# महाभारतम् वनपर्व

## लक्षालङ्कारटीका-पाठान्तरादिसहितम्( क्रिटिकल् एडिशन्)

### भाग 5




**सम्पादकः**

**सि. आर. प्रदीपसिंहाचार्यः चतुर्वेदः**



**प्रकाशनम्**

**वेद-वेदान्ताध्ययनशोधसंस्थानम्**

**वसन्तकुञ्ज, नवदेहली**

विश्वविद्याग्रन्थमाला -17

वेदवेदान्ताध्ययनशोधसंस्थानम्

# श्रीमन्महाभारतम्

**श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-**

**प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्**

# वनपर्व-५

**सम्पादकः**

**सि. आर्. प्रदीपसिंहाचार्यः, चतुर्वेदः**

**उपसम्पादकाः**

देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

**प्रकाशनम्**

**वेद-वेदान्ताध्ययनशोधसंस्थानम्.**
**वसन्तकुञ्ज, नवदेहली.**
**2021**

**विश्वविद्याग्रन्थमाला- 17**

**श्रीमन्महाभारतम्**
**वनपर्व-५**

**श्रीमन्महाभारततात्पर्यनिर्णय-महाभारतलक्षालङ्कारानुसारि-**
**प्राचीनतौळवपाठ-पाठान्तरादिसंवलितम्**

**सम्पादकः** : सि. आर् प्रदीपसिंहाचार्यः, चतुर्वेदः
**उपसम्पादकाः** : देवीप्रसादाचार्यः, आर् विठोबाचार्यः, श्रीनिधि.वि

**प्रकाशनम् :** **वेद-वेदान्ताध्ययनशोधसंस्थानम्.**
**वसन्तकुञ्ज, नवदेहली.**

**© सर्वे अधिकाराः स्वायत्तीकृताः**

**प्रथममुद्रणम् :** **2020**

**पृष्ठसङ्ख्या :** **10 + 520**

**प्रतयः :** **250**

**मूल्यम् :** **300 रूप्यकाणि**

**मुखचित्रविन्यासः:** **कार्तिकः**

**मुद्रणालयः:** **वाणिप्रेस्. मैसूरु**

# Vedic Vedantic Studies & Research Institute

# Śrīmanmahābhāratam

# Vanaparva vol-5

**"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra; including the Ancient Tulu Recension and Variant Readings.**


## Edited by:

**C. R. Pradeepa simha achaya, chaturveda.**

**Sub-editors**

Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.



## Published by:

**Vedic Vedantic Studies & Research Institute**

**(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)**

Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,
vasant Kunj, New Delhi-110070

**2021**

**Vishvavidyagranthamala 17**

# **Śrīmanmahābhāratam - Vanaparva vol-5**

"Following the Mahābhāratatātparyanirṇaya and Lakṣālaṅkāra;
including the Ancient Tulu Recension and Variant Readings.

**Edited by:** **C. R**. vd. **Pradeepa simha achaya, chaturveda.**

**Sub-editors :** **Devīprasādācārya, R. Viṭhobācārya, Śrīnidhi, v.**

**Published by:** **Vedic Vedantic Studies & Research Institute**
(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)
Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,

**Edition:** **2021**

**copies :** **250**

©: **Publishers**

**Price:** **300**

**pages** **10 + 520**

**printed by:** **vanipress.mysore**

# जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

**पेजावरअधोक्षजमठः,उडुपि**

# अनुग्रहसन्देशः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

महाभारतस्य वनपर्वणः अन्तिमभागे विद्यमाना इमा आख्यायिकाः धर्मस्य सूक्ष्मगतिं नीतिं च लोकस्य सूचयन्ति ।

१. द्रौपदी-सत्यभामा-संवादे पतिव्रताधर्मस्य, गृहस्थधर्मस्य च सूक्ष्मं निरूपणम्,

२. घोषयात्रापर्वणि पाण्डवान् पीडयितुं आगतस्य दुर्योधनस्य गन्धर्वैः बन्धनं, तथा धर्मराजेन तस्य रक्षणकरणं , तेन च भातृसौहार्दस्यावश्यकर्तव्यत्वं,

३. सावित्री-उपाख्याने यमराजं जित्वा मृतं पतिं सत्यवन्तं पुनर्जीवितवत्याः महासाध्व्याः सावित्र्याः पावनचरितकथनमुखेन पतिव्रतामाहात्म्यं च वर्णितम्।

एवं आरणेयपर्वणि यक्षप्रश्नप्रसङ्गः। अरणिमृगस्य अन्वेषणार्थं गतानां पाण्डवानां मूर्छा, ततः निगूढयक्षरूपिणः यमधर्मराजस्य आध्यात्मिकप्रश्नानां कृते युधिष्ठिरेण दत्तानि उत्तराणि च अत्र वर्तन्ते। युधिष्ठिरस्य प्रगल्भ-उत्तराणि अद्यतने काले अपि अस्माकं जीवनस्य तत्त्वदीपिकाः सन्ति। अत्रैव यमाद् वरप्राप्तिद्वारा पाण्डवानां क्लेशमयस्य वनवासस्य परिसमाप्तिः भवति, एवम् अज्ञातवासस्य कृते पीठिका च सज्जा भवति।

अस्य ग्रन्थस्य प्रधानसम्पादकः अस्माकं प्रियः विद्वान् श्रीप्रदीपसिंहाचार्यः, तथा तस्य सहयोगिनौ सहसम्पादकौ विद्वांसौ श्रीविठोबाचार्यः, श्रीश्रीनिधि-वि-आचार्यश्च महता परिश्रमेण अस्य ग्रन्थस्य सम्पादनं कृतवन्तौ।

एतेषां विदुषां समष्टिप्रयत्नेन, निष्कामसेवया च प्रकाशितः अयं ग्रन्थः अध्येतॄणां, संशोधकानां, तत्त्वजिज्ञासूनां च महते उपकाराय कल्पताम्। एतादृशानि सत्कार्याणि इतोऽपि अधिकानि प्रवर्धन्ताम्, भगवान् वेदव्यासः, श्रीमन्नारायणः च सर्वेभ्यः सन्मङ्गलं ददातु इति आशास्महे।

इति नारायणस्मृतयः

**श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः**

# निदेशकवचांसि

वेदवेदान्ताध्ययनशोधसंस्थानेन' प्रकाश्यमाने अस्मिन् श्रीमन्महाभारतस्य वनपर्वणः पञ्चमे भागे विद्वज्जनानां, जिज्ञासूनां च स्वागतं व्याहर्तुं वयं भृशं प्रसीदामः। अनेन सम्पुटेन पाण्डवानां द्वादशवर्षीय-वनवासस्य कथा पूर्णतां गच्छति।

अस्मिन् खण्डे द्रौपदीसत्यभामासंवादपर्व'तः आरभ्य आरणेयपर्व (यक्षप्रश्नः) पर्यन्तं विद्यमानाः विषयाः सविस्तरं निरूपिताः सन्ति। अत्र आदौ द्रौपदीसत्यभामयोः संवादेन स्त्रीधर्मस्य सूक्ष्मं निरूपणं कृतम्। ततः घोषयात्रापर्वणि सानुजस्य दुर्योधनस्य गन्धर्वैः बन्धनं, धर्मराजेन तद्रक्षणं च । सावित्र्युपाख्यानमप्यत्रैवान्तर्भवति।

अस्य ग्रन्थस्य सम्पादनकाले अस्माभिः एका विशिष्टा शोधदृष्टिः अनुसृता। पाठनिर्णये श्रीमद्वादिराजतीर्थश्रीचरणैः विरचितायाः 'लक्षालङ्कार-टीकायाः' प्रामाण्यं स्वीकृतम्, येन ग्रन्थस्य गांभीर्यं रक्षितम्। तथा देशस्य विविधग्रन्थागारेभ्यः उपलब्धाः प्राचीन-ताडपत्रमातृकाः (Manuscripts) परिशील्य, तासु दृश्यमानानि 'पाठान्तराणि' (Variant Readings) अत्र 'टिप्पणी-भागे' संयोजितानि सन्ति।

एतादृशे महति क्लिष्टे च शोधकार्ये विद्वान् प्रदीपसिंहाचार्यः तथा सहसम्पादककर्मणि विद्वान् वि.श्रीनिधि.वि. आचार्यः अहोरात्रं परिश्रमं कृतवन्तौ। तेषां शास्त्रनिष्ठा अत्र श्लाघनीया।

अन्ते, येषां अनुग्रहेण, आशीर्वादेन च इदं महत् कार्यं निर्विघ्नेन परिसमाप्तं, तेषाम् अस्माकं कुलगुरूणां, तथा संस्थानस्य मार्गदर्शकानां परमपूज्यश्रीपेजावरणठाधीशानां श्रीश्रीविश्वप्रसन्न-तीर्थश्रीपादानां चरणकमलेषु इदं ग्रन्थकुसुमं भक्त्या समर्प्य, साष्टाङ्गप्रणामान् समर्पयामि।

विद्वान् डा। विठोबाचार्यः<br>निदेशकः,

# सम्पादकीयम्

अयं भागः 'द्रौपदी-सत्यभामासंवादपर्व'तः आरभ्य आरणेयपर्व(यक्षप्रश्न)पर्यन्तं विद्यमानान् चत्वारि उपपर्वाणि क्रोडीकरोति। अत्रैव वनपर्वणः सम्पूर्णा समाप्तिः भवति।

अस्मिन् भागे निरूपिताः प्रधानविषयाः एवं सन्ति:

१. द्रौपदीसत्यभामासंवादपर्व: अत्र पातिव्रत्यधर्मस्य स्त्रीकर्तव्यस्य चातिसूक्ष्मतमं निरूपणम्।

२. घोषयात्रापर्व: अत्र पाण्डवान् पीडयितुं आगतस्य दुर्योधनस्य गन्धर्वैः बन्धनं, तथा धर्मराजेन तस्य रक्षणं कृत्वा दर्शितं सौहार्दम्।

३. पतिव्रतामाहात्म्यनिरूपणपरं सावित्र्युपाख्यानम् ,

४. आरणेयपर्वणि यक्षरूपेण आगतस्य यमधर्मराजस्य गूढप्रश्नानां कृते युधिष्ठिरेण दत्तानि उत्तराणि अद्यतने काले अपि उत्तममार्गदर्शकानि सन्ति। "किं आश्चर्यम्?" इति यक्षस्य प्रश्नः, तस्मै युधिष्ठिरस्य उत्तरं च जगत्प्रसिद्धम्। अनेन प्रसङ्गेन पाण्डवानां द्वादशवर्षीयः वनवासः पूर्णतां गच्छति। अत्रैव वनपर्व च समाप्तं भवति ।

पूर्ववदेव, अस्मिन्नपि भागे लक्षालङ्कार-टीकायाः' अनुरोधेन मूलपाठस्य निर्णयः कृतः अस्ति। तथा च, अनेक-हस्तलेखानां परिशीलनेन 'पाठान्तराणि' अपि संयोजितानि सन्ति।

कृतज्ञतासमर्पणम्:

एतादृशस्य ज्ञानविज्ञानगर्भितस्य ग्रन्थस्य सम्पादनं मम परमं भाग्यम्। अस्य महतो ग्रन्थस्य प्रकाशने मुख्यप्रेरणास्रोतोभूताः, श्रीपेजावरमठाधीश्वराः, परमपूज्यश्रीश्रीविश्वप्रसन्नतीर्थ-श्रीचरणाः। पूज्यपादानां चरणकमलयोः सश्रद्धं साष्टाङ्गप्रणामान् समर्पयामि।

अस्य विशालस्य वनपर्वणः सम्पादनकार्यं मत्कृते महतीं तृप्तिं जनयति। अस्मिन् अन्तिमभागे मत्सहयोगिनः सहसम्पादकाः विद्वांसः श्रीविठोबाचार्यः तथा श्रीश्रीनिधि.वि. आचार्यश्चात्यन्तं श्रद्धया सम्पादनकर्मणि निरताः। तेभ्यो मम कृतज्ञताः। अन्ते, अयं ग्रन्थः महाभारतजिज्ञासूनां, विदुषां, शोधच्छात्राणां च ज्ञानवृद्धये भूयात् इति प्रार्थयन्, इदं ग्रन्थकुसुमं श्रीहरिवायुगुरुणां पादारविन्दयोः समर्पयामि।

विद्वद्वशंवदः

प्रदीपसिंहाचार्यः , चतुर्वेदः

# किञ्चिन्निवेदनम्

'देशे देशे तथा ग्रन्थान् दृष्ट्वा कतिपयान्' इत्यादि श्रीमदाचार्यैः तात्पर्यनिर्णये अभिहितम् । तेन महाभारते नानाविधाः पाठभेदाः सन्तीति अवगम्यते । पूना महानगरगतभण्डार्कर् प्राच्यविद्यासंशोधनालयेन षट्त्रिंशद्वर्षपर्यन्तं महाभारतमूलपाठमधिकृत्य अधीत्य मुद्रितं च तत् क्रिटिकल्एडिषन्मुखेन । तदेव इदानीम् अत्यन्तप्राचीनपाठान्तरसंवलितः महाभारतपाठः इति अनेकेषां विदुषाम् अभिप्रायः । परन्तु, ततोऽपि अधिकप्राचीनतमपाठः उडुपीनगरस्थनानामठीय-ताळपत्रग्रन्थेषु इदानीं समुपलब्ध इति महान् सन्तोषः ।

पञ्चदशाधिकाः महाभारतताळपत्राः इदानीम् अस्मद्धस्तपथं गताः । तत्पर्यालोचनया मूलपाठनिर्धारणे वयं प्रभवाः स्मः । ताळपत्रगतपाठाः वाविळ्ळप्रेस्द्वारा मुद्रितमहाभारतपाठस्य अत्यन्तसंवादि । यत्र विसंवादस्तत्रापि तात्पर्यनिर्णयानुरोधि पाठ एवात्रादृतः । तदेवं अस्मिन् शुद्धपाठसमीक्षासमये अस्माभिः मूलश्लोकतया पलिमारुमठीयताळपत्रगतपाठः आदृतः । श्लोकसङ्ख्याविषये प्रायः वावीळ्ळक्रम आदृतः । क्वचित् मूलश्लोकाः वावीळ्ळपाठे अदृश्यमाना अपि ताळपत्रे, टि.आर् पाठे, बोरि पाठेपि विद्यमानाः अर्थ-तात्पर्यानुरोधात् अस्मिन् संस्करणे आदृताः ।

एतत्संस्करणाध्ययने अस्माभिरादृतः अध्येतृभिरवश्यं वेदितव्यः विना यद्बदेनेनात्रादृतक्रमानधिगमस्तदत्रैवं निरूप्यते ।

*. क्रिटिकल् एडिषन् मध्ये तालपत्रेषु वाविळ्ळे वा अविद्यमानाः श्लोकाः 'अधिकः/ अथवा ins' इति निर्दिष्टः । तद्यथा -

एतदिच्छाम्यहं श्रोतुं वदतो द्विजसत्तम ।
आनुपूर्व्येण ये चान्ये राजानो वंशधारिणः ।।

(२) व्यासतो for वदतो (क); विस्तरेण द्विजोत्तम (ग); द्विजोत्तमः; तपोधन;

after line 1 ins (६९६) वर्णसङ्करजो धर्मः कथं तं नास्पृशत्तदा ।
जरासश्चारणं चापि अन्यदेहेषु नः श्रुतम् ।। (अधिकः घपाठे)

* बोरि क्रिटिकल् पुस्तके appendix निर्दिष्टाः केचनश्लोकाः appendix इत्येव श्लोकाधस्तनभागे निर्दिष्टाः ।

*. क्वचितु soubstitute इति पाठान्तर एव निर्दिष्टाः ।

*. श्लोकसङ्ख्याविषये अयं क्रमः अदृतः । प्रारम्भगतसङ्ख्या आपर्वम् अनुवर्तते । अध्यायान्ते आहत-अध्याय-श्लोकसङ्ख्या निर्दिष्टा यथा 'अस्मिन्नध्याये श्लोकाः सन्ति' इत्येवम् ।

*. भागवतमहाभारतयोः ताळपत्रेषु अयमपि एकः पाठभेदः दरीदृश्यते । भागवतपाठेषु शुक उवाच; परीक्षिदुवाच; राजोवाच इत्यादि पठ्यते क्वचित् । क्वचित् श्रीशुकः इत्येव । महाभारते तु सर्वत्र उवाच इति नैव पठ्यते । कुम्भकोणमुद्रितपुस्तके एवं बोरि पुस्तकेपि उवाचशब्दः पठ्यते । अयं नास्माभिरादृतः । केवलं जनमेजयः; भीमसेनः इत्याद्येव ।

* बोरिपुस्तके मध्ये मध्ये अध्यायाः यत्र परिसमाप्यन्ते तत्र वाविळ्ळपुस्तके अध्यायः नैव समाप्यते । एवं टि. आर् कृष्णाचार्यपाठेपि । अत्र प्राचीनतौळवपाठ एव आदृतः । यत्र द्वयोरध्यायोः एकीभावः तत्र बोरिपुस्तकपत्रसङ्ख्या क्वचिद्दत्ता; क्वचिन्नैव ।

*. line interpretation; आनुपूर्वीव्यत्यासः' यत्र दृश्यते तदपि सूचितः । तत्र निर्देशक्रमः एकरूपतया नैव निर्दिष्टः ।

*. पर्वारम्भे महाभारततात्पर्यनिर्णयगताः तत्पर्वकथासङ्ग्रहश्लोकाः उपनिबद्धाः ।

*. महाभारतकथाविषयानुक्रमणिकापि श्लोकानुसारेण प्रत्यध्यायं विस्तरतो निवेशिता

१*.यद्यपि महाभारतलक्षालङ्कारः एम्. एस्. पि द्वारा मुद्रितः । अत्र विद्यमानाध्याय-श्लोकसङ्ख्यादि न वावीळ्ळ-टि.आर् पाठानुसारी इति केवलं विषयमात्रमत्र निवेशितम् । अध्यायसङ्ख्यादि तौळवपाठानुसार्येवेति चावगन्तव्यम् ।।

*.लक्षालङ्कारे व्याख्याताः श्लोकाः क्वचित् वावीळ्ळपुस्तके नोपलभ्यन्ते । टि.आर् कृष्णाचार्यपाठे उपलभ्यन्त इति तेपि मूलश्लोकतया क्वचिद् ग्राह्या भवन्तीत्यस्माकमाशयः । महन्तः प्रष्टव्याः

*. मूलश्लोकाः बृहदक्षरै राराज्यन्ते । अधिकश्लोकाः अल्पाक्षरैः मूलश्लोकमध्य एव अर्थानुगुणाः विषयविशेषगर्भिताः मूलश्लोकानां पूर्वं पश्चाद्वा, पूर्वार्ध-उत्तरार्धमध्ये वा अनङ्कितसङ्ख्याः निवेशिताः । एतेषां महाभारतान्तर्गतत्वं वा अनन्तर्गतत्वं वा न निश्चेतुं प्रभवामः ।।

*.तत्र पाठान्तरदानसमये पूना(बोरि)पाठान्तराणि अपि निर्दिष्टानि । तद्यथा-

एवं पाठान्तरदानसमये आदृताः अपरेपि विशेषाः एवं निर्दिष्टाः –

सर्वमूलग्रन्थटीका-टिप्पणीषु महाभारतपाठः

* श्रीमन्मध्वाचार्यैः तत्र तत्र महाभारतवचनानि 'भारते, मोक्षधर्मपर्वणि' इत्यादिरूपेण नामनिर्देशमात्रेणसूचितानि।तानिकेचनउपलभ्यन्ते,नोपलब्धानिबहूनिइत्यनेकेषांप्रवादः। अस्माभिः अस्मिन् संस्करणे श्रीमदाचार्योदाहृतवचननां आकरमपि पर्व-अध्याय-श्लोकसङ्ख्या-निर्देशपूर्वकमाकरः प्रादर्शि । यथा -गीताभाष्ये 'अनन्तग अनन्त' इत्येवोदाहृतम् । अस्माभिः अस्य शान्तिपर्वान्तर्गतत्वं संशोध्य '(सर्वमूलो-) गीताभाष्योदाहृत-महाभारतवचनानि 'इति सङ्गृह्य पर्वारम्भे स्थलनिर्देशपूर्वकं १२-१३१-५ इत्येवं निर्दिश्यते ।।

* सर्वमूलेषु- महाभारतवचनतया अनुदाहृतान्यपि प्रमणवचनानि 'इतिच' इत्येवं रूपेण निबद्धानि । यथा गीताभाष्ये 'पृथिवी धर्ममूर्धनि' इति च ' इति। एतादृशानि वाक्यान्यपि अस्मदीयमहाभारतसंशोधनावसरे संशोध्य आकरप्रदर्शनपूर्वकं निर्दिष्टानि ।

* किञ्च महाभारतवाक्यानि टिप्पणीषु तत्र तत्र प्रासङ्गिकतया उदाहृतानि ।

एवं भागवतयादुपत्ये -शर्यातिकथाप्रसङ्गे आदिपर्ववचनमुदाहृतम् - 'यथोक्तमादिपर्वणि- जिगीषया ततो देवा वव्रिरे.. इत्यारभ्य 'दुहिता वृषपर्वणः ' इत्यन्तः ८० श्लोकाः ।

भरतराट्कथाप्रसङ्गेपि - आदिपर्ववचनम् -'तां विशोध्य तदा राजा देवदूतेन भारत... इत्यारभ्य 'मया शुभे' इत्यन्तो भागः ।

विश्वामित्रप्रसङ्गे गदापर्ववचनमुदाहृतम् -'सतु वव्रे वरं राजन् ब्राह्मणः स्यामहं त्विति । तथेति चावदद् ब्रह्मा सर्वलोकपितामहः इति गदापर्वणि' इति ।।

एवं उद्योगपर्ववचनम् -'प्रतिगृह्यय ततो धर्मः... विश्वामित्रस्तथाभवत् ।

एवं शान्तिपर्ववचनम् -च्यवनाद्वरदानेन रुचिकस्य ... ब्राह्मण्यं समवाप्तवान् ।।'

एतादृशग्रन्थसम्पादनकाले सहकृतवद्भ्यः समेभ्यः विद्वद्भ्यः धन्न्यवादः ।।

सम्पादकमण्डली

# द्रौपदीसत्यभामासंवादपर्व

## 03- 04 - 189Adhyaya

महाभारततत्तात्पर्यनिर्णये २२ अध्याये

ततोऽमितौजा भगवानुपागमन्नारायणः सत्यभामासहायः ।

सम्पूजितः पाण्डवैस्तैः समेतश्चक्रेऽथ सौहार्दनिमित्तसत्कथाः ।। ३५८ ।।

कृष्णा च सत्या च परस्परं मुदा सम्भाषणं चक्रतुर्योषिदग्र्ये ।

परीक्षयन्त्या सत्यया सर्ववेत्त्र्या निर्दोषया चोदिता प्राह कृष्णा ।। ३५९ ।।

स्त्रीधर्मानखिलांस्तत्र सत्यां निर्दोषसंविदम् ।

ज्ञात्वाऽपि कृष्णा प्रोवाच लोकशिक्षार्थमेव तु ।। ३६० ।।

क्रीडार्थमेव वचनं ज्ञात्वा सत्यासमीरितम् ।

तस्यानुसारिवाक्यानि तत्प्रीत्या एव साऽब्रवीत् ।। ३६१ ।।

## १८९. एकोननवत्यधिकशततमः अध्यायः

सत्यभामया पतिवशीकरणोपायं पृष्टया द्रौपद्या तदुत्तरत्वेन सत्यभामां प्रति साध्वीस्त्रीणां कर्तव्यस्योपदेशः, पतिव्रताधर्मकथनम् ।।

**वैशम्पायनः**

उपासीनेषु विप्रेषु पाण्डवेषु महात्मसु ।
द्रौपदी सत्यभामा च विविशाते तदा समम् ।। १ ।।

This Stanga in Interchanged in TRK after 1,(01)

(०१) (तान्विप्रान् सर्वेषु (for विप्रेषु ) (२) च भारत (for महा ) (४)विवेशाते तदा ( मा श्रमं (for तदा समम् ),

प्रविश्य चाश्रमं पुण्यमुभे ते परमस्त्रियौ
जाहस्यमाने सुप्रीते सुखं तत्र निषीदतुः ।। २ ।। (०१)

चिरस्य दृष्ट्वा राजेन्द्र तेऽन्योन्यस्य प्रियंवदे।
कथयामासतुश्चित्राः कथाः कुरुयदूत्थिताः ।। ३ ।।

अथाब्रवीत्सत्यभामा कृष्णस्य महिषी प्रिया।
सात्राजिती याज्ञसेनीं रहसीदं सुमध्यमा ।। ४ ।।

**सत्यभामा-**

केन द्रौपदि वृत्तेन पाण्डवानधितिष्ठसि।
लोकपालोपमान्वीरान्पुनः परमसंहतान्। ।। ५ ।।
कथं च वशगास्तुभ्यं न कुप्यन्ति च ते शुभे।
तव वश्या हि सततं पाण्डवाः प्रियदर्शने ।। ६ ।।

न चान्योन्यमसूयं ते कथं वा ते सुमध्यमे।
मुखप्रेक्षाश्च ते सर्वे तत्त्वमेतद्ब्रवीहि मे ।। ७ ।।

व्रतचर्या तपो वापि स्नानमन्त्रौषधानि वा।
विद्यावीर्यं मूलवीर्यं जपहोमागदास्तथा ।। ८ ।।

ममाद्याचक्ष्व पाञ्चालि यशस्यं भगदैवतम् ।
येन कृष्णे भवेन्नित्यं मम कृष्णो वशानुगः ।।

**वैशम्पायनः**

एवमुक्त्वा सत्यभामा विरराम यशस्विनी ।। ९ ।।

प्रतिव्रता महाभागा द्रौपदी प्रत्युवाच ताम् ।। १० ।।

**द्रौपदी**

---

(०१) (प्रहस्यमाने सहयुक्ते पूः हसमानेथ ते भासमाने भासमाने तु निषेदतुः षीदतां.

अतस्त्रीणां समाचारं सत्ये मामनुपृच्छसि।
असदाचरिते मार्गे कथं स्यादनुकीर्तनम् ।। ११ ।।

अनुप्रश्नः संशयो वा नैतत्त्वय्युपपद्यते।
तथा ह्युपेता बुद्ध्या त्वं कृष्णस्य महिषी प्रिया ।। १२ ।।

यदैव भर्ता जानीयान्मन्त्रमूलपरां स्त्रियम्।
उद्विजेत तदैवास्याः सर्पाद्वेश्मगतादिव ।। १३ ।।

उद्विग्नस्य कुतः शान्तिरशान्तस्य कुतः सुखम्।
न जातु वशगो भर्ता स्त्रियाः स्यान्मन्त्रकर्मणा ।। १४ ।।

अमित्रविहिताश्चापि नार्यस्तत्र सुदारुणाः
.मूलप्रचारैर्हि विषं प्रयच्छन्ति जिघांसवः ।। १५ ।।

जिह्वया यानि पुरुषस्त्वचा वाप्युपसेवते।
तत्र चूर्णानि दत्तानि हन्युः क्षिप्रमसंशयम् ।। १६ ।। (०१)

जलोदरसमायुक्ताः श्वित्रिणः परितास्तथा।
अपुम्भिः सत्कृता स्त्रीभिः जडान्धबधिरास्तथा ।। १७ ।।(०२)

लक्षालङ्कारः - अपुम्भिः सत्कृता इत्यत्र अपुम्भिः क्लीबैः सत्कृताः समानतया कृताः ।

पापानुगास्तु पापास्ताः पतीनुपसृजन्त्युत।
न जातु विप्रियं भर्तुः स्त्रिया कार्यं कथञ्चन ।। १८ ।। (०३)

---

(०१) (अ) श्नाति (for यानि ), ) (२)अ पि च (अ) प्युप ) . ) (३) यत्र ; तानि ; ततशू हन्युशू (for तत्र), मूलानि (for चूर्णानि ), चाहन्युः (for दत्तानि ), क्षिप्रं हन्युर् असंशयः क्षिप्रमेव न संशयं .
(०२) (१) (बकों ; वृकों; महों (for जलों), युक्तं (for युक्ताः ), (२) चित्रिण (for श्वि ),.
(०३) (१) (नुगास्ताः ; नुशास्ताः ; नुशिष्टाः; नुरागाः ; नुषङ्गाः ;नुशप्ताः; ’नुशस्ताः (for ’नुगास्तु ), पापिष्ठाः; पापस्थाः. बाधासुशास्ताः पाशास्ताः पापानुशासिनः ( ’सिताः ’सनाः) पापाः), (२) पत्यूरपं (for पतीनुप ) .चरन्ति (for सृजन्ति), ताः च (for (उ)त ), भर्तुः कार्यं. कर्तुः (for भर्तु),कदां (for कथं ),

वर्ताम्यहं तु यां वृत्तिं पाण्डवेषु महात्मसु।
**तां सर्वां शृणु मे सत्यां सत्यभामे यशस्विनि ॥ १९ ॥**[०१]

अहङ्कारं विहायाहं कामक्रोधौ च सर्वदा।
**सदारान्पाण्डवान्नित्यं प्रयतोपचराम्यहम् ॥ २० ॥**[०२]

प्रणयं प्रतिसंहृत्य निधायात्मानमात्मनि।
**शुश्रूषुर्निरहङ्कारा(माना) पतीनां चित्तरक्षिणी ॥ २१ ॥**[०३]

दुर्व्याहृताच्छङ्कमाना दुःस्थितादुरवेक्षितात्।
**दुरासितादुर्व्रजितादिङ्गिताध्यासितादपि ॥ २२ ॥**[०४]

सूर्यवैश्वानरसमान् सोमकल्पान् महारथान्।
**सेवे शत्रु(चक्षु)र्हणः पार्थानुग्रवीर्यप्रतापिनः ॥ २३ ॥**[०५]

लक्षालङ्कारः - इङ्गिताध्यायितादपि इत्यत्र सेवे इत्युत्तरेणान्वयः ।

देवो मनुष्यो गन्धर्वो युवा चापि स्वलङ्कृतः।
**द्रव्यवानभिरूपो वा न मेऽन्यः पुरुषो मतः ॥ २४ ॥**[०६]

---

(०१) वर्तास्म्यहं ; कर्तास्म्यहं. वृत्तं; प्रीतिं (for वृत्ति ), अहं तु वर्ते यां वृत्तिं- ' ) (३)तां सत्यां ; सर्वां तां सत्ये ; सत्यं ; वृत्ति (for सत्यां), सर्वां श्रृणु हि मे. सत्यां.

(०२) (अ) थ (for ( अ) हं), (२)कामं क्रोधं (for कामक्रोधौ) .सर्वशः (for दा), (३) सादरा (for सदारान्), पार्थिवान् (for पाण्डवान्),) (४) प्रयतयों (for प्रयतों),

(०३)(भर्तारं (for प्रणयं), प्रतिसंहृत्य; संस्कत्य ; सङ्गाह्य, (२)।आत्मना (for आत्मनि ) , (३) निरहंमाना; निरभिमाना, (४) यतन्ती (for पतीनां), चाति (for चित्त ), रक्षाणी ; चारिणी; रक्षणे .

(०४) (१)(हृत्या (for हृतात्), शङ्कमानात्; चकमाच्च (for शङ्कमाना) (२) उत्थिता (for दुःस्थिताद्), दुरवेक्ष्य तान्; त्वनवेक्षितान् ; दुरवेक्षिताः तदनुष्ठितात् ; दुरवस्थितात् , (३)दुरासक्ताद् ; शिक्ताद् ; सीनाद्; सदाद् (for सिताद् ), दुर्व्यजिताद्; दुर्विनीताद्; दुर्विदग्धाद्; (दुर्व्रजिनाद्) (४) ध्यायितादपि.

(०५) समान् (for निभान् ), सर्वे; लोक ;सा वै (for सेवे), दुर्याहणान्; शत्रुहणान्; मित्रगुणान्; चक्षुर्हणानु.पादान् नाथान् (for पार्थान्) . 'वीर्य' (for तेजः),.

(०६) (न यक्षो (for मनुष्यो) (२) वायुः (for युवा), वापि (for चापि), (३)अति अपि (for अभि) द्रव्यवान्वा रूपवान्वा, (४) षोत्तमः (for षो मतः),

न भुक्तवति न स्नाते नासंविष्टे च भर्तरि।
न सम्विशामि नाश्नामि सदा कर्म कुर्वती ।। २५ ।। (०१)

लक्षालङ्कारः - न स्नाये कर्म कुर्वती इत्यत्र न स्नाये अभ्याज्य स्नानंन करोम् ।

क्षेत्राद्वनाद्वा ग्रामाद्वा भर्तारं गृहमागतम्।
अभ्युत्थायाभिनन्दामि आसनेनोदकेन च ।। २६ ।।(०२)

प्रमृष्टभाण्डा मृष्टान्ना काले भोजनदायिनी।
संयता गुप्तधान्या च सुसम्मृष्टनिवेशना ।। २७ ।। (०३)

अतिरस्कृतसम्भाषा दुःस्त्रियो नानुसेवती।
अनुकूलवती नित्यं भवाम्यनलसा सदा ।। २८ ।।(०४)

अनर्मे चापि हसितं द्वारि स्थानमभीक्ष्णशः
अवस्करे चिरं स्थानं निष्कुटेषु विसर्जये ।। २९ ।।(०५)

लक्षालङ्कारः - द्वारी स्थानमभीक्ष्णश इत्यत्र अभीक्ष्णशः क्षणे क्षणे द्वारि स्थान् विरज्रये । अवस्करे ‘ मूत्रं प्रस्राव उच्चारावस्करौ शमलं शकृत्’ इत्यभिधानात् मलनिर्मोचनसमये, ‘निष्टुटः कोटरं वा ना वल्लरी मञ्जरी स्त्रियाम्’ इत्यभिधानात् निष्कुटेषु निम्नस्थलेषु बहुकालं स्थानं अवस्थानं विसर्जये ।

निरताहं सदा सत्ये पापामां च विसर्जने ।*

अत्यालापमसन्तोषं परव्यापारसङ्कथा।

---

(०१)(न (ना) भुक्तवति न (स) स्नाते, (२) न संविष्टे न (for च), (३)संविशामि न चाश्नामि, (४) दास (for सदा), न स्नाये कर्म कुर्वती.

(०२)(२)गृहं भर्तारमू (३) अभ्यु (for प्रत्यु) वन्दामि (for नन्दामि),

(०३)(अमृष्टभाण्डा; आमृष्टं ; प्रामुज्यं; प्रसन्ना, (३) मिष्टान्ना; मुष्टान्ना, (४) आसनेनोदकेन च .

(०४)(सम्भारा (for सम्भाषा ), (२) दुस्त्रीणां. नानुसेविनी. दुःस्त्रीसेवन चर्जिता, (४)तदा (for सदा),

(०५)( अस्थाने; अधर्मे; अनर्म; अनर्मा; अनम्र; अनर्हे . वापि; नां (for चां), सहितं; हसितं; हसती, (२) द्वार (for द्वारि ) , (३) चिरं ; पि च (for चिर ), (४)च वर्जयेत. निष्कुटे च वि (चापि) वर्जये ; निष्कुटे च विसर्जये.

अतिहासातिरोषौ च क्रोधनं च विसर्जये ।। ३० ।।

लक्षालङ्कारः - क्रोधनं च विरर्जय इत्यत्र क्रोधनं परस्य क्रोधोत्पादनम् ।

निरताहं सदा सत्ये भर्तणामुपसेवने।
सर्वथा भर्तृरहितं न ममेष्टं कथञ्चन ।। ३१ ।।(०१)

यदा प्रवसते भर्ता कुटुम्बार्थेन केनचित्।
सुमनोवर्णकायेता भवामि व्रतचारिणी ।। ३२ ।।(०२)

लक्षालङ्कारः - सुमलोवर्जकायेता इत्यत्र सुमनांसि पुष्पाणि तेषां वर्जो वर्जनं यस्मिन् स तथोक्तः कायः तेन इता ।

यच्च भर्ता न पिबति यच्च भर्ता न सेवते।
यच्च नाश्नाति मे भर्ता सर्वं तद्वर्जयाम्यहम् ।। ३३ ।।(०३)

यथोपदेशं नियता वर्तमाना वराङ्गने।
स्वलङ्कृता..नुप्रयता भर्तुः प्रियहिते रता ।। ३४ ।।(०४)

लक्षालङ्कारः -क स्वलङ्कृता..नु प्रयता इत्यभ अनु भर्तारमनुसृत्य स्वभर्तरि अलङ्कृते सति स्वलङ्कृता भखवामीत्यर्थः ।

ये च धर्माः कुटुम्बेषु श्वश्वा मे कथिताः पुरा।
भिक्षाबलिश्राद्धमिति स्थालीपाकाश्च पर्वसु ।। ३५ ।।

मान्यानां मानसत्कारा ये चान्ये विदिता मम ।। ३६ ।।(०५)

---

(०१)(रोषा; रात्रौ; रोषं, (२) मानौ; स्थानौ (for स्थानं) च (वि) वर्जयेत्; विवर्जये. क्रोधनस्थानवर्जये, (३)प्रणयं निरताहं सा (४)पापनां च विव र्जने, (३)सर्वदा. भर्तुरहितं. मामिष्टं न (for न ममेष्टं ) कदां (for कथं ),

(०२)(यथा (for यदा ), येनाप्रयतते भर्ता, (३)वर्णकोपेता, (४)तदा च; वसामि (for भवामि ), व्रतधारिणी.

(०३) (२)सेवते (for खादति) ), (३) भर्ता मे यच्च भर्ता न चाश्नाति, (४)तत्सर्वं.

(०४) (यथोपजोषं; पदेश; यथा प्रदेश; निरता, (२) वरानने, (३)ख-सुप्रयता, अलङ्कृता. स्ववहिता.

(०५) (१) य श्च ( यथा) धर्मः गुरुहिते कुटुम्बार्थे, (२) कथितः (तं) पुरा .

अनुतिष्ठामि तं सत्ये नित्यकालमतन्द्रिता ।। (०१)

तान्सर्वाननुवर्तेऽहं दिवारात्रमतन्द्रिता।
विनयान्नियमांश्चैव सदा सर्वात्मना शि ।। ३७ ।।(०२)
अनुतिष्ठामि तत्सर्वं नित्यकालमतन्द्रिता।

मृदून्सतः सत्यशीलान्सत्यधर्मानुपालिनः।
आशीविषानिव क्रुद्धान्पतीन्परिचराम्यहम् ।। ३८ ।।(०३)

पत्याश्रयो हि मे धर्मो मतः स्त्रीणां सनातनः।
स देवः सा गतिर्नान्या तस्य का विप्रियं चरेत् ।। ३९ ।।(०४)

लक्षालङ्कारः - स देवः स गतिः इत्यभख गतिः सम्पत्तिः । तस्य पत्युः ।

अहं पतीन्नातिशये नात्यश्ने नातिभूषये।
नापि श्वश्रूं परिवदे सर्वदा परियन्त्रिता ।। ४० ।।(०५)

अवधानेन सुभगे नित्योत्थिततयैव च ।
भर्तारो वशगा मह्यं गुरुशुश्रूषयैव च ।। ४१ ।। (०६)

---

(०१) (३)भिक्षा बलिः; भिक्षां बलिं ; भिक्षाबली. श्राद्धविधिः
(४)स्थालीपाकश्च; पाकं च. सर्वशः (for पर्वसु) ), मम (for मया ),
(०२) (१) सर्वांस्तान् उपवर्तामि ; अनुवर्तेहं, (२) अनिन्दिते (for अतन्द्रिता ),
(३)चैव (for चापि), विनयाचारसंयुक्ता , (४) सर्वानुपा (for सर्वात्मना ), सर्वात्मना सदा .
(०३) (२)सर्व (for सत्य), पातिनः; यायिनः वर्तिनः (for पालिनः),
(३) ख-स गतिर्नार्यास्तस्य का विप्रि, (४)भर्तृन् ; भीता (for पतीन्),
(०४) (१) धर्मो मे यो धर्मो , (३) सदेव (for स देवः),स (for सा), नान्यासू; नार्यास् (for नान्या ) ,
(४) तस्याः ह्यप्रिय ; न प्रियं (for विप्रियं),
(०५) (२) भूषणे; दूषये; भक्षये (for भूषये) .नात्यश्नीयां न भूषये; नात्यश्नामि न भू ,
(३) ( अ) ति; वा (for (अ) पि) .पर्यवदे (चरे ;वदेत् ), श्वश्रूं परिवदे
(४) तयाहं ; सदाहं; जात्वहं (for सर्वदा), पति (for परि),
(०६)(अवदानेन; अवमा; अभ्युत्था (for अवधा), (२) त्थानतथैव ; स्थित तयैव; त्थानावगामि; त्थाना भवामि; त्थानानिवामि ; त्थानेन चैव. ह (for च) (३) भर्तृणां वशमागम्य ), (४)शुश्रूषयैव च.

नित्यमार्यामहं कुन्तीं वीरसूं सत्यवादिनीम्।
स्वयं परिचराम्येतां पानाच्छादनभोजनैः ॥ ४२ ॥ [०१]

नैतामतिशये या(जा)तु वस्त्रभूषणभोजनैः।
नापि परिवदे चाहं तां पृथां पृथिवीसमाम् ॥ ४३ ॥ [०२]

अष्टावग्रे ब्राह्मणानां सहस्राणि स्म नित्यदा।
भुञ्जते रुक्मपात्रीषु युधिष्ठिरनिवेशने ॥ ४४ ॥ [०३]

अष्टाशीतिसहस्राणि स्नातका गृहमेधिनः।
त्रिशंद्दासीक एकैको यान्बिभर्ति युधिष्ठिरः ॥ ४५ ॥ [०४]

दशान्यानि सहस्राणि येषामन्नं सुसंस्कृतम्।
ह्रियते रुक्मपात्रीभिर्यतीनामूर्ध्वरेतसाम् ॥ ४६ ॥ [०५]

तान् सर्वानग्रहारेण ब्राह्मणान् वेदवादिनः।
यथार्हं पूजयामि स्म पानाच्छादनभोजनैः ॥ ४७ ॥ [०६]

लक्षालङ्कारः - तान् सर्वानग्रहारेण इत्यभ अग्रहारेण श्रेण्याकारगृहसमुदायेन ।

शतं दासीसहस्राणि कौन्तेयस्य महात्मनः।

---

(०१) (३) (ए)तां (for (ए) का ), (४) पानां (for स्नाना),

(०२) (१) (नैनाम् ;न चापि (for नैताम्), (२) वस्त्रभूषणसेवनैः; भोजनभूषणैः; वस्त्राभरणभोजनैः. नाति; नाहं (for नापि),पर्यवदे वादं; वाचं; वाहं(for चाहं), न चाप्यतिवदे वाचा, (४) पृथां च तां पृथां च; तां पृथ्वीं.

(०३) (१)अष्टाशीति; अष्टादश (for अष्टावग्रे), सहस्राणि (for ब्राह्म), ब्राह्म सहं. तु; च for स्म), (३) पात्रेषु; पात्रीभिर् . याज्ञिका गृहमेधिनः.

(०४) (२)ब्राह्मणा; याज्ञिका (for स्नातका ), (३) द्वासीकमेकैकं; द्वासीक एकैकं.

(०५) (२)एषा ; तेषा (for येषा), सुसत्कृतं, (३) क्रियते; भुञ्जते; दीयते. रुक्मपात्रीषु ; पात्रेषु.

(०६) (३)बेदं (for ब्रह्म), पूजयामः स्म तान्; पूजयामास, (४)स्नाना ; याना धना.

कञ्चुकेयूरधारिण्यो निष्ककण्ठ्य स्वलङ्कृताः ।। ४८ ।। (०१)

लक्षालङ्कारः - कञ्चुकेयूरहारिण्य इत्यत्र कञ्चुः कञ्चुकः ।

महार्हमाल्याभरणाः सुवर्णाश्चन्दनोक्षिताः।
मणीन्हेम च बिभ्रत्यो नृत्यगीतविशारदाः ।। ४९ ।। (०२)

तासां नाम च रूपं च भोजनाच्छादनानि च ।
सर्वासामेव वेदाहं कर्म चैव कृताकृतम् ।। ५० ।। (०३)

शतं दासीसहस्राणि कुन्तीपुत्रस्य धीमतः।
पात्रीहस्ता दिवारात्रमतिथीन्भोजयन्त्युत ।। ५१ ।। (०४)

शतमश्वसहस्राणि दशनागायुतानि च ।
युधिष्ठिरस्यानुयात्रं इन्द्रप्रस्थनिवासिनः ।। ५२ ।। (०५)

लक्षालङ्कारः - शतमश्वसहस्राणि दशा इत्यत्र शतम् अश्वसहस्राणि, दशा सहस्राणि चेत्यर्थः। नागायुतानि दशा चेति वा ।

एतदासीत् तदा राज्ञो यन्महीं पर्यपालयत्।
येषां सङ्ख्याविधिं चैव प्रदिशामि शृणोमि च ।। ५३ ।। (०६)

लक्षालङ्कारः -क प्रदशामि शृणोमि च इत्यभ प्रदिशामि वेतनां प्रतिशामि, तदीयं वाक्यं

---

(०१)(दास्यः दश (for दासी) । सहस्राणां. अष्टाशीतिसहस्राणि.

(०२)(२)सुवस्त्रा ;सुवक्त्रा (for सुवर्णा), (३) मणिर्हेम; मणिहेम. विश्रान्ता; बिभ्रन्त्यो. गीतनृत्य नृत्त नित्य गीत .

(०३) (नामानि (for नाम च), रूपाणि (for रूपं च), (२) भोजनाच्छादनं तथा , (३) सर्वमेव च; तासामेव च (for सर्वा ), (४) चापि (for चैव),

(०४)(शत (for शतं), दाससहस्राणां; दासीसहस्राणां ; दाससहस्राणि , (२) कौन्तेयस्य महात्मन (३) पात्र पत्र. दिवारात्रिम्, (४) पूज (for भोज),

(०५) (२)नागशतानि, (३) ययुर् (for यात्रम्),

(०६) (२)यदोर्वी (for यन्महीं), परिपालयत् , (३) तेषां ; एषां. सङ्ख्यां (for सख्यां), विधा; भृतिं (for विधिं) .विधायैवं (for विधिं चैव ), (४)वि च जानती (for शृणोमि च),

श्रृणोमि च ।

अन्तःपुराणां सर्वेषां भृत्यानां चैव सर्वशः।
आगोपालाविपालेभ्यः सर्वं वेद कृताकृतम् ।। ५४ ।।(०१)

सर्वं राज्ञः समुदयमायं च व्ययमेव च ।
एकाहं वेद्मि कल्याणि पाण्डवानां यशस्विनि ।। ५५ ।।(०२)

मयि सर्वं समासज्य कुटुम्बं भरतर्षभाः।
उपासनरताः सर्वे घटयन्ति वरानने ।। ५६ ।।(०३)

तमहं भारमासक्तमनाधृष्यं दुरात्मभिः।
सुखं सर्वं परित्यज्य रात्र्यहानि घटामि वै ।। ५७ ।।(०४)

लक्षालङ्कारः - रात्र्यहानि घटामि वै इत्यत्र घटामि घटयामि ।

अधृष्यं वरुणस्येव निधिपूर्णमिवोदधिम्।
एकाहं वेद्मि कोशं वै पतीनां धर्मचारिणाम् ।। ५८ ।।(०५)

अनिशायां निशायां च सहा या क्षुत्पिपासयोः ।
आराधयन्त्याः कौरव्यांस्तुल्या रात्रिरहश्च मे ।। ५९ ।।(०६)

---

(०१) भृत्यानां सर्वेषां (४) जाने (for वेद ) .

(०२) (समुत्थायम्; समुदये (३)एकाहे कल्याणं , (४)यशस्विनि ;नीं; नी.

(०३)(साद्य (for सज्य), किं सर्वं स ममासाद्य, (२)परमर्षभाः ;कृष्णवल्लभे (for भरत) (३)उपासने सना ( सन), पराः (for रताः) , (४)घटन्ति स्म ; घटयन्ति घटन्तेर्थान् ; दयां यान्ति यदा यान्ति. वरानने ;यथार्थता.

(०४)(भरम् (क्यभारम्), अनिशम् (for आसक्तम्), (२)कृष्य ;दृष्टं (क्यधृष्यं ), महा (क्य दुरा) , (३)सर्वं सुखं (४)वदामि ; वहामि. च(for वै),

(०५)(अदृश्यं (for अधृष्यं), धनदस्येव; निधन (२) निधिं (क्य निधि), पूर्वं (क्य पूर्णम्) . महो (क्यइवो), (३) वेद (for वेद्मि), कोषं (क्य कोशं) , (४)धर्मचारिणी.

(०६)(अनिद्रया ;द्राया (for शायां) (२) सहाया; सहायात्; संहत्या ; सहायां ; विहाय. क्षुत्पिपासया, (३) आराधयन्त्या . कल्याण्या ; कल्याण्यां कल्याणां कौन्तेयान् (क्यकौरव्यान्), (४) तुल्यं (क्य तुल्या),

प्रथमं प्रतिबुध्यामि चरमं संविशामि च ।
नित्यकालमहं सत्ये एतत्संवननं मम ।। ६० ।।(०१)

एतज्जानाम्यहं कर्तुं भर्तृसंवननं मम।
असत्स्त्रीणां समाचारं नाहं कुर्यां न कामये ।। ६१ ।।(०२)

लक्षालङ्कारः - एतत्संवननं मम इत्यत्र ' वन सम्भक्तौ' इति धातोः संवननं भर्तृणां पूजा ।

**वैशम्पायनः-**

तच्छ्रुत्वा धर्मसहितं व्याहृतं कृष्णया तदा।
उवाच सत्या सत्कृत्य पाञ्चालीं धर्मचारिणीम् ।। ६२ ।।(०३)

**सत्यभामा-**

अभिपन्नास्मि पाञ्चालि याज्ञसेनि क्षमस्व मे।
कामकारः सखीनां हि सोपहासं प्रभाषितम् ।। ६३ ।।(०४)

लक्षालङ्कारः - अभिपन्ना..स्मि इत्यत्र अभिपन्ना ज्ञातवती । सखीनां सोपहासं भाषितं कामकारं इच्छानुसारेण करणं घटते ।

**अस्मिन् पर्वणि १८९अध्याये ६३३लोकाः सन्ति**

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि

द्रौपदीसत्यभामासंवादपर्वणि

---

(०१)(परिं (for प्रति), पतिधर्मं प्रबुध्यामि, (३) कार्यम् (for कालम्), मन्ये (for सत्ये), नित्यं त्य कालं परिचरे, (४)चैतत्; एतं; ह्यतत. संवतनं; सर्वं मतं; संवेलनं; संवेतनं महत् (for मम ),

(०२) ( ख- अनिद्रा..हं निशायां च पतीनुपजरामि च, ख-अनिद्रा..हं निशायां च पतीसुपजरामि च, (२)भर्तुः (for भर्तु) संवदनं; प्रियाहितं; संवहनं, (४) कारये ; रोच (for काम),

(०३)( धर्मचरितं ; वचनं , (२) व्याहृतं कृष्णया.

(०४) सत्या, ( अ) सि (for (अ) स्मि), (३) कामाकारः; कामकारं वै (for हि), न मा कुरु सखित्वाच्च, (४) सापहासं. प्रहासितुं; प्रकीर्तितं ; प्रभाषितं .

एकोननवत्यधिकद्विशततमोऽध्यायः ।। १८९ ।।

(द्रौपदीसत्यभामासंवादपर्वणि २अध्यायः)

# 03- 04 - 190Adhyaya

# १९०. नवत्यधिकशततमोध्यायः

द्रौपद्या सत्यभामां प्रति पतिवशीकरणोपायोपदेशव्याजेन पतिव्रताधर्मकथनम् ।।

**द्रौपदी-**

इमं तु ते मार्गमपेतदोषं
वक्ष्यामि चित्तग्रहणाय भर्तुः।
यस्मिन्यथावत्सखि वर्तमाना
भर्तारमाच्छेत्स्यसि कामिनीभ्यः ।। १ ।।(०१)

लक्षालङ्कारः - यस्मिन् यथा इत्यत्र यस्मिन् भर्तरि यथा अपेक्षितं तथा वर्तमाना । भर्तारमाच्छेत्स्यसि कामिनीभ्य इत्यभ कामिनीभ्यः इतरकामिनीभ्यः भर्तारमाच्छेत्स्यसि भर्तृमनसो विनिवृत्तिं करिष्यसि ।

नैतादृशं दैवतमस्ति किञ्चित्
सर्वेषु लोकेषु सदेवकेषु ।
यथा पतिस्स्तस्य तु सर्वकामा
लभ्याःप्रसादे कुपितश्च हन्यात् ।। २ ।।(०२)

लक्षालङ्कारः - यथा पतिस्तस्य इत्यभ तस्य प्रसादे ।

---

(०१) (१)(इदं (for इमं ), उपेत्य(for अपेत), मोहं (for दोषं),
(३) ख-यसिमि - सखि वद, अस्मिन्; तस्मिन् (for यस्मिन् ), पथि; सह (for सखि ),
(४)ख-कर्षसि धेत्स्यसि, उद्वेत्स्यसि ; इच्छेत्स्य; आश्लिष्य; आजेष्य; आकर्ष (for आत्सेत्ख ),
(०२) (१)(मन्ये ; किञ्चित् (for सत्ये), (२) च देवकेषु; सदेवकेषु,
(३)दैवतं; तुष्यति तस्य तु (for तस्य हि), तस्य कामा सर्वकामो; सर्वलोका; सर्वकामान,

तस्मादपत्यं विविधाश्च भोगाः शय्यासनान्युत्तमदर्शनानि।

वस्त्राणि माल्यानि तथैव गन्धाः स्वर्गश्च लोको विपुला च कीर्ति ।।(०१)

सुखं सुखेनेह न जातु लभ्यं दुःखेन साध्वी लभते सुखानि

सा कृष्णमाराधय सौहृदेन प्रेम्णा च नित्यं प्रतिकर्मणा च।। ४ ।।(०२)

तथाऽऽसनैश्चारुभिरग्रमाल्यै-

र्दाक्षिण्ययोगैर्विविधैश्च गन्धैः ।

अस्याः प्रियोऽस्मीति यथा विदित्वा

त्वामेव संश्लिष्यति तद्विधत्स्व ।। ५ ।। (०३)

श्रुत्वा स्वरं द्वारगतस्य भर्तुः प्रत्युत्थिता तिष्ठ गृहस्य मध्ये।

दृष्ट्वा प्रविष्टं त्वरिताऽऽसनेन पाद्येन चैनं प्रतिपूजयस्व ।। ६ ।। (०४)

सम्प्रेषितायामथ चैव दास्यामुत्थाय सर्वं स्वयमेव कार्यम्।

जानातु कृष्णस्तव भावमेतं सर्वात्मना मां भजतीति सत्ये ।। ७ ।। (०५)

त्वत्संनिधौ यत्कथयेत्पतिस्ते यद्यप्यगुह्यं परिरक्षितव्यम्।

---

(४)दद्यात् (for लभ्याः), प्रसादात् .कुपिते च ( तश्च),

(०१) (२) (उ) त्तम (for (अ))। द्भुत)। (३) सुखं तथैव; तथैव गन्धः
(४ )स्वर्गस्य; स्वर्गे च. लोके विमला; विपुला; विविधा (for विषमा)। हि (for च)।.

(०२) (३)कृष्णं त्वम् (for सा कृष्णम्), (४) परि कर्मणा; पति (for प्रति) .

(०३) (क-अर्धजतुष्टयं नास्ति, तथासनैश्; स्नानासनैश् (for तथाशनैश्) . चारुभिरग्र; चारुहिरण्य .
(२)मन्त्रैः; हासैः; भावैः; गाढैः (for गन्धैः), (३)यस्याः (for अस्याः) सदा; तथा (for यथा),
(४) तामेव. तद्विधत्स्व (for सर्वभावैः),

(०४) (२) (स्वयं ;नं (for रं), (२) तस्य; (उ)त्तिष्ठ (for तिष्ठ), (३) तरसासनेन.
(४) चैनं (for चैव), प्रतिपूजयेच्च; येश्च ;येस्त्वं; यस्व; यित्वा; प्रतिपादयेस्त्वं.

(०५) (१)(त्व (for सं),अपि (for अथ), (२) काम्यं; चैव (for सर्वं), प्रतिकर्म (for स्वयमेव),
(२)कार्यं (सर्वं); कुर्यात् (for कुर्याः) , (३)जानाति; न जातु (for जानातु), चैव भावं
(for भावमेतं), एवं; एनं; एतत्; एव (for एतं), (४) मा (for मां),

काचित्सपत्नी तव वासुदेवं प्रत्यादिशेत्तेन भवेद्विरागः ।। ८ ।।(०१)

प्रियांश्च रक्तांश्च हितांश्च भर्तुस्तान्भोजयेथा विविधैरुपायैः

द्वेष्यैरुपेक्ष्यैरहितैश्च तस्य भिद्यस्व नित्यं कुहकोद्यतैश्च ।। ९ ।।(०२)

मदं प्रमादं पुरुषेषु हित्वा संयच्छ मानं प्रतिगृह्य वाचम्।

प्रद्युम्नसाम्बावपि ते कुमारौ नोपासितव्यौ रहिते कदाचित् ।। १० ।।(०३)

लक्षालङ्कारः - रहिते कदाचित् इत्यत्र रहिते एकान्ते ।

महाकुलीनाभिरपापिकाभिः स्त्रीभिः सतीभिस्तव सख्यमस्तु ।

चण्डाश्च शौण्डाश्च महाशनश्च चोराश्च दुष्टाश्चापलाश्च वर्ज्याः।। ११ ।।(०४)

लक्षालङ्कारः - चण्डाश्च शौण्डा इत्यत्र 'शुण्डापानं मदस्थानम्' इत्यभिधानात् शोण्डाः मद्यपायिन्यः ।

एतद्यशस्यं भगवेतनं च स्वर्ग(स्वार्थ्य) तथा शत्रुनिबर्हणं च ।

---

(०१) (वचनं (for कथयेत्), (२) परिरक्षणीयं , (३)कच्चित् (for काचित्), (४) विशेत् (for दिशेत्), हि रागः; विरागाः; विरक्तः; विकारः (for विरागः),

(०२) (१)(मान्याश्च; (अ) मात्यां; पथ्यां; रम्यां (for रक्तां), (२) त्वं (for तान्), भोजयेस्त्वं; भावयेस्त्वं; पूजयेथा (for भोज), (३)अपथ्यैर्; च पथ्यैर्; अपेष्यैर्; उपेक्ष्यैर् ;अपेक्ष्यैर्; अवेक्ष्यैर् ;अभव्यैर् (for अपक्षैर्), विविधैः (for अहितैः), च भर्तुर्; उपायैर्; च सत्ये (for च तस्य), (४)बिभेष्व; बिभेषि ;बिभीष्व; बिभ्यस्व ; बिभास्व ; नित्यस्य; भिदस्व (for भिद्यस्व), द्धलै ; द्यतै; त्थितै (for द्धतै) .

(०३) (१) मन्दं; मद (for मदं),तदप्रमादं (इदं प्रमाणं) पुरुषेषु कृत्वा; नैवं प्रमाणं कुहकेषु कुर्याः. (२) मानं भागं; माना; मानां (for भावं),परि (for प्रति), मानं ; मांण; वाचं (for मौनम्), (३) शांवा (for साम्बा), (४)न हि ते (for रहिते),

(०४) (१) महात्म्यलीलाभिर् (for कुलीनाभिर्), पापकाभिः; अपालिकाभिः (२)सखीभिः (for सतीभिः), सह (for तव), (३)चण्ड्यश्च शौण्ड्यश्च; चण्डप्रचण्डाश्च. शौण्ड्य (for शौण्डा), (४)भ्यश्च; चौर्या ; चोरा; घोरा(for चौरा),

महार्हमाल्याभरणाङ्गरागा भर्तारमाराधय पुण्यगन्धैः ।। १२ ।।(०१)

लक्षालङ्कारः - एतद्यशस्यम् इत्यत्र एतन् पकातिव्रत्यसन्तुष्टभर्तृप्रसादाख्यं भगवेतनं यशस्यमित्यादियोजना ।

अस्मिन् पर्वणि १९०अध्याये १२श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि
द्रौपदीसत्यभामासंवादपर्वणि द्रौपदीकर्तव्यकथने

नवत्यधिकशततमोऽध्यायः ।। १९० ।।

(द्रौपदीसत्यभामासंवादपर्वणि २ अध्यायः)

## 03- 04 - 191Adhyaya

# १९१. एकनवत्यधिकशततमोध्यायः

सत्यभामाया द्रौपदीमाश्वास्य श्रीकृष्णेन सह द्वारकां प्रति प्रस्थानम् ।।

**वैशम्पायनः**

मार्कण्डेयादिभिर्विप्रैः पाण्डवैश्च महात्मभिः।
कथाभिरनुकूलाभिः सह स्थित्वा जनार्दनः ।। १ ।। (०२)

ततस्तैः संविदं कृत्वा यथावन्मधुसूदनः।
आरुरुक्षू रथं सत्यामाह्वयामास केशवः ।। २ ।।(०३)

---

(०१) (१) रहस्यं (for यशस्यं), भगदैवतं; वेतनं, (२)क-ख-घ- स्वर्ग्यं, तदा; यथा (for तथा),
(३)मालाभरणाङ्ग (for गल्याभरणाङ्ग), माला; रागैर् (for रागा),
(४) पुण्यगन्धे; गन्धपुयये; पुण्यगन्धि; गन्धैः .

(०२) (२)ब्राह्मणैं (for पाण्डवै), (३) रूपाभिः; कृल्याभिः (for कृलभिः),
(४)सह स्थित्वा (for सहासित्वा),

(०३) (१) तां; स (for तैः), (२)पाण्डवैर् (for यथावन्), (४)भारत (for केशवः),

सत्यभामा ततस्तत्र स्वजित्वा द्रुपदात्मजाम्।
उवाच वचनं हृद्यं यथाभावं समाहितम् ।। ३ ।।(०१)

**सत्यभामा-**

कृष्णे मा भूत्तवोत्कण्ठा मा व्यथा मा प्रजागरः।
भर्तृभिर्देवसङ्काशैर्जितां प्राप्स्यसि मेदिनीम् ।। ४ ।।(०२)

न ह्येवं शीलसम्पन्ना नैवं पूजितलक्षणाः।
प्राप्नुवन्ति चिरं क्लेशं यथा त्वमसितेक्षणे ।। ५ ।।(०३)

अवश्यं च त्वया भूमिरियं निहतकण्टका।
भर्तृभिः सह भोक्तव्या निर्द्वन्द्वेति श्रुतं मया ।। ६ ।।(०४)

धार्तराष्ट्रवधं कृत्वा वैराणि प्रतियात्य च ।
युधिष्ठिरस्थां पृथिवीं द्रक्ष्यसि द्रुपदात्मजे ।। ७ ।।(०५)

यास्ताः प्रव्रजमानां त्वां प्राहसन्दर्पमोहिताः।
ताः क्षिप्रं हतसङ्कल्पा द्रक्ष्यसि त्वं कुरुस्त्रियः ।। ८ ।।(०६)

तव दुःखोपपन्नाया यैराचरितमप्रियम्।
विद्धि सम्प्रस्थितान्सर्वांस्तान्कृष्णे यमसादनम् ।। ९ ।।(०७)

---

(०१) (१) तां तु (for तत्र), (२)जित्वा च; पूजित्वा; अर्चित्वा; रञ्जित्वा; सस्वजे (for स्वजित्वा), (३) सत्यं (for हृद्यं), (४) भात्रं (for भाव), समाहिता ;समन्वितं.

(०२) (१) ततोत्कण्ठा. गरः (२) ख-अयं पादो..नन्तरश्च न स्तः, (३)सहशैर् (for सङ्काशैर्),

(०३) (२)नैव; एवं; स्त्रियः (for नैवं), लक्षणा, (३)आमुं (for प्राप्न), केल्शान्; कालं (for क्लेशं), (४)तथा (for यथा), असितेक्षणा.

(०४) (१) तु हि (for च), कृष्णे (for भूमिर्), (२)भूमिर् (for इयं), निःसृतं (for निहतं),

(०५) (१) श्रुत्वा (for कृत्वा), प्रतिपत्य; पात्य (for यात्य), (४)द्रक्ष्यसि; वीक्ष्यसे; द्रक्ष्यसे.

(०६) (१) द्रक्ष्यसि, ( त्वां (for ताः), प्रव्रज; प्रव्रज्य (for प्रव्राज),तां (for त्वां), (३)गत (for हत), (४) द्रक्ष्यसे. कुरुस्त्रियं; कुलस्त्रियः.

(०७) (३)तान् (for सं ), (४) त्वत्कृते; कृष्णे त्वं (for तान्कृष्णे),

ये च तत्र स्थिता राज्ञि तत्पक्षीयाःक्षितीश्वराः ।

तेषां कालः क्षितीशानां प्राप्तः कृष्णे दुरासदः ।

पुत्रस्ते प्रतिविन्ध्यश्च सुतसोमस्तथाविधः।
श्रुतकर्मार्जुनिश्चैव शतानीकश्च नाकुलिः ।। १० ।।(०१)

सहदेवाच्च यो जातः श्रुतसेनस्तवात्मजः।
सर्वे कुशलिनो वीराः कृतास्त्राश्च सुतास्तव ।। ११ ।।(०२)

अभिमन्युरिव प्रीता द्वारवत्यां रता भृशम्।
त्वमिवैषां सुभद्रा च प्रीत्या सर्वात्मना स्थिता ।। १२ ।।(०३)

प्रीयते तव निर्द्वन्द्वा तेभ्यश्च विगतज्वरा ।
दुःखिता तेन दुःखेन सुखेन सुखिता तथा।(०४)
भजेत्सर्वात्मना चैव प्रद्युम्नजननी तथा ।। १३ ।।(०५)

भानुप्रभृतिभिश्चैनान्विशिनष्टि च केशवः।(०६)
भोजनाच्छादने चैषां नित्यं मे श्वशुरः स्थितः ।। १४ ।।(०७)

---

(०१) (१) ते च . तु (for ते), तु; ते (for च ), (२)श्रुतं (for सुत), तथा शिशुः; तथाविधः; तथा भिभूः; च वर्धनः (for तथा विभुः), (४) तु (for च ), श्रु सु तसोमं (for श्रुतसेन) .

(०२) (२)कृतार्था (for कृतास्त्रा), (३) प्रीत्या (for प्रीता ), (४) सुभद्रायां (for द्वारवत्यां), सुता (for रता),

(०३) (१) अ)पि (for च), (२) प्रीता (for प्रीत्या),
(३) प्रीतये (for प्रीयते), तव; चैव (for भाव), निर्बद्धा (for निर्द्वन्द्वा),

(०४) (१) भोजा; भजे भजेत् (for भेजे), चैतान् चैनान् (for चैव), भजेत भोजं सर्वात्मानं (३)चैतान् (for चैनान्), (४) न (for च),

(०५) (१) चैनान्; तेषां (for चैषां ),

(०६) (१)स्वसुरः (for श्वशुरः), प्रत्यय (for प्रणय), भा वनि; भामिनी.

(०७) (१)वैशं उ (वैशं), (सान्त्वं; सत्यं; सर्वं; प्रीता (for प्रीत्या),

रामप्रभृतयः सर्वे भजन्त्यन्धकवृष्णयः।(०१)
**तुल्यो हि प्रणयस्तेषां प्रद्युम्नस्य च भाविनि ।। १५ ।।** (०२)

**वैशम्पायनः-**

**एवमादि प्रियं सत्यं हृद्यमुक्त्वा मनोऽनुगम्।**
**गमनाय मनश्चक्रे वासुदेवरथं प्रति ।। १६ ।।**

तां कृष्णां कृष्णमहिषी चकाराभिप्रदक्षिणम्।(०३)
**आरुरोह रथं शौरेः सत्यभामाथ भाविनी ।। १७ ।।**

स्मयित्वा तु यदुश्रेष्ठो द्रौपदीं परिसान्त्व्य च ।
**उपावर्त्व ततः शीघ्रैर्हयैः प्रायात्पुरं स्वकम् ।। १८ ।।**

अस्मिन् पर्वणि १९१अध्याये १८श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि

द्रौपदीसत्यभामासंवादपर्वणि कृष्णगमने

एकनवत्यधिकशततमोऽध्यायः ।। १९१ ।।

(द्रौपदीसत्यभामासंवादपर्व समाप्तम् )

---

(०१) (१) रमं; गतं (for नुगम्), (२) मतिं (for मनश्),
(०२) (१) तां कृष्णा महिषीं, (२) प्रदक्षिणां, (३) शौरिः (for शौरेः), (४) (अ)थ (for च),भाविनी (for भामिनी), सत्य भामासहायवान् ; कृष्णयानुगता शुभा .
(०३) (१) स्मितं कृत्वा ; स स्मयित्वा ;सान्त्वयित्वा (for स्मयित्वा तु),च; स (for तु),
(२) शान्त्य च; सान्त्वयन् (for सान्त्वय च), (३) वृत्य (for वर्त्य ), रथं (for ततः), शीघ्रं; शीघ्रो, (४) परन्तप; पुरं तदा; पुरं स्वकं; नराधिप .

# घोषयात्रापर्व

## 03- 04 - 192Adhyaya

## १९२. द्विनवत्यधिकशततमोध्यायः

कस्मिंश्चित् ब्राह्मणात्पाण्डववृत्तान्तं श्रुतवता धृतराष्ट्रेण पाण्डवान् प्रति परिशोचनम् ॥ १ ॥ तथा पाण्डवपराक्रमानुस्मरणेन स्वपुत्राणां भाविवधनिर्धारणपूर्वकं तान् प्रति परिशोचनम् ॥ २ ॥

**जनमेजयः**

एवं वने वर्तमाना नराग्र्याः शीतोष्णवातातपकर्शिताङ्गाः।
सरस्तदासाद्य वन च पुण्य ततः पर किमकुर्वन्त पार्थाः ॥ १ ॥ (०१)

**वैशम्पायनः**

सरस्तदासाद्य तु पाण्डुपुत्रा जनं समुत्सृज्य विधाय वेशम्।
वनानि रम्याण्यथ पर्वतांश्च नदीप्रदेशांश्च तदा विचेरुः ॥ २ ॥(०२)

तथा वने तान्वसतः प्रवीरान्स्वाध्यायवन्तश्च तपोधनाश्च।
अभ्याययुर्वेदविदः पुराणास्तान्पूजयामासुरथो नराग्र्याः॥ ३ ॥(०३)

ततः कदाचित्कुशलः कथासु

विप्रोऽभ्यगच्छद्भुवि कौरवेयान्।
स तैः समेत्याथ यदृच्छयैव

---

(०१) २)कर्षि ताङ्गाः; कर्षिताश्च ३)समां (for तदा), ४)किमकुर्वन्स्म (for कुर्वन्त),
(०२) १)च (for तु), २)अ-विहाय,सतां च; विहाय) (for विधाय), चैव; रक्षां; वेशं षं; तेषां; चेष्टं (for चैषाम्), ३)च (for (अ) थ), ४)तथा (for तदा),
(०३)१) तस्मिन्; श्रुत्वा (for तथा), च (for प्र),

वैचित्रवीर्यं नृपमभ्यगच्छत् ।। ४ ।।[०१]

अथोपविष्टः प्रतिसत्कृतश्च वृद्धेन राज्ञा कुरुसत्तमेन।
प्रचोदितः सङ्कथयाम्बभूव धर्मानिलेन्द्रप्रभवान्यमौ च ।। ५ ।।[०२]

कृशांश्च वातातपकर्शिताङ्गान्दुःखस्य चोग्रस्य मुखे प्रपन्नान्।
ता चाप्यनाथामिव वीरनाथा कृष्णा परिक्लेशगुणेन युक्ताम् ।।[०३]
वाच कथञ्चित्स्थिरतामुपेत्य तत्सर्वमात्मप्रभव विचिन्त्य।
ततः कथास्तस्य निशम्य राजा वैचित्रवीर्यः कृपयाभितप्तः ।।
वने तथा पार्थिवपुत्रपौत्रान्श्रुत्वा तथा दुःखनदीं प्रपन्नान् ।।[०४]
प्रोवाच दैन्याभिहतान्तरात्मा निःश्वासवातोपहतस्तदानीम् ।। ६ ।।[०५]

**धृतराष्ट्रः-**

कथं नु सत्यः शुचिरार्यवृत्तो ज्येष्ठः सुतानां मम धर्मराजः ।
अजातशत्रुः पृथिवीतले स्म शेते पुरा शङ्कवकूटशायी ।। ७ ।।[०६]

प्रबोध्यते मागधसूतपूगैर्नित्यं स्तुवद्भिः स्वयमिन्द्रकल्पः ।

---

(०१) १) कुशली, कथाविद्, २) सर्वैः; स वै (for स तैः), ४) अन्व (for अभ्यं),
(०२)२)पुङ्गवेन (for सतमेन), २) प्रणोगदित (for प्रचों)। सङ्कथं; सत्कथ (अ) यं कथं (for सन्कथं),
(०३) १) कषिन्ताङ्गान्; कर्शितांश्च कर्शिताङ्गान् २) दुःखग्रहोग्रस्य (for दुःखस्य चोग्रस्य) मुख०; सुखे; मुखं (for मुखे),४) त्याग, (for क्लेश०), ०गणानु०; गणेन (for गुणेन),
(०४) १) कथासू (for कथां), ३)तदा; तथा (for स्थितान्), पाण्डवं (for पार्थिवं), ४) कृष्णां (for श्रुत्वा), (अ) थ (तु) तान्; तथा (for तदा), नदी० (for नदीं) .
(०५)१)अ-तां चाप्यनाथामिव वीरनाथां कृष्णां परिक्लेशगुणेन युक्ताम् । वने सक्थितान् पार्थिवपुत्रपौत्रान् श्रुत्वा तदा दुःखनदीन् प्रपन्नान् ।। ततः कथास्तस्य निशब्य राजा वैचित्रवीर्यऋ कृपयाभितप्तः ।, देव्याभिह०; दैन्याभिहि०; चैनान्विहिं (for दैन्याभिह), २) वातोप ; कण्ठोपं; गर्भोप (for बाष्पोपं), तदानीं; च राजा; शुभार्थी; स्म पार्थान्; (for स पार्थान्), कण्ठोपहतस्वरार्तां र्थां; कण्टापहतस्वरार्तं स्वरान्तां, ४) पचिन्त्य (for विचिन्त्य),
(०६) १) तु (for नु), आत्मवान्वै (for आर्यवृत्तो), २) श्रेष्ठः (for ज्येष्ठः), २)पृथिवीतले स्म; प्र (for व्य) थितः स्म शेते; वसुधातलेषु ४) भूमौ (for शेते), शोभनतल्पशायी; बान्धवकूटशायी.

पतत्त्रिसङ्घैः स जघन्यरात्रे
प्रबोध्यते नूनमिडातलस्थः ॥ ८ ॥ [०१]

कथं नु वातातपकर्शिताङ्गो
वृकोदरः कोपपरिप्लुताङ्गः ।
शेते पृथिव्यामतथोचिताङ्गः
कृष्णासमक्षं वसुधातलस्थः ॥ ९ ॥ [०२]

तथार्जुनः सुकुमारो मनस्वी
वशे स्थितो धर्मसुतस्य राज्ञः ।
विदूयमानैरिव सर्वगात्रै-
र्ध्रुवं न शेते वसतीरमर्षात् ॥ १० ॥ [०३]

यमौ च कृष्णां च युधिष्ठिरं च
भीमं च दृष्ट्वा सुखविप्रयुक्तम्।
विनिःश्वसन्सर्प इवोग्रतेजा
ध्रुवं न शेते वसतीरमर्षात् ॥ ११ ॥ [०४]

तथा यमौ चाप्यसुखौ सुखार्हौ
समृद्धरूपावमरौ दिवीव।
प्रजागरस्थौ ध्रुवमप्रशान्तौ
धर्मेण सत्येन च वार्यमाणौ ॥ १२ ॥ [०५]

---

(०१)१) सङ्घैर्; वृन्दैर्; पुत्रैर् (for पूगैर्), २) यज्ञं; यस्तं (for नित्यं), ३) अपत्रि (for पतत्रि), नृपोद्य (for जघन्य०), रात्रौ; ०काले (for रात्रे), (४) प्रबुध्यते, इला हा तलस्थः इहा वां चलस्थः (for इडां),
(०२)१) कर्षिताङ्गो, २)परिप्लुताक्षः ३) चितः स (सन्), (for चिताङ्गः),
(०३)२) राजस्य (for सुतस्य), (३)विधूयमानै.
(०४) (१) दृष्ट्वा च भीमः (for भीमं च दृष्ट्वा), विप्र० युक्तं; विप्रमुक्तं; संवियुक्तं .
(०५)(१) चापि सुखौ; चाग्र्यसुखौ (for चाप्य), सुरवारत्यौ (for हौं), २) समिद्ध; सवृद्धं समूर्ध (for

समीरणेनाथ समो बलेन समीरणस्यैव सुतो बलीयान्।
स धर्मपाशेन निबद्धमूर्त्तिः ध्रुव विनिःश्वस्य सहत्यमर्षम् ।। १३ ।। (०१)

स चापि भूमौ परिवर्तमानो
वधं सुतानां मम काङ्क्षमाणः ।
सत्येन धर्मेण च वार्यमाणः
कालं प्रतीक्षत्यधिको रणेऽन्यैः ।। १४ ।। (०२)

अजातशत्रौ तु जिते निकृत्या
दुःशासनो यत्परुषाण्यवोचत्।
तानि प्रविष्टानि वृकोदराङ्गं
दहन्ति कक्षाग्निरिवेन्धनानि ।। १५ ।।(०३)

न पावकं ध्यास्यति धर्मपुत्रो
धनञ्जयश्चाप्यनुवर्त्स्यते तम्।
अरण्यवासेन विवर्धते तु
भीमस्य कोपोऽग्निरिवानिलेन ।। १६ ।।(०४)

---

समृद्ध), यथैव; अतीव (for दिवीव), ४) क्रोधेन सत्येन; सत्येन धर्मेण तु (for च), धार्य ; वर्ध (for वार्य),

(०१)(१) समीरणस्य (for णेन), (अ) द्य; (अ) थ; (इ) हः (ए) व (for (अ)पि), २) (अ) थ; (इ) व; (अ) पि (for (ए) व), समो (for सुतो), ३) यतो; वृतो०; ततो (for सितो), ग्रजेन (for ग्रतेजा), ४) विनिश्चित्य, विनिश्वस्य, (अ) मर्षात्; (अ) मर्षी; (अ) मर्षः (for (अ) मर्षम्),(सितोऽग्रजेन),

(०२)(१) परिधार्यमाणो, २) धर्मेण सत्येन, नि (for च), ४) कामं (for कालं), (अ) थ कौरवेंद्रः; (अ) धिको रसोन्यैः.

(०३)(१) शत्रुं (for शत्रौ), नि (for तु), ग्लहे (for जिते), निकृत्यां; निकृत्य, (३) वृकोदराङ्गे ४) दहति, मं (अ) मं दाग्निर्; कक्षाग्निर्; मर्मेग्निर्; धर्माग्निर् (for मर्माग्निद्), (इं) धनेन (for (इ) न्धनानि),

(०४)कोपोऽग्निर् १) पातकं; पापके; पावके; पावकं, पश्यति, स्थास्य; धास्य०;धाक्ष्य (for ध्यास्य), धर्मराजो; ब्रह्मपुत्रो २) वा (for च), वत्स्यते; वत्स्यते (for वर्तते), ३) स; (ऽ)स्य (for तु), ४)

स तेन कोपेन विदह्यमानः करं करेणाभिनिपीड्य वीरः ।
विनिःश्वसत्युष्णमतीव घोरं दहन्निवेमान्मम पुत्रपौत्रान् ।। १७ ।।(०१)

गाण्डीवधन्वा च वृकोदरश्च संरम्भिणावन्तककालकल्पौ।
न शेषयेतां युधि शत्रुसेनां शरान्किरन्तावशनिप्रकाशान् ।। १८ ।।(०२)

दुर्योधनः शकुनिः सूतपुत्रो दुःशासनश्चापि सुमन्दचेताः ।
मधु प्रपश्यन्ति न तु प्रपातं वृकोदरं चैव धनञ्जयं च ।। १९ ।।(०३)

प्रपातं यद्द्यूतमालम्ब्य हरन्ति राज्यम्

लक्षालङ्कारः - मधु प्रपास्यन्ति न तु प्रपातम् इत्यत्र मधु मद्यं प्रपास्यन्ति । तन्निमित्तं प्रपातं न पश्यन्ति । वृकोदरः धनञ्जयश्च मधु न पास्यति । तन्निमित्तप्रपातं न यास्यति ।

शुभाशुभं कर्म नरो हि कृत्वा प्रतीक्षते तस्य फलं विपाके ।
स तेन युज्यत्यवशः फलेन मोक्षः कथं स्यात्पुरुषस्य तस्मात् ।। २० ।।(०४)

लक्षालङ्कारः - मोक्षः कथं स्यात्पुरुषस्य तस्मात् इत्यभ तस्मात् कर्मणः मोक्षः मोचनं तत्परित्याग इत्यर्थः । तस्मात् शुभाशुभरूपकर्मसमुदायात् कैवल्यं वा ।

क्षेत्रे सुकृष्टे ह्युपिते च बीजे देवे च वर्षत्यृतुकालयुक्तम्।

---

कोपाग्निर्, (इं) धनेन (इं) धनानि; (अ) नलेनश्चा (for (अ) निलेन), .

(०१)(१) विदह्यमानः दार्यमाणः निवार्यमाणः, २) (अ) पि (for अ भि), मानी (for वीरः), ३) निश्वसन् उ ग्रम् (for उ ष्णम्), वीरो (for घोरं), ४) इ मां ए नं (for इ मान्,) चेलान्; शैलान्; सेनां; मास्ते (for पौत्रान्),

(०२)(गाञ्जीवधन्वा स (for च), (२)संरम्भणान्, पन्नग (for अ न्तकः), कालतुल्यौ (for कालकल्पौ), ३)निःशेषयेतां; सुयो०धयेतां शेषं (for सेनां), ४) सृजन्ता ; क्षिपन्ता (for किरन्तां),

(०३)(१) सूर्य (for सूतं), २)धनञ्जय (for दुःशासन), समर्ष; समर्ष सुमन्दतेजाः ३) साधु (for मधु), च (for तु), ४) यद् द्यूतमालम्ब्य ०लक्ष्य हरन्ति राज्यं.

(०४)( १) कर्म नरो हि (for पुरुषः कर्म), २) तत्स्वध चेत्स (for तस्य), तु; हि (for स्म), विपाके (for स्म कर्ता), ३) सत्येन; एतेन (for स तेन), मुह्य० (for युज्य०), ४) तस्य (for तस्मात्),

न स्यात्फल तस्य कुतः प्रसिद्धि-
रन्यत्र दैवादिति चिन्तयामि ।। २१ ।। (०१)

कृतं मताक्षेण यथा न साधु
साधुप्रवृत्तेन च पाण्डवेन।
मया च दुष्पुत्रवशानुगेन
तथा कुरूणामयमन्तकालः ।। २२ ।। (०२)

ध्रुवं प्रवास्यत्यसमीरितोऽग्निर्ध्रुवं प्रजास्यत्युत गर्भिणी या।
ध्रुव दिनादौ रजनीप्रणाशस्तथा क्षपादौ च दिनप्रणाशः ।। २३ ।।(०३)

लक्षालङ्कारः - ‘ ध्रुवं प्रशास्यति’ इति पाठे शिक्षां करिष्यति । ‘प्रहास्यति’ इति पाठे स्वराज्यं त्यजति ।

क्रियेन तस्मान्न परे च कुर्युर्दत्ते न दद्युः पुरषाः कथस्वित्।
प्राप्यार्थकालं च भवेदनर्थः कथं न तत्स्यादिति तत्कुतः स्यात् ।। २४ ।।(०४)

लक्षालङ्कारः - क्रियते तस्मात् इत्यत्र स्वयं न क्रियेत । कथं च तत्स्यादिति तत्कुतः स्यात्

(०१)(१) क्षुद्रे (for क्षेत्रे), सुपिष्टे; प्रकृष्टे (for सु), ()प्युपिते; (स)भ्युदि ०रसि; विहि०; रहि वपि; रसिके (for ह्युपिते), ()पि (for च), काले सम्यग; देवे (for बीजे), २) बीजे; दैवे (for देवे), तु (for च), अ नु, अ थ उ त (for ऋ तु),३) वस्तुः; वप्नुः (for न स्यात्), तु साप्य प्र सिद्धिर्, तु साधु साध्वी; तु सम्प्रसिद्धिर् (for कुतः प्रसिद्धिर्), ४) चिन्तनीयं; नास्ति हेतुः (for चिन्तयामि),
(०२)( १) अनार्येण; कृताक्षोण (for मताक्षेण), कृतं ममापेक्षणया न साधु, २) प्रवृत्तेषु च पाण्डवेषु, (३) न तु (for च), दुष्पुत्रशताकुलेन, ४)तथा; कृतः (for यथा),
(०३)(१) प्रशाम्यति (for प्रवास्यति), ()ग्निर् (for पि), ध्रुवं पिबत्यस्य समीरणोग्निर्, २) प्रवास्यति; प्रसू; प्रयां (for प्रजा), अ पि (for उ त), ३) दिवादौ; प्रणा (for दिना), ४) ऋणं (for दिनं),
(०४)(१) क्रियां च; क्षीयेत; क्रियान्न; कृते च (for क्रियेन्त), तस्मात्; दर्पात्; कर्मात् (for कस्मात्), न नराः; अपरे; त्वपरे० (for न परे, वि० ()पि); ()प०; तु (for च), कुर्याद् (for कुर्युर्), २) चित्तं न; वित्तेन; वृत्तं च; वित्तानि; दत्तं च; दत्ते च (for वित्तं न), वित्तेनेति गौडपाठे तु वित्तेन हेतुना दद्यात्; जह्यात् (for दद्युः), पुरुषं०; पुरुषः कथंस्वित्, (३) (अ)थ (अ) र्थ, कामं (for कालं), (४) अ-कश्चनस्यदिति तत् कुतस्स्यात् ।, च; तु; न (for नु), न (for तत्), कृतं गतं त्(for कुतं), कृतार्थः; कथं नु (for कुतः स्यात्),

इत्यत्र तत् अनर्थागमनं कथं स्यात् न कथश्चिदिति यत्, तत्कुतः स्यात् ।

कथं न भिद्येत न च स्रवेत न च प्रसिच्च्येदिति रक्षितव्यम्।
अरक्ष्यमाण शतधा प्रकीर्येत् ध्रुव न नाशोऽस्ति कृतस्य लोके ।। २५ ।।(०१)

लक्षालङ्कारः - कथं न भिद्येन इत्यत्र न प्रसिद्धच्येत् यथा प्ररिद्धं न भवति तथा रक्षितव्यम् ।

गतो ह्यरण्यादपि शक्रलोकं धनञ्जयः पश्यत वीर्यमस्य।
अस्त्राणि दिव्यानि चतुर्विधानि ज्ञात्वा पुनर्लोकमिम प्रपन्नः ।। २६।।

स्वर्गं हि गत्वा सशरीर एव को मानुषः पुनरागन्तुमिच्छेत्।
अन्यत्र कालोपहताननेकान्समीक्षमाणस्तु कुरून्मुमूर्षून् ।। २७ ।।(०२)

धनुर्ग्राहश्चार्जुनः सव्यसाची धनुश्च तद्गाण्डिवं भीमवेगम्।
अस्त्राणि दिव्यानि च तानि तस्य त्रयस्य तेजः प्रसहेत कोऽत्र ।। २८ ।।(०३)

निशम्य तद्वचनं पार्थिवस्य दुर्योधनं हरिते सौबलोऽथ।
अबोधयत्कर्णमुपेत्य सर्वं स चाप्यहृष्टोऽभवदल्पचेताः ।। २९ ।। (०४)

---

(०१)(१) च; नु (for न), भिद्येच्च आ स्रवेच्चः श्रयेत; आ श्रुवेत; मृयेत; स्तुवेत; आ स्रवेत, (for स्रवेत), २) प्रसिध्यें प्रसिश्र्वें; अ वसीदे अ वसज्ये; (अ) वसिज्ये (for प्रसिश्च्यें), ३) अरक्ष्यमाणं; अवेक्षमाणः (णं) (for अरक्ष्यमाणः), च तथा (for शतधा), प्र वि कीर्येद्; प्रकुर्युर् प्रशीर्येद् (for विशीर्येद्),

(०२)(१) च (for हि), हित्वा; यां (for गं), एवं; ,एकः (for एव), २) प्रतिगन्तुम् (for पुनरागन्तुम्), ईक्षेत् (for इच्छेत्), ३) अत्रैव; अनेन; अनुक्त (for अन्यत्र), पहितान् (for पहतान्), अलोकान् (for अनेकान्),(४)माणश्च; माणः स; ०माणाद्धि; ०माणाच्च (for माणस्तु), मुमुक्षून्; मुहूर्तं (for मुमूर्षून्),

(०३)(१)धनुर्ग्रह०, २) तं (for तद्), भीमवेगं (for लोक), ३) तानि तानि ; तानि यस्य ) (for तानि तस्य), ४) तस्यास्त्र तस्यात्र; एतस्य; तत्त; जय; स यं (for त्रय), प्रसहेन्न;०विषहेत ()त्र; ()स्य () पि (for नु), तेजो न सेहेत ततो नु को नु .

(०४)(२)दुर्योधनं रहितः ; सहितः सौबलस्य; लोथ (लेन); लेयः (३)उवाच यत्; प्राबोधयत्;) अवोचतां (for

अस्मिन् वनपर्वणि १९२तमेऽध्याये २९ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि धृतराष्ट्रखेदवाक्ये द्विनवत्यधिकशततमोऽध्यायः ।। १९२ ।।

(घोषयात्रापर्वणि २ अध्यायः)

# 03- 04 - 193Adhyaya

# १९३. त्रिनवत्यिधकशततमोध्यायः

कर्णशकुनिभ्यां दुर्योधनं प्रति स्ववैभवप्रदर्शनेन पाण्डवानांदु :खजननाय द्वैतवनगमनचोदना ।।१ ।। कर्णशकुनिकृतं दुर्योधनस्य प्रशंसनं पाण्डवानां निकटे गन्तुं प्रोत्साहनं च ।। २ ।।

**वैशम्पायनः**

धृतराष्ट्रस्य तद्वाक्यं निशम्य शकुनिस्तदा।
दुर्योधनमिदं काले कर्णेन सहितोऽब्रवीत्** ।। १ ।।

**कर्णः-**

प्रव्राज्य पाण्डवान्वीरान्स्वेन वीर्येण भारत।
भुङ्क्ष्वेमां पृथिवीमेको दिवि शम्बरहा यथा ।। २ ।।

This Stanga Interchanged in TRK after 3.(01)

तवाद्य पृथिवी राजन्नखिला सागराम्बरा।
सपर्वतवनारामा सह स्थावरजङ्गमा ।। ३ ।।

---

अबोध०यत् ) (४)अ-तेजाः, चाप्रहृष्टो; चापि हृष्टो; चाथ हृष्टो तेजाः चेताः

(२) शकुनिस्तदा (for सहसौबलः) वाक्य; राजन् (for काल) कर्णेन सहितोब्रवीत् .

(०१) कर्णः (सर्वान् (for वीरान् ) (३) (ए)तां (for (इ)मां) सर्वां (for एको), (४)दिवि (for दिवं ) सुर०पतिर् (for शम्बरहा) .

प्राच्याश्च दाक्षिणात्याश्च प्रतीच्योदीच्यवासिनः ।

कृताः करप्रदाः सर्वे राजानस्ते नराधिप। ।। ४ ।।

या हि सा दीप्यमानेव पाण्डवानभजत्पुरा।(०१)

साद्य लक्ष्मीस्त्वया राजन्नवाप्ता भ्रातृभिः सह। ।। ५ ।।

इन्द्रप्रस्थगते यां तां दीप्यमानां युधिष्ठिरे।(०२)

अपश्याम श्रियं राजन्दृश्यते सा तवाद्य वै।
शत्रवस्तव राजेन्द्र न चिरं शोककर्शिताः ।। ६ ।।(०३)

दृश्यते सा तवाद्य वैशत्रवस्तव राजेन्द्र

(४) अचिरात् सुचिरं शोककर्षिताः त्वां समागता

सा तु बुद्धिबलेनेयं राज्ञस्तस्माद्युधिष्ठिरात्।
त्वयाऽऽक्षिप्ता महाबाहो दीप्यमानेव दृश्यते ।। ७ ।।(०४)

तथैव तव राजेन्द्र राजानः परवीरहन्।
शासनेऽधिष्ठिताः सर्वे किं कुर्म इति वादिनः ।। ८ ।।(०५)

तवेयं पृथिवी राजन्निखिला सागराम्बरा

सपर्वतवना देवी सग्रामनगराकरा। ।। ९ ।।

---

(०१)(दक्षिणात्याश्च (२)दिव्यमानवाः (for (उ)दीच्यवासिनः (४)आत्मन (for राजान) जना (for नरा),

(०२)(या पुरा; सा हि सा (for या हि सा), प्र (for सा) (२)अभजत् (for भजते), (३)सा हि; सम्यग् (for साद्य ) स्वयं (for त्वया ) प्राप्ता ) (for राजन्) (४)दुराप्ता (for अवाप्ता),

(०३)(प्रस्थं ; प्रस्थे (for प्रस्थ०) गतां (for गते) यात्रां; रात्रां; यां यां; याता; यातां; यातं (for यां तां ) (२)दीप्यमाने; ०माना, (३)अपश्यामि, ततो राजन्; महाराज; महीपाल (for श्रियं राजन् ) .

(०४)( साधु साद्य; सा श्रीर् (for सा तु ) (ए)व; (इ)षुम् (इ)यं) (२)राजन्; राजात् (for राज्ञः ) तस्य (for तस्माद्) तथाविधात् (for युधिष्ठिरात् ) अपहाय युधिष्ठिरं (३) त्वयि शि (for त्वयाक्षिप्ता),

(०५)(तदैव (for तथैव) (३)नेषु स्थिताः ने विष्ठिताः; नेवस्थिताः (for ने युधिताः) .

नानावनोद्देशवती पर्वतैरुपशोभिता।[०१]
**नानाजनपदाकीर्णा स्फीतराष्ट्रामहाबला ।। १० ।।**

वन्द्यमानो द्विजै राजन्पूज्यमानश्च राजभिः ।
**पौरुषाद्दिवि देवेषु भ्राजसे रश्मिवानिव ।। ११ ।।**[०२]

रुद्रैरिव यमो राजा मरुद्भिरिव वासवः ।
**कुरुभिस्त्वं वृतो राजन्भासि नक्षत्रराडिव ।। १२ ।।**[०३]

यैः स्म ते नाद्रियेताज्ञा न च ये शासने स्थिताः ।
**पश्यामस्तान्श्रिया हीनान्पाण्डवान्वनवासिनः ।। १३ ।।**[०४]

श्रूयते हि महाराज सरो द्वैतवनं प्रति।
**वसन्तः पाण्डवाः सार्धं ब्राह्मणैर्वनवासिभिः ।। १४ ।।**[०५]

स प्रयाहि महाराज श्रिया परमया युतः ।
**तापयन्पाण्डुपुत्रांस्त्वं रश्मिवानिव तेजसा ।। १५ ।।**[०६]

स्थितो राज्ये च्युतान्राज्यच्छ्रिया हीनाञ्छ्रिया वृतः ।
**असमृद्धान्समृद्धार्थः पश्य पाण्डुसुतान्नृप ।। १६ ।।**[०७]

---

(०१)(ते वयं; तवेयं (for तवाद्य) (२)अखिला; सकला (for निखिला) (३) वना चेयं; वना देव; वनाकारा (for वना देवी) (४)नगराकरपूरिता; सहस्थावरजङ्गमा विधो (for ० वनो ) पर्वतै (for पत्तनै),
(०२)(स्तूय०; नन्द्य (for वन्द्य) नृपै (for द्विजै ) (२) तथा द्विजैः (for च राजभिः ) भासि नक्षत्र०राडिव (४)मघवानिव ; रश्मिमा.
(०३)(राजन् (for राजा ) (३)सं० तु (for त्वं )(४) -न भोक्षेत नराधिप; घ-न नभो नक्षत्रराडिव.
(०४)(यै (for ये) न ध्रियन्ते; नाद्रियेत (for यन्ते ) त्वां; ()स्मान्; (ऽ)स्मिन् (for ज्ञा।) ये पुरा दीव्यमानाश्च; येस्मान्पुरा नाद्रियन्ते; येस्मांस्तु नाद्रियन्ते नु ये नाद्रियन्तेज्ञानात्त्वां (२) उद्विजन्तः नोद्विजेत न प्रीयन्ते (for नोद्विजन्ते ) श्रिया परमया युताः; ये न च (तु) ते (ये) शासने स्थिताः.
(०५)(श्रूयते च (for हि ) (३)सर्वे (for सार्धं),
(०६) (सं०; त्वं (for स ) ,प्रियाभिर् (for प्रयाहि) बाहो; राजन् (for राज ) (३)तापयन् (for प्रतपन्) च; तान् (for त्वं) (४)रश्मिमान् (for वान् .
(०७) (स्थानात् (for राज्यात्) (२)हि ते भार्यां (for श्रिया हीनाञ् ) युतः (for हुतः ) (३)समृद्धः सन्

महाभिजनसम्पन्नं भद्रे महति संस्थितम्।
पाण्डवास्त्वाभिवीक्षन्तु(न्ता) ययातिम् इव नाहुषम् ।। १७ ।।(०१)

यां श्रियं सुहृदश्चैव दुर्हृदश्च विशाम्पते।
पश्यन्ति पुरुषे दीप्ता सा समर्था भवत्युत ।। १८ ।।(०२)

समस्थो विषमस्थान्हि दुर्हृदो योऽभिवीक्षते।
जगतीस्थानिवाद्रिस्थः किमतः परमं सुखम् ।। १९ ।।(०३)

न पुत्रधनलाभेन न राज्येनापि विन्दति।
प्रीतिं नृपतिशार्दूल याममित्राघदर्शनात् ।। २० ।।(०४)

किं नु तस्य सुखं न स्यादाश्रमे यो धनञ्जयम्।
अभिवीक्षेत सिद्धार्थो वल्कलाजिनवाससम् ।। २१ ।।(०५)

सुवाससो हि ते भार्या वल्कलाजिनसंवृताम्।

पश्यन्तु दुःखितां कृष्णां सा च निर्विद्यतां पुनः।
विन्दन्तां चाप्यनात्मानं जीवितं च धनच्युतम् ।। २२ ।।(०६)

---

(for समृद्धार्थः ) (४)वने (for नृप),

(०१)(अनेकबलसम्पन्नं (२)पदे (for भद्रे) च स्थितं (for सं) (३)त्वभि (for त्वाभि० ) पश्यन्तु; वीक्षन्तु (for वीक्षन्तां ) (४)तिमिह (for तिमिव),

(०२) सुहृदशू दुर्हृदशू (३) अ-दीप्तान् सा समर्था, घ-दीपक्तन् समम्र्याश्च,ख-पश्यन्ति पुरुषे दीप्तांकिं ततः परमं सुखम्, पौरुषैद् (for पुरुषे ) (४)स समर्थो; शमषांश्च; सा समग्रा (for सा समर्था ) सामग्र्या च वाशां पते.

(०३) (समर्थो (for ०स्थो ) (२)वीक्ष्यते (३)जगतिस्थान्, विषम०स्थांश्च यानस्थः भूमिस्थांश्चैव यानस्थः (४)अत; (for ततः) शुभं (for सुखम्),.

(०४)

(०५)( अ-इदमर्धनास्ति, (४)संवृतं .

(०६)(हि तद्भार्या; भीमनिभां (for हि ते भार्या ) (२)संवृतां (३) (अ)सुखिनीं; दुःखितां (अ)सुखितां ) (४) तु (for च) निर्विण्णतां; निर्वेद्यतां (३)विनिन्द्य च; निन्दन्ती निन्दन्ती (for निन्दतां) विनिन्द (द्य)माना चात्मानं; विनिन्दती (दतां; द्यतां) चाप्यात्मानं; दीनतां च स्वभर्तृणां; जितानां च स्वभर्तृणां जीवन्तं; जीवतां (for जीवितं) धनच्युतं; च्युत च्युतिं; च्युतां,च.

दाराणां ते श्रियं दृष्ट्वा दीप्तामद्य जनाधिप।

लक्षालङ्कारः - विन्तन्तां चाप्यनात्मानम्  इत्यत्र जीवितस्य अनात्मानम् अप्रयत्नम् ।

न तथा हि सभामध्ये तस्या भवितुमर्हति।
वैमनस्यं यथा दृष्ट्वा तव भार्याः स्वलङ्कृताः ।। २३ ।।(०१)

**वैशम्पायनः-**

एवमुक्त्वा तु राजानं कर्णः शकुनिना सह ।
तूष्णीम्बभूवतुरुभौ वाक्यान्ते जनमेजय ।। २५ ।।(०२)

वनपर्वणि १९३तमेऽध्याये २४श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि कर्णशकुनिवाक्ये त्रिनवत्यधिकशततमोऽध्यायः ।। १९३ ।।

(घोषयात्रापर्वणि ३ अध्यायः)

## 03- 04 - 194Adhyaya

# १९४. चतुर्नवत्यधिकशततमो अध्यायः ।

कर्णाशकुन्यादिभिर्द्वैतवनगमने घोषयात्राया उपायत्वनिर्धारणम्  ।। दुर्योधनेन स्वीकृते स्वकीये प्रस्तावे कर्णशकुनिकर्तृकं घोषयात्राव्याजेन द्वैतवनं गन्तुं धृतराष्ट्रतोऽनुज्ञाप्राथ निम्

**वैशम्पायनः**

(०१)(२)तस्याभूद्दःच्छत्तमं (४)तव भार्यां स्वलङ्कृतां.

(०२)वैशं उ (for वैशं) (अ) थ च (for तु) (२)शकुनिरेव च (for ना सह),

कर्णस्य वचनं श्रुत्वा राजा दुर्योधनस्ततः ।
हृष्टो भूत्वा पुनर्दीन इद वचनमब्रवीत् ॥ १ ॥ (०१)

ब्रवीषि यदिदं कर्ण सर्वं मनसि मे स्थितम्।
न त्वभ्यनुज्ञां लप्स्यामि गमने यत्र पाण्डवाः ॥ २ ॥ (०२)

लक्षालङ्कारः - न त्वभ्यनुज्ञाम् इत्यत्र अभ्यनुज्ञां पितुराज्ञाम् ।

परिदेवति तान्वीरान्धृतराष्ट्रो महीपतिः ।
मन्यतेऽभ्यधिका श्चापि तपोयोगेन पाण्डवान् ॥ ३ ॥ (०३)

अथवाप्यनुबुध्येत नृपोऽस्माकं चिकीर्षितम्।
एवमप्यायतिं रक्षन्नाभ्यनुज्ञातुमर्हति ॥ ४ ॥ (०४)

लक्षालङ्कारः - एतामप्यायतिम् इत्यत्रख एतामायतिम् अभिवृद्धिं रक्षन्नपि कलहे सति विद्यमाना..पि सम्पद्रमिष्यतीति भीत्येत्यर्थः।

न हि द्वैतवने किञ्चिद्विद्यतेऽन्यत्प्रयोजनम्।
उत्सादनमृते तेषा वनस्थाना महाद्युते ॥ ५ ॥ (०५)

जानासि हि यथा क्षत्ता द्यूतकाल उपस्थिते।
अब्रवीद्यच्च मां त्वां च सौबलं वचन तदा ॥ ६ ॥ (०६)

---

(०१) (तु वचः (for वचनं ) (२)तथा; ततः (for तदा) (३)तूष्णीं (for हृष्टो) पुनरथो (for पुनर्दीन) (४)राधेयमिदमब्रवीत्.

(०२)(२)च मनसि; मनसि मे ) तद्धृदये तत्सर्वं हृदि संस्थितं (३)च (for तु) हि (for (अ)भि० ) लिप्सामि; लप्स्येहं (for लप्स्यामि) तस्य त्वनुज्ञां लप्स्येहं,च .

(०३)(देवते हि तान् देवयते (for देवति तान् ) (२)ष्ट्रो हि पाण्ड० वान् ष्ट्रोम्बिकासुतः (३) हि (for ()भि),

(०४)( तु (for (अ)पि) (२)चिकीर्षितुं (३)एताम् (for एवम्) अप्यायतीन्; अव्यायतीं रक्षेन् (for रक्षन् ) (४)अर्हसि (for अर्हति),.

(०५)(३) क-उन्मदानमिदं, ख-इन्मादनादृते- नामपि द्विषाम्, उन्मादनमृते; उत्पाटनामृते; उन्मादनाद्दते उन्मादनमि (मृ)दं (४)स्थाने (for स्थानां ) महाद्युते; महद् द्विषां; अपि द्विषां.

(०६) (जानामि; ति (for सि) (ए)व (for हि) जानात्येव तथा क्षत्ता (३) यत्तु (for यच्च) अब्र०वीत्त्वां

तानि सर्वाणि वाक्यानि यच्चान्यत्परिदेवितम्।
विचिन्त्य नाधिगच्छामि गमनायेतराय वा ॥ ७ ॥ [०१]

ममापि हि महान्हर्षो यदहं भीमफाल्गुनौ।
क्लिष्टावरण्ये पश्येयं कृष्णया सहिताविति।[०२]

न तथा ह्याप्नुयां प्रीतिमवाप्य वसुधामिमाम्। ॥ ८ ॥
दृष्ट्वा यथा पाण्डुसुतान्वल्कलाजिनवाससः ।[०३]

किं नु स्यादधिकं तस्माद्यदहं द्रुपदात्मजाम्।
द्रौपदीं कर्ण पश्येयं काषायवसनां वने।[०४]

यदि मां धर्मराजश्च भीमसेनश्च पाण्डवः ।
युक्तं परमया लक्ष्म्या पश्येतां जीवितं भवेत् ॥ ९ ॥ [०५]

उपायं न तु पश्यामि येन गच्छेम तद्वनम्। ॥ १० ॥ [०६]

यथा चाभ्यनुजानीयाद्गच्छन्तं मां महीपतिः ।[०७]

---

च मां चैव (४)वचनं (for च वचस्) तथा (for तदा),

(०१) (यानि; ततः (for तानि ) सर्वाणि ) (for पू) (२) (अ)न्यं (for अ न्यत्) अपि (for परि ) (३)आचिन्त्य (for वि) मा (for न) निश्चितं गच्छेद्; निश्चियो राज्ञो; निश्चियं गच्छेर् (राजा; गच्छेद्) (for नाधिगच्छामि) (४)विजयाय (for गमनाय) च (for वा),

(०२)(च ; सु (for हि) महाहर्षो (२)फाल्गुनौ (३)कृष्टा (for क्लिष्टा) (४) (अ)पि (for (इ)ति),

(०३) (अ)वाप्नुयां; ह्या (for प्रा ) (२)इमां (for अपि), (४)वासिनः वाससान्.

(०४)(तु; तत् (for नु ) वाभ्यधिकं (for स्याद), (२)यद्वने (for यदहं) (३)पश्यामि (for पश्येयं) (४)कषाय०; काशाय नाम्बरां; नामपि (for नां वने),

(०५)(ख-दृष्ट्वा यथा पाण्डुसुतान् वल्कलाजिनवाससः ।,किंनु स्यादधिकंतस्माद्यदहं द्रुपकदात्मजाम् ॥ , द्रौपदीं कर्ण जश्येयं काणायवसनां वने ।, (अधिकः पाठः),यदि मा; यदिदं (२)भीमसेनेन पाण्डवाः (३)उक्तं परमया भक्त्या .

(०६)(तु न नानु० पश्यामो;, गच्छामि (for पश्यामि) (२)गच्छामि (for गच्छेम ),

(०७) (यथा वा; स यथा (for यथा च ) अ प्यनु; ह्यनु; नाभ्यनु ) (for अभ्यनु) (२) मां व्रजन्तं; व्रजन्तं मां; इच्छतोस्मान् (for गच्छन्तं मां),

स सौबलेन सहितस्तथा दुःशासनेन च ।
उपायं पश्य निपुणं येन गच्छेम तद्वनम् ॥ ११ ॥(०१)

अहमप्यद्य निश्चित्य गमनायेतराय च ।
कल्यमेव गमिष्यामि समीप पार्थिवस्य ह ॥ १२ ॥(०२)

मयि तत्रोपविष्टे तु भीष्मे च कुरुसत्तमे।
उपायो यो भवेद्दृष्टस्तं ब्रूयाः सहसौबलः ॥ १३ ॥(०३)

वचो भीष्मस्य राज्ञश्च निशम्य गमनं प्रति।
व्यवसायं करिष्येऽहमनुनीय पितामहम् ॥ १४ ॥(०४)

**वैशम्पायनः-**

तथेत्युक्त्वा तु ते सर्वे जग्मुरावसथान्प्रति।
व्युषितायां रजन्यां तु कर्णो राजानमभ्ययात् ॥ १५ ॥ (०५)

ततो दुर्योधनं कर्णः प्रहसन्निदमब्रवीत्।।

**कर्णः-**

उपायः परिदृष्टोऽयं तं निबोध जनेश्वर ॥ १६ ॥(०६)

घोषा द्वैतवने सर्वे त्वत्प्रतीक्षा नराधिप।
घोषयात्रापदेशेन गमिष्यामो न संशयः ॥ १७ ॥(०७)

---

(०१)(सौबलेयेन (for स सौबलेन), सर्वैश्च (for सहितम् ) (४)गच्छाम; गच्छामि (for गच्छेम),
(०२)कर्ण उ(अहमद्य विनिश्चित्य; अहं चाप्य (अहमप्य) नुगच्छामि (२)च (for वा) (३)कल्यम् (for काल्यम् ) (४)ह (for हि),
(०३)( च (for च) सत्तम (३)मे (for यो), (४)तद् (for तं), ब्रूयात् (for ब्रूयाः) तव (for सह०),
(०४)(वचो (for ततो) (२)निशाम्य ,वचनं प्रति० (४)याय्य (for नीय),
(०५) (४)अभ्यगात् ; अब्रवीत (for अभ्ययात्) .
(०६) (२)वाक्यम् (for इदम्) (३)यस्; , नस् (for ऽयं) (४)जनाधिप; नरेश्वर; नराधिप.
(०७)(२)त्वत्प्रतीक्ष्या महा (ह्वी) भुज (for नरा ) (४)वनं प्रति (for न संशयः),

उचितं हि सदा गन्तुं घोषयात्रां विशाम्पते।
एवं च त्वां पिता राजन्समनुज्ञातुमर्हति ।। १८ ।।(०१)

**वैशम्पायनः-**

तथा कथयमानौ तौ घोषयात्राविनिश्चयम्।
गान्धारराजः शकुनिः प्रत्युवाच हसन्निव ।। १९ ।।(०२)

**शकुनिः-**

उपायोऽयं मया दृष्टो गमनाय निरामयः ।
अनुज्ञास्यति नो राजा बोधयिष्यति चाप्युत ।। २० ।।(०३)

घोषा द्वैतवने सर्वे त्वत्प्रतीक्षा नराधिप।
घोषयात्रापदेशेन गमिष्यामः सरः प्रति ।। २१ ।। (०४)

लक्षालङ्कारः - घोषा द्वैतवन इत्यत्र 'घोष आभीरपल्ली स्यात्' इत्यभिधानात् घोषाः गोव्रजाः त्वत्प्रतीक्षाः ता प्रति मासं प्रति ईक्षा येषामपेक्षिता ते तथोक्ताः ।

ततः प्रहसिताः सर्वे तेऽन्योन्यस्य तलान्ददुः ।
तदेव च विनिश्चित्य ददृशुः कुरुसत्तमम् ।। २२ ।। (०५)

---

(०१)(उचितां तु; ते (for हि) (२)घोषयात्रा न संशयः (for विशां पते) (३)अ-ज्ञापितो राजास; ख-चेत् त्त्वां पितां; घ-स्थापिता राजन्,त्वां च च त्वा; चोक्ते; चेत्त्वां त्वत्पिता; स्वपिता (for त्वां पिता) (४) त्वामनु (for समनु),

(०२)(तु (for तौ) (२)श्चितौ; श्चये (३)गन्धार राजः सुबल (for शकुनिः) (४)इत्यु (for प्रत्यु ) शकुनिः प्रत्युवाच ह.

(०३) (१)थ (for यं) महान् (for मया), (३)वो; , वै (for नो ) (४)बोध; नोद; मोद (for चोद) वा (for च ) पुनः (अ)च्युत (for (अ)प्युत),

(०४) (२)त्वत्प्रतीक्ष्या जनाधिप; महीभुजः (४) गमिष्याम; मि सरः प्रति (for न संशयः) .

(०५) (२)ह्यन्यो; अन्यो (for तेऽन्यो) बलान्; तलं (for तलान् ) (३)तदैव; तदेवं तु (for च), स (for वि),

वनपर्वणि १९४तमेऽध्याये २२श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि घोषयात्रामन्त्रणे चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥

(घोषयात्रापर्वणि ३ अध्यायः)

## 03- 04 - 195Adhyaya

# १९५. पञ्चनवत्यधिकशततमो अध्यायः

**दुर्योधनेन घोषयात्राव्याजेनानुजादिभिस्सह द्वैतवनं प्रति गमनम् ॥ स्वकीयं प्रस्तावमनङ्गीकृतवतो धृतराष्ट्रस्य शकुनिकर्तृकं प्रबोधनं ततस्तस्यानुमतिदानं दुर्योधनस्य प्रस्थानं च**

**वैशम्पायनः**

धृतराष्ट्रं ततः सर्वे ददृशुर्जनमेजय।
**पृष्ट्वा सुखमथो राज्ञः पृष्टा राज्ञा च भारत ॥ १ ॥** (०१)

ततस्तैर्विहितः पूर्वं समङ्गो नाम वल्लवः ।
**समीपस्थास्तदा गावो धृतराष्ट्रे न्यवेदयत् ॥ २ ॥** (०२)

**लक्षालङ्कारः - समङ्गो नाम वल्लव इत्यत्र वल्लवः गोपालः ।**

अनन्तरं च राधेयः शकुनिश्च विशाम्पते।
**आहतुः पार्थिवश्रेष्ठं धृतराष्ट्रं जनाधिपम् ॥ ३ ॥** (०३)

---

(०१)(२)दृष्ट्वा ते (for ददृशुर्),पृथिवीपतिं (for जनमे) (३) दृष्ट्वा; पृष्टः; स्पृष्ट्वा पृष्ट्वा ) राज्ञा; ० जा (for ज्ञः) (४)पृष्टो पृष्ट्वा.

(०२)(सर्वं; पूर्वे (for पूर्वं) (२) घ-समगो, सङ्गमो; सङ्गवो (for समङ्गो) वल्लभः;पल्लवः (for बल्लवः) (३)तथा (for तदा ) गा वै; ,गोपं (for गावो),

(०३) (२)महारथः; महाबल (for विशां पते) (३)पाण्डव (for पार्थिव (४)नराधिपं; जनेश्वरं (for

## शकुनि-कर्णौ-

रमणीयेषु देशेषु घोषाः सम्प्रति केशव।
स्मारणं समयः प्राप्तो वत्सानामपि चाङ्कनम् ।। ४ ।। (०१)

लक्षालङ्कारः - स्मारणं समयम् इत्यत्र स्मारणं स्मरणयोग्यम् ।

स्मारणे स्मरणहेतौ कर्मणि । गवां सङ्ख्यापूर्वकं वयोवर्ण०

जातिनाम्नां लेखने । स्मारणासमय इति गौडाः पठन्ति ।(०२)

मृगया चोचिता राजन्नस्मिन्काले सुतस्य ते।
दुर्योधनस्य गमनं समनुज्ञातुमर्हसि ।। ५ ।। (०३)

## धृताराष्ट्रः

मृगया शोभना तात गवां हि समवेक्षणम्।
विश्रम्भस्तु न गन्तव्यो वल्लवानामिति स्मरे ।। ६ ।। (०४)

ते तु तत्र नरव्याघ्राः समीप इति नः श्रुतम्।
अतो नाभ्यनुजानामि गमनं तत्र वः स्वयम् ।। ७ ।। (०५)

छद्मना निर्जितास्ते तु कर्शिताश्च महावने।

---

जना),
(०१)(२)घोषान्; घोराः (for घोषाः पार्थिव (for कौरव) (३)स्मारणे; स्मरणा०; स्मरणो (for स्मारणा) संशयः (for समयः) .
(०२)(४)काञ्चनं; ,चाङ्कने चाङ्कितुं; चाङ्कितं (for चाङ्कनम्),
(०३)(१)चोदिता (for चोचिता) (२)तस्मिन् (for अस्मिन्) लोके (for काले), तु तस्य (for सु ) (for ते ) (३)गमने (४) समनु; तदनु (for त्वमनु),.
(०४)(शोभनं (for ना) (२)हि (for च ) परिरक्षणं (for समवे०) गवां चैवमवेक्षणं; गवानां च समीक्षण (३) विस्रम्भस्तु; सविश्रम्भे (for भो); सुः (for स) विस्रभ्य च (for तु ) कर्तव्यं (for गन्तव्यो। ) (४)वल्लभानां); पाण्डवानाम् (for बल्लवानाम्) स्मरन्; श्रुतं; स्म ह (for स्मरे) .
(०५)(हि; (ऽ पि ) तु (३)ततो (for अतो ) हि ) (for (अ)भि) (४)यत् (for वः),

तपोनित्याश्च राधेय समर्थाश्च महारथाः ।। ८ ।। (०१)

धर्मराजो न सङ्क्रुद्ध्येद्भीमसेनस्त्वमर्षणः ।
यज्ञसेनस्य दुहिता तेज एव तु केवलम्।(०२)

यूयं चाप्यपराध्येयुर्दर्पमोहसमन्विताः ।। ९ ।।
ततो विनिर्दहेयुस्ते तपसा हि समन्विताः ।(०३)

अथवा सायुधा वीरा मन्युनाभिपरिप्लुताः ।
सहिता बद्धनिस्त्रिंशा दहेयुः शस्त्रतेजसा ।। १० ।।(०४)

अथ यूयं बहुत्वात्तानभियात कथञ्चन।
अनार्यं परमं तत्स्यादशक्यं तच्च वै मतम् ।। ११ ।।(०५)

उषितो हि महाबाहुरिन्द्रलोके धनञ्जयः ।
दिव्यान्यस्त्राण्यवाप्याथ ततः प्रत्यागतो वनम् ।। १२ ।।(०६)

अकृतास्त्रेण पृथिवी जिता बीभत्सुना पुरा।

---

(०१)(आत्मना; जिह्मिता (for छद्मना ) ते तु; तत्र; सर्वे; तेपि (for ते हि ) (२)कर्षिताश्च; गताश्चैव तु (for च ) तथा वने नीतिज्ञाश्चैव राधेय समर्थाश्चैव भारत.

(०२)(अ)पि; तु (for न ) सङ्कुप्येद् (for सङ्क्रुध्येद् ) (२) (अ)म०र्षितः (for (अ)मर्षणः) भीमो नित्यममर्षणः (४)तेजसा सा (for तेज एव),

(०३)(एवं (for यूयं) (अ)पराधेषुर्) हि राधेय अ पराध्येयुर् (for अ पराध्येयुर्) , यूयं च पुनराधेय (२) अर्थ (for दर्प) (४) (अ)भि च (for हि),.

(०४)( ख-ततो विनिर्दहेयुस्ते तपसाहि समान्विता (अधिकः पाठः),,(२) समीरिताः (for परिप्लुताः (३)वर्मिणो (for सहिता) (४)तत्र (for शस्त्र),

(०५) तानालभेयुः (यं); तान्नारभेध्वं ; च नाक्षिपध्वं ; तानाकृतध्वं ; तु ताल्लभध्वं; तान्ना (ना) रभेरन् ; ताना ) (न्ना) क्षिपन्तः तान्नाक्षिपध्वं; तान्नाक्षिपेयुः; , तान्ना०पराध्यन्; , तान्नालम्बध्वं; न नापराघ्नं; तान्नारभ० (ब) ध्वं ; तानपराध्यान्; तानभि० यात; तानारभध्वं ) अथ यूयं बहून्बाहूनारभेरन्कथञ्चन (३) अन्यायं; अनार्षयं (for अनार्यं) च परं; च वनं (for परमं ) तस्मात् (for तत्स्यात्) (४) तन्न शक्यं; क्षमं शक्यं; तदशक्यं (for अशक्यं तच् )वै (for मे) .

(०६)(उषित्वा (२)इन्द्रलोकं; स्वर्ग०लोकं (for इन्द्रलोके ) (३)सर्वाणि (for दिव्यानि ) चावाप्य; (अ) थावाप्य; सम्प्राप्य (for (अ)वाप्याथ),

किं पुनः स कृतास्त्रोऽद्य न हन्याद्वो महारथः ।। १३ ।।(०१)

अथवा मद्वचः श्रुत्वा तत्र यत्ता भविष्यथ
उद्विग्नवासो..विस्रम्भात् दुःखं तत्र भविष्यति ।। १४ ।। (०२)

लक्षालङ्कारः - उद्विग्नवासो..विस्रम्भात् इत्यत्र र्त पाण्डवानां वासः आश्रमः अविस्रम्भात् भवतामविश्वासात् उद्विग्नवासः उद्वेगः फलमूलापहारादिना भयं तेन युक्तो भविष्यति । भवदीयाः (क) किञ्चिदुपद्रवं करिष्यन्तीति भावः ।

अथवा सैनिकाः केचिदपकुर्युर्युधिष्ठिरम्।
तदबुद्धिकृतं कर्म दोषमुत्पादयेच्च वः ।। १५ ।।(०३)

तस्माद्गच्छन्तु पुरुषाः स्मारणायाप्तकारिणः ।
न स्वयं तत्र गमनं रोचये तव भारत ।। १६ ।।(०४)

### शकुनिः

धर्मज्ञः पाण्डवो ज्येष्ठः प्रतिज्ञातं च संसदि।
तेन द्वादश वर्षाणि वस्तव्यानीति भारत ।। १७ ।।(०५)

अनुवृत्ताश्च ते सर्वे पाण्डवा धर्मचारिणः ।
युधिष्ठिरस्तु कौन्तेयो न नः कोपं करिष्यति ।। १८ ।।(०६)

---

(०१)(भीताः । स्म (for पृथिवी ) (२)वयं (for जिता ) तदा (for पुरा (३)सुकृतोस्त्रो (for स कृतास्त्रो ) हि (for ऽद्य ) (४)नि (for न) वै (for वो ) न तु हन्यो महारथः,च.

(०२)(यद्वच (for म ) अथ मद्वचनं श्रुत्वा (२)यन्न; यन्ता यात्वा (for यत्ता) (३)वासे; वाचो; वासा (for वासो ) विस्र (श्व) ब्धाद् विश्रं (स्रं) भो विस्रम्भाद् ऽ उद्विग्ना वासवि०स्रब्धाद् (४) दुःस्वात्; वासं; वासास् (for दुःखं ) गमिष्यथ (for भवि ) .

(०३)( खृ-इद्विग्न वा सुविस्रब्धा दुःखंतत्र गमिष्यथ । (अधिकः पाठः),(२)उपा अपा (for अप ) युधिष्ठिरं; हो महात्मसु (३) तदा (for तद ) (४)येद्धि; येत; येत्तु येत् (for येच्च ) तव; तदो ) (for वः),

(०४) (तस्मादन्ये (न्य०) नरा यान्तु;देऽ तस्मादन्यो नरो यातु (२) स्मर०णाय सकारणाः; आ त्तकारणात, अधिकारिणः; आ त्तकारिणः (३) स्वयं न (४)रोचते तत्र (for तव),

(०५)(पाण्डवश्रेष्ठः (२)प्रतिज्ञाते; ज्ञातश्; परिज्ञातश् (३)ततो (for तेन) .

(०६) (०व्रता० (for वृत्ता ) तं (for ते ) (२)पाण्डवं ०चारिणं (३)तु (for च) (४)नरः; तु , न वः

मृगयां चैव नो गन्तुमिच्छा संवर्तते भृशम्।
स्मारणं तु चिकीर्षामो न तु पाण्डवदर्शनम् ।। १९ ।।(०१)

न चानार्यसमाचारः कश्चित्तत्र भविष्यति।
न च तत्र गमिष्यामो यत्र तेषां प्रतिश्रयः ।। २० ।।(०२)

**वैशम्पायनः**

एवमुक्तः शकुनिना धृतराष्ट्रो जनेश्वरः ।
दुर्योधनं सहामात्यमनुजज्ञे न कामतः ।। २१ ।।(०३)

अनुज्ञातस्तु गान्धारिः कर्णेन सहितस्तदा।
निर्ययौ भरतश्रेष्ठो बलेन महता वृतः ।। २२ ।।(०४)

दुःशासनेन च तथा सौबलेन च धीमता।
संवृतो भ्रातृभिश्चान्यैः स्त्रीभिश्चापि सहस्रशः ।(०५)

तं निर्यान्तं महाबाहुं द्रष्टुं द्वैतवनं सरः ।
पौराश्चानुययुः सर्वे सहदारा वनं च तत् ।। २३ ।।(०६)

अष्टौ रथसहस्राणि त्रीणि नागायुतानि च।

---

(for न नः),

(०१) (एव; अपि; चापि (for चैव) (२) संवर्तते इच्छा सम्प्रति वर्तते (३)स्मरिणां; स्मरणं तु ) (for च ) करिष्यामो चिकीर्षामो ) स्मरणाच्च विकर्षामो (४) न नः (for न तु ) तो वयं पाण्डवनन्दनं.

(०२) (२)कच्चित् (for कश्चित् ) अत्र । गमि (for भवि ) (३) अ-तत्रासमाचारो; ख-तत्र गमिष्यामो, न च तत्र )(०त्रा०) समाचारो (४) तत्र (for यत्र) समा; परि (for प्रति),

(०३) (२)जनाधिपः प (for जनेश्वरः ) दुर्योधनः सहामात्यः अनुज्ञेयोथ कामतः.

(०४) (च (for तु) गान्धारः (२)ततः (for तदा ) (३)श्रेष्ठ (for श्रेष्ठो) (४)सौबलेन समावृतः.

(०५)(तदा (for तथा ) (२)सौबलेयेन (for लेन च) धीमता (for देविना ) (३)आवृतो; प्र सर्वैश्च; सर्वशो (for संवृतो) सार्धं (for चान्यैः) (४)चैव (for चापि) .

(०६)ख-तंविर्यान्तं महाबाहुं द्रष्टुं द्वैतवनं सरः ।(अधिकःपाठः),(तं निर्यातं; निर्यातं तं (२)दृष्ट्वा (for द्रष्टुं ) शरं; प्रति (for सरः ) (३)निर्ययुः (अ) नुययुः (४)दारे (for दारा बलं (for वनं ) गताः; गतं; हि तत्; यतः (for च तत्),

पत्तयो बहुसाहस्रा हयाश्च नवतिः शताः ।। २४ ।।(०१)

शकटापणवेशाश्च वणिजो वन्दिनस्तथा।
नराश्च मृगयाशीलाः शतशोऽथ सहस्रशः ।। २५ ।।(०२)

ततः प्रयाणे नृपतेः सुमहानभवत्स्वनः ।
प्रावृषीव महावायोरुद्धतस्य विशाम्पते ।। २६ ।।(०३)

गव्यूतिमात्रे न्यवसद्राजा दुर्योधनस्तदा।
प्रयातो वाहनैः सर्वैस्ततो द्वैतवनं सरः ।। २७ ।।(०४)

वनपर्वणि १९५तमेऽध्याये २७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि दुर्योधनप्रस्थाने पञ्चनवत्यधिकशततमोऽध्यायः ।। १९५ ।।

## 03- 04 - 196Adhyaya

महाभारततात्पर्यनिर्णये २२ अध्याये

वने वसत्स्वेव च पाण्डवेषु चक्रे यज्ञं पौण्डरीकाख्यमेव ।

---

(०१) (२)नागशतानि (for नागायु० ) (३)पत्तिनो; पत्त्यश्च; पत्तिश्च; , पत्तीनां (for पत्तयो ) (४) हयाश्वा; यानं च; हयानां नवतिं; तावतिः; तावती (for नवतिः) शतं.
(०२)(वंशा वेशा०); वेषा (for वैश्या) (for ०वेश्या) (२)वाणिजो.
(०३)(प्रयाते (for णे) नृपतौ (for तेः) (२)सुमहान् अभवत् (३)०बाहोर् (for वायोद्) (४)उद्धतस्य; उत्थि; रूक्षि (for उद्ध०),
(०४)( ऽ )भ्यवसद्; , निवसन् (for न्यवसद् ) (२) तथा (for तदा) (३) साध (for सर्वैस्) (४) यतो; तदा (for ततो) .

संस्पर्धया राजसूयस्य राजा दुर्योधनो नाप्यसौ तत्कलार्हः ।। ३७७ ।।
दुर्योधनस्याऽज्ञया पाण्डवानां दुःशासनः प्रेषयामास तत्र ।
आगच्छतेत्यवमानाय तं तु भीमोऽवादीद् रणयज्ञं स्वगम्यम् ।। ३७८ ।।
ततो दिनैः कैश्चन धार्तराष्ट्राः सकर्णगान्धारनृपाः कुमन्त्रतः ।
सभार्यकाः पाण्डवान् द्रौपदीं च महैश्वर्यं दर्शयित्वाऽवमन्तुम् ।। ३७९ ।।

तै स्यन्दनैः काञ्चनरत्नचित्रैर्महागजैस्तुरगैः पत्तिभिश्च ।
स्वलंकृताश्चित्रमाल्यम्बराश्च विनिर्ययुर्द्वैतवनाय शीघ्रम् ।। ३८० ।।
गवां दृष्टिच्छद्मना निर्गतांस्तान् ज्ञात्वा शक्रस्तेजसो भङ्गकामः ।
तत्सामर्थ्यं वरमस्मै प्रदाय तद्बन्धनायादिशच्चित्रसेनम् ।। ३८१ ।।
स षष्टिसाहस्रकोटियूथपैर्गन्धर्वमुख्यैः संवृतोऽगात् सरस्तत् ।
यस्मिन् स्नातुं वाञ्छति धार्तराष्ट्रस्तदाज्ञया पुरुषास्तानथोचुः ।। ३८२ ।।
स्नातुं समायास्यति धार्तराष्ट्रो राजेश्वरो निस्सरध्वं तदस्मात् ।
तीर्थादाज्ञां धारयन्तश्च तस्येत्युक्ता गन्धर्वा जहसुस्तानथौच्चैः ।। ३८३ ।।
ऊचुर्वयं मानयामस्तदाज्ञां त्रिलोकानां यः पतिः शक्रदेवः ।
न मानुषाणामपि चक्रवर्तिनां किम्वल्पसारस्य सुयोधनस्य ।। ३८४ ।।
इतीरिते कुपितो धार्तराष्ट्रो जघान गन्धर्ववराञ्छरौघैः ।
जघ्नुः सकर्णा अपि तस्य सोदरा जघ्नुश्च ते धार्तराष्ट्रस्य सेनाम् ।। ३८५ ।।
मुहूर्तमासीत् सममेव युद्धं तेषां तदा धार्तराष्ट्रस्य चैव ।
पुरां भिन्दोर्वरतो मायया च गन्धर्ववीरा ववृधुस्ततः स्म ।। ३८६ ।।
तेजोभङ्गं तत्र सुयोधनस्य पार्थार्थमत्र प्रविधातुमेव ।
बलं ददावब्जजः केशवश्च गन्धर्वाणां तेऽभ्ययुर्धार्तराष्ट्रान् ।। ३८७ ।।

स चित्रसेनः प्रथमं कर्णमेव युयोध पार्थस्पर्धया तेन युद्ध्न् ।
कर्णो नाशक्नोद् वचनाद् भार्गवस्य रामस्य नित्यामितषड्गुणस्य ।। ३८८ ।।
स भग्नयानश्च विकर्णयानमास्थाय तस्यैव नियम्य वाजिनः ।
पराद्रवत् तेन सहैव शीघ्रं दुर्योधनश्चित्रसेनं युयोध ।। ३८९ ।।
मुहूर्तमेतेन समं स युद्ध्नन्यैर्गन्धर्वैर्बहुभिर्माययैव ।
भग्ने रथे भूमितले स्थितः सन् गृहीत आसीच्चित्रसेनेन सङ्ख्ये ।। ३९० ।।
महाबलो धार्तराष्ट्रोऽपि शक्रवराद् विष्णोराज्ञया चाभिवृद्धे ।
स चित्रसेनेन धृतस्तदाऽसीद् बद्धः पाशैर्वैद्युतैरिन्द्रदत्तैः ।। ३९१ ।।
तस्यानुजाः शकुनी राजभार्याः सर्वे बद्धाः शक्रदूतैः प्रणीताः ।
आदाय तानम्बरे सम्प्रयातेष्वरूरुवन् पाण्डवान् मन्त्रिणोऽस्य ।। ३९२ ।।
समीपमागत्य पृथासुतानां पराभूतं वः कुलं शक्रभृत्यैः ।
धृतः सभार्यः सानुजो धार्तराष्ट्रस्तं मोचयध्वं भ्रातरं भारताग्र्याः ।। ३९३ ।।
इत्युक्त ऊचे भीमसेनोऽग्रजं स्वं जाने राजन् यादृशोऽयं विमर्दः ।
ऐश्वर्यं स्वं दर्शयन् नः समागाद् दुर्योधनस्तेजसो भङ्गमिच्छन् ।। ३९४ ।।
विज्ञाय तेषां मन्त्रितं वज्रबाहुरेतच्चक्रे नात्र नः कार्यहानिः ।
दिव्यं ज्ञानं स्वात्मनो दर्शयन् स एतावदुक्त्वा विरराम भीमः ।। ३९५ ।।
एकाहयज्ञे दीक्षितेनैव राज्ञा सम्प्रेषितो भीमसेनोऽर्जुनश्च ।
समाद्रेयौ चित्रसेनं रणे तौ विजित्य दुर्योधनमाश्वमुञ्चताम् ।। ३९६ ।।

# १९६. षण्णवत्यधिकशततमो अध्यायः ।

द्वैतवने सरोभितः क्रीडास्थाननिर्माणायाज्ञप्तानां दुर्योधनभृत्यानां पूर्वमेवतत्रागतै र्गन्धर्वैः प्रतिवारणम् ।। १ ।। भृत्यैर्गन्धर्वक-तनिवारणं निवेदितेन दुर्योधनेन

**तेषामुत्सारणाय सेनाप्रषणम् ।। २ ।। गन्धर्वैः परुषभाषणैर्भीषितानां भटानां दुर्योधनं प्रति तन्निवेदनम् ।। ३ ।। ससैन्यस्य दुर्योधनस्य द्वैतवने गमनं गवां निरीक्षणं च तत्सैनिकानां गन्धर्वाणां च कलहः**

**वैशम्पायनः-**

अथ दुर्योधनो राजा तत्र तत्र वने वसन्।
**जगाम घोषानभितस्तत्र चक्रे निवेशनम् ।। १ ।।**(०१)

**रमणीये समाज्ञाते सोदके समहीरुहे।**

देशे सर्वगुणोपेते चक्रुरावसथान्पराः ।(०२)

तथैव तत्समीपस्थान्पृथगावसथान्बहून्।
**कर्णस्य शकुनेश्चैव भ्रातणां चैव सर्वशः ।। २ ।।** (०३)

ददर्श स तदा गावः शतशोऽथ सहस्रशः ।
**ॠ अङ्कैर्लक्षैश्च ताः सर्वा लक्षयामास पार्थिवः ।। ३ ।।**(०४)

अङ्कयामास वत्सांश्च जज्ञे चोपसृतांस्त्वपि।
**बालवत्साश्च या गावः कालयामास ता अपि ।। ४ ।।**(०५)

---

(०१) (३)जघान (for जगाम) (४)प्रतिश्रयं (for निवेशनम्),

(०२)(समे ज्ञाते देशेभि (हि च) रमणीये च (२) सोदके समभूतले (३)तस्य; तथा; अत्र; तत्र (for देशे) पेतं (for पेते) (४)आव० सथान्! .

(०३)(तत्रैव तत् ,तत्र तत्र; तथापि तत् (for तथैव तत्) ०पेन्यान् (for पस्थान्) (२)प्रधाना (for पृथगा ) (३) ख-तथैव तत्समीपे..न्यान् पृथमावसथान् बहुन् ।, (अधिकः पाठः),कर्णश्च शकुनिश्चैव; , बहूस्तथैव कर्णस्य (४)अपि; चास्य (for चैव) सङ्घशः; सर्वथा (for सर्वशः) .

(०४)(ददृशे स; स ददर्श पश्यन्तस्ते ततो (for तदा ) गा वै; गाश्च (for गावः) (३)लक्ष्यैश्च; अक्षैश्च; वक्षसि (for लक्षैश्च ) तान्सर्वात्र् (for ताः सर्वा) (४) शतशोथ सहस्रशः.

(०५)(अङ्कयाताः सवत्साश्च (२)यज्ञे; राज्ञा; राज्ञे (for जज्ञे ) चोपहृतानपि तांस्त्वपि); भृ (धृ) तांस्त्वपि; ज्ञ ०सृतांसवपि; सृतांस्त्वसि (यि) हृता०मपि; (चोपा ) स्यतास्वपि; चोपसृता अपि; (३)गावश्च; या गाश्च (for या गावः) (४)कलयामास; दर्शया; दमया; गणया.

अथ स स्मारणं कृत्वा लक्षयित्वा त्रिहायनान्।
वृतो गौपालकैः प्रीतो व्यहरत्कुरुनन्दनः ।। ५ ।।[०१]

स च पौरजनः सर्वः सैनिकाश्च सहस्रशः ।
यथोपजोषं चिक्रीडुर्वने तस्मिन्यथामराः ।। ६ ।।[०२]

ततो गोपाः प्रगातारः कुशला नृत्यवादने।
धार्तराष्ट्रमुपातिष्ठन्कन्याश्चैव स्वलङ्कृताः ।। ७ ।।[०३]

स स्त्रीगणावृतो राजा प्रहृष्टः प्रददौ वसु।
तेभ्यो यथार्हमन्नानि पानानि विविधानि च ।। ८ ।।[०४]

ततस्ते सहिताः सर्वे तरक्षून्महिषान्मृगान्।
गवयर्क्षवराहांश्च समन्तात्पर्यकालयन् ।। ९ ।।[०५]

स ताञ्छरैर्विनिर्भिद्य गजांश्च सुबहून्वने।
रमणीयेषु देशेषु ग्राहयामास वै मृगान् ।। १० ।।[०६]

गोरसानुपयुञ्जान उपभोगांश्च भारत।
पश्यन्स रमणीयानि वनान्युपवनानि च ।। ११ ।।[०७]

---

(०१) (सं (for स) स्मरणं; स्मारणां (२)सर्वस्यापि (for लक्षयित्वा) त्रिहायनं तपांस्यायाति भानवान् (३) ततो (for वृतो) (४)व्याह (च) रत् (for व्यहरत्),
(०२)(जनाः सर्वे मे (२)चैव सर्वश (for च सह ) (३)योगं (for जोषं ) (४)नराः (for (अ)मराः),
(०३) (प्रणेतारः; प्रशास्तारः (for प्रगा) ततोध्व (ध्र्व)गमनात् (न) श्रान्तं (२) नृत्यवादने; ,नृत्तवादने; नृत्यवादिते; नृत्यवादिनः नृत्य, त्त ) वादितैः (४)सहस्रशः) (for स्वलं),
(०४)(स्त्रीपरिवृतो स्त्रीगणा (२)वसुधायां तदा ददौ (३)यथार्थम् (for ईम्) इष्टानि अन्नानि (४) पेयानि; दानानि (for पा) विविधानि बहूनि च .
(०५) (२)वने (for मृगान् ) (३)गवयाश्व (४) वारयन् (for कालयन्) .
(०६) (शताञ्; शतं; त्रस्ताञ् स्रस्ताञ् (for स ताञ्) विभिन्नाङ्गान्; विनिर्भिद्य (for भिन्दन् (२) निघन्न्; तत्र; बद्धान्; वद्वा (for बघन्न् ) गजांश्च सुबहून्वने (४)ग्राहयञ्श (च्छ) तशो मृगान्.
(०७)(उपभुञ्जान; अपि युञ्जान (३) स च (for सु) अप श्यद्रमणी० (४)वनान्युप तानि तानि); सरांसि च (for पुष्पितानि),

मत्तभ्रमरजुष्टानि बर्हिणाभिरुतानि च ।
अगच्छदानुपूर्व्येण पुण्यं द्वैतवनं सरः ।। १२ ।।

ऋद्ध्या परमया युक्तो महेन्द्र इव वज्रभृत् ।। १३ ।।(०१)

मत्तभ्रमरसञ्जुष्टं नीलकण्ठरवाकुलम्।
सप्तच्छदसमाकीर्णं पुंन्नागव(ब)कुलैर्युतम्।

यदृच्छया च तत्रस्थो धर्मपुत्रो युधिष्ठिरः

ईजे राजर्षियज्ञेन सद्यस्केन विशाम्पते। ।। १४ ।। (०२)

दिव्येन विधिना चैव वन्येन कुरुसत्तम।(०३)

लक्षालङ्कारः - ईजे राजर्षियज्ञेन इत्यत्र राजर्षीणां योग्ययज्ञेन सद्यस्केन तस्मिन् दिन एव क्रियमाणेन ।

विद्वद्भिः सहितो धीमान्ब्राह्मणैर्वनवासिभिः ।। १५ ।।

भीमार्जुनयमैः सार्धं सराभ्याशे तदावसत् ।

कृत्वा निवेशमभितः सरसस्तस्य कौरव।
द्रौपद्या सहितो धीमान्धर्मपत्न्या नराधिपः ।। १६ ।।(०४)

ततो दुर्योधनः प्रेष्यानादिदेश सहस्रशः ।
आक्रीडावसथाः क्षिप्रं क्रियन्तामिति भारत ।। १७ ।।(०५)

---

(०१)(घुष्टानि (२)बर्हणाभिरु; वनान्युपवनानि च (३) आगच्छद् ० आ अ नुपूर्वेण, (४) रम्यं पुण्यं .
(०२)(तत्रस्थो (for तदहो ) (२)राजो (for पुत्रो ) (३)इष्ट्वा (for ईजे ) सत्रेण (for यज्ञेन ),
(०३) (४)साद्यस्केन; स्वकाम्येन; सद्यस्तेन राजन्; चैव (for राजा) कुरुसत्तम .
(०४)(२) सरसस्तत्र तत्सरस्तत्र भारतः केशव कौरव (३) श्रीमान् (for धीमान्) (४) नराधिप महामनाः (तपाः),
(०५)(प्रेक्षा (क्ष्या) न् प्रैष्यान् (२)सहानुगः; सहस्रशः सहानुजैः; विशां पते; सहानुगैः (३)शीघ्रं (for क्षिप्रं) आक्रीडावसथाञ्शीघ्रं (४) क्रियताम् कुरुध्वं सरसोभितः.

ते तथेत्येव कौरव्यमुक्त्वा वचनकारिणः ।
चिकीर्षन्तस्तदाऽऽक्रीडाञ्जग्मुर्द्वैतवनं सरः ॥ १८ ॥(०१)

This Stanza is Interchanged in TRK after 18

सेनाग्र्यं धार्तराष्ट्रस्य प्राप्तं द्वैतवनं सरः ।
प्रविशन्तं वनद्वारि गन्धर्वाः समवारयन् ॥ १९ ॥(०२)

तत्र गन्धर्वराजो वै पूर्वमेव विशाम्पते।
कुबेरभवनाद्राजन्नाजगाम गणावृतः ॥ २० ॥(०३)

गणैरप्सरसां चैव त्रिदशानां तथाऽऽत्मजैः ।
विहारशीलः क्रीडार्थं तेन तत्संवृतं सरः ॥ २१ ॥ (०४)

तेन तत्संवृतं दृष्ट्वा ते राजपरिचारकाः ।
प्रतिजग्मुस्ततो राजन्यत्र दुर्योधनो नृपः ॥ २२ ॥(०५)

ते समेत्य तदा प्रोचुर्गन्तुं नैवोपलभ्यते
रक्षितं बहुभिः शूरै राजन्द्वैतवनं सरः
न्यवेदयंस्ततो राज्ञे गन्धर्वास्तत्र भारत

स तु तेषां वचः श्रुत्वा सैनिकान्युद्धदुर्मदान्।

---

(०१)प्रेष्यान् ०)सहानुगः; सहस्रशः )!); तु, सहानुजैः; विशाम्पते; सहानुगैः ०) शीघ्रं ) क्षिप्रं ) एत ब आक्रीडावसथाञ्शीघ्रं ०) ० क्रियताम् तु, प्र कुरुध्वं सरसोभितः (तत्; तं (for ते) तथोवाच (for तथेत्येव ) तथेत्यक्तेति ) क्ते तु वचनं (३)तथा (for तदा ) क्रीडां (for (आ) क्रीडाञ्),

(०२)(सोपश्यद्; सनागं (for सेनाग्रं ) (२)पुरः तदा (for सरः ) (३)प्रविशन्तो; शत्तद्०; शन्नु नवद्वारि; वनं द्वारि; वनद्वारं; वनं राजन् (४)समवाकिरन्; प्रत्यवारयन्.

(०३) (अत्र, राजा (for तत्र, राजो ) (३)भुवना (for भवना ) (४) (अं)गनावृतः; जना; गणान्वितः (for गणावृतः ) .

(०४) (२)महात्मजैः; तथैव च; तथानुजैः (for तथात्मजैः (३) विहारशैलः; त्रिहायनीनां; विहारशीलं; , शैलैः; शीलैः क्रीडार्थे.

(०५)(ततस्; तैश्च च (for तेन ) ते संवृते (for तत्संवृतं) (३)प्रतिषिद्धा गता राजन् (४) यतो (for यत्र ) (ऽ)भवत् (for नृपः ) .

**प्रेषयामास कौरव्य उत्सारयत तानिति ।। २३ ।।**(०१)

**तस्य तद्वचनं श्रुत्वा राज्ञः सेनाग्रयायिनः ।**
**सरो द्वैतवनं गत्वा गन्धर्वानिदमब्रुवन् ।। २४ ।।**(०२)

**सैनिकाः-**

**राजा दुर्योधनो नाम धृतराष्ट्रसुतो बली।**
**विजिहीर्षुरिहायाति तदर्थमपसर्पत ।। २५ ।।**(०३)

**लक्षालङ्कारः - विजिहीर्षुरिह इत्यत्र विजिहीर्षुः विहारं कर्तुमिच्छुः ।**

**वैशम्पायनः-**

**एवमुक्तास्तु गन्धर्वाः प्रहसन्तो विशाम्पते।**
**प्रत्यब्रुवंस्तान्पुरुषानिदं हि परुषं वचः ।। २६ ।।**(०४)

**गन्धर्वाः-**

**न चेतयति वो राजा मन्दबुद्धिः सुयोधनः ।**
**योऽस्मानाज्ञापयत्वेवं वैश्यानिव दिवौकसः ।। २७ ।।**(०५)

**यूयं मुमूर्षवश्चापि मन्दप्रज्ञा न संशयः ।**
**ये तस्य वचनादेवमस्मात्ब्रूत विचेतसः ।। २८ ।।**(०६)

---

(०१)(ते (for स) (२)सामर्षो वाहिनीं तदा .

(०२)(ततस् (for तस्य ) ते तु तस्य वचः श्रुत्वा (२)सेनानुयायिनः; ग्रगामिनः; ग्रयोधिनः (३) स च (for स्वरो) (४)अब्रवीत् (for अब्रुवन्),

(०३)(२)धार्तराष्ट्रो महाबलः (३)विजिगीषुर् चिक्रीडिषुर् (for विजिहीर्षुर्) जिहीर्षुरीहयामास (४) उपसर्पत (थ); इह स (for अपस ) .

(०४)(उक्त्वा (for उक्तास् ) च (for तु ) (२)प्रहसन्ति पुनः पुनः (for विशां पते ) (४)हि; स ते (for सु),

(०५)(न वेदयति; न चिन्तयति। न च जानाति (for न चेत ) ते वै (for वो ) (२)मन्दबुद्धे स बालिशः (for सुयो) (३)सो ;ये (for यो) विज्ञापयति; आज्ञापयन्ति ए व ए ष (for ए वं) (४)वन्यानिव; वैश्या.

(०६) (चैव (for चापि ) (२)विचेतसः (for न संशयः) (३)ते तस्य; यत्तस्य; एतस्य मूढा (for एवम्)

गच्छध्वं त्वरिताः सर्वे यत्र राजा स कौरवः ।
न चेदद्यैव गच्छध्वं धर्मराजनिवेशनम् ॥ २९ ॥(०१)

लक्षालङ्कारः - धर्मराजनिवेशनं यमपुरम् ।

**वैशम्पायनः-**

एवमुक्तास्तु गन्धर्वै राज्ञः सेनाग्रयायिनः ।
संम्प्राद्रवन्यतो राजा धृतराष्ट्रसुतोऽभवत् ॥ ३० ॥(०२)

वनपर्वणि १९६तमेऽध्याये ३०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्त्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि गन्धर्वदुर्योधनसेनासंवादे षण्णावत्धिकशततमोऽध्यायः ॥ १९६ ॥

(घोषयात्रापर्वणि १ अध्यायः)

## 03- 04 - 197Adhyaya

# १९७.सप्तनवत्यधिकशततमो अध्यायः ॥

गन्धर्वैस्सह कौसवाणामायोधनम् ॥ १ ॥ चित्रसेनादिभिर्विरथीकृतेन कर्णेन रणाङ्गणात् पलायनम् ॥ २ ॥ कौरवाणां गन्धर्वैः सह सङ्ग्रामः कर्णस्य पराजयश्च

**वैशम्पायनः**

---

(४)त्वस्मान् (for अस्मान् ) ब्रूथ; आत्थ क्रूर (for ब्रूत) विशेषतः विचेतसः.

(०१) (गच्छध्वं सुयोधनः (for स कौ ) (३) क-शयाना गच्छत; ख-घ-यथा नागच्छत द्वैतं, शीघ्रमद्यैव; द्वेषसत्यैव; द्वेष्यम ) (मा )द्यैव; न (स) चेद; द्वैषाद्या; द्वेषान्मा यथा ना०गच्छताद्यैव ( त द्वैतं ) (४) निकेतनं .

(०२)(ते सर्वे (for गन्धर्वै ) (२) राज (for राज्ञः ) सेनानुयायिनः; सेनाग्रयो० धिनः ०(३)ततो (४) धार्तराष्ट्रस्ततोभवत्.

ततस्ते सहिताः सर्वे दुर्योधनमुपागमन्।
**अब्रुवंश्च महाराज यदूचुः कौरवं प्रति ।। १ ।।**(०१)

गन्धर्वैर्वारिते सैन्ये धार्तराष्ट्रः प्रतापवान्।
**अमर्षपूर्णः सैन्यानि प्रत्यभाषत भारत ।। २ ।।** (०२)

**दुर्योधनः-**

शासतैनानधर्मज्ञान्मम विप्रियकारिणः ।
**यदि प्रक्रीडते सर्वैर्देवैः सह शतक्रतुः ।। ३ ।।** (०३)

**वयमत्र यथाप्रीता क्रीडिष्यामो निरङ्कुशम्।**

**वयमत्र यथाप्रीताः क्रीडिष्यामो निरन्तरम् ।च**

**वैशम्पायनः-**

दुर्योधनवचः श्रुत्वा धार्तराष्ट्रा महाबलाः ।
**सर्व एवाभिसंनद्धा योधाश्चापि सहस्रशः ।। ४ ।।** (०४)

ततः प्रमथ्य सर्वांस्तांस्तद्वनं विविशुर्बलात्।
**सिंहनादेन महता पूरयन्तो दिशो दश ।। ५ ।।** (०५)

ततोऽपरैरवार्यन्त गन्धर्वैः कुरुसैनिकाः ।
**साम्नैव तत्र विक्रान्ता मा साहसमिति प्रभो ।। ६ ।।**

---

(०१)( च तैः (for ते) (३)अब्रवंश्च महाराजं (४)कौरवान्प्रति.

(०२) (२) (अ)त्यमर्षणः (for प्रतापवान्) (३)पूर्वः (पूर्णः) सैन्यानां (for नि) अमर्षवशमापन्नः .

(०३) (ए)तान् (for (ए)नान्) यद्यपि क्रीडतो यदि विक्रीडते डतो; ०डिते) यदि प्रक्रीडते (डतः हिते); यदत्र क्रीडिते यदि प्रक्रीडने देवैः सर्वैः शचीपति (for शतक्रतुः) .

(०४)( ख-वयमत्र यथा प्रीताः क्रीडिष्यामेनिरङ्कुशम् ;(अधिकः पाठः),(३)एवाति भावेन; एवापि; एव हि (for एवाभि० ) ०सम्पन्ना (for संनद्धा ) (४)यौधा० (for योधा),

(०५)(तत्र (for ततः) सर्वांस्तान् (for गन्धर्वान् ) (२)बलं प्रवि (for तद्वनं वि) महत् (for बलात्) (४) पूरयन्ति.

ते वार्यमाणा गन्धर्वैः साम्नेव वसुधाधिप।
ताननादृत्य गन्धर्वांस्तद्वनं विविशुर्महत् ॥ ७ ॥[०१]

यदा वाचा न तिष्ठन्ति धार्तराष्ट्राः सराजकाः ।
ततस्ते खेचराः सर्वे चित्रसेने न्यवेदयन् ॥ ८ ॥[०२]

गन्धर्वराजस्तान्सर्वानब्रवीत्कौरवान्प्रति।
अनार्याच्छासतेत्येतांश्चित्रसेनोऽत्यमर्षणः ॥ ९ ॥[०३]

अनुज्ञाताश्च गन्धर्वाश्चित्रसेनेन भारत।
प्रगृहीतायुधाः सर्वे धार्तराष्ट्रानभिद्रवन् ॥ १० ॥[०४]

तान्दृष्ट्वा पततः शीघ्रान्गन्धर्वानुद्यतायुधान्।
प्राद्रवंस्ते दिशः सर्वे धार्तराष्ट्रस्य पश्यतः ॥ ११ ॥[०५]

तान्दृष्ट्वा द्रवतः सर्वान्धार्तराष्ट्रान्पराङ्मुखान्।
राधेयः तु तदा वीरो नासीत्तत्र पराङ्मुखः ॥ १२ ॥[०६]

आपतन्तीं तु सम्प्रेक्ष्य गन्धर्वाणां महाचमूम्।
महता शरवर्षेण राधेयः प्रत्यवारयत् ॥ १३ ॥[०७]

क्षुरप्रैर्विशिखैर्भल्लैर्वत्सदन्तैस्तथाऽऽयसैः ।

---

(०१)(परम्; परैर् (for (अ)परैर् ) (२)नन्दनाः; सङ्घकाः; सत्तमाः (for सैनिकाः), बलात् (for महत्),
(०२) (न वाचा न चाव (२) वार्यमाणाः (for धार्त ) (३) खचराः (खे) (४)सेनं (for सेने),
(०३)(२)कौरवं (for वान् ) (३)ख-घ-ञ् शासतेत्येवं, (ए)तान्; (ए)नान्; (ए)ति (for (ए)वं) (४) ()भ्यम; ह्यम ) (for (ऽ) त्यम०),
(०४)(चित्रसेन (for अनुज्ञाता); च (for तु) गन्धर्व (२)अनुज्ञानेन (for चित्रसे) (४)उपा समा (for अभि),
(०५)(द्रवत (for पततः) सर्वान्; शूरान्; सङ्ख्ये; शीघ्रं (for शीघ्रान् ) (३)सङ्घे (for सङ्ख्ये ) सम्प्रद्रवत् प्राद्रवच्च चमूः सर्वा प्राद्रवंस्ते (ते प्राद्रवन्) दिशः सर्वे (४)धीमतः (for पश्यतः),
(०६)(दृष्ट्वा तान् पततः (for द्रवतः) शूरान्; शीघ्रं (for सर्वान् ) (३)राधेयस्तु (for वैकर्तनस् ),
(०७)(च (for तु ) तत्रैव; संवेक्ष्य; तां प्रेक्ष्य (४)समवाकिरत्; समवारयत्,.

गन्धर्वाञ्छतशोऽभ्यघ्नँल्लघुत्वात्सूतनन्दनः ॥ १४ ॥[०१]

पातयन्नुत्तमाङ्गानि गन्धर्वाणां महारथः ।
क्षणेन व्यधमत्सर्वां चित्रसेनस्य वाहिनीम् ॥ १५ ॥[०२]

ते वध्यमाना गन्धर्वाः सूतपुत्रेण धीमता।
भूय एवाभ्यवर्तन्त शतशोऽथ सहस्रशः ॥ १६ ॥[०३]

गन्धर्वभूता पृथिवी क्षणेन समपद्यत।
आपतद्भिर्महावेगैश्चित्रसेनस्य सैनिकैः ॥ १७ ॥[०४]

अथ दुर्योधनो राजा शकुनिश्चापि सौबलः

दुःशासनो विकर्णश्च ये चान्ये धृतराष्ट्रजाः ।
न्यहनंस्तत्तदा सैन्यं रथैर्गरुडनिःस्वनैः ॥ १८ ॥[०५]

भूयश्च योधयामासुः कृत्वा कर्णमथाग्रतः ।
महता रथसङ्घेन रथचारेण चाप्युत ॥ १९ ॥[०६]

वैकर्तनं परीप्सन्तो गन्धर्वान्समवाकिरन् ॥ २० ॥ [०७]

---

(०१)(निशितैर् विविधैर् (for विशिखैर्) बल्लैर्; क्षुद्रैर्; फल्लैर् (for भल्लैद्) क्षुरैः क्षुरप्रैर्विशिखैर् (२) दृढायुधः धैः तथायुधैः (for तथायसैः) (३)(ऽ)भ्याहन्; ()भ्यहनत्; निघन्न्; चाघन्न्; ()भिघन्न्; ()भ्यस्यन्; ह्यघन्न्; न्यघन्न् (for ()भ्यघन्न्),

(०२)(३)विधिमत् (अ)व्यथयत् (for व्यधमत्) सेनां (for सर्वां ) (४)सैनिकान्; संयुगे (for वाहिनीम्),

(०३)युध्य (for वध्य) समरे (for गन्धर्वाः) ते वध्यमानाः कर्णेन गन्धर्वा युद्धकोविदाः; गन्धर्वाः सूतपुत्रेण धीमता भूय एव तु (३) (अ)भि; (अ)न्व) (अ)भ्य) वध्यमाना न्यवर्तन्त० .

(०४) (२)प्रत्यदृश्यत (for समप),.

(०५)(ततो (for अथ) (२) शकुनिश्च महारथः (३)न्यडनन्त (for नंस्तत् ) ते (for तत् ) तथा;महा (for तदा) शरै (for रथै),

(०६)( क-मायोजितं; घ-मायोधनं - मृष्यत, सैन्यमायो (न्यं तं बा) धितं दृष्ट्वा कर्णो राजन्नमर्षितः (३) रथसङ्घेन; शरवर्षेण (for रथघोषेण),

(०७) ( हया (या) रावेण; रथचारेण; योधयामास (for हयचारेण) वाप्यथ चाच्युतः (for चाप्युत) समवाकिरन् (for समवारयन् ) गन्धर्वाः प्रत्य (पर्य) वारयन् .

ततः सन्न्यपतत्(न्) सर्वे गन्धर्वाः कौरवैः सह ।
**तदा सुतुमुलं युद्धमभवल्लोमहर्षणम् ॥ २१ ।** [०१]

ततस्ते मृदवोऽभूवन्गन्धर्वाः शरपीडिताः ।
**उच्चुक्रुशुश्च कौरव्या गन्धर्वान्प्रेक्ष्य पीडितान् ॥ २२ ॥** [०२]

गन्धर्वांस्त्रासितान्दृष्ट्वा चित्रसेनो ह्यमर्षणः ।
**उत्पपातासनात्क्रुद्धो वधे तेषां समाहितः ॥ २३ ॥** [०३]

ततो मायास्त्रमास्थाय युयुधे चित्रमार्गवित्। [०४]
**वियत्सञ्छादयामास न ववौ तत्र मारुतः ॥ २४ ॥**

हस्त्यारोहाः हताः पेतुर्हस्तिभिः सह भारत।
**हयारोहास्सह हयैरथैश्च रथिनस्तदा ॥ २५ ॥**

पत्तयश्च तथा पेतुः विशस्ताश्शरवृष्टिभिः ।
**तया मुह्यन्त कौरव्याश्चित्रसेनस्य मायया ॥ २६ ॥**

**तेन मुक्ताः शरा घोराः सूर्यरश्मिसमप्रभाः ।***

**(अधिकपाठः)**

**वियत्सञ्छादयामासुर्न ववौ तत्र मारुतः ।***

---

(०१)( ते न्यप०; सैन्येप (for संन्यप ) (२)कौरवं प्रति (for वैः सह ) (३)ततः सु; अथासीत्; तदा स्म (for तदा सु) तुमलं (४)उभयोः (for अभवत् ) रोम (for लोम),
(०२)(तु (for ते ) भूत्वा; भूता (for ऽभूवन् ) (३) राजगुप्ता (for उच्चुक्रुशु) वा सर्वे (for कौरव्या) (४)वीक्ष्य (for प्रेक्ष्य) .
(०३) (ताडिता (for त्रासिता) (२) ()भ्य; ह्य; (ऽ)प्य (ऽत्य ) (३)महाक्रद्धो; तदा क्रद्धो (for (आ)सनालद्धो (४)समुद्यतः (for समा),.
(०४)(आसाद्य; आदाय; आच्छाद्य; आश्रिय (for आस्थाय ) ततो मायाः समाहृत्य.

हस्त्यारोहा हताः पेतुर्हस्तिभिः सह भारत ।

हयारोहाश्च सहयै रथैश्च रथिनस्तथा ।

पत्तयश्च यथा पेतुर्विशस्ताः शरवृष्टिभिः ।[०१]

एकैको हि तदा योधो धार्तराष्ट्रस्य भारत।

पर्यवर्तत गन्धर्वैर्दशभिर्दशभिः सह ।

ततः सम्पीड्यमानास्ते बलेन महता तदा ।। २७ ।।[०२]

प्राद्रवन्त रणे भीता ये च राजञ्जिजी(गी)षवः ।

भज्यमानेष्वनीकेषु धार्तराष्ट्रेषु सर्वशः ।[०३]

कर्णो वैकर्तनो राजंस्तस्थौ गिरिरिवाचलः ।। २८ ।।[०४]

दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः ।

गन्धर्वान्योधयामासुः समरे भृशविक्षताः ।। २९ ।।[०५]

सर्व एव तु गन्धर्वः शतशोऽथ सहस्रशः ।

जिघांसमानाः सहिताः कर्णमभ्यद्रवन्रणे ।। ३० ।।

---

(०१) (३)ततो; तथा; तदा (for तया) मुह्यन्ति अ मुह्यन्त कौरव्य; ते सर्वे .

(०२)(एकैकश्च कस्य; कं हि (for को हि ) तथा; महा; यदा; समं (for तदा ) युद्धे; वीरो; योधा; यौधा (for यौधा) (४) दुर्मतेः (for भारत) (३)वर्तन्त वार्य० वार्यं) त (for वर्तत) गन्धर्वा (४)युधि (for सह),

(०३) (तत्र (for ततः (अ)नु (for सं०) (२)युद्धे तस्मिन्महाबलैः (३)प्राद्रवश्च ; व्यद्रवन्त रणे वीरा; वने वीरा; रणे नीता (४)येन (for यत्र) ये न (च) राजञ्जिगीषवः (जीषवः!),

(०४)(धक्ष्यमाणे (for भज्य) सैन्येषु; सर्वेषु; (अ)नेकेषु ) (for (अ)नीकेषु ) (२)धार्तराष्ट्रस्य सर्वतः भारत (३)वीरः (for राजन् ) वैकर्तनो महाराज.

(०५) (अ)पि (च ) कौरव्यः तेजस्वी (for कर्णश्च ) (३) न्योधयामासुः (४)सर्वे च (for समरे) भृशविक्षिताः विकृताः मीक्षिताः; वी०क्षिताः; शरविक्षताः .(च (for तु ) (३)सं०रब्धाः (for सहिताः ) (४) अभ्यद्रवद् कर्णमेवाभिदुद्रुवुः असिभिः पट्टिशैः शूलैर्गदाभिश्च महाबलाः ।

(पट्टसैः खड्गैर् (for शूलैर्)० (२)महाबल; बलः रथाः (for बलाः ) गदामुषलकम्पनैः; गदाभिः परिघैस्तथा.

सूतपुत्रं जिघांसन्तः समन्तात्पर्यवाकिरन् ।। ३१ ।।

अन्येऽस्य युगमच्छिन्दन्ध्वजमन्ये न्यपादयन्।(०१)

ईषामन्ये हयानन्ये सूतमन्ये न्यपातयन् ।। ३२ ।।(०२)

अन्ये च्छत्रं वरूथं च बन्दुरं च तथा परे।

अन्ये सञ्चूर्णयामासुश्छत्रे चाक्षौ तथा परे ।। ३३ ।।(०३)

लक्षालङ्कारः - अन्ये च्छत्रं वरूथं च इत्यत्र स्वस्वासाधारणचिह्नाङ्कितपताकाम् । नल्वो.. पि कश्चिद्रथालङ्कारः ।

गन्धर्वा बहुसाहस्रास्तिलशो व्यधमन्रथम्।(०४)
प्रगृहीतायुधा वीराश्चित्रसेनपुरोगमाः ।। ३४ ।।

अन्ये सम्पूर्णयामासुश्चक्रे चाक्षौ तथापरे ।(०५)

ततो रथादवप्लुत्य सूतपुत्रोऽसिचर्मभृत्
अंसावलम्बितधनुर्धावमानो महाबलः ।। ३५ ।।(०६)

अंसावलम्बितधनुर्धावमानो महाबलः ।
विकर्णरथमास्थाय मोक्षायाश्वानचोदयत् ।। ३६ ।।(०७)

---

(०१)(सूर्य (for सूत ) (२)वाकिरन् (for वारयन्),

(०२) (आः)युधम् ध्वजम् (for युगम्) आछिद्य; आछिन्दन् अन्ये युगं समाछिन्दन्; अन्ये स्थन्दन० माछिन्दन् (२)त्व (for न्य ) ध्मन्येन पातयन्; ध्वजमागत्य पात (३) येवाम्; ईषान्; (for ईशान् ) ईषाम् (४)न्यवारयन् न्यपाट (for न्यपात) .

(०३) (अन्ये यन्त्रं छत्रमन्ये.

(०४) (कवचं च; बभञ्जुश्च (for बन्धुरं च).

(०५)(४) तिलशो (for खण्डशो) व्या (व्य) हनन्; ()भ्यहरनन्; न्यहनन्; व्यधमन् (for ऽभ्यहनन्) धनुः रणे (for रथम्),

(०६)(अवस्कद्य (for प्लुत्य) (२)धृत् (for भृत् ) (ऽ)पि भारत (for सिचर्मभृत्), अधोव (for अंसाव) रथः (for बलः),

(०७)(३)आरुह्य (for आस्थाय) (४)स रथाश्चन्; दिव्यानश्वन् । (for मोक्षायाश्वान्) अनोदयत् (for अचोदयत्) आत्ममक्षाय नोदयत्, .

वनपर्वणि १९७ तमेऽध्याये ३६श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि कर्णपराभवे सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥

(घोषयात्रापर्वणि . अध्यायः)

# 03- 04 - 198Adhyaya

# १९८. अष्टनवत्यधिकशततमो अध्यायः

चित्ररथेन रणे पराजितस्य दुर्योधनस्य बन्धनपूर्वकं स्वरथारोपणम् ॥ १ ॥ इतरैर्गन्धर्वैर्दुर्योधनभ्रातृणां तद्दाराणां च बन्धनम् ॥ २ ॥ दुर्योधनामात्यादिभिर्युधिष्ठिराय तन्निवेदने भीमेन दतनुमोदनम् ॥ ३ ॥ दुर्योधनादीन्पराजित्य गन्धर्वकर्तृकं तेषामपहरणम्

**वैशम्पायनः**

गन्धर्वैस्तु महाराज भग्ने कर्णे महारथे।
सम्प्रद्रवच्चमूः सर्वा धार्तराष्ट्रस्य पश्यतः ॥ १ ॥ (०१)

तान्दृष्ट्वा द्रवतः सर्वान्धार्तराष्ट्रान्पराङ्मुखान्।
दुर्योधनो महाराजो नासीत्तत्र पराङ्मुखः ॥ २ ॥ (०२)

तामापतन्तीं सम्प्रेक्ष्य गन्धर्वाणां महाचमूम्।
महता शरवर्षेण सोऽभ्यवर्षदरिन्दमः ॥ ३ ॥ (०३)

अचिन्त्य शरवर्षं तु गन्धर्वास्तस्य तं रथम्।

---

(०१)(प्रद्रुतैश्च (for गन्धर्वैस्तु) (२)भग्ने कर्णे (३)सम्प्राद्रवन् ; प्राद्रवच्च ०त्सा (for सम्प्राद्रवच्), 
(०२) (विद्रुतः (for द्रवतः) शूरान् (for सर्वान्) (२)योधमुख्यान्पराजि०तान् (३)महाराजो (४)तव (for तत्र ) पराङ्मुस्वी.
(०३) (४)अरिन्दम; अमर्षणः (for अरिन्दमः),

दुर्योधनं जिघांसन्तः समन्तात्पर्यवारयन् ॥ ४ ॥ [०१]

युगमीषां वरूथं च तथैव ध्वजसारथी।
अश्वांस्त्रिवेणुं तल्पं च तिलशो व्यधमञ्छरैः ॥ ५ ॥ [०२]

दुर्योधनं चित्रसेनो विरथं पतितं भुवि।
अभिद्रुत्य महाबाहुर्जीवग्राहमथाग्रहीत् ॥ ६ ॥ [०३]

तस्यवाहू महाराज बद्ध्वा रज्ज्वा महारथम्।
आरोप्य स महाबाहूश्चित्रसेन ददर्शह ॥ ७ ॥

**तस्य बाहू महाराज बद्ध्वा रज्ज्वा महारथम् ।**

**आरोप्य स्वं महाराज चित्रसेनो ननाद ह ।**

(प्रणम्य धर्मपुत्र तु (३)विदार्य व्रडावान् (for व्रीडेन), (४)तदा (for प्रति) .बाहू वद्ध्वा; वद्ध्वा, रज्ज्वा आरोप्य तं महाबाहुश्)

तस्मिन्गृहीते राजेन्द्र स्थितं दुःशासनं रथे।
पर्यगृह्णन्त गन्धर्वाः परिवार्य समन्ततः ॥ ८ ॥ [०४]

विविंशतिं चित्रसेनम् आदायान्ये विदुद्रुवः ।
विन्दानुविन्दावपरे राजदारांश्च सर्वशः ॥ ९ ॥ [०५]

---

(०१)( ते तं; तद् (for तु) जिघांसन्तं .

(०२)(च बाहुं (for वरूथं) (२)०सारथिम् सारथीन् (३)क-पूर्व त्रिवेषुमक्षं च शतशे..भ्यहनद्रथम् ।,घ-नल्यं, ह्यहनद्रथम् ।, अश्वं; नल्वं (for अश्वान्) वेणु (for वेणुं ) अक्षं (for तल्पं ) (४)शतशो (for तिलशो) व्यहनद्; व्यहरन्; विहनन्; भ्यहरन्; व्यधमद्; ऽभ्यहनद्, व्याहनन् (for ऽभ्यहनन् ) रथात्; शरै (for रथम् ),

(०३)(आरोप्य स महाबाहुर् (२) पातितं (३)महाबाहु; बाहुं (for बाहुर् ) (४)केशपक्षे तथा (for जीवग्राहमथ) अगृह्णत (for अथाग्रहीत् ) .

(०४)(राजेन्द्रे; कौरव्ये (for राजेन्द्र ) (२)दुर्योधनं (for दुःशा) रथं;रणं;(for रण (for रथे) (३) पर्यगृह्यन्त; प्रत्यगृह्णन्त (४)सहस्रशः (for समन्ततः ),

(०५)(विविंशतिशू; शति चित्रसेन; ०सेनाव् (२)चाचायाग्रे चादायान्ये (for आदायान्ये) वि (for प्र) (३) (अ)परौ (for (अ)परे) .

सैन्यं तद्धार्तराष्ट्रस्य गन्धर्वैः समभिद्रुतम्।
पूर्वं प्रभग्नाः सहिताः पाण्डवानभ्ययुस्तदा ।। १० ।।(०१)

शकटापणवैश्या(वेशा)श्च यानयुग्यं च सर्वशः ।
शरणं पाण्डवाञ्जग्मुर्ह्रियमाणे महीपतौ ।। ११ ।।(०२)

## दुर्योधनामात्याः-

प्रियदर्शी महाबाहुर्धार्तराष्ट्रो महाबलः ।
गन्धर्वैर्ह्रियते राजा पार्थास्तमनुधावत ।। १२ ।।(०३)

दुःशासनो दुर्विषहो दुर्मुखो दुर्जयस्तथा।
बद्ध्वा ह्रियन्ते गन्धर्वै राजदाराश्च सर्वशः ।। १३ ।।(०४)

## वैशम्पायनः-

इति दुर्योधनामात्याः क्रोशन्तो राजगृद्धिनः ।
आर्ता दीनास्ततः सर्वे युधिष्ठिरमुपागमन् ।। १४ ।।(०५)

तांस्तथा व्यथितान्दीनान्भिक्षमाणान्युधिष्ठिरम्।
वृद्धान्दुर्योधनामात्यान्भीमसेनोऽभ्यभाषत ।। १५ ।।(०६)

---

(०१)(योधाः; सैन्यं; ,सेना (for सैन्याः ) तद्; च (for तु ) (२)द्रुतं (for द्रुताः) (३)पूर्व (for पूर्वं ) प्रभग्नाः सहिता पूर्वभग्नैः प्रसहिताः; पूर्वभग्नैस्तु सहिताः (४)पाण्डवाञ्छरणं ययुः.

(०२) सैनिकाः(शकटा (टाः )पणवेशाश्च; शकटीपणवैश्या (२) युग्मान् (for युग्यं ) (३) शरण्यं (for शरणं ) शरणं; पाण्डवं (for पाण्डवाञ् ) (४)परन्तपे (for महीपतौ ) ,धर्मराजं युधिष्ठिरं .

(०३) सैनिका ऊचु (प्रियदर्शो; दर्शी दर्शन् दुर्योधनो, सुयोधनो, दर्शन्ति यो महाबाहो राज (२)गन्धर्वैर्नो जितं बलं (३)बद्धश्च (for गन्धर्वैर् ) राजन् (४) तद् (for तम्) अभि; अन्व (for अनु ) तं मोक्षयत पाण्डवाः; पार्था०स्तखपधावत.

(०४) (२)दुर्मुखः दुर्जयः (for दुर्जय ) पलय (for दारा) सहस्रशः (for च सर्वशः),

(०५)(२)क्रोशन्ते जयगृद्धिनः; गृर्द्धिनः, राजगर्द्धिनः; गृध्रिणः; ०गर्धिनः (३) दानसुताः; दीनास्ततः (for दीनस्वराः ) (४)अथागमन् (for उपा०) धर्मराजमभि०द्रवन्.

(०६)(तथाप्यवस्थितान्दीनान् (२)वीक्ष (for भिक्ष ) ष्द्वा; गृध्रान् भीतान्; वृत्तान् (for वृद्धान्) सुयो० (for दुर्यो ) भीमसेनो महाबाहुरास्फोट्य समभाषत ० .

प्रगृहीतायुधान्वीरांश्चत्रसेनपुरोगमान्

महता हि प्रयत्नेन संनह्य गजवाजिभिः ।

महता हि प्रयत्नेन संनह्य गजवाजिभिः ।[०१]

**भीमसेनः-**

अन्यथा वर्तमानानामर्थो जातोऽयमन्यथा।
अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितम् ।। १६ ।।[०२]

दुर्मन्त्रितमिदं तावद्राज्ञो दुर्द्यूतदेविनः ।[०३]
दीनान्दुर्योधनस्यास्मान्द्रष्टुकास्य दर्मते ।।
दीनान्दुर्योधनस्यास्मान्द्रमुकामस्य दुर्मतेः ।। १७ ।। [०४]

द्वेष्टारमन्ये क्लीबस्य पातयन्तीति नः श्रुतम्।
इदं कृतं नः प्रत्यक्षं तदेतदतिमानुषम् ।। १८ ।।

लक्षालङ्कारः - तदेतदतिमानुषम् इत्यत्र तस्मात् ।

दिष्ट्या लोके पुमानस्ति कश्चिदस्मत्प्रिये स्थितः ।
येनास्माकं हृतो भार आसीनानां सुखावहः ।। १९ ।।[०५]

शीतवातातपसहांस्तपसा चैव कर्शितान्।
समस्थो विषमस्थान्हि द्रष्टुमिच्छति दुर्मतिः ।। २० ।।[०६]

---

(०१) सु०; (अ) पि (for हि) संनद्ध (संनह्य ) रथवाजिनः ),

(०२) (२)भूतो (for जातो) (३)अस्माभिर् यद् .

(०३) (तावद् (for तात) दुर्मत्रिता तु राज्ञश्चेद्; दुर्मन्त्रितं पश्यताद्य (२)राज्ञो वै घूतचो दितं ० .

(०४) सुयोधनस्य (आ)सन् (for (अ)स्मान् ) (४)यात (योज); घातं; ताप; धार (for पात),

(०५) ( इदं (for तदिदं) तदिदं कर्म प्रत्यक्षं; कृतं तदेव प्रत्यक्षं (२)मानुषैः (४) क्वचिद् (for कश्चिद्) अस्मिन् (for अस्मत्) कृत (for प्रिये) रतः; स्थितं (for स्थितः) तेना (for येना) आसीनानां यथासुखं०.

(०६)(तपसहासू (२)कर्षिताः; कर्षितान् (३) स; च; स्म (for हि ) .

अधर्मचारिणस्तस्य कौरव्यस्य दुरात्मनः ।
ये शीलमनुवर्तन्ते ते पश्यन्ति पराभवम् ॥ २१ ॥(०१)

अधर्मो हि कृतस्तेन येनैतदुपशिक्षितम्।
अनृशंसास्तु कौन्तेयास्तत्प्रत्यक्षं ब्रवीमि वः ॥ २२ ॥(०२)

एवं ब्रुवाणं कौन्तेयं भीमसेनमपस्वरम्।
न कालः परुषस्यायमिति राजाभ्यभाषत ॥ २३ ॥(०३)

वनपर्वणि १९८ तमेऽध्याये २३ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि दुर्योधनादिहरणे अष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥

(घोषयात्रापर्वणि १ अध्यायः)

## 03- 04 - 199Adhyaya

# १९९. एकोनद्विशततमो अध्यायः

भीमेन युधिष्ठिरं प्रति दुर्योधनकृतापनयानुस्मारणपूर्वकं तद्विमोचनस्यानौचित्यप्रतिपादने युधिष्ठिरेण पुनस्तं प्रति तश्चोदनायामर्जुनेन तत्प्रतिज्ञानम् ॥ गन्धर्वेभ्यः कौरवान्मोचयितुं युधिष्ठिरस्य भीमसेनं प्रत्यादेशोऽर्जुनस्य तथा कर्तुं प्रतिज्ञानं च

---

(०१)(अधर्मा (२)कौरवस्य, (३)ते (for ) ये) अनुवर्तति, (४)पश्यन्तु .

(०२)(२) (हः) दम् (for (ए)तद्) उपशिक्षिताः उपमन्त्रितं; उपलक्षितं (३)अनृशंसस् कौन्तेयस् अनृशंसे तु कौतेये (४) तस्याधिक्ष्यान्; तत्प्रत्यक्षं सेनाध्यक्षान् तस्थाद्ध्यक्तं .

(०३) (कौन्तेयो संरब्धं (for कौन्तेयं ) (२)अपस्व (ज्व) रं अपस्वनं (for अमर्षणम् ) (४)राजाभिभाषितः; राजा न्यवा रयत् .

## युधिष्ठिरः-

अस्मानभिगतांस्तात भयार्ताञ्छरणैषिणः ।
कौरवान्विषमप्राप्तान्कथं ब्रूयास्त्वमिदृशम् ।। १ ।। (०१)

रक्षणीया महाबाहो मैवं वद महामते ।

भवन्ति भेदा ज्ञातीनां कलहाश्च वृकोदर ।
प्रसक्तानि च वैराणि कुलधर्मो न नश्यति ।। २ ।। (०२)

यदा तु कश्चिज्ज्ञातीनां बाह्यः प्रार्थयते कुलम्।
न मर्षयन्ति तत्सन्तो बाह्येनाभिप्रधर्षणम् ।। ३ ।। (०३)

(परैः परिभवे प्राप्ते वयं पञ्चोत्तरं शतम्।
परस्परविरोधे तु वयं पञ्च शतं तु ते ।। )

परैः परिभवे प्राप्ते वयं पञ्चोत्तरं शतम्
परस्परविरोधे तु वयं पञ्च शतं तु ते ।
(अन्यैः सह विरोधे तु )

जानात्येष हि दुर्बुद्धिरस्मानिह चिरोषितान्।
स एवं परिभूयास्मानकार्षीदिदमप्रियम् ।। ४ ।। (०४)

दुर्योधनस्य ग्रहणाद्गन्धर्वेण बलात्प्रभो।

---

(०१) (अधि (for अभि) (३) पाण्डवान् (for कौरवान् ) विषमं (शरणं) (for विषम०),
(०२)(लोके (for भेदा) (२) महामते (for वृको) (३) धर्माणि (for वैराणि ) (४) कुलधर्मो वि (for न) .
(०३)(हि (for तु) कस्य (for कश्चित्) (२)बाह्यं पोथ (for प्रार्थ) (३)मर्षयेरन् (for यन्ति ) ते (for तत्) (४) (अ)पि प्रमर्शनं; (अ)भिप्रदर्शनं; ( अ) भिप्रधर्षणं; ( अ)पि समर्षणं; (अ) पि प्रवर्षणं.
(०४)(कुशातिर्; जन्मतो (for जानाति ) हि एष दुर्मेधा (for दुर्बुद्धिर ) जन्मप्रभृति दुर्बुद्धिद् (३)एवं (for एष),

**स्त्रीणां बाह्याभिमर्शाच्च हतं भवति नः कुलम् ॥ ५ ॥** [०१]

शरणं च प्रपन्नानां त्राणार्थं च कुलस्य च ।
**उत्तिष्ठध्वं(त) नरव्याघ्राः सज्जीभवत मा चिरम् ॥ ६ ॥** [०२]

अर्जुनश्च यमौ चैव त्वं च वीरापराजितः ।
**मोक्षयध्वं नरव्याघ्रा ह्रियमाणं सुयोधनम् ॥ ७ ॥** [०३]

एते रथा नरव्याघ्राः सर्वशस्त्रसमन्विताः ।
**इन्द्रसेनादिभिः सूतैः कृतशस्त्रैरधिष्ठितान् ॥ ८ ॥** [०४]

**धृतराष्ट्रस्य पुत्राणां विमलाः काञ्चध्वजाः ।**
**सस्वनानधिरोहध्वं नित्यसज्जानिमान्रथान्।**
**धृतराष्ट्रस्य पुत्राणां विमलाः काञ्चनध्वजाः ।**
**सस्वनानधिरोहध्वं नित्यसज्जानिमान्रथान् ।**[०५]

एतानास्थाय वै यत्ता गन्धर्वान्योद्धुमाहवे।
**सुयोधनस्य मोक्षाय प्रयतध्वमतन्द्रिताः ॥ ९ ॥**[०६]

य एव कश्चिद्राजन्यः शरणार्थमिहागतम्।
**परं शक्त्याभिरक्षेत किं पुनस्त्वं वृकोदर ॥ १० ॥**[०७]

---

(०१) (सुयोधनस्य ग्रहणं (२)प्रभो (for किल) (for रणे) (३) मर्षाच्च .
(०२) (शरण्यं वः (for च) (२) त्राणार्थे च (for नः) (३)उत्तिष्ठत; ष्टन्तु; ष्ट त्वं नरव्याघ्र (४) भव च (for भवत),
(०३) (चापि चैव (२)भीमोपराजितः; वीरापराजितः; भीमापराजित (३) नरव्याध्रा (for धार्त) (४)महाबलैः (सुयो) .
(०४)(रथान् (२)वदां वराः; विशारदाः .
(०५) पुत्रस्य प्रभाः (for ध्वजाः ) , वि० मलान्काचनध्वजान् ) (४)सञ्ञाताः; संयाताः; संहताः; सायुधाः; संवृताः;सयज्ञाः कनकध्वजैः , संयतान्कनकध्वजान् .
(०६)(वै यत्ता (त्तान्); वै ततो; वै यत्नाद्; शत्रुघ्ना (२)अर्हथ; आशु वै ) (for आहवे),
(०७) (एव कश्चिद् एवं; एको; एष (for कश्चिद् ) राजन्यं (२)इहागतः; उपागतं (for इहागतम् )

**वैशम्पायनः**

एवमुक्तस्तु कौन्तेयः पुनर्वाक्यमभाषत।
कोपसंरक्तनयनः पूर्ववैरमनुस्मरन् ॥ ११ ॥

**भीमः**

पुरा जतुगृहेऽनेन दग्धुमस्मान्युधिष्ठिर ।
दुर्बुद्धिर्हि कृता वीरा तदा(र भृश) दैवेन रक्षिताः ॥ १२ ॥

कालकूटं विषं तीक्ष्णं भोजने मम भारत।
उत्वा गङ्गां लतापाशैर्बद्ध्वा च प्राक्षिपत्प्रभो ॥ १३ ॥

रसातलं च सम्प्राप्य तदा वासुकिमञ्जसा।
तत्र दृष्ट्वा तु राजेन्द्र पुनः प्राप्तो महीतलम् ॥

द्यूतकालेऽपि(ले हि) कौन्तेय वृजिनानि कृतानि वै।
द्रौपद्याश्च परामर्शः केशग्रहणमेव च ।
वस्त्रापहरणं चैव सभामध्ये कृतानि वै ॥ १४ ॥

राज्यं चाच्छिद्य राजेन्द्र उक्तवान्परुषाणि नः ।
पुरा कृतानां पापानां फलं भुङ्क्ते सुयोधनः ॥ १५ ॥

अस्माभिरेव कर्तव्यो धार्तराष्ट्रस्य निग्रहम्(हः ।)
अन्येन तु कृतं तद्वै(च्च) मैत्र्यमस्माभिरिच्छता ॥
उपकारी तु गन्धर्वो मा राजन्विमना भव ॥ १६ ॥

**वैशम्पायनः**

एतस्मिन्नन्तरे राज श्चित्रसेनेन वै हृतः ।
विललाप सुदुःखार्तो ह्रियमाणः सुयोधनः ॥ १७ ॥

---

शरणा०र्थिनमागतं .

**दुर्योधनः**

युधिष्ठिर महाबाहो सर्वधर्मभृता वर ।

स पुत्रान्सहदायंश्च गन्धर्वेण हृतान्बला।

पाण्डुपुत्र महाबाहो पौरवाणां यशस्क ।।

सर्वधर्मभृतां श्रेष्ठ गन्धर्वेण हृतं बलात् ।। १८ ।।

रक्षस्व पुरुषव्याघ्र युधिष्ठिर महायशः ।। १९ ।।

भ्रातरं ते महाबाहो बद्ध्वा नयति मामयम्।
दुःशासनं दुर्विषहं दुर्मुखं दुर्जयं तथा ।। २० ।।

बद्ध्वा हरन्ति गन्धर्वा अस्मद्दारांश्च सर्वशः ।
अनुधावत मां क्षिप्रं रक्षध्वं पुरुषोत्तमाः ।
वृकोदर महाबाहो धनञ्जय महायशः ।। २१ ।।

यमौ मामनुधावेतां रक्षार्थं मम सायुधौ ।।
कुरुवंशस्य सु(तु) महदयशः प्राप्तमीदृशम् ।। २२ ।।
व्यपोहयध्वं गन्धर्वाञ्जित्वा वीर्येण पाण्डवाः ।। २३ ।।

**वैशम्पयानः**

एवं विलपमानस्य कौरवस्यार्तया गिरा।*
श्रुत्वा विलापं सम्भ्रान्तो घृणयाभिपरिप्लुतः ।
युधिष्ठिरः पुनर्वाक्यं भीमसेनमथाब्रवीत् ।। २४ ।।

**युधिष्ठिरः-**

सुयोधनस्य मोक्ष्याय प्रयतध्वमतन्द्रिताः ।। २५ ।।

य एव कश्चिद्राजन्यश्शरणार्थमिहागतः ।
परं शक्त्याऽभिरक्षेत किं पुनस्त्वं वृकोदर ।। २६ ।।

क इहार्यो दवेत्त्राणमभिधावेति चोदिता(तः)।
प्राञ्जलिं शरणापन्नं दृष्ट्वा शत्रुमपि ध्रुवम्       ।। २७ ।।(०१)

लक्षालङ्कारः -प्राञ्जलिं शरणापन्नम् इत्यत्र शत्रुमपि शरणापन्नं दृष्ट्वा कः प्राणान् वहेदिति पूर्वेण सम्बन्धः । वरप्रदानम् अर्थिनामभीप्सितवरप्रदानम्, राज्यं शत्रून्विजित्य राज्यसम्पादनम्, पुत्रजन्म च पुत्रकामेष्ट्यादिना पुत्रजन्म च इति त्रितयं राज्ञामपेक्षितो धर्मः । त्रीणि पूर्वोक्तानि यानि त्रीणि, एकं शरणागतशत्रोर्मोक्षणं तत्समं तेषां त्रयाणां समम् ।

वरप्रदानं राज्यं च पुत्रजन्म च पाण्डवाः ।
शत्रोश्च मोक्षणं क्लेशात्त्रीणि चैकं च तत्समम्   ।। २८ ।। (०२)

एते शतं वयं पञ्च यावद्वयं .. ..

...परैस्तु परिभूतानां वयं पञ्च शतोत्तरम्

किं चाप्यधिकमेतस्माद्यदापन्नः सुयोधनः ।
त्वद्बाहुबलमाश्रिय जीवितं परिमार्गते       ।। २९ ।।(०३)

वैं एते शतं वयं पञ्च यावद्वयं परस्परम्

परैस्तु परिभूतानां वयं पञ्च शतोत्तरम् ।

परैः परिभवे प्राप्ते वयं पञ्चोत्तरं शतम्।
परस्परविरोधे तु वयं पञ्चैव ते शतम्।

परैः परिभवे प्राप्ते वयं पञ्चोत्तरं शतम् ।

परस्परविरोधे तु वयं पञ्चैव ते शतम् ।

---

(०१)(इहार्थे; इहार्यो; इवान्यो; (for इवार्यो ) (for इहान्यो ) वदेत्; धरेत्; नयेत्; दयेत् (for भवेत् ) प्राणान्; इह को यो धरेत्प्राणान्; कदर्योपि (नु०)नयेत्प्राणान् (२)अनुधावेति नोदितः (४) अभिद्रुतं (for अपि ध्रुवम् ) .

(०२)(२)पाण्डवाः (३)शौण्डा (for शत्रो) रक्षणं (for मो) (४)तीव्रं चैकत्र (for त्रीणि चैकं च) .

(०३)(किं ह्यन्याधिकम्; किं चाप्यधिकम्; किं चाभ्यधिकम्; न ह्यभ्य (त्य) धिकम् किञ्चिदन्यधिकं चैव (४) परिमार्गते; परमां गतिं .

स्वयमेव प्रधावेयं यदि न स्याद्वृकोदर ।
विततो मे क्रतुर्वीरं न हि मेऽत्र विचारणा ।। ३० ।।[०१]

साम्नैव तु यथा भीम मोक्षयेथाः सुयोधनम्।
तथा सर्वैरुपायैस्त्वं यतेथाः कुरुनन्दन ।। ३१ ।।[०२]

न साम्ना प्रतिपद्येत यदि गन्धर्वराडसौ।
पराक्रमेण मृदुना मोक्षयेथाः सुयोधनम् ।। ३२ ।।[०३]

अथासौ मृदुयुद्धेन न मुञ्चेद्भीम कौरवान्।
सर्वोपायैर्विमोच्यास्ते निगृह्य परिपन्थिनः ।[०४]

एतावद्धि मया शक्यं सन्देष्टुं वै वृकोदर ।। ३३ ।।

वैताने कर्मणि तते वर्तमाने च भारत।[०५]
वरप्रधानं समहद्याचकस्य प्रकीर्तितम् ।। ३४ ।।

वरप्रदानं सुमहद्याचकस्य प्रकीर्तितम्

**वैशम्पायनः**

अजातशत्रोर्वचनं तच्छ्रुत्वा तु धनञ्जयः ।
प्रतियज्ञे गुरोर्वाक्यं कौरवाणां विमोक्षणे(णम) ।। ३५ ।।[०६]

**अर्जुनः**

---

(०१)(३)मे (for ऽयं) (४) न ह्यमित्र (मुत्र) विचारणाः .

(०२)(साम्नैर्वा। सान्त्वैव (for साम्नैव ) च (for तु ) यथा वीर; यदानेन (for यथा भीम ) यथासौ मृदुयुक्तेन मुञ्चे भीम सकौरवान् ० तदा (for तथा),

(०३)(साम्ना न; साम्ना तु; न साम (४) तदा०; इह (for असौ),

(०४) (तथासौ; यदासौ मृदु०यत्नेन; युक्तेन पराक्रमेण मृदुना (२)कौरवं (३)विमुच्या; विमोक्षा (for विमोच्या),

(०५) (२)सन्देशं (for ष्टुं) पुरुषर्षभ (for वै वृकोदर) कौरवाणां विमोक्षणे.

(०६)(वचनात् (२)च; (अ)थ (for तु ) श्रुत्वा पार्थो धनञ्जयः (३) वाक्यात् (for वाक्यं) (४)विमोक्षणे .

यदि साम्ना न मोक्ष्यन्ति गन्धर्वा धृतराष्ट्रजान्।
अद्य गन्धर्वराजस्य भूमिः पास्यति शोणितम् ।। ३६ ।।(०१)

अर्जुनस्य तु तां श्रुत्वा प्रतिज्ञां सत्यवादिनः।
कौरवाणां तदा राजन्पुनः प्रत्यागतं मनः ।। ३७ ।।(०२)

वनपर्वणि १९९तमेऽध्याये ३७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां

वनपर्वणि घोषयात्रापर्वणि

दुर्योधनमोचनानुज्ञायां एकोनद्विशततमोऽध्यायः ।। १९९ ।।

(घोषयात्रापर्वणि १ अध्यायः)

## 03- 04 - 200Adhyaya

# २००. द्विशततमो अध्यायः ।।

भीमदीनां चतुर्णां चित्रसेनादिभिर्गन्धर्वैर्युद्धम् ।। १ ।। अर्जुनेन मायाशक्तया..न्तर्धानेन युध्यते चित्रसेनायास्त्रप्रयोगे सति तेनार्जुनं प्रति स्वस्य सखित्वकथनम् ।। २ ।। ततो..र्जुनेनास्त्रोपसंहारे भीमादीनां युद्धोपरमपूर्वकं तेन सह सल्लाँपः ।। ३ ।। पाण्डवानां गन्धर्वैः सह सङ्ग्रामः

### वैशम्पायनः

---

(०१) धनञ्जयः (for अर्जुनउ०) (मोक्षन्ति (२)धृतराष्ट्रजं.

(०२)(तदा; चतां (for तु तां) सत्यां (for श्रुत्वा) (३)तथा राजन्; महाराज (for तद राजन्) (४) प्रत्यागमन् .

युधिष्ठिरवचः श्रुत्वा भीमसेनपुरोगमाः ।
प्रहृष्टवदनाः सर्वे समुत्तस्थुर्नरर्षभाः ॥ १ ॥ (०१)
जाम्बूनदविचित्राणि कवचानि महारथाः ॥ २ ॥

अभेद्यानि ततः सर्वे समनह्यन्त भारत।(०२)

This Stanza is Interchanged in TRK after 1

आयुधानि च दिव्यानि विविधानि समादधुः ।(०३)

ते दंशिता रथैः सर्वे ध्वजिनः सशरासनाः ।
पाण्डवाः प्रत्यदृश्यन्त ज्वलिता इव पावकाः ॥ ३ ॥(०४)

तान्रथान्साधुसम्पन्नान्संयुक्ताञ्जवनैर्हयैः ।
आस्थाय रथशार्दूलाः शीघ्रमेव ययुस्ततः ॥ ४ ॥ (०५)

ततः कौरवसैन्यानां प्रादुरासीन्महास्वनः ।
प्रयातान्सहितान्दृष्ट्वा पाण्डुपुत्रान्महारथान् ॥ ५ ॥ (०६)

जितकाशिनः(नश्च) चत्वारस्त्वरिताश्च महारथाः ।
क्षणेनैव वने तस्मिन् समाजग्मुरभीतवत् ॥ ६ ॥ (०७)

लक्षालङ्कारः - जितकाशिनश्च चत्वार इत्यत्र जितकाशिनः जयाकाङ्क्षिणः ।

न्यवर्तन्त ततः सर्वे गन्धर्वा जितकाशिनः ।

---

(०१) (अर्जुनस्य वचः श्रुत्वा राज्ञस्तद्वचनं श्रु, (४)नराधिपाः महारथाः (for नरर्षभाः),
(०२) (४)बलाः (for रथाः),
(०३) दीप्तानि (for दिव्यानि), समाददुः.
(०४) (दंशितरथाः सर्वैर्, (३)प्रतिदृश्यन्त, (४)ज्वलन्त (for ज्वलिता),
(०५) (रथान् तत्रस्थान् तांस्तथा, तान्सर्वान्सहसम्पन्नान्, (२)सुयुक्ताञ् प्रभुः (यु) क्ताञ, यवनैर् (for जवनैर्), (३)नर (for रथ), (४)तदा (for ततः),
(०६) (२)आविरा० (for प्रादुरा), (३)प्रयतान्, (४)पाण्डवांश्चण्डविक्रमान्.
(०७) (जितारयश्च काशिनः (च), खचरान् (for खचराः), (२)त्वरिताश्चा तांश्च, (३) (ए) वं (for (ए) व), चास्मिन् (for तस्मिन्), (४)अभि (for समाः), गन्धर्वान्प्रतिपेदिरे.

**दृष्ट्वा रथागतान्वीरान्पाण्डवांश्चतुरो रणे ॥ ७ ॥** [०१]

**तांस्तु विभ्राजितान्दृष्ट्वा लोकपालानिवोद्यतान्।**
**व्यूढानीका व्यतिष्ठन्त गन्धमादनवासिनः ॥ ८ ॥** [०२]

**राज्ञस्तु वचनं स्मृत्वा धर्मपुत्रस्य धीमतः ।**
**क्रमेण मृदुना युद्धमुपक्रान्तं च भारत ॥ ९ ॥** [०३]

**न तु गन्धर्वराजस्य सैनिका मन्दचेतसः ।**
**शक्यन्ते मृदुना श्रेयः प्रतिपादयितुं तदा ॥ १० ॥** [०४]

**ततस्तान्युधि दुर्धर्षान्सव्यसाची परन्तपः ।**
**सान्त्वपूर्वमिदं वाक्यमुवाच खचरान्रणे ॥ ११ ॥** [०५]

**विसर्जयत राजानं भ्रातरं मे सुयोधनम् ।**

**अर्जुनः-**

**नैतद्गन्धर्वराजस्य युक्तं कर्म जुगुप्सितम्।**
**परदाराभिमर्शश्च मानुषैश्च समागमः ॥ १२ ॥** [०६]

**उत्सृजध्वं महावीर्यान्धृतराष्ट्रसुतानिमान्।**

---

(०१)(निवर्तन्त व्यव प्रतिजग्मुस् न्यवर्तत, रथागतान् (४)च ततो (for चतुरो),

(०२) (ततो (for तांस्तु), विभ्राजितान् जितो, (३)ह्यतिं (for व्यति), ०नीकानतिष्ठन्त, (४)गन्धर्वा वनचारिणः वासिनः.

(०३) ( च (for तु), वचनाद्, स्मृत्वा एव (for श्रुत्वा), (२)धर्मपुत्रस्य धीं धर्मसूनोर्महात्मनः (३)युक्ता (for युद्धम्), (४)उपा क्रामत उपाक्रामन्तु उपक्रान्तं च अपाक्रामन्त समुपाक्रान्त भारताः.

(०४)(२)मन्दतेजसः मूढचेतसः, युक्तं कर्म जुगुप्सितं (३) ख-श्रेयः प्रतिपादयितुं तदा,श्रेष्ठः श्रेष्ठे (for श्रेयः), शक्यन्ते मृदुयत्नेन, (४) यथा यदा (for तदा),

(०५) (युद्धदुर्धर्षान् युधि दुर्धर्षान्, (२)धनञ्जयः (for परं), (३)मृदुं (for सान्त्वं), (४)वने, (for रणे) .

(०६) (ते० (for (ए) तद्), (३)मर्षश्च, (४)मनुष्यैश्च, समागतः.

दारांश्चैषां विमुञ्चध्वं धर्मराजस्य शासनात् ॥ १३ ॥ (०१)

**वैशम्पायनः-**

त एवमुक्ता गन्धर्वाः पाण्डवेन यशस्विना।
उत्स्मयन्तस्तदा पार्थमिदं वचनमब्रुवन् ॥ १४ ॥ (०२)

**गन्धर्वाः-**

एकस्यैव वयं तात कुर्याम वचनं भुवि।
यस्य शासनमाज्ञाय चरामो विगतज्वराः ॥ १५ ॥ (०३)

तेनैकेन यथाऽऽदिष्टं तथा वर्ताम भारत।
न शास्ता विद्यतेऽस्माकमन्यस्तस्मात्सुरेश्वरात् ॥ १६ ॥ (०४)

**वैशम्पायनः-**

एवमुक्तः स गन्धर्वैः कुन्तीपुत्रो धनञ्जयः ।
गन्धर्वान्पुनरेवेदं वचनं प्रत्यभाषत ॥ १७ ॥ (०५)

न तद्गन्धर्वराजस्य युक्तं कर्म जुगुप्सितम्।
परदाराभिमर्शश्च मानुषैश्च समागमः ।

उत्सृज्यध्वं महावीर्यान्धृतराष्ट्रसुतानिमान्।
दारांश्चैषां विमुञ्चध्वं धर्मराजस्य शासनात्

**अर्जुनः-**

---

(०१) (उत्सृज्यध्वं, महावीर्याः, (३)दासान् (for दारान्), (ए) वां (ए) षां, विमुञ्चन्तु, (४)विधर्मः सुमहानयं.
(०२)(त एवमुक्ता (for एवमुक्तास्तु),
(०३)(एकैकस्य, (२)विभोः सदा (for भुवि), (३)आस्थाय (for आज्ञाय), (४)चरामो.
(०४)(यथोद्दिष्टं यथान्यायं समादिष्टं, (२)यथा (for तथा), कर्तास्म स्मि कुर्म स्म (for वर्ताम),
(०५) (तु (for स), (२)युधिष्ठिरः (for धनं), (३)ए तान् (for इ दं),

यदा साम्ना न मुञ्चध्वं गन्धर्वा धृतराष्ट्रजान्।
**मोक्षयिष्यामि विक्रम्य स्वयमेव सुयोधनम्  ॥ १८ ॥** [०१]

**वैशम्पायनः-**

एवमुक्त्वा ततः पार्थः सव्यसाची धनञ्जयः ।
**ससर्जनिशितान्बाणान्खचरान्खचरान्प्रति  ॥ १९ ॥** [०२]

तथैव शरवर्षेण गन्धर्वास्ते बलोत्कटाः ।
**पाण्डवानभ्यवर्तन्त पाण्डवाश्च दिवौकसः  ॥ २० ॥** [०३]

ततः सुतुमुलं युद्धं गन्धर्वाणां तरस्विनाम्।
**बभूव भीमवेगानां पाण्डवानां च भारत  ॥ २१ ॥** [०४]

वनपर्वणि  २००तमेऽध्याये २१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि
पाण्डवगन्धर्वयुद्धे द्विशततमोऽध्यायः ॥ २०० ॥

# २०१. एकाधिकद्विशततमो अध्यायः ॥

---

(०१) (यदा, न साम्ना मुञ्चं (for मोक्षं), (२)धृतराष्ट्रजान्, धर्मराजस्य शासनात्,

(०२)(तु गन्धर्वान् (for ततः पार्थः), (२)कुन्तीपुत्रो (for सव्यं), परन्तपः (for धनं), (३)घोरान् (for बाणान्), (४)खेचरान्खेचरान्प्रति.

(०३) (शरवर्षाणि, (२)च (for ते) मदोत्कटाः, (३)अभ्य भि वर्षतः अभिवर्तत,.

(०४)(सतुमलं , तु तुमलं समभवद्, (३)तत्र तद् (for बभूव), (४)तरस्विनः महात्मनां (for च भारत),

## पाण्डवानां चित्रसेनादिभिर्गन्धर्वैस्सह युद्धम् ।। गन्धर्वाणां पाण्डवेभ्यः पराजयः

### वैशम्पायनः

ततो दिव्यास्त्रसम्पन्ना गन्धर्वा हेममालिनः ।
विसृजन्तः शरान्दीप्तान्समन्तात्पर्यवारयन् ।। १ ।।[०१]

चत्वारः पाण्डवा वीरा गन्धर्वाश्च सहस्रशः ।
रणे संन्यपतन्राजंस्तदद्भुतमिवाभवत् ।। २ ।।[०२]

यथा कर्णस्य च रथो धार्तराष्ट्रस्य चोभयोः ।
गन्धर्वैः शतशश्छिन्नौ तथा तेषां प्रचक्रिरे ।। ३ ।।[०३]

तान्समापततो राजन्गन्धर्वाञ्छतशो रणे।
प्रत्यगृह्णन्नरव्याघ्राः शरवर्षैरनेकशः ।। ४ ।।[०४]

ते कीर्यमाणाः खगमाः शरवर्षैः समन्ततः
न शेकुः पाण्डुपुत्राणां समीपे परिवर्तितुम् ।। ५ ।।[०५]

अभिक्रुद्धानभिक्रुद्धो गन्धर्वानर्जुनस्तदा।
लक्षयित्वाथ दिव्यानि महास्त्राण्युपचक्रमे ।। ६ ।।[०६]

---

(०१)(३)विसृजताः व्यसृजन्ता (जन्तः),दीप्तं दिव्यान् दीप्तान्, (४)गन्धर्वाः(for समन्तात्), अभ्य, अभि परिं(for पर्य),

(०२)(चापि (for वीरा), पाण्डवाश्च महात्मानो चतुरः पाण्डवान्वीरान्, (४)शरवर्षैरनेकशः.

(०३) (३)शतधा छिन्नम् शरसञ्छन्नसू शतशश्छिन्नसू, (४)चैषां(for तेषां),

(०४)(समाधावतो, दृष्ट्वा (for राजन्), (३)प्रतिगृह्य० अभ्यगृह्ण.

(०५)(आकीर्य ते कीर्य (for अवकीर्य)। शुगमाः श्वगमाः सुखगाः खचराः (for खगमाः), (२)पाण्डुपुत्राः (for शर), अनेकशः महौजसः (for सम), (४)समीपं.

(०६) ( अतिकुद्दान् अतिकुद्दो अभिक्रुद्धो अभिप्रायाद्, (for अभिप्रेक्ष्य), (२)तथा (for तदा), (३) च तु (for (अ)थ), (४)(उ) पचक्रिरे प्रचक्रमे (for उ पचक्रमे) .

तन्समापततो राजन्दिव्यास्त्रैरभिवर्षयन् ।

सहस्राणां सहस्राणि प्राहिणोद्यमसादनम्।
आग्नेयेनार्जुनः सङ्ख्ये गन्धर्वाणां बलोत्कटः ।। ७ ।। (०१)

तथा भीमो महेष्वासः संयुगे बलिनां वरः ।
गन्धर्वाञ्छतशो राजञ्जघान निशितैः शरैः ।। ८ ।। (०२)

माद्रीपुत्रावपि तथा युध्यमानौ बलोत्कटौ।
परिगृह्याग्रतो राजञ्जघ्नतुः शतशः परान् ।। ९ ।। (०३)

ते वध्यमाना गन्धर्वा दिव्यैरस्त्रैर्महारथैः ।
उत्पेतुः खमुपादाय धृतराष्ट्रसुतांस्ततः ।। १० ।। (०४)

स तानुत्पतितान्दृष्ट्वा कुन्तीपुत्रो धनञ्जय।
महता शरजालेन समन्तात्पर्यवारयत् ।। ११ ।। (०५)

ते बद्धाः शरजालेन शकुन्ता इव पञ्जरे।
ववर्षुरर्जुनं क्रोधाद्गदाशक्त्यृष्टिवृष्टिभिः ।। १२ ।। (०६)

गदाशक्त्यृष्टिवृष्टीस्ता निहत्य परमास्त्रवित्।

---

(०१)(सहस्रज्ञः स्रं तुः स्राणि स्रं च स्रं हि (for स्रं स), (३)आग्नेयो नार्जुनः अजितानार्जुनः अजे यानर्जुनः सङ्क्षे सङ्क्षे (for सङ्ख्ये), (४)गन्धर्वान्मूर्यवर्चसः.

(०२)(महाबाहुः (for महे), (२)सङ्ग्रामे रब्धो (for युगे), (३)तत्र (for राजञ्), गन्धर्वाञ्शातसाहस्राञ्.

(०३) (माद्रीपुत्रानपि ततो (for तथा), (२)द्रवः (भ्रम) माणान्पराङ्मुखान् (३)परिपृच्छ्य (for गृह्य), द्युतिं (for (अ) ग्रतो), (४)शतशोपरान् शतशोपमान्; ते महारथान्.

(०४)(२)महाबलाः बलैः, रथैः रथाः (for त्मभिः), (३)उपाधाय समादाय, (४)धार्तराष्ट्रसुतान् तदा (for ततः),

(०५)(उत्पतिष्यन् स तानुत्पतितान्दृष्ट्वा, (३)वर्षेण (for जालेन),

(०६) (नद्धाः रुद्धाः (for बद्धाः), (२)शकुन्त इव पञ्जिरे (३)फल्गुनं फल्गुने फाल्गुनं; अर्जुने (for अर्जुनं), क्रुद्धा, (४)शत्त्य सिवृष्टयः शकृसिवृष्टिभिः शत्त्य सिवृष्टिभि.

गात्राणि चाहनद्भल्लैर्गन्धर्वाणां धनञ्जयः ॥ १३ ॥ (०१)

शिरोभिः प्रपतद्भिश्च चरणैर्बाहुभिस्तथा।
अश्मवृष्टिरिवाभाति परेषामभवद्भयम् ॥ १४ ॥ (०२)

ते वध्यमाना गन्धर्वाः पाण्डवेन महात्मना।
भूमिष्ठमन्तरिक्षस्थाः शरवर्षैरवाकिरन् ॥ १५ ॥ (०३)

तेषां तु शरवर्षाणि सव्यसाची परन्तपः।
अस्त्रैः संवार्य तेजस्वी गन्धर्वान्प्रत्यविध्यत ॥ १६ ॥ (०४)

स्थूणाकर्णेन्द्रजालं च सौरं चापि तथार्जुनः।
आग्नेयं चापि सौम्यं च ससर्ज कुरुनन्दनः ॥ १७ ॥ (०५)

ते दह्यमाना गन्धर्वाः कुन्तीपुत्रस्य सायकैः।
दैतेया इव शक्रेण विषादमगमन्परम् ॥ १८ ॥ (०६)

ऊर्ध्वमाक्रममाणाश्च शरजालेन वारिताः।
विसर्पमाणा भल्लैश्च वार्यन्ते सव्यसाचिना ॥ १९ ॥ (०७)

गन्धर्वांस्त्रासितान्दृष्ट्वा कुन्तीपुत्रेण भारत।

---

(०१) (वृष्टा स; शक्त्यृष्टिवृष्टीस्ता; शक्त्यसिवृष्टि तां (२)नपात्य; वार्य (for हत्य), परमास्त्रवित् सुमहास्त्र (३) शस्त्राणि (for गात्राणि), व्यहनत् व्यहरत् प्राहरत् (for चाहनत्), फल्लैर् (for भल्लेर्) .

(०२)(२)चरणैः बाहुभिः (४)चादध (द) द्; अदधद्; वादधद् (for अभवद्),

(०३) (२)यशस्विना (for महां), (३)भूयिष्ठम्; भूमिस्थम् भूमिष्ठान्.

(०४)(तच्छस्त्रजालं सम्भिद्य, (२)पाण्डुपुत्रः (for सव्यं), (३)सन्तार्य; सन्धार्य, (४)प्रत्ययुध्यत.

(०५) (कर्णं च जालं च; कर्णे (णं) च याम्यं च; कर्णास्त्रजालं च; कर्णेंद्रजाले च, (२) शौर स्रोतं; शौणं; स्रोतश, (for सौरं), वायव्यं च (for सौरं चापि), धनञ्जयः धनञ्जयं (for तथार्जुनः), (३)सौमुख्यं (for सौम्यं च),

(०६) (वध्य नाह्यं (for दह्यं), (३)चक्रेण (for शक्रेण),

(०७)(ऊर्ध्वमुत्क्रम्य ऊर्ध्वमुत्क्रम्य (२)शरवर्षेण, पातिताः, (३)फल्लै ० (for भल्लै०), (४)धार्यन्ते दार्यन्ते (for वार्यन्ते),

चित्रसेनो गदां गृह्य सव्यसाचिनमाद्रवत् ।। २० ।। [०१]

तस्याभिपततस्तूर्णं गदाहस्तस्य संयुगे।
गदां सर्वायसीं पार्थः शरैश्चिच्छेद सप्तधा ।। २१ ।। [०२]

स गदां बहुधा दृष्ट्वा कृत्तां बाणैस्तरस्विना।

संवृत्य विद्ययाऽऽत्मानं योधयामास पाण्डवम्। ।। २२ ।। [०३]

अस्त्राणि तस्य दिव्यानि सम्प्रयुक्तानि सर्वशः ।[०४]

दिव्यैरस्त्रैस्तदा वीरः पर्यवारयदर्जुनः ।

स वार्यमाणस्तैरस्त्रैरर्जुनेन महात्मना।

गन्धर्वराजो बलवान्माययान्तर्हितस्तदा ।। २३ ।। [०५]

अन्तर्हितं स(त)मालक्ष्य प्रहरन्तमथार्जुनः ।
ताडयामास खचरैर्दिव्यास्त्रप्रतिमन्त्रितैः ।। २४ ।। [०६]

अन्तर्धानवधं चास्य चक्रे क्रुद्धोऽर्जुनस्तदा
शब्दवेधं समाश्रित्य बहुरूपो धनञ्जयः ।। २५ ।। [०७]

स बध्यमानस्तैरस्त्रैरर्जुनेन महात्मना।

---

(०१) (ताडि (for त्रासि), (२)पाण्डुपुत्रेण, भारत ताडितः (for धीमता) .

(०२)(तस्याजं तस्थाप्यां तस्याभिद्रवत, (४)तथा चिच्छेद सायकैः.

(०३) (तां (for स), कृत्तां (for दृष्ट्वा), गदां बहुविधां दृष्ट्वा, (२)दृष्ट्वा (for कृत्तां), (३)संहृत्य (for वृत्य), संवृत्य माययात्मानं, क्रोधयामास, ततश्चतर्दधे मृधे.

(०४)(सर्व (for तस्य), सम्प्रयुक्तानि (for तस्य दिव्यानि), रोधं पोयं चोदं (for योध), संस्थितः वै स्थितं; स्वे स्थितं, सम्प्रयुक्तानि (गन्धर्वेण च) सर्वशः,.

(०५)(२)स्थितः (for तदा),

(०६) (तमा (दा) लक्ष्य; समासाद्य; समाज्ञाय, (२)तथा (for अथां), दिव्यास्त्रैः.

(०७) (तस्य; चक्रे (for चास्य), (२)तथा (for चक्रे), ततः तथा (for तदा), (३)शब्दवेद्य; वेधं सप्तचित्रं; भिन्नं विद्दं (for वेध्यं) अपाश्रित्य समाश्रित्य उपाहत्य अथालक्ष्य (४) रुप रुपं.

ततोऽस्यादर्शयामास तदाऽऽत्मानं प्रियः सखा ।। २६ ।।(०१)

चित्रसेनस्तथोवाच सखायं युधि विद्धि माम् ।

चित्रसेनं समा(मथा)लक्ष्य सखायं युधि दुर्बलम्।
सञ्जहारास्त्रमथ तत्प्रसृष्टं पाण्डवर्षभः ।। २७ ।।(०२)

दृष्ट्वा तु पाण्डवाः सर्वे संहृतास्त्रं धनञ्जयम्।
सञ्जह्रुः प्रद्रुतानश्वाञ्छरवेगान्धनूंषि च ।। २८ ।।(०३)

चित्रसेनश्च भीमश्च सव्यसाची यमावपि।
पृष्ट्वा कौशलमन्योन्यं रथेष्वेवावतस्थिरे ।। २९ ।।(०४)

वनपर्वणि २०१तमेऽध्याये २९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि गन्धर्वपराभवे एकाधिकद्विशततमोऽध्यायः ।। २०१ ।।

# २०२.व्यधिकद्विशततमो अध्यायः ।।

चित्रसेनेनार्जुनं प्रति दुर्योधनबन्धने कारणाभिधानपुर्वकं युधिष्टिरसमीपगमनम् ।। १

---

(०१)( ते वध्यमाना, (२)चित्रसेनो (for अर्जु), महाबलः अ मितौजसा (for महां), (३)अन्यथा; ततोस्य (for अथास्य) .

(०२) (समालक्ष्य; तथालक्ष्य; अथासाद्य, (२)सहायं (for सखायं), युधि दुर्बलम्, इति (for युधि), विह्वलः विह्वलं, विस्मितं विस्मितः (for दुर्बलम्), (४)प्रसृष्टः (for प्रहृष्टः), (for प्रसृष्टं), भरतर्षभ हा पाण्डवस्तदा.

(०३) (पाण्डवं, (३)सङ्क्रुद्धः जगृहुः (for सञ्जह्रुः), तत्र तान् (for प्रद्रुतान्), पार्थान् अस्त्रान् (for अश्वान्), (४)शरवेग; शरवर्ष, शरवर्षं शरवेगं.

(०४) (सम्प्रेक्ष्य (for भीमश्च), (२) (उ) भौ (for (अ) पि (३)कृत्वा दृष्ट्वा (for पृष्ट्वा), कौशल्यम्; तत्र स्वम्; कुशलम् (for कौशलम्), (४) रथेष्वेवोप०; रथे चैवावं .

।। युधिष्ठिरेण गन्धर्वैर्दुर्योधनादीनां बन्धाद्विमोचनम् ।। २ ।। ततो दुर्योधनेन स्वपुरं प्रति प्रस्थानम् ।। ३ ।।

चित्रसेनार्जुनयुधिष्ठिराणां संवादो दुर्योधनस्य गन्धर्वबन्धनतो मोचनं च

**वैशम्पायनः**

ततोऽर्जुनश्चित्रसेनं प्रहसन्निदमब्रवीत्।
मध्ये गन्धर्वसैन्यानां महेष्वासो महाद्युतिः ।। १ ।।(०१)

किं ते व्यवसितं वीर कौरवाणां विनिग्रहे।
किमर्थं च सदारोऽयं निगृहीतः सुयोधनः ।। २ ।।(०२)

**चित्रसेनः**

विदितोऽयमभिप्रायस्तत्रस्थेन दुरात्मनः ।
दुर्योधनस्य पापस्य कर्णस्य च धनञ्जयः ।। ३ ।।(०३)

वनस्थान्भवतो ज्ञात्वा क्लिश्यमानाननाथवत्।
इमे च(ऽव)हसितुं प्राप्ता द्रौपदीं च यशस्विनीम्।(०४)
समस्थो विषमस्थांस्तान्द्रक्ष्यामीत्यनवस्थितान् ।(०५)
ज्ञात्वा चिकीर्षितं चैषां मामुवाच सुरेश्वरः ** ।। ४ ।।

**इन्द्रः-**

गच्छ दुर्योधनं बद्ध्वा सहामात्यमिहानय।(०६)

---

(०१)(अथां (for ततों), (२)वाक्यम् (for इदम्), (३)गन्धर्वसेनानां, (४)महाद्युतिं.
(०२)अर्जुन उं (२) च (for वि),.
(०३)(२)महात्मनः दुरात्मनः (३)इन्द्रेण धार्तराष्ट्रस्य, (४)कर्णस्य(for कर्णस्य च), ससौबलेः (for धनं),
(०४) (२)अनाथवत् अनर्हतः अहर्निशं (for अनर्हवत्),
(०५)(३) पहासितं; च हसितुं; ()वहिंसितुं; ()पहसितुं , वञ्चयितुं (for वहसितुं),
(०६) (त्वेषां; तेषां; ह्येषां (for चैषां), (२)पुरन्दरः सुराधिपः (for सुरें), (३)गत्वा (for बद्ध्वा),

धनञ्जयश्च ते रक्ष्यः सह भ्रातृभिराहवे ।। ५ ।।

स च प्रियः सखा तुभ्यं शिष्यश्च तव पाण्डवः ।। ६ ।। (०१)

वचनाद्देवराजस्य ततोऽस्मीहागतो द्रुतम्।
अयं दुरात्मा बद्धश्च गमिष्यामि सुरालयम् ।। ७ ।। (०२)

नेष्याम्येनं दुरात्मानं पाकशासनशासनात्।(०३)

**अर्जुनः**

उत्सृज्यतां चित्रसेन भ्रातास्माकं सुयोधनः ।
धर्मराजस्य सन्देशान्मम चेदिच्छसि प्रियम् ।। ८ ।। (०४)

**चित्रसेनः**

पापोऽयं नित्यसन्तुष्टो न विमोक्षणमर्हति।
प्रलब्धा धर्मराजस्य कृष्णायाश्च धनञ्जय ।। ९ ।। (०५)

नेदं चिकीर्षितं तस्य कुन्तीपुत्रो युधिष्ठिरः ।
जानाति धर्मराजो हि श्रुत्वा कुरु यथेच्छसि ।। १० ।। (०६)

---

(४)सामात्यं तम्; सहामात्यम् (for सामात्यं त्वम्) .

(०१)(२)अच्युतः अच्युत (for आहवे), (३)स च तव (for स हि), प्रियसखा; प्रियसखस् (for प्रियः सखा), मह्यं (for तुभ्यं), (४)पाण्डव .

(०२) (देवदेवस्य, (२)भुवं (for द्रुतम्), ततो मही गतो द्रुती ततो स्म हि गतो द्रुतं; ततोस्मि ह्यागतो द्रुतं; ततो ह्यभ्यागतो द्रुतं ततोहं ह्यागतो ध्रुवं द्रुतं.

(०३) (अ) हं (for (ए) नं),

(०४) धनञ्जयः (for अर्जुनः), (२)धार्तराष्ट्रः (for भ्रातां), सुयोधनं.

(०५) वैशं (for चित्र), (१) नित्यसन्तुष्टो; सन्द्रष्टो पापसेवी च, पापचोनिरयं दुष्टो, (४)परन्तप (for धनं),

(०६)अर्जुनः, (ह्यस्य त्वस्य (for तस्य), (२) धनञ्जयः युधिष्ठिरः महां (३) ()पि (for हि), (४)कुर्याद् (for कुरु), (इ) च्छति, श्रुत्वा वाक्यं यथेप्सितं .

**वैशम्पायनः**

ते सर्व एव राजानमभिजग्मुर्युधिष्ठिरम्।
अभिगम्य च तत्सर्वं शशंसुस्तस्य चेष्टितम् ।। ११ ।। (०१)

अजातशत्रुस्तच्छ्रुत्वा गन्धर्वस्य वचस्तदा।
मोक्षयामास तान्सर्वान्गन्धर्वान्प्रशशंस च ।। १२ ।। (०२)

दिष्ट्या भवद्भिर्बलिभिः शक्तैः सर्वैर्न हिंसितः ।
दुर्वृत्तो धार्तराष्ट्रोऽयं सामात्यज्ञातिबान्धवः ।। १३ ।। (०३)

उपकारो महांस्तात कृतोऽयं मम खेचरैः ।
कुलं न परिभूतं मे मोक्षणेऽस्य दुरात्मनः ।। १४ ।। (०४)

आज्ञापयध्वमिष्टानि प्रीयामो दर्शनेन वः ।
प्राप्य सर्वानभिप्रायांस्ततो व्रजत मा चिरम् ।। १५ ।। (०५)

**वैशम्पायनः-**

अनुज्ञातास्तु गन्धर्वाः पाण्डुपुत्रेण धीमता।
सहाप्सरोभिः संहृष्टाश्चित्रसेनमुखा ययुः ।। १६ ।। (०६)

देवलोकं ततो गत्वा गन्धर्वैः सहितस्तदा।

---

(०१)(सर्वे, एव राजानः, धर्मराजानम् (for एव राजानम्), (३)ततः (for च तत्), (४) चेष्टितं; दुष्करं (for दुष्कृतम्),

(०२)(२)च तद्वचः (for वचस्तदा), (३)मोचं (for मोक्षं), (४)ह (for च),

(०३) युधिष्ठिर उं (दृष्ट्वा (for दिष्ट्या), (२)शक्तैः सर्वैः सद्भिर् (for सर्वैर्), नि (for न), (३) धार्तराष्ट्र यं.

(०४) (तावत् (for तात), (२)धर्मं च (for यं मम), खेचरैः र; (३)बलं नः न कुलं च परिभूतो;, त्वपरिभूतं (for न परि) च नो (for मे), (४)मोक्षणे (for मोक्षेण),

(०५) (इष्टानां इच्छामि (for इष्टानि), (२)प्रियामो; प्रियं मे प्रीतिर्मद्;, प्रीतिमान् प्रीतं मां, च (for वः), (३)प्राप्त एवोपकारोयं; अक्षताः सन्निरामर्षासू, (४)गच्छ (for व्रज),

(०६) (च (for तु) .

न्यवेदयच्च तत्सर्वं चित्रसेनः शतक्रतोः ।। १७ ।।

देवराडपि गन्धर्वान्मृतांस्तान्समजीवयत्।
दिव्येनामृतवर्षेण ये हताः कौरवैर्युधि ।। १८ ।। (०१)

चित्रसेनस्तदा वाक्यमुवाच प्रौढ्या गिरा।
मुञ्चध्वं सानुजामात्यं सदारं च सुयोधनम् ।

गन्धर्वास्तु वचश्श्रुत्वा चित्रसेनस्य वैदृतम्।
राजानं मोचयामासुर्बद्धं निगडबन्धनैः ।

सदारं सानुगामात्यं बालजालमयेनये।
लुण्ठं तश्चाऽपि सर्वे युधिष्ठिर समीपतः ।

पतिताः लज्जिताश्चैव तस्थुश्चाधोमुखास्तदा।
युधिष्ठिरोऽपि दयया तान्समीक्ष्य तथागतम् ।

ज्ञातींस्तानवमुच्याथ राजदारांश्च सर्वशः ।
कृत्य(त्वा) च दुष्करं कर्म प्रीतियुक्ताश्च पाण्डवाः ।। १९ ।। (०२)

सस्त्रीकुमारैः कुरुभिः पूज्यमाना महारथाः ।
बभ्राजिरे महात्मानः क्रतुमध्ये यथाग्नयः ।। २० ।। (०३)

ततो दुर्योधनं मुक्तं भ्रातृभिः सहितस्तदा।
युधिष्ठिरस्तु प्रणयादिदं वचनमब्रवीत् ।। २१ ।। (०४)

---

(०१)(देवराजश्च; राजोपि, (२)हतांस्तान्, अपि जीवयन्, (४)कौरवा; पण्डवैर्; पाण्डवा (for कौरवरू),
(०२) (ज्ञातीसू, मोच्या; मोक्ष्यां जप्वा जत्यां (for मुच्या), (३)दृष्ध्वा (for कृत्वा), तद् (for च), (४)स्म तु (for च),
(०३)(आस्त्री आस्त्रैः (for सस्त्री), (३)विभ्राजिरे, (४)क्रतुं (for कुरु),
(०४)(मुक्तं; मोच्य; मध्ये (for मुच्य), ततो युधिष्ठिरो राजा, (२)सहितः प्रभुः (for तदा), तु प्रणयाद्, (for सप्रणयम्), ससां त्वमब्रवीच्छ्रीमानवमुच्य सुयोधनं .

**युधिष्ठिरः-**

मा स्म तात पुनः कार्षीरीदृशं साहसं क्वचित्।
**न हि साहसकर्तारः सुखमेधन्ति भारत ।। २२ ।।** (०१)

स्वस्तिमान्सहितः सर्वैर्भ्रातृभिः कुरुनन्दन।
**गृहान्व्रज यथाकामं वैमनस्यं च मा कृथाः ।। २३ ।।** (०२)

**वैशम्पायनः**

पाण्डवेनाभ्यनुज्ञातो राजा दुर्योधनस्तदा।
**विदीर्यमाणो व्रीडावाञ्जगाम नगरं प्रति ।। २४ ।।** (०३)

**अभिवाद्य धर्मपुत्रं गतेन्द्रिय इवातुरः ।(०४)**

तस्मिन्गते कौरवेये कुन्तीपुत्रो युधिष्ठिरः ।
**भ्रातृभिः सहितो वीरः पूज्यमानो द्विजातिभिः ।। २५ ।।** (०५)

तपोधनैश्च तैः सर्वैर्वृतः शक्र इवामरैः ।
**तथा द्वैतवने तस्मिन्विजहार मुदा युतः ।। २६ ।।** (०६)

वनपर्वणि २०२तमेऽध्याये २६श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि
दुर्योधनमोक्षणे द्व्यधिकद्विशततमोऽध्यायः ।। २०२ ।।

---

(०१) (२)सहसा (for साहसं), (३)साहसानां (for हि साहस), (४)सुखमेधं न (for मेधन्ति), कर्हिचित् (for भारत),

(०२)(स्वस्तीत्युक्त्वाथ तु तान्सर्वान्, (३)यज (for व्रज),

(०३) (अ) -भिनुज्ञातो, (२)ततः (for तदा),

(०५)(धार्तराष्ट्रे (for कौर), (३)वीरैः;, (४) महात्मं महर्षि (for द्विजातिं),

(०६)(महर्षिभि (for तपो धनैं), (३)तथा (for वने), (४)मुदान्वितः .

# प्रायोपवेशनपर्व

महाभारततत्तात्पर्यनिर्णये २२ अध्याये

स चित्रसेनो वासवोक्तं च सर्वं कुमन्त्रितं धार्तराष्ट्रस्य चाऽह ।

पार्थस्य भीमस्य च तन्निशम्य सुव्रीडितो धृतराष्ट्रत्मजोऽभूत् ।। ३९७ ।।

समाप्य यज्ञं च ततोऽभियान्तं सर्वे प्रापुर्धर्मराजं स चाऽशु ।

सम्पूज्य तूत्सृज्य च चित्रसेनमूचे गान्धारे न पुनः कार्यमीदृक् ।। ३९८ ।।

स पाण्डवैर्मोचितः सानुजश्च सभार्यकः किञ्चिदतोऽपगम्य ।

सम्मेलनायोपविष्टश्च तत्र सुव्रीडितः सूतपुत्रं ददर्श ।। ३९९ ।।

स चाऽह दिष्ट्या जयसि राजन्निति सुयोधनम् ।

व्रीडितो नेति तं चोक्त्वा यथावृत्तं सुयोधनः ।

उक्त्वा प्रायोपवेशं च चक्रे तत्र सुदुःखितः ।। ४०० ।।

कर्णदुःशासनाभ्यां च सौबलेन च देविना ।

अन्यैश्च याच्यमानोऽपि नैवोत्तस्थौ सुयोधनः ।। ४०१ ।।

## २०३. त्र्यधिकद्विशततमोऽध्यायः

दुर्योधनेन मध्येमार्गं क्वचन रमणीये देशे सेनादिसन्निवेशनपूर्वकमवसक्थानम् ।।

१ ।। तत्र सकमागतेन गन्धर्वकृते बन्धनमोचने अपरिजानता कर्णेलभ्रमत्तस्य कन्धर्वचोतृत्वेन रूपेण प्रशंसनम् ।। २ ।। ससैन्यस्य दुर्योधनस्य मार्गे विश्रमः कर्णकृतं तदभिनन्दनं च

**जनमेजयः**

शत्रुभिर्जितबद्धस्य पाण्डवैश्च महात्मभिः ।
मोक्षितस्य युधा पश्चान्मानिनः सुदुरात्मनः ।। १ ।। (०१)

कत्थनस्यावलिप्तस्य गर्वितस्य च नित्यशः ।
सदा च पौरुषौदार्यैः पाण्डवानवमन्यतः ।। २ ।। (०२)

दुर्योधनस्य पापस्य नित्याहङ्कारवादिनः ।
प्रवेशो हास्तिनपुरे दुष्करः प्रतिभाति मे ।। ३ ।। (०३)

तस्य लज्जान्वितस्यैव शोकव्याकुलचेतसः ।
प्रवेशं विस्तरेण त्वं वैशम्पायन कीर्तय ।। ४ ।। (०४)

**वैशम्पायनः**

धर्मराजनिसृष्टस्तु धार्तराष्ट्रः सुयोधनः ।
लज्जयाधोमुखः सीदन्नुपासर्पत्सुदुःखितः ।। ५ ।। (०५)

स्वपुरं प्रययौ राजा चतुरङ्गबलानुगः ।

---

(०१)(शत्रुभिर्बध्यमानस्य (२)महर्षिभिः (for महात्मभिः), (३)मोक्षितश्च; मोहितस्य; क्षोभि कथं; भयात् (for युधा),जित्वा; त्वा (for चा), सीन्; तस्मान् (for पश्चान्), मानितस्य; मानिनश्च; मानिनः सु (for मानस्थस्य), दुरात्मभिःमहात्मनः.

(०२)(कथं तस्य (for कत्थनस्य), (२)गर्हितस्य; गर्जितस्य दुरात्मनः (for च नित्यशः),

(३)मन्यत; जानतः; मन्यते (for मन्यत),

(०३) (२)नित्याहङ्कारमानिनः; सांहकारस्य मानिनः (४)दुष्करं .

(०४) ((ए)वं; इ ह(for (ए) व), (२)शोकेनाकुल, (३)हस्तिनपुरे (for विस्तरेण त्वं),

(०५)(धर्मराज्ञा वि (नि) सृष्टश्च ; राजविसृष्टस्तु (स्थ), (३) (अ) भिमुखः, चासीद्; श्रीमान् (for सीदन्),(४)अवासर्पन् (for उपासर्पत्),अपासर्पत दुःखितः,.

शोकोपहतया बुद्ध्या चिन्तयानः पराभवम् ।। ६ ।। (०१)

विमुच्य पथि यानानि देशे सुयवसोदके।

संनिविष्टः शुभे रम्ये भूमिभागे यथेप्सितम्।
हस्त्यश्वरथपादातं यथास्थानं न्यवेशयत् ।। ७ ।। (०२)

अथोपविष्टं राजानं पर्यङ्के ज्वलनप्रभे
उपप्लुतं यथा सोमं राहुणा रात्रिसङ्क्षये ।। ८ ।। (०३)

उपागम्याब्रवीत्कर्णो दुर्योधनमिदं तदा ।। ९ ।। (०४)
कर्णः-

दिष्ट्या जीवसि गान्धारे दिष्ट्या नः सङ्गमः पुनः ।
दिष्ट्या त्वया जिताश्चैव गन्धर्वाः कामरूपिणः ।। १० ।।

(०५)

दिष्ट्या समग्रान्पश्यामि भ्रातं स्ते कुरुनन्दन।
विजिगीषून्रणे युक्तान्निर्जितारीन्महारथान् ।। ११ ।। (०६)

अहं त्वभिद्रुतः सर्वैर्गन्धर्वैः पश्यतस्तव ।
नाशक्नुवं स्थापयितुं दीर्यमाणां च वाहिनीम् ।। १२ ।। (०७)

---

(०१)(स पुरं, (२)बलान्वितः.

(०२) (पार्थ (for पथि), (२)सं (for सु), (३)सुनिविष्टे; संनिविष्टे, (४)यथोचिते; यथेप्सिते, निवेशयत्,.

(०३) (३)प्लवं; स्थितं; क्लृप्तं (for प्लुतं), कामं (for सोमं),

(०४) उपागम्या वचः; वथा (for तदा), .

(०५)(जयस्य; जयसि (for जीवसि), (२)सङ्गतं; तः (for मः), (३)सङ्ख्ये; सङ्घे (for चैव), (४)कामचारिणः.

(०६)(२)जनमेजय (for कुरु), (३)रणे (for रणान्), युक्तान् (for मुक्तान्), (४)महाबलान् (for रथान्),

(०७) (त्वति; चाति (for त्वभि), (२)तस्य पश्यतः; तव पश्यतः पश्यतस्तव चाग्रतः धारयितुं, (for स्थाप),(३) ग-धारयितुं वध्यमानां; ख-धारयितुं दीर्यमाणां तु; , घ-धारयिंतु पीड्यमानां, (४)पीड्यमानां (for दीर्य), च; तु (for स्व),

शरक्षताङ्गश्च भृशं व्यपयातोऽभिपीडितः ।
इदं त्वत्यद्भुतं मन्ये यद्युष्मानिह भारत ।। १३ ।। [०१]

अरिष्टानक्षतांश्चापि सदारबलवाहनान्।
विमुक्तान्सम्प्रपश्यामि युद्धात्तस्मादमानुषात् ।। १४ ।। [०२]

नैतस्य कर्ता लोकेऽस्मिन्पुमान्भारत विद्यते।
यत्कृतं ते महाराज सह भ्रातृभिराहवे ।। १५ ।। [०३]

**वैशम्पायनः**

एवमुक्तस्तु कर्णेन राजा दुर्योधनस्तदा।
उवाच चाङ्गराजानं बाष्पगद्गदया गिरा ।। १६ ।। [०४]

अस्मिन् पर्वणि २०३अध्याये १६श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि
कर्णदुर्योधनसंवादे त्र्यधिकद्विशततमोऽध्यायः ।। २०३ ।।

---

(०१) (सविक्षितागशू; शरक्षतोहं (for क्षताङ्गशू), (२)अपयातो (for व्यप ), ()ति, ()स्मि; नि, (for ()भि), (३)अप्यद्भुतं (for त्वत्य) (४)अस्मान् (for युष्मान्), इति (for इह),
(०२) (अश्लिष्टान् (for अरिष्टान्), अक्षयान् (for अक्षतान्), चैव (for चापि), (२)वाहनं; सदारबलवाहनान्; सदाररथ (३)सम्प्रपश्यामि युष्मांस्तु (४)तस्मात् युद्धाकत्, युष्मान्; सर्वान् (for तस्माद्),
(०३)(कर्ता लोके नैतस्य लोके कस्तस्मिन् (२)भारत विद्यते; विद्यति भारत (३)हि (for ते) .
(०४)वैशं उं वैशं (३) (अ) धोमुखोः (अ) वाङ्भुखो (for अ वाविशरा), वाक्यं (for राजन्), उवाच चां (वां; वं) गराजानं, आरवय, द्ध्योन्धनप्रायोपवेश (धनप्रवेश); प्रायोपवेशन .

# २०४. चतुरधिकद्विशततमोऽध्यायः

दुर्योधनेन कर्णं प्रति युद्धे सानुजस्य स्वस्य गनिधर्वौर्बन्धनस्य युधिष्ठिरचोदनया भीमादिभिर्गन्धर्वाणां रणे पराजयस्य च कथनम् ॥ दुर्योधनस्य कर्णं प्रति स्वपराजयवृत्तान्तवर्णनम्

**दुर्योधनः**

अजानतस्ते राधेय नाभ्यसूयाम्यहं वचः ।
जानासित्वं जिताञ्छत्रून्गन्धर्वांस्तेजसा मया ॥ १ ॥ (०१)

आयोधितास्तु गन्धर्वाः सुचिरं सोदरैर्मम।
मया सह महाबाहो कृतश्चोभयतः क्षयः ॥ २ ॥ (०२)

मायाधिकास्त्वयुध्यन्त यदा शूरा वियद्गताः ।
तदा नो न समं युद्धमभवत्खेचरैः सह ॥ ३ ॥ (०३)

असमर्थास्ततस्तांस्तु प्रतियोद्धुं वियद्गतान्

पराजयं च प्राप्ताः स्मो रणे बन्धनमेव च ।

सभृत्यामात्यपुत्राश्च सदारबलवाहनाः ।
उच्चैराकाशमार्गेण ह्रियमाणाः(हृताः स्मस्तैः)सुदुःखिताः ॥ ४ ॥ (०४)

---

(०१)(तु (for ते), (२)ते (for (अ) हं यत्प्रोक्तोहं त्वया वचः ।.

(०२)(अ (सु) योधिताः च (for तु), (२) ते चिरं; सुदीर्घं (for सुचिरं) सह (for मम), (४)तैः संधत (for चोभयतः) .

(०३)(मया मा धिकास्,तु युध्यन्त; त्वबुध्यन्त (२)यथा (for यदा), दिवं गताः(for विय), (४)सह खेचरैः.

(०४)(प्राप्ताः स्मो; सम्प्राप्ताः (for प्राप्ताः स्म), (३)मात्यसुताश्च; सभ्रातृमातृ पुत्राश्च; संहृत्यामात्य (४) बल वाहनाः;धना सुत वान्धवाः हृतास्तैः स्म; हत्वास्तेस्मान् हृताः स्मस्तेः; प्रणितास्तैः; हृयमाणाः (for ह्रिया

अथ नः सैनिकाः केचिदमात्याश्च महारथाः ।
उपगम्याब्रुवन्दीनाः पाण्डवाञ्छरणप्रदान् ।। ५ ।। (०१)

**सैनिकामात्याः-**

एष दुर्योधनो राजा धार्तराष्ट्रः सहानुजः ।
सामात्यदारो ह्रियते गन्धर्वैर्दिवमाश्रिः ।। ६ ।। (०२)

तं मोक्षयत भद्रं वः सहदारं नराधिपम्।
परामर्षो(भवो)मा भविष्यत्कुरुदारेषु सर्वशः ।। ७ ।। (०३)

इत्यब्रुवन्नणान्मुक्ता धर्मराजमुपागताः

**दुर्योधनः-**

एवमुक्ते तु धर्मात्मा ज्येष्ठः पाण्डुसुतस्तदा।
प्रसाद्य सोदरान्(पाण्डवान्)सर्वानाज्ञापयत मोक्षणे ।। ८ ।।

अथागम्य तमुद्देशं पाण्डवाः पुरुषर्षभाः ।
सान्त्वपूर्वमयाचन्त शक्ताः सन्तो महारथाः ।। ९ ।। (०४)

यदा चास्मान्न मुमुचुर्गन्धर्वाः सान्त्विता अपि।
आकाशचारिणो वक्षि नदन्तो जलदा इव ।। १० ।। (०५)

---

मस्तैः), सुदुःखितान् हृतास्नैर्बहुदुःखिताः.

(०१) (अ तः (for नः) (२)अमात्याश्च (for अमात्या), तान् (for च), महारथाः (३)उपागम्य, अ ब्रवीद्; अ ब्रवन् (for अ ब्रुवन्) (४) च रणप्रदान्; शरणैषिणः (for शरण'),

(०२)(२)सुयोधनः (for सहा) (४)आश्रिः (for आस्थितैः),

(०३)(विमोक्षय (for मोक्षयत), ते (for वः), (२)जनाधिपं; महारथं; सुयोधनं (for नराधिपम्), (३) पराभवो; परामर्षो ; नाभविष्यत् (for मा भ), (४) पाण्डवाः; सर्वथा (for सर्वशः) .

(०४) (यदा (for अथा), आ गत्य (for आ गम्य), तद् (for तम्), (२) भरतर्षभाः (३)साम्ना (for सान्त्व), अवोचन्त (for अयाचन्त), (४)मुक्ति (for शक्ताः),

(०५)(३)तदां (for ततों), (४)यमौ चैव मदोत्कटौ; यमौ द्वौ च बलो; यमौ च प्रबलों.

ततोऽर्जुनश्च भीमश्च यमजौ च बलोत्कटौ।
मुमुचुः शरवर्षाणि गन्धर्वान्प्रत्यनेकशः ॥ ११ ॥ (०१)

अथ सर्वे रणं मुक्त्वा प्रयाताः खेचरा दिवम्।
अस्मानेवाभिकर्षन्तो दीनान्मुदितमानसाः ॥ १२ ॥ (०२)

ततः समन्तात्पश्यामः शरजालेन वेष्टितम्।
अमानुषाणि चास्त्राणि प्रमुञ्चन्तं धनञ्जयम् ॥ १३ ॥ (०३)

समावृता दिशो दृष्ट्वा पाण्डवेन शितैः शरैः ।
धनञ्जयसखाऽऽत्मानं दर्शयामास वै तदा ॥ १४ ॥ (०४)

चित्रसेनः पाण्डवेन समाश्लिष्य परस्परम्।
कुशलं परिपप्रच्छ तैः पृष्टश्चाप्यनामयम् ॥ १५ ॥ (०५)

ते समेत्य तथान्योन्यं सन्नाहान्विप्रमुच्य च ।
एकीभूतास्ततो वीरा गन्धर्वाः सह पाण्डवैः ॥ १६ ॥ (०६)

अपूजयेतामन्योन्यं चित्रसेनधनञ्जयौ।

---

(०१)(२)सान्त्वतापि तैः; सान्त्वितास्तु तैः सान्त्वितापि (ताश्च; ता स्म) ते.

(०२)(त्यक्त्वा (for मुक्त्वा), (२)खेचरा दिशः (for दिवम्), (३)मर्षन्तो; वर्षन्तो; काङ्क्षन्तो; प,वीक्षन्तो (for कर्षन्तो), (४) दीना (for दीनान्),

(०३) (समस्तं (for समन्तात्),पश्यामः (for मि), (२)शरजालविवे ष्टितं, (४)प्रदिशन्तं; मुसुतं; मुचानं (for युञ्जानं),

(०४) (३)धनञ्जयं स चात्मानं .

(०५)(पाण्डवेयैः (for न), (२)समाश्लिष्टः; समाविष्टः,परस्परं (for परन्तपः) (३)कुशलैः परिपृष्टस्तैः (for पप्रच्छ), (४)स (for तैः),

(०६)(तदा; यथा (for तथा), न्यायं (for अ न्योन्यं), ते वै समेत्य चान्योन्यं, (२)संनाहं (for हान्), प्रविमुच्य च; वै प्रमुच्य च; विप्रमुच्यत; विप्रमुच्य वै संनाहानि विमुच्य च, (३)तदा (for ततो), सर्वे (for वीरा), (४)सह पाण्डवैः गन्धर्वैः पाण्डवाः सह.

**परस्परं समागम्य प्रीत्या परमया युताः ।। १७ ।।** [०१]

अस्मिन् पर्वणि २०४अध्याये १७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि दुर्योधनवाक्ये चतुरधिकद्विशततमोऽध्यायः ।। २०४ ।।

## २०५. पञ्चाधिकद्विशततमोऽध्यायः

# घोषयात्रापर्व

**दुर्योधनेन कर्ण प्रति स्वबन्धनविषये चित्रसेनार्जुनसंवादप्रकारकथनपुर्वकं युधिष्ठिरात् स्वस्य बन्धमोचनकथनम् ।। दुर्योधनस्य प्रायोपवेशननिश्चयो दुःशासनाय राज्यं दातुमादेशो दुःशासनपरिदेवनं कर्णकृतं दुर्योधनप्रबोधनं च**

**दुर्योधनः**

**चित्रसेनं समागम्य प्रहसन्नर्जुनस्तदा।**

---

(०१)युतौ (for युताः), प्रहसन्नर्जुनस्तदा आरण्यः प्रायो पवेश; दुर्योधन प्रायोपवेश वेशन; दुर्योधनघोषयात्रा, दुर्योधनपराजयः; .

इदं वचनमक्लीबमब्रवीत्परवीरहा ।। १ ।। [०१]

**अर्जुनः-**

भ्रातनर्हसि मे वीर मोक्तुं गन्धर्वसत्तम।
अनर्हधर्षणा हीमे जीवमानेषु पाण्डुषु ।। २ ।। [०२]

**दुर्योधनः-**

एवमुक्तस्तु गन्धर्वः पाण्डवेन महात्मना।
उवाच यत्कर्ण वयं मन्त्रयन्तो विनिर्गताः ।। ३ ।।

द्रष्टारः स्म सुखाद्धीनान्सदारान्पाण्डवानिति।[०३]
स्थितो राज्ये च्युताभस्थानाच्छ्रिया हीनाञ्श्रिश्रयावृताः ।। ४ ।।[०४]

तस्मिन्नुच्चार्यमाणे तु गन्धर्वेण वचस्तथा।
भूमेर्विवरमन्वैच्छं प्रवेष्टुं व्रीडयान्वितः ।। ५ ।। [०५]

युधिष्ठिरमथागम्य गन्धर्वाः सह पाण्डवैः ।
अस्मद्दुर्मन्त्रितं तस्मै बद्धांश्चास्मान्यवेदयन् ।। ६ ।। [०६]

स्त्रीसमक्षमहं दीनो बद्धः शत्रुवशं गतः ।
युधिष्ठिरस्योपहृतः किं नु दुःखमतः परम् ।। ७ ।। [०७]

---

(०१) वैशं (for दुर्यो), (२)प्रहर्ष (for प्रहस), (४)पाण्डवस्तदा (for परवीरहा),

(०२)(असि हि (for अर्हसि), मे(for नो), (३) क-घ-भीमे, अनर्हं (ई) धर्षणं; अनार्हधर्षणं; अनर्हां च क्षणं; अनर्हा (र्हां) धर्षणां; अनर्हः (for र्हा) घर्षणा; अवहर्धिर्षणां अप्यनर्हा धर्षणा मे.

(०३)(उक्तात् च (for तु), गन्धर्वाः (४) , मन्त्रयित्वा .

(०४) स्थिता (for स्थितो), तु (for स्म), सुखासीनान् (for द्धीनान्), ,द्रष्टारः स्मासु (न्सु) खान्दीनान्; द्रष्टारस्तान्सुखाद्दीमान्;, द्रष्टास्मि त्म निःसुखान्वीरान्, ततस्तान् (for सदारान्),

(०५)(अस्मिन् (for तस्मिन्), (२)वचस्य तु; स्तथा; स्यधः; स्तदा (for स्यथ) (३)अन्विच्छ; अन्येहं; अन्विच्छन्; अन्विच्छे (for अन्वैच्छं),

(०६)(उपागम्य (for अथा) गन्धर्वैः; र्वः (for र्वः), सह पाण्डवैः (३)अस्मिन् (for अस्मद्), चास्मै (for तस्मै), (३)बद्धाः; बध्वा (for बद्धान्), स्वा (for चा), समस्तं प्रत्यवेदयत्.

(०७)(३) (उ)पकृतः हितः; कृतं; सृतं (for हृतः), (४)मे (for नु) इतः (for अतः),

ये मे निराकृता नित्यं रिपुर्येषामहं सदा।
तैर्मोक्षितोऽहं दुर्बुद्धिर्दत्तं तैरेव जीवितम् ॥ ८ ॥ (०१)

प्राप्तः स्यां यद्यहं वीर वधं तस्मिन्महारणे।
श्रेयस्तद्भविता मह्यं नैवम्भूतस्य जीवितम् ॥ ९ ॥ (०२)

अभूद्यशः(भवेद्यशः)पृथिव्यां मे ख्यातं गन्धर्वतो वधात्।
प्राप्ताश्च पुण्यलोकाः स्युर्महेन्द्रसदनेऽक्षयाः ॥ १० ॥ (०३)
यत्त्वद्य मे व्यवसितं तच्छृणुध्वं नरर्षभाः ॥ ११ ॥ (०४)

इह प्रायमुपासिष्ये यूयं व्रजत वै गृहान्।
भ्रातरश्चैव मे सर्वे यान्त्वद्य स्वपुरं प्रति ॥ १२ ॥ (०५)

कर्णप्रभृतयश्चैव सुहृदो बान्धवाश्च ये।
दुःशासनं पुरस्कृत्य प्रयान्त्वद्य पुरं प्रति ।(०६)

न ह्यहं सम्प्रयास्यामि पुरं शत्रुनिराकृतः ।
शत्रुमानापहो भूत्वा सुहृदां मानकृत्तथा ॥ १३ ॥ (०७)

---

(०१)(ते (for मे), पूर्वं तेसां (for नित्यं), (२)ये (ए) षां रिपुर् तदा; , गतः (for सदा), (४)दत्तं तैर् जीवितं हि (तु) मे; एव जीवितं.

(०२) (प्राप्तव्यं; प्राप्तोस्मि यद् (for यदि), (२)तस्मान् (for तस्मिन्),मृधे; वने; हवे (for रणे), (३) तु (for तद्), (४)निन्द्य; नैवं (for एवं),हि(for न), जीवनं (for जीवितम्),नैवम्भूतस्य जीवितं.

(०३)(अभूद्; भूयाद् (for भवेद्), यथा (for यशः), (२)ख्यातिर्; ख्यातो वधं; , वधः (for वधात्) (३)प्राप्तस्य (for प्राप्ताश्च), लोकान्पुण्यान्; पुण्यलोकाः (लोकाः पुण्याः) च;, मे (for स्युट्), प्राप्ताः स्युश्चैव मे लोकाः (४)महेन्द्रभवने क्षयः क्षयान्.

(०४) ( अ-यद्यम्मेव्यवसितं किञ्चित्, ख-यत्त्वद्य मे..ध्यवसितं तच्छृणुध्वंनराधिपाः।.

(०५)(यत्त्विदं; यदद्य; यच्चाद्य (for यत्त्वद्य), ()ध्यवसितं (for व्यव), यन्मे व्यवसितं किञ्चित् (२) नराधिपाः; नराधिप (for नर), (३)उपाशिष्ये; समासिष्ये (for उपासिष्ये), (४)गृहं (अ) द्य (for (ए)व) पुरीं; गृह्यं (for पुरं), प्रयान्तु नगरं प्रति; यान्त्वद्य स्वपुरं प्रति.

(०६)(सर्वे (for चैव), (२)च मे; तथा (for च ये), (४)प्रयान्तु नगरं प्रति.

(०७) (त्वहं (for ह्यहं), सं (मां) प्रवेक्ष्यामि; सम्प्रयास्यामि; सम्प्रपश्यामि; सम्प्रयच्छामि (for प्रतियां ), न ह्यप्यहं प्रयास्यामि (२) शत्रुविमानितः; तिरस्कृतः, (३)मानापहौ; मानासहो, (४) बलकृत्तदा (for

कामं रणशिरस्यद्य शत्रभिर्वै विमानितः
कारणैः सम्यगभितः

कारणैरस्म्यभिहितः शत्रुभिवै विमानितः
अङ्कारणेस्म्यभिजितः शत्रुभिर्वै विमानितः
स सुहृच्छोकदो जातः शत्रूणां हर्षवर्धनः ।। १४ ।। (०१)

वारणाह्वयमासाद्य किं वक्ष्यामि जनाधिपम् ।। १५ ।। (०२)

भीष्मद्रोणौ कृपद्रौणी विदुरः सञ्जयस्तथा।
बाह्लीकः सौमदत्तिश्च ये चान्ये वृद्धसम्मताः ।। १६ ।। (०३)

ब्राह्मणाः श्रेणिमुख्याश्च तथोदासीनवृत्तयः ।
किं मां वक्ष्यन्ति किं चापि प्रतिवक्ष्यामि तानहम् ।। १७ ।।

रिपूणां शिरसि स्थित्वा तथा विक्रम्य चोरसि।
आत्मदोषात्परिभ्रष्टः कथं वक्ष्यामि तानहम् ।। १८ ।। (०४)

दुर्विनीताः श्रियं प्राप्य विद्यामैश्वर्यमेव च ।
तिष्ठन्ति न चिरं भद्रे यथाहं मदगर्वितः ।। १९ ।। (०५)

अहो नार्हमिदं कर्म कष्टं दुश्चरितं कृतम्।

---

था); शोकहृत्तथा; मानवर्धनः ; मानकृत्तदा.

(०१) (जातः; भुवं (for भूत्वा), सुहृच्छोकप्रदो भूत्वा (दोद्याहं; दो नित्यं); स सुहृच्छोकसन्तप्तः .

(०२) (३) नराधिपं प; त्रिपिष्टपं (for जना) .

(०३) (भीष्मद्रोणौ; भीष्मौ द्रौणिः कृपद्रौणी (for णिद्), (२)तदो (for तथा), (३)बाह्लिकः सौमदत्ति (४) वृत्तसंमतः; दृढसंमताः भृश.

(०४)(२)चारिभिः; चोपरि (for चोरसि), (४)द्रक्ष्यामि (for व),

(०५)(प्रियं; स्वयं (for श्रियं), (२)वा (for च), (३)तिष्ठन्ति न, (४)मदगर्वितं; मतिगर्वितः; अति.

स्वयं दुर्बुद्धिना मोहाद्येन प्राप्तोऽस्मि संशयम् ।। २० ।।[०१]

तस्मात्प्रायमुपासिष्ये न हि शक्ष्यामि जीवितुम्।
चेतयानो हि को जीवेत्कृच्छ्राच्छत्रुभिरुद्धृतः ।। २१ ।।[०२]

शत्रुभिश्चावहसितो मानी पौरुषवर्जितः ।
पाण्डवैर्विक्रमाढ्यैश्च सावमानमवेक्षितः ।। २२ ।।[०३]

अस्मिन् पर्वणि २०५अध्याये २२श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि दुर्योधप पञ्चाधिकद्विशततमोऽध्यायः ।। २०५ ।।

# २०६. षडधिकद्विसततमो अध्यायः

दुर्योधनेन प्रायोपवेशने निजाध्यवसायकथनपूर्वकं दुश्शासनं प्रतिराज्यपालनविधानम्

---

(०१)(यदेतन्; यथैतन् (for यथेदं), अहोनर्ह (नय; नार्ह) मिदं कर्म, (२)दृष्टं (for कष्टं),
(०२) (उपा शिष्ये (२)न हि शक्यामि; शक्ष्यामि न हि; न हि शक्नोमि सह्यं मे नेह जीवितं, (३) चिन्तयानो; चेतनावान्; , वेदयानो.
(०३)(अ) पहं (for अ वहं), (२) पौरुषगर्वितः (३)विक्र माद्यैश्च (विषमस्थैश्च); विक्रमारूढैः (४)सावसानम्; स सावज्ञम् (for सावमानम्) .

।। १ ।। कर्णेन दुर्योधनं प्रति प्रायोपवेशनान्निवर्तनाप सान्त्वोक्तिः ।। २ ।।

**वैशम्पायनः**

एवं चिन्तापरिगतो दुःशासनमथाब्रवीत्।

**दुर्योधनः-**

दुःशासन निबोधेदं वचनं मम भारत।(०१)
प्रतीच्छ त्वं मया दत्तमभिषेकं नृपो भव ।। १ ।।

प्रशाधि पृथिवीं स्फीतां कर्णसौबलपालिताम्।(०२)
भ्रातन्पालय विस्रब्धं मरुतो वृत्रहा यथा ।। २ ।। (०३)

बान्धवाश्चोपजीवन्तु देवा इव शतक्रतुम् ।। ३ ।। (०४)

ब्राह्मणेषु सदा वृत्तिं कुर्वीथाश्चाप्रमादतः।
बन्धूनां सुहृदां चैव भवेथास्त्वं गतिः सदा ।। ४ ।। (०५)

ज्ञातींश्चाप्यनुपश्येथा विष्णुर्देवगणान्यथा।
गुरवः पालनीयास्ते गच्छ पालय मेदिनीम् ।। ५ ।। (०६)

नन्दयन्सुहृदः सर्वान्शात्रवांश्चावभर्त्सयन्।

---

(०१) (एवं चिन्तागतो राजा.

(०२)(प्रतीहासं (for प्रतीच्छ त्वं), (२)नृपो त्तम (for नृपो भव), (३)कृत्स्नां; सर्वां (for स्फीतां), (४) कर्णसौवल्य; पावितः;पालितः .

(०३) (विश्रब्धं; विश्रब्धः (२)मरुतां; प्रभूतो (for मरुतो),

(०४) (३)चोप (for त्वोप), (४)सहस्राक्षमिवामराः.

(०५) (यथा (for सदा), वृत्तं; बुद्धिं; वृत्तिः; दान्तं (for वृत्तिं), (२)तु (for च), प्रसादयन् (for अ प्रमादतः), कुर्वीथा रोषमुत्सृज; कुरु वीरा प्रमादतः.

(०६) (ज्ञातीश्च (for ज्ञातींश्च), मन्येथा (for पश्येथा), (२)यथा (for इव), (३)कुरवः (for गुरवः), मान (for पालं ),च (for ते),

कण्ठे चैनं परिष्वज्य गम्यतामित्युवाच ह ॥ ६ ॥[०१]

**वैशम्पायनः-**

तस्य तद्वचनं श्रुत्वा दीनो दुःशासनोऽब्रवीत्।
अश्रुकण्ठः सुदुःखार्तः प्राञ्जलिः प्रणिपत्य च ॥ ७ ॥

सगद्गदमिदं वाक्यं भ्रातरं ज्येष्ठमात्मनः ।[०२]
प्रसीदेत्यपतद्भूमौ दूयमानेन चेतसा ॥ ८ ॥

दुःखितः पादयोस्तस्य नेत्रजं जलमुत्सृजन्।[०३]
उक्तवांश्च नरव्याघ्रो नैतदेवं भविष्यति ॥ ९ ॥

विदीर्येत्सकला भूमिर्द्यौश्चापि शकलीभवेत्।
रविरात्मप्रभां जह्यात्सोमः शीतांशुतां त्यजेत् ॥ १० ॥[०४]

वायुः शैघ्र्यमथो जह्याद्धिमवांश्च परिव्रजेत्।
शुष्येत्तोयं समुद्रेषु वह्निरप्युष्णतां त्यजेत् ॥ ११ ॥[०५]

न चाहं त्वदृते राजन्प्रशास्ते(से)यं वसुन्धराम्।

---

(०१)(चैव (for सर्वाञ्), (२)शत्रंश्चैव (for शात्रवांश्च), (अ) वसादयन्; (अ) वसादय; (अ) वनादयन्; ,(आ) हृय स्वयं, (३)कर्णं (for कण्ठे), (४) तं (for ह),

(३)बाष्पकण्ठः (ठाः) अश्रुपूर्णाः उत्कठश्च (for अश्रुकण्ठः),

(०२) (४) ह (for च), एव च (for आत्मनः) .

(०३) (भ्यपतद्; त्येव तद् (for त्यपतद्), (२)दीर्यमाणेन (for दूय ), तेजसा (for चेतसा), (३)सखेदं (for दुःखितः), (४)नेत्राभ्यां (for नेत्रजं),

(०४)(तु (for च), नरव्याघ्र (३)दीर्येत (for विदीर्येत्), नगाद्; सकला (for सनगा), (४)मन्दरः (for द्यौश्चापि), आतपतां (for आत्मप्रभां), शीतांशुतसू; तीक्ष्णांशुतां व्रजेत् (for त्यजेत्),

(०५)(शैत्यम्; शीघ्रम् (for शैष्ठयम्), पाशं जलेशो जह्याद्यद्, (२)परित्यजेत्; (अ) पि सश्चलेत्;,हिमं व्र; लतां व्र; परिप्लवेत्; (३)समुद्रस्य; द्रोपि, (४)ख-अयं पादो..नन्तरश्च नस्तः, अग्निर् (for वह्निर्) अति (for अपि), भविष्यति शतं समाः.

**पुनः पुनः प्रसीदेति वाक्यं चेदमुवाच ह ।। १२ ।।**

**दुश्शासनः-**

त्वमेव नः कुले राजा भविष्यसि शतं समाः ।(०१)
**शत्रूणां शोककृद्राजन्सुहृदां शोकनाशनः ।। १३ ।।** (०२)

**वैशम्पायनः-**

एवमुक्त्वा स राजानं सुस्वरं प्ररुरोद ह ।
**पादौ संस्पृश्य मानार्हौ भ्रातुर्ज्येष्ठस्य भारत ।। १४ ।।**(०३)

तथा तौ दुःखितौ दृष्ट्वा दुःशासनसुयोधनौ।
**अधिगम्य व्यथाविष्टः कर्णस्तौ प्रत्यभाषत ।। १५ ।।** (०४)

**कर्णः-**

विषीदथः किं कौरव्यौ बालिश्यात्प्राकृताविव ।
**न शोकः शोचमानस्य विनिवर्तेत कर्हिचित् ।। १६ ।।** (०५)

यदा च शोचतः शोको व्यसनं चा(ना)पकर्षति
**समार्थ्यं किं ततः शोके शोचमानौ प्रपश्यथः ।। १७ ।।** (०६)

---

(०१)(तु (for च), त्वत्कृते; त्वामृते (for त्वदृते), (२)प्रशासिष्ये; शासयेयं (for प्रशासेयं), (४)(ए) तद् (for (इ) दम्),

(०२) मानवर्धनः; हर्षवर्धनः (for शोक), जातो; राजन् (for राजा), भविष्यति न संशयः (for शतं समाः) .

(०३) (राजेंद्रं; राजानं, (२)सुस्वरं; सस्वरं (for सस्वनं), च(for ह), (३) स गृह्य; संस्पर्श; स्पृश्य; हृत्य (for गृह्य), शिरसा; मानार्हो (४)मानद (for भारत),

(०४) (तदा; अथ (for तथा), द्वौ; सु; तु (for तौ), भूत्वा(for दृष्ट्वा), (३)अधिगम्य महाबाहुः; महाराज; सुदुःखार्ता (for व्यथा.

(०५)(विषीदथः किं विषीदतः कौरवेन्द्रौ (for किं कौरव्यौ), (२)बालिशौ; किं युवां (for बालिश्यात्), प्राकृतानि च; प्राकृता इव, (३)शोक (for शोच), (४)वर्तति; वर्तेत्त (for वर्तेत), कर्हि (for कस्य),

(०६)(यथा (for यदा), न; तु (for च), शोचयतः (for च शोचतः), (२)व्यसनान् (for व्यसनं), सर्पति (for कर्षति),

धृतिं गृह्णीत मा शत्रून्शोचन्तौ नन्दयिष्यथः ।(०१)

धृतिमन्तो जयं शत्रुञ्शोचन्तौ नाभविष्यथ

**कर्तव्यं हि कृतं राजन्पाण्डवैस्तव मोक्षणम् ।। १८ ।।**

**नित्यमेव प्रियं कार्यं राज्ञो विषयवासिभिः ।**
**पाल्यमानास्त्वया ते हि निवसन्ति गतज्वराः ।। १९ ।। (०२)**

**नार्हस्येवङ्गते मन्युं कर्तुं प्राकृतवद्यथा**
**विषण्णास्तव सोदर्यास्त्वयि प्रायं समास्थिते ।। २० ।।**

**तदलं दुःखितानेतान्यर्तुं सर्वान्नराधिप**
**उत्तिष्ठ व्रज भद्रं ते समाश्वासय सोदरान् ।। २१ ।। (०३)**

**तदलं दुःखितान्सर्वान् कर्णः, उ कर्णः**

अस्मिन् पर्वणि २०६अध्याये २१श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि दुर्योधनप्रायोपवेशे षडधिकद्विशततमोऽध्यायः ।। २०६ ।।**

---

(०१) (३)क ख-धृदिं गृह्णीत मा शत्रूञ् शोचन्तो नन्दयिष्यथः।,ततः (for त्वतः), शोकं; शोको (४) शोचमानः प्रपश्यति; तः;थ गृह्णीतं; गृह्णीतः धृनिमन्तौ श्रियं चेमां, शोचतो (for न्तौ), ष्यत (for ष्यथः), शत्रूञ्शोकमिमं जहि; शोचन्तौ मा जहास्यथः .

(०२)(३)एवं (for एव), हितं (for प्रियं), (४) राज्ञां, ()पि (for हि),

(०३) (नार्हति (for नार्हसि), (ए)वं कृतं; वं कृते (for वङ्गते), मन्ये; शोकं; मृत्युं (for मन्युं), (४)सर्वं (for कर्तुं), प्रभो; भवान्; स्वयं; विभो (for यथा), (३)त्वयि (for तव) सौदर्यासू, (४)समाशि; उपासिते.

# २०७. सप्ताधिकद्विशततमोऽध्यायः

२०७ कर्णेन बहुधा प्रार्थने अपि दुर्योधनेन प्रायोपवेशान्यवरानावपरावर्तनम् ।।

कर्णकर्तृकप्रबोधनेनापि दुर्योधनस्य प्रायोपवेशनतोऽनिवृत्तिः

**कर्णः**

राजन्नाद्यावगच्छामि तवेह लघुसत्त्वताम्।
अल्पत्वं च तथा बुद्धेः कार्याणामविवेकिताम् ।। १ ।। (०१)

किमत्र चित्रं यद्वीर मोक्षितः पाण्डवैरसि।
सद्यो वशं समापन्नः शत्रूणां शत्रुकर्शन ।। २ ।। (०२)

सेनाजीवैश्च कौरव्य तथा विषयवासिभिः ।
अज्ञातैर्यदि वा ज्ञातैः कर्तव्यं नृपतेः प्रियम् ।। ३ ।। (०३)

प्रायः प्रधानाः पुरुषाः क्षोभयन्त्व(न्त्य)रिवाहिनीम्।
निगृह्यते च युद्धेषु मोक्ष्यन्ते चैव सैनिकैः ।। ४ ।। (०४)

सेनाजीवाश्च ये राज्ञां विषये सन्ति मानवाः ।
तैः सङ्गम्य नृपार्थाय यतितव्यं यथातथम् ।। ५ ।। (०५)

यद्येवं पाण्डवै राजन्भवद्विषयवासिभिः ।

---

(०१) आलस्यं (for अल्पत्वं), अविवेकतां, (३)तद्वीर; धर्मज्ञ (for यद्वीर), सद्यस्त्वं वशमापन्नः कर्षण; कर्षनः;, कर्षणः.

(०२)(नाद्याव; न ह्याव (for अद्याव), (२) (इ) मां; (ए)व (for (इ) ह),

(०३)(जीव्यैश्च; जीवस्य (३)ह्यथ; अथ (for यदि),

(०४)(प्रधान; प्रवीणाः (for प्रधानाः), (२)क्षोभयन्तु; कालयन्ति; क्षोभयित्वा (३)सु सु; षु; ()त्र (for च), (४) स्वसेवकैः सैन्यकैः; (ए)व सैनिकैः.

(०५) (जीव्या; जेव्या (for जीवा), राज्ञो; राजन् (for राज्ञां), (२)विजये (for विषये),

यदृच्छया मोक्षितोऽसि तत्र का परिदेवना ।। ६ ।। [०१]

न चैतत्साधु यद्राजन्पाण्डवास्त्वां नृपोत्तमम्।
स्वसेनया सम्प्रयान्तं नानुयान्ति स्म पृष्ठतः ।। ७ ।। [०२]

प्रयातं च; समं सर्वे सेनया सम्प्रयान्तं वै,

शूराश्च बलवन्तश्च संयुगेष्वपलायिनः ।
भवतस्ते सहाया वै प्रेष्यतां पूर्वमागताः ।। ८ ।। [०३]

पाण्डवेयानि रत्नानि त्वमद्याप्युपभुञ्जसे
सत्त्वस्थान्पाण्डवान्पश्य न ते प्रायमुपाविशन् ।। ९ ।। [०४]

उत्तिष्ठ राजन्भद्रं ते न चिरं कर्तुमर्हसि।
तदलं ते महाबाहो बुद्धिः प्रायोपवेशने ।। १० ।। [०५]

अवश्यमेव नृपते राज्ञो विषयवासिभिः ।
प्रियाण्याचरितव्यानि तत्र का परिदेवना ।। ११ ।। [०६]

मद्वाक्यमेतद्राजेन्द्र यद्येवं न करिष्यसि।
स्थास्यामीह भवत्पादौ शुश्रूषन्नरिमर्दन ।। १२ ।। [०७]

नोत्सहे जीवितुमहं त्वद्विहीनो नरर्षभ।

---

(०१)(यद्; यदा; इति यदि), राजा (for राजन्), (२)भवान् (for भवद्), (३) ()सि (for द्य), (४)तत्र का, परिवेदना.

(०२) (तवै; न वै (for न चै), (२)पाण्डवानां; वेया (for वास्त्वां), नृपोत्तमं, (३) सम्प्रयान्तं; याते; .

(०३)(२)सङ्ग्रामेषु (for संयुगेषु), (अ)प लायनः; (अ) पराजिताः, (३)सहाया (for सभायां),

(०४) (पूर्वाणि (for रत्नानि), (२)एतानि (for अद्यापि), (अ) नुयुज्यसे; (उ) पयुञ्जते; युञ्जसे; भुग्ष्वसे, (३)सत्वस्थाः पाण्डवाश्चपि,.

(०५) विषादं (मर्ष) कर्तुमीदृशं; विशादेन महा बल.

(०६) (अपश्यम् (for अवश्यम्), (२) राज्ञां, (४)तत्र का, परिदेविना; वेदना.

(०७)(२)अद्य (for यदि), त्वं; (ए)तन् (for (ए)वं), (४)शुश्रूषुद्; शुश्रूषाम् (for शुश्रूषन्), भरतर्षभ (for अरि),

प्रायोपविष्टस्तु नृप राज्ञां हास्यो भविष्यसि ।। १३ ।।(०१)

**वैशम्पयनः**

एवमुक्तस्तु कर्णेन राजा दुर्योधनस्तदा।
नैवोत्थातुं मनश्चक्रे स्वर्गाय कृतनिश्चयः ।(०२)

अस्मिन् पर्वणि २०७अध्याये १३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि दुर्योधनप्रायोपवेशे कर्णवाक्ये सप्ताधिकद्विशततमोऽध्यायः ।। २०७ ।।

महाभारततत्तात्पर्यनिर्णये २२ अध्याये

ततो निशायां प्राप्तायां स्वपक्षे प्रविषीदति ।
मन्त्रयित्वाऽसुरैः कृत्या निर्मिता होमकर्मणि ।। ४०२ ।।
शुक्रेणोत्पादिता कृत्या सा प्रसुप्तेषु मन्त्रिषु ।
धार्तराष्ट्रं समादाय ययौ पातालमाशु च ।
अथ सम्बोधयामासुर्दैत्या दुर्योधनं नृपम् ।। ४०३ ।।
त्वं दिव्यः पुरुषो वीरः सृष्टोऽस्माभिः प्रतोषितात् ।
तपसा शङ्कराद् वज्रकायोऽवध्यश्च सर्वदा ।
अस्माकं पक्षभूतस्त्वं देवानां चैव पाण्डवाः ।। ४०४ ।।

---

(०१) (जीवितम् (for तुम्), सत्यं; शक्यं (for अहं), (२)यद्; त्वां (for त्वद्), (३)ख-प्रायोपविष्टस्तु तथा राज्ञां हास्यो भविष्यति।, च (for तु), तथा (for नृप), प्रायोपविष्टं राजानं, (४)हासो भविष्यति, दुर्योधनममर्षणं, (एवमुक्तस्तु कर्णेन राजा दुर्योधनस्तथा । नाभ्युत्थातुं मनश्चक्रे स्वर्गाय कृतनिश्चयः ।। (अधिकः पाठः) .

(०२) (२)तथा (for तदा), यश्द्रुतं कौरवं त्वया (३)स नो (for नैवो), (४)मानसः (for निश्चयः),

इदानीं सर्वदेवानां वरात् त्वं विजितो रणे ।
वयं तथा करिष्यामो यथा जेष्यसि पाण्डवान् ।। ४०५ ।।
कृष्णेन निहतश्चैव नरकः कर्ण आस्थितः ।
स च कृष्णार्जुनाभावं करिष्यति न संशयः ।। ४०६ ।।
भीष्मादींश्च वयं सर्वानाविशाम जयाय ते ।
तपसा वर्द्धयिष्यामस्त्वां कर्णादींश्च सर्वशः ।। ४०७ ।।
तस्माद् गत्वा पालयस्व राज्यं राजन्नपेतभीः ।
इदं कस्यापि नाऽख्येयं सुगुप्तं भूतिवर्द्धनम् ।। ४०८ ।।
इत्युक्त्वा कृत्यया भूयः स्वस्थाने स्थापितो नृपः ।
उमया निर्मितात्मार्द्धमुत्तरं हरनिर्मितम् ।
ज्ञात्वैवावध्यतां चैव राज्ये बुद्धिं चकार सः ।। ४०९ ।।
नोवाच कस्यचित् तेषु स्वानुभूतं सुयोधनः ।
प्रभातायां तु शर्वर्यां पुनः कर्णो वचोऽब्रवीत् ।। ४१० ।।
भृत्यैस्तवैव पार्थैर्यन्मोचितोऽसि परन्तप ।
तेन मान्योऽधिकं लोके यद् भृत्या एव तादृशाः ।
किमु त्वं राजशार्दूल तदुत्तिष्ठ स्थिरो भव ।। ४११ ।।
या च तेऽर्जुनमाहात्म्ये शङ्का सा व्येतु मे शृणु ।
यावन्नैवार्जुनं हन्यां पादौ प्रक्षालये स्वयम् ।। ४१२ ।।
इत्युक्तोऽवरजैश्चैव सर्वैः शकुनिना तथा ।
याचितो रथमारुह्य ययौ नागपुरं द्रुतम् ।। ४१३ ।।

# २०८. अष्टाधिकद्विशततमोऽध्यायः

शकुन्यादिभिर्वहुधा परिसान्त्वने अपि दुर्योधनेन प्रायोपवेशन्भियादनिवर्तने पातालवारिभिर्दैत्यदानवैस्तदानयनाय जपहोमादिना कृत्यासर्जनम् ॥ १ ॥ तया कृत्यया प्रायोपविष्टस्य दुर्योधनस्य पातालं प्रत्याननम् ॥ २ ॥ शकुनिकृतप्रबोधनादपि दुर्योधनं स्वनिश्चयादविचलितमेव निरीक्ष्य दैत्यानां कृत्यासाहाय्येन तस्य रसातले समानयनम्

प्रायोपविष्टं राजानं दुर्योधनममर्षणम्।
उवाच सान्त्वयन्राजञ्छकुनिः सौबलस्तदा।(०१)

**शकुनिः**

सम्यगुक्तं हि कर्णेन तच्छ्रुतं कौरव त्वया।
मया हृतां श्रियं स्फीतां तां मोहादपहाय किम् ॥ १ ॥ (०२)

त्वं बुध्वा नृवर प्राणानुत्स्रष्ढ्वमिह त्रेष्टसि,
अथवाप्यवगच्छामि न वृद्धाः सेवितास्त्वया ॥ २ ॥

यः समुत्पतितं हर्षं दैन्यं वा न नियच्छति।
स नश्यति श्रियं प्राप्य पात्रमाममिवाम्भसि ॥ ३ ॥ (०३)

---

(०१)(३)राजा (for राजञ्), (४)सौबलिसू, तथा (for तदा),.

(०२)त्वमबुद्ध्याद्य(ल्पबुद्ध्या)नृपते प्राणानुत्प्र(त्स्र)ष्टुमर्हसि। शकुनिरुवाच (शकुनिः) (ख-प्रायोपविष्टं राजानं दुर्योधनममर्षणम् ।,उवाच सान्त्वयत्राजञ्शकुनिस्साबलस्तदा ॥ , ख-अर्धचतुष्टयं नास्ति, तु (for हि), (२) न; यत् (for तत्), (३)दीप्तां (for स्फीतां), (४)स्नेहात् (for मोहात्), समवहाय; त्वमपहाय; सर्वां विहाय, तां (for किं), तां मोहादप (त्सम; दुप) हाय किं (वै) (अ) द्य नृपते; च नृपते; भूय एव (for नृपवर), अर्हसि (for इच्छसि) .

(०३) (अथ (for अद्य), वा (for च), तु (for (अ) पि), (३)यत् (for यः), घोरं; कोपं; क्रोधं (for हर्षं), (४)नियच्छसि, नश्यते हि (for स नश्यति), आमकुम्भ; प्राप्तनाव; छिद्रां नाव,(for पात्रमाम),

यः शोकं समनुप्राप्तं न नियच्छति भारत
तमीदृशं नरं न श्रीः कदाचिदपि सेवते,

अतिभीरुमतिक्लीबं दीर्घसूत्रं प्रमादिनम्।
व्यसनाद्विषयाक्रान्तं न भजन्ति नृपं प्रजाः ।। ४ ।।[०१]

सत्कृतस्य हि ते शोको विपरीते कथं भवेत्।
मा कृतं शोभनं पार्थैः शोकमालम्ब्य नाशय ।। ५ ।।[०२]

यत्र हर्षस्त्वया कार्यः सत्कर्तव्याश्च पाण्डवाः ।
तत्र शोचसि राजेन्द्र विपरीतमिदं तव ।। ६ ।।[०३]

प्रसीद मा त्यजात्मानं तुष्टश्च सुकृतं स्मर ।
प्रयच्छ राज्यं पार्थानां यशो धर्ममवाप्नुहि।[०४]
क्रियामेतां समाज्ञाय कृतज्ञस्त्वं भविष्यसि ।। ७ ।।[०५]

सौभ्रात्रं पाण्डवैः कृत्वा समवस्थाप्य चैव तान्।
पित्र्यं राज्यं प्रयच्छैषां ततः सुखमवाप्स्यसि ।। ८ ।।[०६]

**वैशम्पायनः**

---

(०१) (२)भीम; भीत (for भीरु), मृदुं (for अति), (३)विषयक्रान्तं; विषमं तात (४)नृप; नरं; पर (for नृपं), प्रजाः; बुधाः (for श्रियः),

(०२) (तैः (for ते), लोके; शोके (for शोको), (२)विपरीतः (३)यत्; तैः (for मा), पूजनं; शोभनैः (for शोभनं), (४)शोकमेतं कालं विनाशय.

(०३) (अत्र (for तत्र),

(०४) (न (for मा), प्रसीद चात्म नात्मानं; प्रसीद सत्यमात्मानं; , प्रसादं न त्यजास्माकं; प्रसीद कृतसन्मानं, (२)तुष्टस्व; सुष्ठु त्वं; सन्तुष्टः (for तुष्टश्च), स्व (for सु), (३)पांहूनां (for पार्थानां), तेषां प्रतिकृतं कृत्वा (कार्यं), (४)राज्य (for धर्म) .

(०५)(स्थाय; , ज्ञाप्य (for ज्ञाय), (२)कृतज्ञस्त्वं (for ध्नो न),

(०६)(४) हि (for तान्), प्रदायैषां (for प्रयच्छै), अवाप्स्यसि (for ग्नुहि),

शकुनेस्तु वचः श्रुत्वा दुःशासनमवेक्ष्य च ।
**पादयोः पतितं वीरं विकृतं भ्रातृसौहृदात्(दम) ।। ९ ।।** (०१)

बाहुभ्यां साधुजाताभ्यां दुःशासनमरिन्दमम्।
**उत्थाप्य सम्परिष्वज्य(ज्व)प्रीत्याजिघ्रत मूर्धनि ।। १० ।।** (०२)

कर्णसौबलयोश्चापि संश्रुतं(त्य)वचनान्यसौ।
**निर्वेदं परमं गत्वा राजा दुर्योधनस्तदा ।। ११ ।।**

व्रीडयाभिपरीतात्मा नैराश्यमगमत्परम्।(०३)
**तच्छ्रुत्वा सुहृदश्चैव समन्युरिदमब्रवीत् ।। १२ ।।**

**दुर्योधनाः-**

न धर्मधनसौख्येन नैश्वर्येण न चाज्ञया।
**नैव भोगैश्च मे कार्यं मा विहन्यत गच्छत ।। १३ ।।** (०४)

निश्चितेयं मम मतिः स्थिता प्रायोपवेशने।
**गच्छध्वं नगरं सर्वे पूज्याश्च गुरवो मम ।। १४ ।।** (०५)

**त एवमुक्ताः प्रत्यूचू राजानमरिमर्दनम् ।। १५ ।।**

**कर्णसौबलौ-**

---

(०१)वैशं उ (च वचः; वचनं; तद्वचः (for तु वचः), (२)अवेक्ष्य ह; अवैक्षत(for अवेक्ष्य च),(३)दीनं (for वीरं), (४)विकृतं; क्लबं (for क्लवं),
(०२)(साधुवृत्ताभ्यां, (२)अरिन्दमः ; अरिन्दम, (४)प्रातिं (for प्रीत्या), जिघ्रति; जिघ्राय; ,चाघ्राय (for (अ) जिघ्रत),
(०३) (ए)व (for (अ) पि), (२)संश्रुत्य (for संस्मृत्य), (अ) थ (for असौ), (३)कृत्वा (for गत्वा), (३) व्रीडेन (for व्रीडया), (अ) पि परीतात्मा; च परीताङ्गः; (अ) भिपरीतः सन्.
(०४)(तच्छ्रुत्वा सुहृदश्चैव, (३)धर्मैर् (for धर्म), (४)वा (for चा), च (for (ए) व) कामै, (for भोगै), मे कार्यं मा विगच्छत कश्चन; मां विहाय च गच्छत; , मा न विघ्नत गच्छत; , मा न विघ्नेन गच्छतः.
(०५)(मतिः सिद्धा (for मम मतिः), (२)स्थितः मम; स्थित्वा (for स्थिता) (३) सहिताः (for नगरं),

या गतिस्तव राजेन्द्र सास्माकमपि भारत।
**कथं वा सम्प्रवेक्ष्यामस्त्वद्विहीनाः पुरं वयम्   ।। १६ ।।** (०१)

**वैशम्पायनः**

स सुहृद्भिरमात्यैश्च भ्रातृभिः स्वजनेन च ।
**बहुप्रकारमप्युक्तो निश्चयान्न विचाल्यते   ।। १७ ।।** (०२)

दर्भास्तरणमास्तीर्य निश्चयाद्धृतराष्ट्रजः ।
**संस्पृश्यापः शुचिर्भूत्वा भूतले समुपस्थितः   ।। १८ ।।** (०३)

कुशचीराम्बरधरः परं नियममास्थितः ।
**वाग्यतो राजशार्दूलः स स्वर्गगतिकाम्यया   ।। १९ ।।** (०४)

मनसोपचितिं कृत्वा निरस्य च बहिष्क्रि(बहिःक्रि)याः ।(०५)
**तस्थौ प्रायोपवेशेथ मतिं कृत्वा सुनिश्चयाम्   ।। २० ।।** (०६)

अथ तं निश्चयं तस्य बुद्ध्वा दैतेयदानवाः ।
**पातालवासिनो रौद्राः पूर्वं देवैर्विनिर्जिताः   ।। २१ ।।** (०७)

ते स्वपक्षक्षयं तं तु ज्ञात्वा दुर्योधनस्य वै।

---

(०१)(तमू इति (for त), उक्ते (for उक्ताः), (३)सा गतिर्न च भारत, च; हि; नु (for वा), त्वयि हीनाः (त्वद्विहीनाः), पुरं वयं.

(०२) वैशं उ (वैशं) (सह पुत्रैर् (for स सुहृद्भिर्), (३) इति (for अपि), (४)च चाल्यते; विचाल्यते; (अ)प्यचाल्यतः.

(०३) (दर्भसंस्तर; दर्भास्तरण, (२)निश्चयं (for निश्चयाद्), (४)भूतले, निषसाद ह; समुपस्थितः; समुपाहितः.

(०४)(२)निश्चय (for नियमं), परं नित्यमभीप्सितः (३)वाग्जितो; वाक्यं ते (for वाग्यतो), राजशार्दूल.

(०५)(४)सुदुर्गति काम्यया मनसोपतितं; स्सोमचितं; सोप हितं; स्सोविजितं ज्ञात्वा, बहिःकृताः; बहिष्क्रियां
.

(०६) निश्चलां.

(०७)(निश्चितं (for निश्चयं), (२)ज्ञात्वा; श्रुत्वा (for बुद्ध्वा), दैत्येय.

आह्वानाय तदा चक्रुः कर्म वैतानसम्भवम् ॥ २२ ॥ (०१)

बृहस्पत्युशनोक्तैश्च मन्त्रैर्मन्त्रविशारदाः

अथर्ववेदप्रोक्तैश्च याश्चोपनिषदि क्रियाः ।
मन्त्रजप्यसमायुक्तास्तास्तदा सप्र(म)वर्तयन् ॥ २३ ॥ (०२)

जुह्वत्यग्नौ हविः क्षीरं मन्त्रवत्सुसमाहिताः ।
ब्राह्मणा वेदवेदाङ्गपारगाः सुदृढव्रताः ॥ २४ ॥ (०३)

अध्वर्यवो दानवानां कर्म प्रावर्तयं स्तुतः ॥ २५ ॥(०४)

कर्मसिद्धौ तदा तत्र जृम्भमाणा महाद्भुता।
कृत्या समुत्थिता राजन्किं करोमीति चाब्रवीत्।(०५)

तस्मिन्यज्ञे दानवानां वर्तमाने नराधिप
आहुर्दैत्याश्च तां तत्र सुप्रीतेनान्तरात्मना ॥ २६ ॥

**दैत्याः-**

प्रायोपविष्टं राजानं धार्तराष्ट्रमिहानय ॥ २७ ॥ (०६)

---

(०१)(तु षु (for स्व),तं वै; ज्ञात्वा (for तं तु), (२)श्रुत्वा; राज्ञो; मतं (for ज्ञात्वा), ह; च (for वै) (३)आनयार्थं (for आह्वानाय), ततः (for तदा), आश्लायनतश्चक्रुः.

(०२)(बृहस्पत्युशनःप्रोक्तैर् (३)वेदप्रोक्ताश्च; वेदमन्त्रेषु (४)याश्चैवोपनिषत्क्रियाः; याश्चैपनिषद दाः; दः; दां क्रियाः; पारगाः सुदृढव्रताः मन्त्र जाप्य, सम्प्रवर्तयन्; समवर्तयत् तदा सम्यगवर्तयन्.

(०३)(जुह्वन्त्यग्नौ; जुह्वन्तो, ततः (for हविः), (२)हितः (for हिताः) (३) वेदाङ्गाः; वेदाङ्गं (for वेदाङ्ग), (४)सुधृतव्रताः.

(०४)यन्त तत् (for यंस्ततः), आसन्कर्मप्रवर्तकाः.

(०५)ततम् (for तदा), महाद्भुता; महद्भुतं; महाभुजाः; तदद्भुतं, (घोरा (for राजन्), (४)सा (for चा) .

(०६)(दैत्यांश्च (for दैत्या), तान् (for तां),राजन् (for तत्र), आहुश्च तां तदा तत्र (२)घोररूपां भयावहां.

कृत्यां सुतीक्ष्णदन्ताग्रां दीप्ता (शि) शिरोरुढाम् (०१)

**वैशम्पायनः-**

तथेति च प्रतिश्रुत्य सा कृत्या प्रययौ तदा।
**निमेषादगमच्चापि यत्र राजा सुयोधनः** ।। २८ ।। (०२)

समादाय च राजानं प्रविवेश रसातलम्।
**दानवानां मुहूर्ताच्च तमानीतं न्यवेदयत्** ।। २९ ।। (०३)

तमानीतं नृपं दृष्ट्वा रात्रौ सङ्गत्य दानवाः ।
**प्रहृष्टमनसः सर्वे कश्चिदुत्फुल्ललोचनाः** ।। ३० ।।

दृढमेनं परिष्वज्य पृष्ट्वा च कुशलं तदा (०४)
**साभिमानमिदं वाक्यं दुर्योधनमथाब्रुवन्** ।। ३१ ।। (०५)

अस्मिन् पर्वणि २०८अध्याये ३१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि दुर्योधनप्रायोपवेशे अष्टाधिकद्विशततमोऽध्यायः ।। २०८ ।।

# २०९. नवाधिकद्विशततमोऽध्यायः

---

(०१) (४)दुयौधनमिहा.

(०२) ((अ) थ (for प्र) नृप (for तदा), (३)(ए) व (for (अ)पि),

(०३)(सा त (स) मादाय (for समादाय च), (३)मुहूर्तं (for मुहूर्तच्) ।। (४)अप्यानीतं पुरस्तात्तं (for तमानीतं), पुरतस्तं निवे; आनीतं तत्र वेद.

(०४) (अ) ब्रवीत् (for (अ)ब्रुवन्),

(०५) (ततो (for नृपं), (२)सर्वे (for रात्रौ), सङ्गत्य; गम्य (for हृत्य), (३)मानसाः; मानवाः (४)लोचनः; चेतनाः .

पातालवासिभिर्दैत्यदानवैर्दुर्योधनं प्रति हेतूपन्यासपूर्वकं प्रायोपवेशानिश्चयान्निवर्तनम् ॥ १ ॥ पुनः कृत्यया दुर्योधनस्य पूर्वस्थानं प्रत्यानयनम् ॥ २ ॥ पराद्युः कर्णादिप्रार्थनया दुर्योधनेन सर्वैस्सह स्वपुरं प्रत्यागमनम् ॥ ३ ॥ दानवानां दुर्योधनप्रबोधनं ततः कर्णानुरोधेन दुर्योधनस्यानशनत्यागं कृत्वा स्वपुरं प्रति प्रस्थानम्

**दानवा ऊचुः**

भोः सुयोधन राजेन्द्र भरतानां कुलोद्वह ।
शूरैः परिवृतो नित्यं तथैव च महात्मभिः ॥ १ ॥ (०१)

अकार्षीः साहसमिदं कस्मात्प्रायोपवेशनम्।
आत्मत्यागी ह्यधो याति वाच्यतां चायशस्करीम् ॥ २ ॥ (०२)

न हि कार्यविरुद्धेषु बहुपापेषु कर्मसु।
मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ ३ ॥ (०३)

नियच्छैनां मतिं राजन्धर्मार्थसुखनाशिनीम्।
यशःप्रतापवीर्यघ्नीं शत्रूणां हर्षवर्धनीम् ॥ ४ ॥ (०४)

श्रूयतां हि(तु)प्रभो तत्त्वं दिव्यतां चात्मनो नृप।
निर्माणं च शरीरस्य ततो धैर्यमवाप्नुहि ।(०५)

---

(०१)(भे, दुर्योधन, (२)भारतानां, (३)राजा (for नित्यं), (४)सु (for च),

(०२)(मा कार्षीः (२)कथं ; यस्मात् (for कस्मात्), (३)ह्यधो याति; ह्यवगति; समा (ह्यवा) प्रोति (for ह्यवाग्याति), (४)वा (for चा), पापानां चाप्यथो गतिं; पाप्मान मयशस्करं.

(०३)(कार्यविरोधेषु; कार्यानिरुद्धेषु ज्ञानविरुद्धेषु (२)बहुपापेषु बहूपायेषु .

(०४)((ए) नां; तां (for ए तां), महाराज (for मतिं राजन्), (२)सुयशस्विनीं; सुखनाशनीं; कर्शिनीं, (३)वीर्यघ्नीं; धर्मघ्नीं, (४)वर्धिनीं.

(०५) (तु (for च), प्रभो वाक्यं; परं तत्वं; पूः प्रभूतिं तं च; प्रभूतत्वं (for प्रभो तत्त्व), श्रूयतां भवभूतिं च (२) च ()नघ, (for नृप), (४)धर्मम् (for धैर्यम्),

**पुरा त्वं तपसास्माभिर्लब्धो राजन्महेश्वरात् ।। ५ ।।** [०१]

**पूर्वकायश्च स(पू)र्वस्ते निर्मितो वज्रसञ्चयैः**
**अस्त्रैरभेद्यः शस्त्रैश्चाप्यधः कायश्च तेऽनघ ।। ६ ।।** [०२]

**कृतः पुष्पमयो देव्या रूपतः स्त्रीमनोहरः ।** [०३]

**एवमीश्वरसंयुक्तस्तव देहो नृपोत्तम।**
**देव्या च राजशार्दूल दिव्यस्त्वं हि न मानुषः ।। ७ ।।** [०४]

**क्षत्रियाश्च महावीर्या भगदत्तपुरोगमाः ।**
**दिव्यास्त्रविदुषः शूराः क्षपयिष्यन्ति ते रिपून् ।**
**यैः सुरापि घृणां त्यक्त्वा योत्स्यन्ते सह वैरिभिः ।। ८ ।।** [०५]
**तदलं ते विषादेन भयं तव न विद्यते।**
**साहाय्यार्थं च ते वीराः सम्भूता भुवि दानवाः ।** [०६]
**भीष्मद्रोणकृपादींश्च प्रवेक्ष्यन्त्यपरेऽसुराः** [०७]

---

(०१)( ख-निर्माणं च शखरीरस्य ततो धैर्यमवाप्नुहि।, त्वं तपसो; द्वैतवने (for त्वं तपसा), (२)राजन् (for देवान्),

(०२)(घोरा (for राजन्), (४)सा (for चा), (३)सर्वः ते पूर्व (for सर्व),

(०३) (विभेद्यः वा (for च), (२)न च; ह्यधः (for (अ) प्यधः), कार्यः (for कायः), तव; तु ते (for च ते), नृप (for नधे), (३)देव; दैव्या; दिव्यो (for देव्या), (४) ते(for स्त्री),

(०४) (संयुस्तया, (२)नरेश्चर (for नृपो), (४)देव (for दिव्य), न हि भुवि मानवः (for मानुषः) दिव्यं रूपं हि मानुषं.

(०५) (३)ख-दिव्यास्त्रविदुषश्शूराः क्षपयिष्यन्ति तेरिपून् । तदलं ते विषादेन भयं तव न विद्यते ।। सहायार्थं च ते वीर सम्भूता भुवि दानमा : । भीष्मद्रोणकृपादींश्व प्रवेक्ष्यन्त्यपरे..सुराः ।। , वेदिनः नं; दिव्यास्त्रे विदितः निपुणाः (for विदुषः), (४)क्षययिष्यन्ति,.

(०६) (परितापेन (for ते विषादेन), (२)तत्र (for तव), न भयं तव विद्यते, विद्यते तव, (३) सहायार्थं (र्थे) च ते वीरा साह्यार्थं चेह ते वीराः), सर्वमर्थं च वीरास्ते; सहाय्यार्थं हि ते वीर; साह्यार्थं चैव ते वीर, (४) दिवि (for भुवि), मानवाः (for दानवाः),

(०७) ((अ) प्यवेक्ष्यन्ति (for प्रवेक्ष्यन्ति), परे (for परे), (३)वैरा, (for यैरा), कृपां (for घृणां) यथ त्यक्ता (for त्यक्त्वा), (४)तव शत्रुभिः; वैरिभिः सह (for तैव वैरिभिः),

नैव पुत्रान्न च भ्रातन्न पितन्न च बान्धवान्।
नैव शिष्यान्न च ज्ञातीन्न बालान् स्थविरान्न च ।। ९ ।। [०१]

युधि सम्प्रहरिष्यन्तो मोक्ष्यन्ति कुरुसत्तम ।। १० ।। [०२]

लक्षालङ्कारः - मोक्ष्यन्ति कुरुसत्तम इत्यत्र पुत्रान्न मोक्ष्यन्तीत्यादियोजना ।

निःस्नेहा दानवाविष्टाः समाक्रान्तेऽन्तरात्मनि।[०३]
प्रहरिष्यन्ति विवशाः स्नेहमुत्सृज्य दूरतः ।। ११ ।।

दृष्टाः पुरुषशार्दूलाः कलुषीकृतमानसाः ।
अविज्ञानविमूढाश्च दैवश्च विधिनिर्मितात् ।। १२ ।। [०४]

व्यभाषमाणाश्चान्योन्यं न मे जीवन्विमोक्ष्यसे।
सर्वे शस्त्रास्त्रमोक्षेण पौरुषे समवस्थिताः ।। १३ ।।[०५]

श्लाघमानाः कुरुश्रेष्ठ करिष्यन्ति जनक्षयम्।[०६]
तेऽपि पञ्च महात्मानः प्रतियोत्स्यन्ति पाण्डवाः ।। १४ ।।[०७]

वधं चैषां करिष्यन्ति दैवयुक्ता महाबलाः ।[०८]

---

(०१) (वे; च; (इ)ष्टान् (for (ए)व), नैव भ्रातृन्न च सुतान्, (२)पुत्रान् (for पितृन्), पितृन्नैव च बान्धवान्, (३)न वै (for नैव), न शिष्यान्नैव च ज्ञातीन्, (४)बाल (for बालान्),
(०२)(युद्धे (for युधि), (२)मोक्ष्यन्ते; योत्सन्ते (for मोक्ष्यन्ति), कुरुसत्तमाः; मः.
(०३)(पराक्रान्ते,.
(०४)(विवशाः(for बन्धुभ्यः), (२)भारत (for दूरतः), (३)दुष्टाः (for हृष्टाः), अवि ज्ञातः (तं) विमूढाश्च; अनभिज्ञाश्च मूढाश्च; अज्ञान तं मूला देवाश्च; अनभिज्ञातमूलाश्च (श्च) अनभिज्ञा विमूढाश्च.
(०५)(आभाष (ष्य) माण; व्थाभाष्य (२)विमोक्ष्य (क्ष) सि; विमोक्षसे; प्रमोक्ष्यसे; न मो
न मे जीवितुमर्हथ; न मे जीवितुमर्हसि; न जीवश्च च मोक्ष्यसे (३)सर्वे (for सर्व), सर्वे शस्त्रा स्त्रमोक्षे च; सर्वशास्त्रास्त्रमोक्षेण (क्षेषु क्षे च) सर्वशस्त्रप्रमोक्षेण; सर्वे शस्वास्त्रमो क्षैश्च;, सर्वशस्त्रास्त्रमोक्षे च.
(०६)(४)समुप; पर्यव (for समव), श्लाध्यमानाः;धार्यमाणाः कुरुश्रेष्ठाः.
(०७) (च (for पि), पञ्च (for शक्त्या), (२)प्रयोत्स्यन्तीह; योक्ष्यन्ति (for योत्स्यन्ति), पाण्डवान् .
(०८) (३)क्षयं (for वधं), तेषां (for चैषां), (४)देव; वैर (for दैव),

दैत्यरक्षोगणाश्चैव सम्भूताः क्षत्रयोनिषु ।। १५ ।। (०१)

योत्स्यन्ति युधि विक्रम्य शत्रुभिस्तव पार्थिव ।
गदाभिर्मुसलैः शूलैः शस्त्रैरुच्चावचैस्तथा ।(०२)
प्रहरिष्यन्ति ते वीरास्तवारिषु महाबलाः ।। १६ ।।

यच्च तेऽन्तर्गतं वीर भयमर्जुनसम्भवम्।
तत्रापि विहितोऽस्माभिर्वधोपायोऽर्जुनस्य वै ।। १७ ।। (०३)

हतस्य नरकस्यात्मा कर्णमूर्तिमुपाश्रितः ।
तद्वैरं संस्मरन्वीर योत्स्यते केशवार्जुनौ ।। १८ ।। (०४)

स ते विक्रम शौण्डी(टी)रो रणे पार्थं विजेष्यति।
कर्णः प्रहरतां श्रेष्ठः सर्वांश्चारीन्महारथः ।। १९ ।। (०५)

लक्षालङ्कारः - स ते विक्रमशौण्डीर इत्यत्र विक्रमशौण्डीरः पराक्रमेण कुशलः ।

ज्ञात्वैतच्छद्मना वज्री रक्षार्थं सव्यसाचिनः ।
कुण्डले कवचं चैव कर्णस्यापहरिष्यति ।। २० ।। (०६)

तस्मादस्माभिरप्यत्र दैत्याः शतसहस्रशः ।
नियुक्ता राक्षसाश्चैव ये ते संशप्तका इति ।। २१ ।।

---

(०१)(दैत्या दैत्य), (ए) व (for (अ)पि), (२)प्रविष्टाः (for सम्भूताः), संहता ह्यस्त्रयोधिषु.
(०२) (३)विधि; तव (for युधि), (४)सह (for तव), मुशलैः; मुषलैः शूलैः; शूरैः (for खड्गैः),अरत्रै,(for शस्त्रै), तदा; अपि (for तथा),
(०३)(हृद्गतं (for न्तर्गतं), (२)फल्गुन (for अर्जुन), (३)(अ) भि (for (अ) पि), विध्युपायो (for वधो),
(०४)(२)कर्णमूर्तिर् अपाश्रितः (३)वीरं (for वैरं), संस्मृतं (for संस्मरन्),वीरो (for वीर), तत्तद्वैरं स्मरन्वीरि, (४) र्जुनकेशवौः.
(०५)(शौटीरो; विक्रम्य शौंडीरो; विक्रमसौटीरो; शौडीरो, (२) विजेष्यते, (४)सर्वधारीन् (for सर्वांश्चारीन्), यशाः; रथाः; मतिः; रथान् (for रथः),
(०६)(तच् (for (ए)तच्), (२)रक्षार्थी (३)(अ)पि (ए) व) (४)(अ) पि (for अ प),

प्रख्यातास्तेऽर्जुनं वीरं निह(हनि)ष्यन्ति (च)मा शुचः ।। २१ ।।(०१)
**असपत्ना त्वया हीयं भोक्तव्या वसुधा नृप ।। २२ ।।** (०२)

मा विषादं गमस्तस्मान्नैतत्त्वय्युपपद्यत
**विनष्टे त्वयि चास्माकं पक्षो हीयेत कौरव ।। २३ ।।** (०३)

गच्छ वीर न ते बुद्धिरन्या कार्या कथञ्चन।
**त्वमस्माकं गतिर्नित्यं देवतानां च पाण्डवाः ।। २४ ।।** (०४)

**वैशम्पायन उवच**

एवमुक्त्वा परिष्वज्य दैत्यास्तं राजकुञ्जरम्।
**समाश्वास्य च दुर्धर्षं पुत्रवद्दानवर्षभाः ।। २५ ।।** (०५)

स्थिरां कृत्वा बुद्धिमस्य प्रियाण्युक्त्वा च भारत।
**गम्यतामित्यनुज्ञाय जयमाप्नुहि चेत्यथ ।। २६ ।।** (०६)

तैर्विसृष्टं महाबाहुं कृत्या सैवानयत्पुनः ।
**तमेव देशं यत्रासौ तदा प्रायमुपाविशत् ।। २७ ।।** (०७)

प्रतिनिक्षिप्य तं वीरं कृत्या समभिपूज्य च ।

---

(०१)(२)चापि (for शत), (४)ते वै; एते (for ये ते), संसप्तका; सर्वान्तका इव (for इति) वीर, हनिष्यन्ति च; युधि हिंस्यं (सं) ति युधि योत्स्यन्ति (for निहनि),

(०२)(असपत्नी ह्येषा; वीर (for हीयं), (२)वसुधाधिप.

(०३)(अ-न विषादं न चस्वास्थ्यं न चास्वस्थो भवानघ ।, क-मा विषादं नयस्वाद्यं, ख- मविषादस्त्वया कार्यो नेतत्त्वय्युपपद्यते ।, न (for मा),विषादे; विषादो नयस्वास्य; नयात्मानं; गमस्तस्मान्; नयस्वात्मा; त्वया कार्यो; नयस्यास्था (for नयस्वास्मान्), (२) मनस्वस्थो भवानघ,मोक्षो (for पक्षो), सर्वदा; पार्थिव (for कौरव),

(०४)(३)रतिर् (for गतिर्), (४)दैवतानां तु (for च),

(०५)(परित्यज्य (२)ते (for तं), पुङ्गवं (for कुञ्जरम्), (३)दुर्धर्षाः (for र्षः) .

(०६)(स्थितां (for स्थिरां), (३)(अ) नुज्ञाप्य (for ज्ञाय), (४)शिवम् (for जयम्), प्राप्नुहि; प्राप्स्यसि (for आप्नुहि), मा व्यथः (for चेत्यथ),

(०७) (२)च (for सा), प्रभुः (for पुनः), (३)यत्र; तत्र (for देशं), तत्रा (for यत्रा),

अनुज्ञाता च राज्ञा सा तथैवान्तरधीयत ॥ २८ ॥ [०१]

गतायामथ तस्यां तु राजा दुर्योधनस्तदा।
स्वप्नभूतमिदं सर्वमचिन्तयत भारत ॥ २९ ॥[०२]

विजेष्यामि रणे पाण्डूनिति चास्याभवन्मतिः ॥ ३० ॥ [०३]

संस्मृत्य तानि वाक्यानि दानवोक्तानि दुर्मतिः [०४]

कर्णं संशप्तकांश्चैव पार्थस्यामित्रघातिनः ।
अमन्यत वधे युक्तान्समर्थांश्च सुयोधनः ॥ ३१ ॥ [०५]

एवमाशा दृढा तस्य धार्तराष्ट्रस्य दुर्मतेः ।
विनिर्जये पाण्डवानामभवद्भरतर्षभ ॥ ३२ ॥ [०६]

कर्णोऽप्याविष्टचित्तात्मा नरकस्यान्तरात्मना।
अर्जुनस्य वधे क्रूरां करोति स्म तदा मतिम् ॥ ३३ ॥ [०७]

संशप्तकाश्च ते वीरा राक्षसाविष्टचेतसः ।

---

(०१)(प्रतिवेश्य (for निक्षिप्य), (३)(अ) थ; तद् (for च), आज्ञा; कृत्या (for राज्ञा), सा राज्ञा (ए) व राज्ञा, तु (अ)थ; च (for सा) (४)तथै (for तत्रै),

(०२)(च तु (३)अनुभूतम्; यत्तु भूतम् (for स्वप्न), इमं; तथा (for इदं),

(०३)(४)चिन्तयामास (for अचिन्तयत),

(०४)सर्वाणि (for वाक्यानि), श्रुत्वा च (संस्मृत्य) दानवोक्तानि तानि वाक्यानि दुर्मतिः) विजेष्येहं ; विजेष्यसे चास्य (for तस्य), मनः (for मति),

(०५) (कर्ण (for कर्णं), संसप्त, (२)(अ) पि प्रघातिनः (अ) मित्रपातिनः (३)रणे (for वधे), (४) पार्थिवान् (for समर्थान्) .

(०६)(वृथा; वृधा (for दृढा), ह्येषा (for तस्य), (३)विनिर्जित्य, (४)पुरुषर्षभ (for भरत),

(०७)(कर्णो व्या (भ्या) विष्ट; कर्णोशयाविष्टचितात्मा; कर्णोप्यीवि (दु) ष्ट ; कर्णोप्यादिष्ट (३)वधंकर्तुम् (for वधे क्रूराम्), (४)अकरोत्स्वां; अत नोत्स (for अकरोत्स), स्मृतिं; समां; सदा (for मतिं), मतिं (for तदा), करोति स्म तदा मतिं.

रजस्तमोभ्यामाक्रान्ताः फाल्गुनस्य वधैषिणः ।। ३४ ।। (०१)

भीष्मद्रोणकृपाद्याश्च दानवाक्रान्तचेतसः
न तथा पाण्डुपुत्राणां स्नेहवन्तो विशाम्पते ।। ३५ ।।(०२)

न चाचचक्षे कस्मैचिदेतद्राजा सुयोधनः ।(०३)
कृत्ययानार्यकथितं यदस्य निशि दानवैः ।। ३६ ।।

दुर्योधनं निशान्ते च कर्णो वैकर्तनोऽब्रवीत्।
स्मयन्निवाञ्जलिं कृत्वा पार्थिवं हेतुमद्वचः ।। ३७ ।।(०४)

न मृतो जयते शत्रूञ्जीवन्भद्राणि पश्यति।
मृतस्य भद्राणि कुतः कौरवेय कुतो जयः ।। ३८ ।।
(०५)न कालोऽद्य विषादस्य भयस्य मरणस्य वा।(०६)

**वैशम्पायनः-**

परिष्वज्याब्रवीच्चैनं भुजाभ्यां स महाभुजम्(जः) ।। ३९ ।।

**कर्णः-**

उत्तिष्ठ राजन्किं शेषे कस्माच्छोचसि शत्रुहन्।
शत्रून्प्रताप्य वीर्येण स कथं मृत्युमिच्छसि ।। ४० ।। (०७)

---

(०१) (संशप्तकान्; संसप्तकाः तदा; च ये (for च ते)। वीर (for वीरा)। संशप्तका बभूवुश्च (३)आविष्टाः विक्रान्ताः (for आक्रान्ताः) (४)फाल्गुनस्य फल्गुण; फाल्गुण.

(०२)(१)कृपाचार्या, (२)दानवाविष्टचेतसः (३)तत् (for न), पुत्रेषु (for पुत्राणां), (४)ते भवन्ति (for स्नेह), (४)भवंस्तदा (for विशां पते),

(०३)(१) चाचक्षीत; चाचक्षेत; चाचष्टे च (for चाचचक्षे), कस्मिंश्चिद्, एवं (for एतद्), एतत् राजा.

(०४)(२)कर्णो वचनमब्रवीत् (३)हस (for स्मय), (४)सुमहद् ,(for हेतुमद्), पार्थिवेदं तु मद्वचः .

(०५)(२)जीवं तत्रापि पश्यति,.

(०६)(१)यं (for ()द्य), तवाद्य (for भयस्य),(२) भयस्य मशगम्य वै; च (for वा),

(०७)(एवं; वाक्य; एन (for चैनं), (२)बलं; श्रमः; भुजं (for भुजः), (४)कस्माच्छोचितु मर्हसि प्रतप्य; सन्ताप्य (for प्र), सकलं; कथं त्वं (for स कथं), कर्तुम्; मृत्युम् (for मर्तुम्), अर्हसि (for इच्छसि),

**अथवा ते भयं जातं दृष्ट्वार्जुनपराक्रमम्।**
**सत्यं ते प्रतिजानामि वधिष्यामि रणेऽर्जुनम्   ।। ४१ ।।** (०१)

**गते त्रयोदशे वर्षे सत्येनायुधमालभे।**
**आनयिष्याम्यहं पार्थान्वशं तव जनाधिप   ।। ४२ ।।**(०२)

**वैशम्पायनः-**

**एवमुक्तस्तु कर्णेन दैत्यानां वचनात्तथा।**
**प्रणिपातेन चाप्येषामुदतिष्ठत्सुयोधनः   ।। ४३ ।।**(०३)

**दैत्यानां तद्वचः श्रुत्वा हृदि कृत्वा स्थिरां मतिम्।**(०४)
**ततो मनुजशार्दूलो योजयामास वाहिनीम्   ।। ४४ ।।**

**रथनागाश्वकलिलां पदातिजनसङ्कुलाम्।**(०५)
**गङ्गौघप्रतिमा राजन्सा प्रयाता महाचमूः   ।। ४५ ।।**(०६)

**श्वेतच्छत्रैः पताकाभिश्चामरैश्च सुपाण्डुरैः ।**(०७)
**रथैर्नागैः पदातैश्च शुशुभेऽतीव सङ्कुला   ।। ४६ ।।**(०८)
**व्यपेताभ्रघने काले द्यौरिवाव्यक्तशारदी।**(०९)

---

(०१)(भये जाते (for भयं जातं), (२)अर्जुनस्य पराक्रमं.
(०२) (इतस् (for गते), तृतीयके (for त्रयो), (२)शस्त्रेणा (for सत्येना), पार्थं (for पार्थान्), आनयिष्ये रणे पार्थान्; आनयिष्यामि पार्थं तु वशे (for वशं), नरा धिप; जनेश्वर (for जना), करिष्यामि वधं राजन्पार्थस्यामिततेजसः.
(०३) (२)वचनात्तदा; वचनेन वा वचसा तदा, (३)प्रणिधानेन, चाप्येषाम्.
(०४) (४)समुत्तस्थौ (for उदतिष्ठत्), तु (for तद्), स्थिरां मतिं .
(०५) (मनुजशार्दूल; ()थ नरशार्दूलो; वै राज (३)कलिलाः (४)ध्वजसङ्कुलां; पत्तिध्वजसमाकुलां.
(०६)(गाङ्गोघ प्रतिमां, चास्य; वीर; सा तु; साद्य (for राजन्), (२)प्रयाता सा शुशुभे स महा; प्रयाणे (प्रायेण), स महाचमूं; प्रयाणे शुशुभे चमूः .
(०७)(३)पत्रैः (for च्छत्रैः), पताकैश्च (for काभिश्), (४)सपाण्डु (ड) रैः; (अ) पि पाण्डुरैः; सुपाण्डरैः.
(०८) ( च पादातैः; पताकैश्च (for पदातैश्च), (२)वीर (for तीव), शोभना (for सङ्कुला),
(०९) प्रयाणे सा चमू बभौ; प्रयाणे सा बभौ शुशुभे; प्रबभौ चमूः (४)वासक्तशारदी; वासीत्सु; वाव्यक्तशर्वरी;

**हंसपङि:समाकीर्णा भ्रमत्सारसशोभिता ॥ ४७ ॥**

जयाशीर्भिर्द्विजेन्द्रैः स स्तूयमानोऽधिराजवत्।
**गृह्णन्नञ्जलिमालाश्च धार्तराष्ट्रो जनाधिपः ॥ ४८ ॥**(०१)

सुयोधनो ययावग्रे श्रिया परमया ज्वलन्।
**कर्णेन सार्धं राजेन्द्र सौबलेन च देविना ॥ ४९ ॥** (०२)

दुःशासनादयश्चास्य भ्रातरः सर्व एव ते।
**भूरिश्रवाः सोमदत्तो महाराजश्च बाह्लिकः ॥ ५० ॥**(०३)

रथैर्नानाविधाकारैर्हयैर्गजवरैस्तथा
**प्रयान्तं नृपसिंहं तमनुजग्मुः कुरूद्वहाः ॥ ५१ ॥**

प्रत्युद्गताश्च कुरुभिर्नागरैर्ब्राह्मणैरपि
**कालेनाल्पेन राजेन्द्र स्वपुरं विविशुस्तदा ॥ ५२ ॥** (०४)

**प्रहृष्टमनसः सर्वे दुर्योधनपुरोगमाः (०५)**

अस्मिन् पर्वणि २०९अध्याये ५२श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि दुर्योधनपुरप्रवेशे नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥

---

वासीत्त शारदी.

(०१) (द्विजाग्र्याणां; द्विजैश्चैव; द्विजेन्द्राणां (for द्विजेन्द्रैस्तु),स; च (for तु), (२)व्यराजत; विराजते, (for धि), (३)लिमानश्च; लिमादाय; लयश्चापि (for लिमालाश्च), (४)जनाधिप धनाधिपः.

(०२)(दुर्योधनो यथा चाग्रे; यथा मार्गे (for यया), (२)युतः (for ज्वलन्), (४) सु (for च),

(०३) (३)भूरिश्रवः (४)महाराजा च, .

(०४) (३)प्रयातं राज; नर (for नृप), तु (for तं), (४)अभिजग्मुः कुरूद्वहं (ह ह),

(०५)(अ)न्येन (for (अ) ल्पेन), राजेन्द्र; ते राजन् (for राजंस्ते), विविशुः स्वपुरं, आरण्य, घोषयात्रा समाप्त दुर्योधनः (दुर्योधन) प्रायोपवेश समाप्त प्रायोपवेशननिवर्तनं.

## २१०. दशाधिकद्विशततमोऽध्यायः

भीष्मेण दुर्योधनं प्रति पाण्डवप्रशंसनपूर्वकं तैःसह सन्धिविधानम् ।। १ ।। तथा कर्णस्य गर्हणम् ।। २ ।। दुर्योधनानुमत्या कर्णेम दिग्विजयाय निर्गमनम् ।। ३ ।। दिग्विजयार्थ गतेन कर्णेन सकतराजवशीकरणपूर्वकं हेतूक्तया तन्निपेधनपूर्वकं तं प्रति यज्ञन्तकाणनियोजनम् ।। ५ ।। कर्णं विनिन्द्य भीष्मस्य पाण्डवैः सह सन्धिकरणार्थं दुर्योधनाय सम्मतिदानं कर्णस्य क्षोभपूर्णं वचनं दिग्विजयाय प्रस्थानं च

**जनमेजयः**

वसानेषु पार्थेषु वने तस्मिन्महात्मसु।
धार्तराष्ट्रा महेष्वासाः किमकुर्वत सत्तमाः ।। १ ।।(०१)

कर्णो वैकर्तनश्चैव शकुनिश्च महाबलः ।
भीष्मद्रोणकृपाश्चैव तन्मे शंसितुमर्हसि ।। २ ।। (०२)

**वैशम्पायनः**

एवं गतेषु पार्थेषु विसृष्टे च सुयोधने।

आगते हास्तिनपुरं मोक्षिते पाण्डुनन्दनैः ।
भीष्मोऽब्रवीन्महाराज धार्तराष्ट्रमिदं वचः ।। ३ ।। (०३)

**भीष्मः-**

उक्तं तात यथा पूर्वं गच्छतस्ते तपोवनम्।

---

(०१)(वर्तमानेषु एवं गतेषु, (२)वने ब्रह्मन्; पाण्डवेषु (for वने तस्मिन्), (४)अकुर्वत, सत्तमा (for वै द्विज),

(०२) (चैव (for चापि), (२)शकुनिश्चापि सौबलः भीष्मो द्रोणः (मो द्रोण; ष्मद्रौणिः), कृपश्चव.

(०३)(गतेषु तेषु पार्थेषु, (२)नि वि सृष्टेषु (for विसृष्टे च), नराधिप (for सुयो), (३)हस्तिन तदा राजा (for महा),

गमनं मे न रुचितं तव तत्र कृतं च ते ।। ४ ।। [(०१)]

ततः प्राप्तं त्वया वीर ग्रहणं शत्रुभिर्बलात्।
मोक्षितश्चासि धर्मज्ञैः पाण्डवैर्न च लज्जसे ।। ५ ।। [(०२)]

प्रत्यक्षं तव गान्धारे ससैन्यस्य विशामप्ते
सूतपुत्रोऽप्याद्भीतो गन्धर्वाणां तदा रणात् ।। ६ ।। [(०३)]

क्रोशशतस्तव राजेन्द्र ससैन्यस्य नृपात्मज ।
व्यपयात्पृष्ठतस्तस्मात्प्रेक्षमाणः पुनः पुनः (०४)
दृष्टस्ते विक्रमश्चैव पाण्डवानां महात्मनाम् ।। ७ ।। [(०५)]

कर्णस्य च महाबाहो सूतपुत्रस्य दर्मतेः ।। ८ ।।

न चापि पादभाक्कर्णः पाण्डवानां नृपोत्तम।
धनुर्वेदे च शौर्ये च धर्मे वा धर्मवत्सल ।। ९ ।। [(०६)]

तस्मादहं क्षमं मन्ये पाण्डवैस्मै(स्तै)र्महात्मभिः ।
सन्धिं सन्धिविदां श्रेष्ठ कुलस्यास्य विवृद्धये ।। १० ।। [(०७)]

**वैशम्पायनः-**

---

(०१) (तथा (for मया), (२)सुयोधन (for तपो), (३)वचनं (for गमनं), ते; तन् (for मे),(४) मम; तथा (for तव), तत्र; तं च (for तन्न ), च मे; त्वया (for च ते), मद्वचो (तत्तथा) न कृतं त्वया; मद्वचो न कृतं च ते.

(०२) (तात (for वीर), (२)ग्रहणं शत्रुभित् (३) चापि (for चासि),

(०३)(राजेन्द्र (for गान्धारे), (२)सैन्यस्य च (for ससैन्यस्य), (३)तदापेतो; भयाद्भीतो (for पयाद्भीतो), (४)तथा रणात्; तदा भयात्; तदा बलात्; तरखिनां.

(०४) विशां पते; यथागतम् (for नृपा) .

(०५)(ख-व्यपायात्पृष्ठतस्तस्मात्प्रेक्षमाषः पुनः पुनः ।,(२)पाण्डूनां सुमहात्मनां.

(०६)(२)महात्मनां (for नृपो), पाण्डवस्य नृपा त्मज, (३)धनुर्विद्धिशू (for वेंदे), ()थ (for च), शूरैशू (for शौर्ये), वा (for च), (४)कुशलो धर्मे वा), धर्मशीलता; धर्मवत्सलः सर्वैश्च बलवत्तरैः.

(०७) (तस्मादहं (for तस्य तेहं), (३)सन्धिमतां, (४)स्वकुलस्य (for कुलस्यास्य),

एवमुक्तश्च भीष्मेण धार्तराष्ट्रो जनेश्वरः ।
प्रहस्य सहसा राजन्विप्रतस्थे ससौबलः ।। ११ ।। (०१)

तं तु प्रस्थितमाज्ञाय कर्णदुःशासनादयः ।
अनुजग्मुर्महेष्वासा धार्थराष्ट्रं महाबलम् ।। १२ ।। (०२)

तांस्तु सम्प्रस्थितान्दृष्ट्वा भीष्मः कुरुपितामहः ।
लज्जया व्रीडितो राजञ्जगाम स्वं निवेशनम् ।। १३ ।। (०३)

गते भीष्मे महाराज धार्तराष्ट्रो जनेश्वरः ।
पुनरागम्य तं देशममन्त्रयत मन्त्रिभिः ।। १४ ।।(०४)

किमस्माकं भवेच्छ्रेयः किं कार्यमवशिष्यते।
कथं च सुकृतं तत्स्यान्मन्त्रयामोऽद्य यद्धितम् ।। १५ ।। (०५)
भीष्मोऽस्मान्निन्दति सदा पाण्डवांश्च प्रशंसति

त्वद्द्वेषाच्च महाबाहो ममापि द्वेष्टुमर्हति।
विगर्हते च मां नित्यं त्वत्समीपे नरेश्व ।

सोऽहं भीष्मवचस्तद्वै न मृष्यामीह भारत।
त्वत्समक्षं यदुक्तं च भीष्मेणामित्रकर्षण।

---

(०१)(च (for तु), (२)जनाधिपः; महीपतिः (for जने), (३)प्रसह्य; , प्रहसन् (for प्रहस्य), स महाराज; सहसा राजा, (४)महाबलः (for ससौ), प्रतस्थे सहसौबलः.

(०२) (ततः (for तं तु), आस्थाय, (२)नावपि (for नादयः), (३)महेष्वा सान्; महेष्वासं (४)जनेश्वरं (for महां), धार्तराष्ट्रा महाबलाः; धार्क्षराष्ट्रान्महाबलान्.

(०३)(क्षुत्वा (for दृष्ट्वा) ।। स तु प्रतस्थिवान्तष्ट्वा, (२) भीष्मः कुरुकुलोद्वहः (३)(अ) धो मुखो; (अ) वनतो (for व्रीडितो), (४)स्व (for स्वं) .

(०४)(२)जनेश्वरः (सुयो धनः); महाबलः (for जनाधिपः), (३)राजा (for देशम्), (४)आमन्त्रयत; न्यमन्त्र,.

(०५)(अस्माभिर् (for अस्माकं), (२)मम (for अव), (३)च (for नु), न; नः; तत्; मे(for च), (४)मन्त्रयामोत्र य (त) द्धितं; मन्त्रयामोद्य यः त द्धितं; मन्त्रयामो धियाकृतं .

पाण्डवानां यशो राजंस्तव निन्दां च भारत।
अनुजानीहि तां राजन्सभृत्यबलवाहनम् ।

जेष्यामि पृथिवीं राजन्सशैलवनकाननाम्।
जिता च पाण्डवैर्भूमिश्चतुर्भिर्बलशालिभिः ।

तामहं ते विजेष्यामि एक एव न संशयः।
सम्पश्यतु सुदुर्बुद्धिर्भीष्मः कुरुकुलाधमः ।

अनिन्द्यं निन्दते यो हि अप्रशंस्यं प्रशंसति।
स पश्यतु बलं मेऽद्य आत्मानं तु विगर्हतु ।

अनुजानीहि मां राजन्ध्रुवो हि विजयस्तव।
प्रतिजानामि ते सत्यं राजन्नायुधमालभे ।

तच्छ्रुत्वा तु वचो राजन्कर्णस्य भरतर्षभ।
प्रीत्या परमया युक्तः कर्णमाह नराधिपः ।

धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे त्वं महाबलः।
हितेषु वर्तसे नित्यं सफलं जन्म चाद्य मे

यदा च मन्यसे वीर सर्वशत्रुनिबर्हणम्।
तदा निर्गच्छ भद्रं ते ह्यनुशाधि च मामिति ।

एवमुक्तस्तदा कर्णो धार्तराष्ट्रेण धीमता।
सर्वमाज्ञापयामास प्रायात्रिकमरिन्दम ।

निर्य(प्रय)यौ च महेष्वासो नक्षत्रे शुभदैवते।
शुभे तिथौ मुहूर्ते च पूज्यमानो द्विजातिभिः ।
मङ्गलैश्च शुभैः स्नातो वाग्भिश्चापि प्रपूजितः ।

नादयन्रथघोषेण त्रैलोक्यं सचराचरम्।

अस्मिन्  पर्वणि ७अध्याये २५३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि कर्णदिग्विजये त्रिपञ्चाशदधिकद्विशततमोऽध्यायः ।। २५३ ।।

चतुःपञ्चाशदधिकद्विशततमोऽध्यायः

घोषयात्रापर्व

कर्णस्य दिग्विजयस्तस्य हस्तिनापुरे सत्कारश्च

वैशम्पायनः

ततः कर्णो महेष्वासो बलेन महता वृतः ।
द्रुपदस्य पुरं रम्यं रुरोध भरतर्षभ ।

युद्धेन महता चैनं चक्रे वीरं वशानुगम्।
सुवर्णं रजतं चापि रत्नानि विविधानि च ।

करं च दापयामास द्रुपदं नृपसत्तम।
तं विनिर्जित्य राजेन्द्र राजानस्तस्य येऽनुगाः ।

तान्सर्वान्वशगांश्चके करं चैनानदापयत्।
अथोत्तरां दिशं गत्वा वशे चक्रे नराधिपान् ।

भगदत्तं च निर्जित्य राधेयो गिरिमारुहत्।
हिमवन्तं महाशैलं युध्यमानश्च शत्रुभिः ।

प्रययौ च दिशः सर्वान्नृपतीन्वशमानयत्।
स हैमवतिकाञ्जित्वा करं सर्वानदापयत् ।
(नेपालविषये ये च राजानस्तानवाजयत्।)

अवतीर्य ततः शैलात्पूर्वां दिशमभिद्रुतः ।
अङ्गान्वङ्गान्कलिङ्गांश्च शुण्डिकान्मिथिलानथ ।

मागधान्कर्कखण्डांश्च निवेश्य विषयेऽऽत्मनः ।
आवशीरांश्च योध्यांश्च अहिक्षत्रं च योज(निर्ज)यत् ।

पूर्वं दिशं विनिर्जित्य वत्सभूमिं तथागमत्।
वत्सभूमिं विनिर्जित्य केवलां मृत्तिकावतीम् ।

मोहनं पत्तनं चैव त्रिपुरीं कोसलां तथा।
एतान्सर्वान्विनिर्जित्य करमादाय सर्वशः ।

दक्षिणां दिशमास्थाय कर्णो जित्वा महारथान्।
रुक्मिणं दाक्षिणात्येषु योधयामास सूतजः ।

स युद्धं तुमुलं कृत्वा रुक्मी प्रोवाच सूतजम्।
प्रीतोऽस्मि तव राजेन्द्र विक्रमेण बलेन च ।

न ते विघ्नं करिष्यामि प्रतिज्ञां समपालयम्।
प्रीत्या चाहं प्रयच्छामि हिरण्यं यावदिच्छसि ।

समेत्य रुक्मिणा कर्णः पाण्ड्यं शैलं च सोऽगमत्।
स केरलं रणे चैव नीलं चापि महीपतिम् ।

वेणुदारिसुतं चैव ये चान्ये नृपसत्तमाः ।
दक्षिणस्यां दिशि नृपान्करान्सर्वानदापयत् ।

शैशुपालिं ततो गत्वा विजिग्ये सूतनन्दनः ।
पार्श्वस्थांश्चापि नृपतीन्वशे चक्रे महाबलः ।

आवन्त्यांश्च वशे कृत्वा साम्ना च भरतर्षभ।

वृषिभिः सह सङ्गम्य पश्चिमामपि निर्जयत् ।

वारुणीं दिशमागम्य यवनान्बर्बरांस्तथा।
नृपान्पश्चिमभूमिस्थान्दापयामास वै करान् ।

विजित्य पृथिवीं सर्वां स पूर्वापरदक्षिणाम्।
सम्लेच्छाटविकान्वीरः सपर्वतनिवासिनः ।

भद्रान्रोहितकांश्चैव आग्ने(ग्रे)यान्मालवानपि।
गणान्सर्वान्विनिर्जित्य नीतिकृत्प्रहसन्निव ।

शशकान्यवनांश्चैव विजिग्ये सूतनन्दनः।
नग्नजित्प्रमुखांश्चैव गणाञ्जित्वा महारथान् ।

एवं स पृथिवीं सर्वां वशे कृत्वा महारथः।
विजित्य पुरुषव्याघ्रो नागसाह्वयमागमत् ।

तमागतं महेष्वासं धार्तराष्ट्रो जनाधिपः।
प्रत्युद्गम्य महाराज सभ्रातृपितृबान्धवः ।

अर्चयामास विधिना कर्णमाहवशोभिनम्।
आश्रावयच्च तत्कर्म प्रीयमाणो जनेश्वरः ।

यन्नभीष्मान्न च द्रोणान्न कृपान्न च बाह्लिकात्।
प्राप्तवानस्मि भद्रं ते त्वत्तः प्राप्तं मया हि तत् ।

बहुना तु(च)किमुक्तेन शृणु कर्ण वचो मम।
सनाथोऽस्मि महाबाहो त्वया नाथेन सत्तम ।

न हि ते पाण्डवाः सर्वे कलामर्हन्ति षोडशीम्।
अन्ये वा पुरुषव्याघ्र राजानोऽभ्युदितोदिताः ।

स भवान्धृतराष्ट्रं तं गान्धारीं च यशस्विनीम्।
पश्य कर्ण महेष्वास अदितिं वज्रभृद्यथा ।

ततो हलहलाशब्दं(ब्दः)प्रादुरासीद्विशाम्पते।
हाहाकाराश्च बहवो नगरे नागसाह्वये ।

केचिदेनं प्रशंसन्ति निन्दन्ति स्म तथापरे।
तूष्णीमासंस्तथा चान्ये नृपास्तत्र जनाधिप ।

एवं विजित्य राजेन्द्र कर्णः शस्त्रभृतां वरः ।
सपर्वतवनाकाशां ससमुद्रां सनिष्कुटाम् ।

देशैरुच्चावचैः पूर्णां पत्तनैर्नगरैरपि।
द्वीपैश्चानूपसम्पूर्णैः पृथिवीं पृथिवीपते ।

कालेन नातिदीर्घेण वशे कृत्वा तु पार्थिवान्।
अक्षयं धनमादाय सूतजो नृपमभ्ययात् ।

प्रविश्य च गृहं राजन्नभ्यन्तरमरिन्दम।
गान्धारीसहितं वीरो धृतराष्ट्रं ददर्श सः ।

पुत्रवच्च नरव्याघ्र पादौ जग्राह धर्मवित्।
धृतराष्ट्रेण चाश्लिष्य प्रेम्णा चापि विसर्जितः ।
तदा प्रभृति राजा च शकुनिश्चापि सौबलः ।
जानते निर्जितान्पार्थान्कर्णेन युधि भारत।
अस्मिन् पर्वणि ८अध्याये ३५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि कर्णदिग्विजये चतुष्पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५४ ॥

पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः

घोषयात्रापर्व

कर्णपुरोधसोरनुमत्या दुर्योधनस्य वैष्णवयागसमारम्भः

**वैशम्पायनः**

जित्वा तु पृथिवीं राजन्सूतपुत्रो जनाधिप।
अब्रवीत्परवीरघ्नो दुर्योधनमिदं वचः ।

**कर्णः**

दुर्योधन निबोधेदं यत्त्वां वक्ष्यामि कौरव ।
श्रुत्वा वाचं तथा सर्वं कर्तुमर्हस्यरिन्दम ।। १६ ।। (०१)

तवाद्य पृथिवी वीर निःसपत्ना नृपोत्तम।
तां पालय यथा शक्रो हतशत्रुर्महामनाः ।

**वैशम्पायनः(०२)**

एवमुक्तस्तु कर्णेन कर्णं राजाब्रवीत्पुनः ।। १७ ।।

**दुर्योधनः-**

न किञ्चिद्दुर्लभं तस्य यस्य त्वं पुरषर्षभ।(०३)

सहायश्चानुरक्तश्च मदर्थं च समुद्यतः ।। १८ ।। (०४)

अभिप्रायश्च(स्तु)मे कश्चित्तं वै शृणु यथातथम् ।। १९ ।। (०५)

---

(०१) (निबोध त्वं (for धेदं), (२)यत्त्वां; यथा, भारत (for कौरव), (३)वाचं; तु तत्; च तं(४)(अ) निन्दित (for (अ) रिन्दम) .

(०२) (राजन् (for वीर), (२) सप्रम्पन्ना (for निःस), (३)महाराज; महाबाहो (for यथा शक्रो), (४)यथा शक्रो; गतशत्रुर्, महाबलः.

(०३) (२)राजा कर्णमथाब्रवीत्, (४)पुरुषोत्तम.

(०४)(सुसहायोनुरक्तश्च, (२)समर्थं; मदर्थे.

(०५) (तन्मे (for तं वै),

राजसूयं पाण्डवस्य दृष्ट्वा क्रतुवरं महत्।
मम स्पृहा समुत्पन्ना तां सम्पादय सूतज ।[०१]

**वैशम्पायनः-**

एवमुक्तस्ततः कर्णो राजानमिदमब्रवीत् ।। २० ।।

**कर्णः-**

तवाद्य पृथिवीपाला वश्याः सर्वे नृपोत्तम।[०२]
आहूयन्तां द्विजवराः सम्भाराश्च यथाविधि ।। २१ ।। [०३]

सम्भ्रियन्तां कुरुश्रेष्ठ यज्ञोपकरणानि च ।
ऋ त्विजश्च समाहूता यथोक्ता वेदपारगाः ।। २२ ।।[०४]

क्रियां कुर्वन्तु ते राजन्यथाशास्त्रमरन्दिम ।। २३ ।।

बह्वन्नपानसयुक्तः सुसमृद्धगुणान्वितः ।
प्रवर्ततां महायज्ञस्तवापि भरतर्षभ ।। २४ ।। [०५]

**वैशम्पायनः-**

एवमुक्तस्तु कर्णेन धार्तराष्ट्रो विशाम्पते।
पुरोहितं समानाय्य वचनं चेदमब्रवीत् ।। २५ ।। [०६]

**दुर्योधनः-**

राजसूयं क्रतुश्रेष्ठं समाप्तवरदक्षिणम्।

---

(०१)(२)महत् (for तदा), (४)सुव्रत (for सूतज),
(०२)(तदा (for ततः), (४)सर्वे वश्या, नृपात्मजः.
(०३)(आह्वयन्तां; आहूयन्त, द्विजवरान्,(२)अ-घ-जीवमाने युधिष्ठिरे .
(०४) समाहूय; यथा भूता, (२)यथोक्ता वेद पारगैः (३)क्रियाः.
(०५)(४)तवाद्य पुरुषर्षभ.
(०६) वौशं (३)समासाद्य; नीय; हूयः (४)त्विदं (for इदं)। वचनं चेदमब्रवीत्.

आहर त्वं मम कृते यथान्यायं यथाक्रमम्।[०१]

**वैशम्पायनः-**

स एवमुक्तो नृपतिमुवाच द्विजसत्तमः ।। २६ ।।[०२]

**पुरोहितः-**

ब्राह्मणैः सहितो धीमान्ये तत्रासन्समागताः
न स शक्यः क्रतुश्रेष्ठो जीवमाने युधिष्ठिरे ।। २७ ।।[०३]

आहर्तुं कौरवश्रेष्ठ कुले तव नृपोत्तम।[०४]

दीर्घायुर्जीवति च ते धृतराष्ट्रः पिता नृप ।। २८ ।।[०५]

अतश्चापि विरुद्धस्ते क्रतुरेष नृपोत्तम ।। २९ ।।[०६]

अस्ति त्वन्यन्महत्सत्रं राजसूयसमं प्रभो।
तेन त्वं यज राजेन्द्र शृणु चेदं वचो मम ।। ३० ।।[०७]

य इमे पृथिवीपालाः करदास्तव पार्थिव ।
ते करान्सम्प्रयच्छन्तु सुवर्णं च कृताकृतम् ।। ३१ ।।[०८]

तेन ते क्रियतामद्य लाङ्गलं नृपसत्तम।

---

(०१)(क्रतुवरं, (३)आहरस्व यथाशास्त्रं.
(०२)(एवमुक्तः स नृपतिम् (२) द्विजसत्तमः.
(०३)(३)शक्यस्तु; स शत्रुः; शक्यः स च शक्यं; वै शक्यं त्वया राजन्; कुरुश्रेष्ठे (ष्ठ ष्ठो)कृतश्रेष्ठो.
(०४)(४) वर्त (for जीव), काले (for कुले), नराधिप; नरोत्तम,.
(०५) (च स (for च), ते (for वौ), (२) नृप (for तव),
(०६)(३) (अ) सौ (for ते),
(०७)(अस्तु (for अस्ति), चान्यन् महासत्रं, अस्ति त्वन्यो महाराज, (२)समः विदुः; विभो (for प्रभो), (४)श्रृणुष्वेदं; श्रृणु चैवं.
(०८) (ये चेमे (for य इमे), (४)सुवर्णमकृतं कृतं (तं शुभं; ताकृत),

यज्ञवाटस्य ते भूमिः कृष्यतां तेन भारत ।। ३२ ।।(०१)

तत्र यज्ञो नृपश्रेष्ठ प्रभूतान्नः सुसंस्कृतः ।
प्रवर्ततां यथान्यायं सर्वतो ह्यनिवारितः ।। ३३ ।।(०२)

एष ते वैष्णवो नाम यज्ञः सत्पुरुषोचितः ।
एतेन नेष्टवान्कश्चिदृते विष्णुं पुरातनम् ।। ३४ ।।(०३)

राजसूयं क्रतुश्रेष्ठं स्पर्धत्येष महाक्रतुः
अस्माकं रोचते चैव श्रेयश्च तव भारत ।। ३५ ।।(०४)

निर्विघ्नश्च भवत्येष सफला स्यात्स्पृहा तव ।(०५)
तस्मादेष महाबाहो तव यज्ञः प्रवर्तताम् ।। ३६ ।।

एवमुक्तस्तु तैर्विप्रैर्धार्तराष्ट्रो महीपतिः ।
कर्णं च सौबलं चैव भ्रातंश्चैवेदमब्रवीत् ।। ३७ ।।(०६)

**दुर्योधनः-**

रोचते मे वचः कृत्स्नं ब्राह्मणानां न संशयः ।
रोचते यदि युष्माकं तस्मात्प्रब्रूत मा चिरम् ।। ३८ ।।(०७)

**वैशम्पायनः-**

(०१) (३)वै (for ते), (४)ते नृपोत्तम; तव भारत; ते नरर्षभ,.

(०२)(तेन; रुद्र; यत्र (for तत्र), नरश्रेष्ठ (२)प्रभूतार्थः (४)सर्वशोप्यनि; सर्वपापनिवारणः; सर्वशो ह्यनि; संस्पृशोप्यनि.

(०३)(वै (for ते), (३)एतेनैव तु यज्ञेन, (४)दृष्ट्वा (for ऋते), विष्णोः पूः सनातनं; सनातनात् .

(०४) (क्रतुश्रेष्ठं क्रतुवरं, (२)स्पर्धतेयं (३)चैष (for चैव), एवं तु रोचतेस्माकं.

(०५)(४)श्रेष्ठश्च; श्रेयांश्च, भवत्येष, निर्विघ्नश्च भवत्येष, च ते (for तव),

(०६)( अ-कर्णेन;, धर्मेण (for तैर्विप्रैर्), (२)महामतिः (for मही),

(०७)(ते (for मे), (२)तथैव च (for न संशयः), (४)तन्मां; तस्मात् (तच्च); ततः (for तन्मा),ब्रुवत (for प्रब्रूत), तन्मम ब्रूत माचिरं.

एवमक्तास्तु ते सर्वे तथेत्यूचुर्नराधिपम्।
सन्दिदेश ततो राजा व्यापारस्थान्यथाक्रमम् ॥ ३९ ॥ [०१]

हलस्य करणे चापि व्यादिष्टाः सर्वशिल्पिनः ।
यथोक्तं च नृपश्रेष्ठ कृतं सर्वं यथाक्रमम् ॥ ४० ॥ [०२]

अस्मिन् पर्वणि २१०अध्याये ४०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि दुर्योधनयज्ञसमारम्भे दशाधिकद्विशततमोऽध्यायः ॥ २१० ॥

## २११.एकादशाधिकद्विशततमोऽध्यायः

**दुर्योधनेन यज्ञसमापनानन्तरं सहहुमानं प्राहुणिकविप्रनुशप्रेवणपूर्वकं निजनगरप्रवेशनम् ॥ दुर्योधनयज्ञस्यारम्भः सम्पूर्तिश्च**

**वैशम्पायनः**

ततस्तु शिल्पिनः सर्वे अमात्यप्रवराश्च ये।
विदुरश्च महाप्राज्ञो धार्तराष्ट्रे न्यवेदयन् ॥ १ ॥ [०३]

**विदुरशिल्पिनः-**

सज्जं क्रतुवरं राजन्प्राप्तकालं च भारत।

---

(०१)(सर्वे ते (२)प्रत्यूजुस्तं नरा, (धृतराष्ट्रं धार्तराष्ट्रे) (३)आदि (for सन्दि), महाराज; तथा राजा, (४) व्यापारतन्स्वा (रांस्ता) न्यथा.

(०२) (करणं; कारणाच् कारणे, चैव (for चापि), (२)शिल्पकारिणः (for सर्व), (३)ते; तन् (for च), (४) ते तं (for कृतं), कृत्यं (for सर्वं),

(०३) (ते; च (for तु), सर्वं, (२)ये (for ह), तेमात्यप्रवरा (मुखा) श्च ह; कृतमूचुर्न (र्ध्वं न) राधिपं, (३)महाप्रज्ञो, (४)धृतराष्ट्रे (ष्ट्रं) न्यवेशयन्; न्यवेदयन्.

सौवर्णं च कृतं सर्वं लाङ्गलं च महाधनम्  ।। २ ।। (०१)

**वैशम्पायनः-**

एतच्छ्रुत्वा नृपश्रेष्ठो धार्तराष्ट्रो विशाम्पते।
भीष्मो द्रोणः कृपः कर्णो गान्धारी च यशस्विनी  ।। ३ ।।

आज्ञापयामास नृपः क्रतुराजप्रवर्तनम् ।(०२)

ततः प्रववृते यज्ञः प्रभूतार्थं सुसंस्कृतः ।
दीक्षितश्चापि गान्धारिर्यथाशास्त्रं यथक्रमम् ।(०३)

प्रहृष्टो धृतराष्ट्रश्च विदुरश्च महायशाः ।
भीष्मो द्रोणः कृपः कर्णो गान्धारी च यशस्विनी ।(०४)

निमन्त्रणार्थं दूतांश्च प्रेषयामास शीघ्रगान्।
पार्थिवानां च राजेन्द्र ब्राह्मणानां तथैव च  ।। ४ ।। (०५)

ते प्रयाता यथोद्दिष्टा दूतास्त्वरितवाहनाः ।(०६)
तत्र कश्चित्प्रयातं तु दूतं दुःशासनोऽब्रवीत्  ।। ५ ।।

**दुश्शासनः-**

---

(०१)(सज्जः क्रतुवरो राजन्; सज्जं कृतं (ज्जः क्रतुं; ज्जं क्रतुर्; ज्जः क्रतुर्; ज्जी कृतं) महाराज; सम्भाराः सम्भृता राजन्, (२)प्राप्तकालं; कालं प्राप्तं कालप्राप्तश्; कालः प्राप्तश्; काले प्राप्तश्, (३) सर्वं; द्रव्यं (for दिव्यं), (४)च (for सु),

(०२) (चैव (for श्रुत्वा), नृपश्रेष्ठ; नरश्रेष्ठो, (२)धृतराष्ट्रो, नराधिपः; महीपतिः (for विशां पते), (३) ख-आज्ञापकयामास नृप क्रतुराजः प्रवर्तताम् । ततः प्रववृते यज्ञः प्रभूतान्नसुसत्कृतः ।। दीक्षितश्चापि गान्धारिः यथाशास्त्वं यथाक्रमम् । प्रहृष्टो धृतराष्ट्रो..भूद्विदुरश्च महामनाः ।।

प्राज्ञा (for आज्ञा), नृप; नृपान्, (४)क्रतू राजन् (राज्ञो यज्ञः; यज्ञो राज्ञः) प्रवर्ततां,.

(०३) (प्रवर्तते, प्रभूतार्थं; तयि संस्कृतं; सत्कृतः, (३)गान्धारो.

(०४)(प्रविष्टो ,धार्तराष्ट्रः च (for भूद्), (२)महामनाः; द्युतिः; मतिः (३)भीष्मद्रोणः.

(०५)(निमन्त्रणाय; आमन्त्रणार्थं (२)प्रेरयामास वीर्यवान्, (३) राजेन्द्रो; विप्रेन्द्रो, (४) च भारत; च पार्थिव (for तथैव च),

(०६) यथाज्ञप्तं; यथाप्रज्ञं; यथायज्ञं; यथोद्दिष्टाः.

गच्छ द्वैतवनं शीघ्रं पाण्डवान्पापपूरुषान्।
निमन्त्रय यथान्यायं विप्रांस्तस्मिन्वने तदा ।(०१)

**वैशम्पायनः-**

स गत्वा पाण्डवान्सर्वानुवाचाभिप्रणम्य च ॥ ६ ॥

**दूतः-**

दुर्योधनो महाराज यजते नृपसत्तमः ।(०२)
स्ववीर्यार्जितमर्थौघमवाप्य कुरुसत्तमः ॥ ७ ॥

तत्र गच्छन्ति राजानो ब्राह्मणाश्च ततस्ततः ॥ ८ ॥(०३)

अहं तु प्रेषितो राजन्कौरवेण महात्मना।
आमन्त्रयति वो राजा धार्तराष्ट्रो जनेश्वरः ।
मनोऽभिलषितं राज्ञस्तं क्रतुं द्रष्टुमर्हथ ॥ ९ ॥(०४)

**वैशम्पायनः-**

ततो युधिष्ठिरो राजा तच्छ्रुत्वा दूतभाषितम्।
अब्रवीन्नृपशार्दूलो दिष्ट्या राजा सुयोधनः ॥ १० ॥

**युधिष्ठिरः-**

यजते क्रतुमुख्येन पूर्वेषां कीर्तिवर्धनः ।
वयमप्युपयास्यामो न त्विदानीं कथञ्चन ॥ ११ ॥

समयः परिपाल्यो नो यावद्वर्षं त्रयोदशम्।

---

(०१) (तं तु; ततः (for तत्र), (४)पापपौरुषान्; पुरुषर्षभान्, वने तथा; वने तदा स्थितान्; च यद्वने; वने यथा (for महावने),
(०२)(स गत्वा पाण्डवान्मर्वान्, (२)(अ) थ (for (अ) भि), च (for तान्), (३)महाराजो, (४)सत्तम .
(०३)(तमर्थोयम्; तरत्नोघम्, (२)कुरुनन्दन; सत्तमः.
(०४)इद्रियाणां (for याभि- ); इन्द्रियाणि मनोधैर्यं, दमः शमः .

**वैशम्पायनः-**

**श्रुत्वैतद्धर्मराजस्य भीमो वचनमब्रवीत्** ॥ १२ ॥

**भीमः-**

तदा तु नृपतिर्गन्ता धर्मराजो युधिष्ठिरः ।
**अस्त्रशस्त्रप्रदीप्तेऽग्नौ यदा तं पातयिष्यति** ॥ १३ ॥

वर्षात्त्रयोदशादूर्ध्वं रणसत्रे नराधिपः ।
**यदा क्रोधहविर्मोक्ता धार्तराष्ट्रेषु पाण्डवः** ॥ १४ ॥

आगन्ताहं तदास्मीति वाच्यस्ते स सुयोधनः ॥ १५ ॥

**वैशम्पायनः-**

शेषास्तु पाण्डवा राजन्नैवोचुः किञ्चिदप्रियम्।
**दूतश्चापि यथावृत्तं धार्तराष्ट्रे न्यवेदयत्** ॥ १६ ॥

अथाजग्मुर्नरश्रेष्ठा नानाजनपदेश्वराः ।
**ब्राह्मणाश्च महाभाग धार्तराष्ट्रपुरं प्रति** ॥ १७ ॥

ते त्वर्चिता यथाशास्त्रं यथाविधि यथाक्रमम्।
**मुदा परमया युक्ताः प्रीताश्चापि नरेश्वराः** ॥ १८ ॥

धृतराष्ट्रोऽपि राजेन्द्र संवृतः सर्वकौरवैः ।
**हर्षेण महता युक्तो विदुरं प्रत्यभाषत** ॥ १९ ॥

**धृतराष्ट्रः-**

यथा सुखी जनः सर्वः क्षत्तः स्यादन्नसंयुतः ।
**तुष्येत्तु यज्ञसदने तथा क्षिप्रं विधीयताम्** ॥ २० ॥

**वैशम्पायनः-**

विदुरस्तु तदाज्ञाय सर्ववर्णानरिन्दम।

**यथा प्रमाणतो विद्वान्पूजयामास धर्मवित् ।। २१ ।।**

**भक्ष्यपेयान्नपानेन माल्यैश्चापि सुगन्धिभिः ।**
**वासोभिर्विविधैश्चैव योजयामास हृष्टवत् ।। २२ ।।** (०१)

**कृत्वा ह्यावसथान्वीरो यथाशास्त्रं यथाक्रमम्।**

**सान्त्वयित्वा च राजेन्द्रो दत्त्वा च विविधं वसु।**
**विसर्जयामास नृपान्ब्रह्मणांश्च सहस्रशः ।। २३ ।।** (०२)

**स्नातश्चावभृथो राजा धार्तराष्ट्रो महामनाः(०३)**

**विसृज्य च नृपान्सर्वान्भ्रातृभिः परिवारितः ।**
**विवेश हास्तिनपुरं सहितः कर्णसौबलैः ।। २४ ।।** (०४)

अस्मिन् पर्वणि २११अध्याये २४श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि
दुर्योधनयज्ञे एकादशाधिकद्विशततमोऽध्यायः ।। २११ ।।

# २१२. द्वादशाधिकद्विशततमोऽध्यायः

---

(०१) (भक्ष्यपेयान्न पानेन (पानानि; दानानि; दानेन) भोज्यान्नपानैश्च .

(०२) (ह्यावसथान्; (अ) प्यवभृथं; ह्यवभृतं, (२)विधि (for क्रमम्),

(०३)(३)सान्त्वयामास (for यित्वा च), तु; (अ) थ (for च),राजेन्द्र; राजेन्द्रान्, (४)बहुविधं (for च वि), ब्राह्मणांश्चपि श्चैव सर्वशः.

(०४) (विसृज्य च नृपान्सर्वान् (विसर्ज यामास नृपान्), (२)ब्राह्मणान् (३)हस्तिन कर्णकौरवैः .आरण्य, धार्तराष्ट्रयज्ञ; दुर्योधनः (दुर्योधन) यज्ञः,

दुर्योधनसभार्या कर्णेनार्चुनवधप्रतिज्ञानम् ।। १ ।। चारमुखात्पाण्डवैस्तच्छ्रवणम् ।। २ ।। दुर्योधनयज्ञविषये लोकानां मतानि कर्णकृतार्जुनवधप्रतिज्ञा युधिष्ठिरस्य चिन्ता दुर्योधनस्य शासननीतिश्च

**वैशम्पायनः**

प्रविशन्तं महाराज सूतास्तुष्टुवुरच्युतम्।
जनाश्चापि महेष्वासं तुष्टुवू राजसत्तम ।। १ ।।[०१]

लाजैश्चन्दनचूर्णैश्च विकीर्य च जनास्ततः ।
ऊचुर्दिष्ट्या नृपाविघ्नः समाप्तोऽयं क्रतुस्त्वत ।। २ ।।[०२]

अपरं त्वब्रुवंस्तत्र वातिकास्तं महीपतिम्।

**वादिकाः-**

युधिष्ठिरस्य यज्ञस्य न समो ह्येष ते क्रतुः ।। ३ ।।

लक्षालङ्कारः - वादिकास्तं महीपतिम् इत्यत्र वादिकाः यथास्थितस्य व्यक्तवचन-शीलाः ।

नैव तस्य क्रतोरेष कलामर्हति षोडशीम्।[०३]

**वैशम्पायनः-**

एवं तत्राब्रुवन्केचिद्वाद(ति)कास्तं जनेश्वरम् ।। ४ ।।[०४]

सुहृदस्त्वब्रुंवंस्तत्र अति सर्वानयं क्रतुः ।[०५]

---

(०१)(महाराजं महाबाहुं; (२)अर्चितं (for अच्युतमू), (३)माग धाश्च (for जना), महाबाहुं;, महेष्वासा, (४) तुष्टुवू राजसत्तम;, नागराश्च सहस्रशः समन्ततः.

(०२)(गधैश्च; चूर्णेन; ; पुष्पैश्च; चूतैश्च (for चूर्णश्च), (२) (अ) प्यकीर्यन्त; (अ) प्यपकीर्य; विकीर्य च (र्यन्त); अवकीर्य व्यकीर्यत; व्यकिरन्त; व्यवकीर्य ततः; तथा (३)नृपाविघ्नः; विघ्नान् (४)महाक्रतुः (for क्रतुस्तव),

(०३)(२)वार्तिका; ,वादिका वादिता नराधिपं (for महीपतिम्), (३)यौधि यज्ञस्य, न वै (for नैव), ह्येष.

(०४)(तु ते (for तत्रा), (२)वार्तिका; वीतिका; वादिका; वादिन महीपतिं; जनेश्चरं; नराधिपं.

(०५)(३)अपरे(for सुहृदस्), च (for तु), केचिद् (for तत्र), (४)ह्यति (for आति), क्रतू न्सर्वानहं

प्रवर्तितो ह्ययं राज्ञा धार्तराष्ट्रेण धीमता

क्रतुः (शत्रुः) प्रवर्तितो राज्ञा धार्त,।

ययातिर्नहुषश्चापि मान्धाता भरतस्तथा।
**क्रतुमेनं समाहृत्य पूताः सर्वे दिवं गताः ।। ५ ।।** (०१)

एता वाचः शुभाः शृण्वन्सुहृदां भरतर्षभ।
**प्रविवेश पुरं हृष्टः स्ववेश्म च नराधिपः ।। ६ ।।** (०२)

अभिवाद्य ततः पादौ मातापित्रोर्विशाम्पते।
**भीष्मद्रोणकृपादीनां विदुरस्य च धीमतः ।। ७ ।।** (०३)

अभिवादितः कनीयोभिर्भ्रातृभिर्भ्रातृनन्दनः ।। ८ ।। (०४)

**सूतपुत्रः-**

निषसादासने मुख्ये भ्रातृभिः परिवारितः ।(०५)
**स(त)मुत्थाय महाराजं सूतपुत्रोऽब्रवीद्वचः ।**
**दिष्ट्या ते भरतश्रेष्ठ समाप्तोऽयं महाक्रतुः ।** (०६)

हतेषु युधि पार्थेषु राजसूये तथा त्वया।

---

त्वति; , क्रतुः सर्वास्त्वयं ह्यति; क्रतून्सर्वानयं ह्यति; इति सर्वानलङ्कृतान्; क्रतून्सर्वान वाप्स्यसि, .
(०१) (नाहुष, चैव (for चापि), (२)मान्धाता भरतर्षभ; भिरतस्तथा (३) ख-प्रवर्तीतोह्ययं राज्ञा धार्तराष्ट्रेण धीमता ।,एतं (for एनं), (४)भूताः सर्वे; पूतात्मानो (for पूताः सर्वे),
(०२)(२)र्षभं, (३)विवेश च (for प्रविवेश), (४)सुवेश्म च; स्वयमेव नराधिप; परन्तपः.
(०३)(नृपः (for ततः), पादान् (for पादौ), (३)कृपादीनां, (४)भारत (for धीमतः),
(०४)( ख-अभिवादितः कनीयोभिर् भ्रतृभिर्भ्रातृवत्सलः । निषसादासने मुख्ये भ्रातृभिः परिवारितः ।। .
(०५)(कनिष्ठैश्च; , कनीयो हि, (२)नन्दनः (for वत्सलः),
(०६)(तमुवाच (for त्थाय), महाराजं; तदा राजन्, (२)महद् (for ब्रवीद्), (४), क्रतूत्तमः; मम क्रतुः; त्वया क्रतुः.

आहृतेऽहं नरश्रेष्ठ त्वां सभाजयिता पुनः ।। ९ ।।[०१]

**वैशम्पायनः-**

तमब्रवीन्महाराजो धार्तराष्ट्रो महायशाः ।। १० ।।

दुर्योधनः-

सत्यमेतत्त्वयोक्तं हि पाण्डवेषु दुरात्मसु।[०२]

निहतेषु नरश्रेष्ठ प्राप्ते चापि महाक्रतौ।
राजसूये पुनर्वीर त्वमेवं वर्धयिष्यसि ।। ११ ।।[०३]

**वैशम्पायनः-**

एवमुक्त्वा महाराज कर्णमाश्लिष्य भारत।
राजसूयं क्रतुश्रेष्ठं चिन्तयामास कौरवः ।। १२ ।।[०४]

सोऽब्रवीत्कौरवांश्चापि पार्श्र्वस्थान्नृपसत्तमः।
राधेयसौबलादीनवै धार्तराष्ट्रो महीपतिः ।। १३ ।।[०५]

**दुर्योधनः-**

कदा तु तं क्रतुवरं राजसूयं महाधनम् ।[०६]
निहत्य पाण्डवान्सर्वानाहरिष्यामि कौरवाः ।। १४ ।।[०७]

---

(०१) (३) ()यं; च (for हं), नृप (for नरं), आहूतोयं नृपश्रेष्ठ; आहृते भरतश्रेष्ठः.

(०२) (महाबाहुर्; महाराज, दुर्योधनः (३)एव; एतं (for एतत्), च त्वां वीर; त्वयोक्तं हि (for त्वया वीर), (४)महात्मसु (for दुरा),

(०३)(नृपश्रेष्ठ; वर; कुरु; , महावीर; रणे वीर्यात, (३)महावीर (for पुनर्वीर), (४)त्वमेवं वर्ध; त्वं मां वर्धाप; त्वं मां वै वर्ध.

(०४) (महाराज; महेष्वासः (for महाप्राज्ञः), (२)आश्यि (for आश्लिष्य), (३)क्रतुवरं; कुरुश्रेष्ठं (४) भारतः(for कौरवः),

(०५) ( अब्रवीत् सुहृदस्सर्वान् धार्तराष्ट्रो महीपतिः ।.

(०६) ( ख-अब्रवीत् सुहृदस्सवान् धार्दराष्ट्रो महीपतिः । मध्ये अर्धं नास्ति.

(०७)(अब्र (for सोवं), कौरवांश्चापि (for सुहृद ), (२) नृपः , (नर) सत्तमः, (सौबलाकवक्ष्यि),

**वैशम्पायनः-**

तमब्रवीत् तदा कर्णः शृणु मे राजकुञ्जर ।। १५ ।।

**कर्णः-**

पादौ न धावये तावद्यावन्न निहतोऽर्जुनः ।[०१]

लक्षालङ्कारः - पादौ न धावये तावत् इत्यत्र 'धावृ शोधन' इति धातोः यथा रजोपहारेण कान्तिविशेषो भवति, तथा दास्यादीनां करेण पाद- क्षालनम् ।

कीलालजं न खादेयं करिष्ये चासुरव्रतम्

नास्तीति नैव वक्ष्यामि याचितो येन केनचित्

अथोत्क्रुष्टं महेष्वासैर्धार्तराष्ट्रैर्महारथैः ।। १६ ।।

**वैशम्पायनः-**

प्रतिज्ञाते फाल्गुनस्य वधे कर्णेन संयुगे।
विजितांश्चाप्यमन्यन्त पाण्डवान्धृतराष्ट्रजाः ।। १७ ।। [०२]

तदा प्रतिज्ञामारुह्य सूतपुत्रेण भाषिते।
दुर्योधनोऽपि राजेन्द्र विसृज्य नरपुङ्गवान् ।। १८ ।।

प्रविवेश गृहं श्रीमान्यथा चैत्ररथं प्रभुः ।
तेऽपि सर्वे महेष्वासा जग्मुर्वेश्मानि भारत ।। १९ ।। [०३]

कर्णोपि स्वगृह गत्वा मुदितो बान्धवैः सह

---

(३) नु (for तु), (४)महाक्रतुं.

(०१)(२)राजपुङ्गव; राजसत्तम.

(०२)(अथोत्कृष्टं; दुष्टं द्धृष्टं महाराज (for महेष्वासैर्), (३)फाल्गु नस्य; अर्जुनस्य.

(०३)()थ (for पि), राजेन्द्रो, (२)विजित्य; हृत्य (for सृज्य), नरपुङ्गवः; च नराधिप (३)धीमान्; राजन्; राजा (for श्रीमान्), (४)सुखं; विभुः; हरिः; तथा; प्रति (for प्रभुः) पूज्यमानश्च बन्दिभिः.

प्रददौ वित्तमर्थिभ्यो धनाध्यक्ष इवापरः ;
स्वानि स्वानि महाराज भीष्मद्रोणादयो नृपाः

पाण्डवाश्च महेष्वासा दूतवाक्यप्रचोदिताः ।
चिन्तयन्तस्तमेवार्थं नालभन्त सुखं क्वचित् ।। २० ।। (०४)

भूयश्च चारै राजेन्द्र प्रवृत्तिरुपपादिता।
प्रतिज्ञा सूतपुत्रस्य विजयस्य वधं प्रति ।। २१ ।। (०५)

एतच्छ्रुत्वा धर्मसुतः समुद्विग्नो नराधिप।(०६)
अधोमुखश्चिरं तस्थौ किं कार्यमिति चिन्तयन् ।। २२ ।। (०७)

अभेद्यकवचं मत्वा कर्णमद्भुतविक्रमम् ।
अनुस्मरंश्च सङ्क्लेशान्न शान्तिमुपयाति सः ।। २३ ।।

तस्य चिन्तापरीतस्य बुद्धिर्जज्ञे महात्मनः ।
बहुव्यालमृगाकीर्णं त्यक्तुं द्वैतवनं वनम् ।। २४ ।। (०८)

धार्तराष्ट्रोऽपि नृपतिः प्रशशास वसुन्धराम्।
भ्रातृभिः सहीतो वीरैर्भीष्मद्रोणकृपैस्तथा ।। २५ ।। (०९)

सङ्गम्य सूतपुत्रेण कर्णेनाहवशोभिना (१०)
सततं प्रीयमाणो वै देविना सौबलेन च ।। २६ ।।

---

(०४) (पाण्ड वापि; स्तु, (२)प्रणोदिताः.

(०५) (भूयश्चरैर्नृपश्रेष्ठ, (४)अर्जुनस्य; विजानन्तु (for विजयस्य),

(०६) (धर्मपुत्रः; राजः (२)नराधिपः.

(०७)(३)अभेद्यं कवचं ज्ञात्वा सु (for च), सङ्क्लेशं, उपजग्मि (ज्ञि) वान्; उपयान्नृपः (for याति सः),

(०८) (३)महाव्यालमृगा; बहुव्यालगणा; बहुव्यालसमा (४)सरः (for वनम्),

(०९) ()पि राजर्षिः; नरपतिः (for पि नृपतिः), (३)भ्रातृभिः सहितो वीरो (४)भीष्मद्रोणकृपादिभिः; द्रोणभीष्म कृपैस्तथा.

(१०) (सङ्गत्य.

**दुर्योधनः प्रिये नित्यं वर्तमानो महीभृताम्।**
**पूजयामास विप्रेन्द्रान्क्रतुभिर्भूरिदक्षिणैः ॥ २७ ॥** (०१)

**भ्रातणां च प्रियं राजन्स चकार परन्तपः।**
**निश्चित्य मनसा वीरो दत्तभुक्तफलं धनम् ॥ २८ ॥** (०२)

अस्मिन् पर्वणि २१२अध्याये २८श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि घोषयात्रापर्वणि युधिष्ठिरचिन्तायां द्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥

# २१३. त्रयोदशदधिकद्विशततमोऽध्यायः

## मृगस्वप्नोद्भवपर्व

**पाण्डवनिहतभूयिष्टैर्मृगैर्युधिष्टिरं प्रति स्वप्ने स्थानान्तरगमनेन स्वकुशलशेषीकरणप्रार्थना ॥ १ ॥ युधिष्टिरेण भ्रादुषु स्वीयस्वप्नदर्शनकथनपूर्वकं पुनः काम्यकवनं प्रति गमनम् ॥ २ ॥ पाण्डवानां काम्यकवने गमनम्**

**जनमेजयः**

---

(०१)(४)महामतिः; महीभृतां; महीक्षितां; महीपतेः.

(०२)(कार्यं (for राजन्), (३)वीरं; राजन्, (४)आरण्यः धार्त (धृत) राष्ट्रयज्ञ, समाप्त; दुर्योधनयज्ञ समाप्त, कर्ण प्रतिज्ञानं.

दुर्योधनं मोक्षयित्वा पाण्डुपुत्रा महाबलाः ।
किमकार्षुर्वने तस्मिंस्तन्ममाख्यातुमर्हसि ॥ १ ॥ [०१]

**वैशम्पायनः**

ततः शयानं कौन्तेयं रात्रौ द्वैतवने मृगाः ।
स्वप्नान्ते दर्शयामासुर्बाष्पकण्ठा युधिष्ठिरम् ।[०२]
तानब्रवीत्स राजेन्द्रो वेपमानान्कृताञ्जलीन् ॥ २ ॥

लक्षालङ्कारः - स्वप्नान्ते दर्शयामासुः इत्यत्र स्वप्नान्ते स्वप्नमध्ये ।

**युधिष्ठिरः-**

ब्रूत यद्वक्तुकामाः स्थः(स्थ)के भवन्तः किमिष्यते ॥ ३ ॥ [०३]

**वैशम्पायनः-**

एवमुक्ताः पाण्डवेन कौन्तेयेन यशस्विना।
प्रत्यब्रुवन्मृगास्तत्र हतशेषा युधिष्ठिरम् ॥ ४ ॥ [०४]

**मृगाः**

वयं मृगा द्वैतवने हतशिष्टास्तु भारत।
नोत्सीदेम महाराज क्रियतां वासपर्ययः ॥ ५ ॥ [०५]

भवतो भ्रातरः शूराः सर्व एवास्त्रकोविदाः ।

---

(०१)(पाण्डुपुत्राः; मोक्षयित्वा (for मोच), (२)मोचयित्वा (for पाण्डु), महारथाः किमकुर्वन् (for कार्षुद्) (४)तत्त्वम (for तन्ममा), समा (for ममा), समाख्यातुं त्वमर्हसि; , तन्ममाचक्ष्व सर्वशः.
(०२)(नृपतिं; राजानं (for कौन्तेयं),(३) क-सुप्तान्ते; ख- श्वप्नान्ते.
(०३)(२)वेपमानःकृताञ्जलिः (३)तु (for स्थ), (४) इच्छते; इच्छथ (for इष्यते), तत्करिष्याम्यशेषतः; करिष्ये तदशेषतः.
(०४) (२)महात्मना(for यश), (३) त्रस्ता (for तत्र),
(०५) (२)हतशेषाः तु भारत; युधिष्ठिर (for स्म भारत), (३)नोत्सादनं (for नोत्सीदेम), (४)पाण्डवर्षभ.

कुलान्यल्पावशिष्टानि कृतवन्तो वनौकसाम् ॥ ६ ॥ [०१]

बीजभूता वयं केचिदवशिष्टा महामते।
विवर्धेमहि राजेन्द्र प्रसादात्ते युधिष्ठर ॥ ७ ॥ [०२]

**वैशम्पायनः-**

तान्वेपमानान्वित्रस्तान्बीजमात्रावशेषितान्।
मृगान्दृष्ट्वा सुदुःखार्तो धर्मराजो युधिष्ठिरः ।[०३]
तांस्तथेत्यब्रवीद्राजा सर्वभूतहिते रतः ॥ ८ ॥

**युधिष्ठिरः-**

यथा भवन्तो ब्रुवते करिष्यामि च तत्तथा ॥ ९ ॥ [०४]

**वैशम्पायनः-**

इत्येवं प्रतिबुद्धः स रात्र्यन्ते राजसत्तमः ।
अब्रवीत्सहितान्भ्रातन्दयापन्नो मृगान्प्रति ॥ १० ॥ [०५]

उक्तो रात्रौ मृगैरस्मि स्वप्नान्ते हतशेषितैः ।
अनुभूताः स्म भद्रं ते दया नः क्रियतामिति ॥ ११ ॥ [०६]

लक्षालङ्कारः - अनुभूताः स्म भद्रं त इत्यत्र अनु अनुकूलतया भूताः अनुभूताः।

---

(०१) (भवतो (२)सर्वशस्त्रास्त्र (३) शेषाणि.

(०२)(वने (for वयं), (२)महीपते; विशां पते (for महामते), (३)विवर्धे महाराज; विवृधेमहि रा .

(०३)(३)सुदुःखा र्तान्, (४) धर्मपुत्रो.

(०४) (ए) व (for (इ)ति), (३)यथा (for तथ्यं), (४) वचस् (for च तत्), तत्करिष्यामि वो वचः.

(०५)(सन् (for स), (२)व्युष्टायां (for रात्र्यन्ते), व्युष्टायां निशि पार्थिवः भारतः (४) दयावांस्तान्; दयावन्तो.

(०६)(अस्मिन् (२)मृगशेषितैः; हतशेषिभिः (३) क-ख- भूतास्स्म, घ-स्यत्यजास्स्म, तेन्तभूताः अनु; तन्तु; तनू अनुभूतास्तु दृश्यन्ते.

ते सत्यमाहुः कर्तव्या दयास्माभिर्वनौकसाम्।
साष्टमासं हि नो वर्षं यदेनानु(तदु)पयुग्ष्महे ।। १२ ।। (०१)

त्वदधीना वयं राजन्मा त्वमस्मान्विचारय
यत्रैव मन्यसे पार्थ तत्र गच्छामहे वयम् ।। १३ ।।

**युधिष्ठिरः-**

पुनर्बहुमृगं रम्यं काम्यकं काननोत्तमम्।
मरुभूमेः शिरःस्थानं तृणबिन्दुसरः प्रतिः ।
तत्रेमां वसतिं शिष्टां विहरन्तो रमेमहि ।। १४ ।। (०२)

**वैशम्पायनः**

इत्युक्तास्ते महात्मानः पाण्डवेन महात्मना
ततस्ते पाण्डवाः शीघ्रं प्रययुर्धर्मकोविदाः
ब्राह्मणैः सहिता राजन्ये च तत्र सहोषिताः ।। १५ ।। (०३)

इन्द्रसेनादिभिश्चैव प्रेष्यैरनुगतास्तदा ।। १६ ।। (०४)

ते यात्वानुसृतैर्मार्गैः स्वन्नैः शुचिजनान्वितैः ।

---

(०१) (कर्तव्यं (२)दयास्माकं यदस्माभिर् (३) क-दृतमांसं - यतेतदुपययुक्षहि, ख-इदमर्धं नास्ति, घ-गृष्ट, मांसवने वर्षः, हृष्टमासं; हृष्टामांसं वने (for हि नो), (४)यदेतद्; यदेतम्; यदेतान् उपयुज्महे; भुज्महेः यत्स्महे; भुग्ष्वहे भुञ्महे; भुञ्जते; भुग्ष्महे; युञ्हे; युग्ष्महे; युज्महि; युग्ष्वहि; युञ्महि; क्षैं, युग्महि .
(०२) युधिष्ठिरः (२) श्रूयते काम्यकं वनं, (३)स्थानं प्र ख्यातस् मरुभूः शिखरं ख्यातं तत्रेमां वसतिं शिष्टां; तत्र मासान्वने शिष्टान्, वसेमहि; रमामहे.
(०३)(२)युद्ध (for धर्म),
(०४)(४) यैस्तैस्तत्र; ये तैस्तत्र; ये ते तत्र; य एतेत्र; ये तत्रासन् ये तत्र; वनवासिनः जग्मुस्तत्र सहोषितैः भृत्यैर् (for प्रेष्यैर्) अनुगतैस् तथा च ते.

**ददृशुः काम्यकं पुण्यमाश्रमं तापसायुतम् ॥ १७ ॥** (०१)

**विविशुस्ते स्म कौरव्या वृता विप्रर्षभैस्तदा।**
**तद्वनं भरतश्रेष्ठाः स्वर्गं सुकृतिनो यथा ॥ १८ ॥** (०२)

अस्मिन् पर्वणि २१३अध्याये १८श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मृगस्वप्नोद्भवपर्वणि काम्यकप्रवेशे त्रयोदशादधिकद्विशततमोऽध्यायः ॥ २१३ ॥**

**(प्रायोपवेशनपर्व समाप्तम् )**

---

(०१) (ते याताः; गत्वा ते, सुसुखैद्; (अ) नुगतैर्;, तु रथैर्; तु सुखैर् (२)शुभैः; ,श्वभ्रैः; क्षुण्णैः; स्वच्छैः; शनैः (३)विविशुः पुण्याम्; रम्यम् (४)तापसावृतं; तपसा युतं, (न्वितं; युताः; न्विताः) ; तापसान्वितं; तापसैर्युतं .

(०२)(ददृशु (for विविशु), (२) विप्रर्षिभिस्, तथा (३) श्रेष्ठ तद्वनं विविशुः पार्थाः आरण्य, मृगस्वप्नदर्शन; मृगस्वप्न; स्वप्नदर्शन; मृगस्वमोद्भवप्रदर्शन.

# व्रीहिद्रौणिकपर्व

## २१४. चतुर्दशाधिकद्विशततमोऽध्यायः

कदाचन काम्यकवनवासिनः पाण्डवानुपागतेन व्यासेन युधिष्ठिरं प्रति दानप्रशंसनम् ।। युधिष्ठिरस्य चिन्ता । पाण्डवानां संनिधौ व्यासस्यागमनं दानमहिम्नः प्रतिपादनं

**वैशम्पायनः**

वने निवसतां तेषां पाण्डवानां महात्मनाम्।
वर्षाण्येकादशातीयुः कृच्छ्रेण भरतर्षभ ।। १ ।।

फलमूलाशनास्ते हि सुखार्हा दुःखमुत्तमम्।
प्राप्तकालमनुध्यान्तः सेहिरे वरपूरुषाः ।। २ ।। [०१]

लक्षालङ्कारः - प्राप्तकालमनुध्यान्त इत्यत्र अनुध्यान्तः अनुध्यायन्तः ।

युधिष्ठिरस्तु राजर्षिरात्मकर्मापराधजम्।
चिन्तयन्स महाबाहुर्भ्रातॄ तृणां दुःखमुत्तमम् ।। ३ ।। [०२]

---

(०१)('शिन' (for शना ); ()ति पि (for हि ); (२)सुखम् (for दुःखम्, );, (३) ख- ध्यान्तः सेहुरुत्तमपूरुषाः।, प्राप्य (for प्राप्त ); प्राप्ताः (for ध्यान्तः ); प्राप्तकालमनुष्यत् , (४)सेहुरुत्तमपौरुषाः; सेहिरे वरपूरुषाः; , तेरुस्ते पुरुषर्षभाः.

(०२)(३)चिन्तयंस्तन्; अचिन्तयन्.

न सुष्वाप सुखं राजा हृदि शल्यैरिवार्पितैः ।
दौरात्म्यमनुपश्यंस्तत्काले द्यूतोद्भवस्य हि ।। ४ ।।(०१)

संस्मरन्पुरुषा वाचः सूतपुत्रस्य पाण्डवः ।
निःश्वासपरमो दीनो बिभ्रत्कोपविषं महत् ।। ५ ।।(०२)

अर्जुनो यमजौ चोभौ द्रौपदी च यशस्विनी।

स च भीमो महातेजाः सर्वेषामुत्तमो बली। ।। ६ ।।(०३)

चिरस्य जातं धर्मज्ञं सासूयमिव ते तदा।
युधिष्ठिरमुदीक्षन्तः सेहुर्दुःखमनुत्तमम्।(०४)

This Stange is Interchenged in TRK after 6

अवशिष्टमल्पकालं मन्वानाः पुरुषर्षभाः ।। ७ ।।
वपुरन्यदिवाकार्षुरुत्साहामर्षचेष्टितैः ।(०५)

कस्यचित्त्वथ कालस्य व्यासः सत्यवतीसुतः ।
आजगाम महायोगी पाण्डवानवलोककः ।। ८ ।।(०६)

तमागतमभिप्रेक्ष्य कुन्तीपुत्रो युधिष्ठिरः ।
प्रत्युद्गम्य महात्मानं प्रत्यगृह्णाद्यथाविधि ।। ९ ।।(०७)

---

(०१)(महाराज; चिरं राजन्; तदा राजा (for सुखं राजा ); (२)इवार्दितः; इवार्पितः; इवाभवत, (३)अनुपश्यन्स; अनुसम्पश्यन्, दौरात्म्यमात्मनः पश्यन् (४)कलेर् कालं ह; च (for हि ); काले ( लं) घूतोद्भवं स्म ह; , काले घूतोद्भत्रं प्रति ( स हि );.

(०२) उवाच (for संस्मरन् ); निश्वास, दध्रे (for बिभ्रत् );.

(०३) (३)भीमसेनो महा, (४)बले (for बली );.

(०४) (३)उपे; अपे (for उदी '); सेहिरे दुःखमुत्तमं.

(०५) (ह्यल्पकालं; च कालं तु; त्वल्प; चाल्पं, अवशिष्टाल्पकालं च, (२)पुरुषो- त्तमाः (३)अन्य; अन्यम् (for अन्यद् ); चोदितैः .

(०६) ( ख- वपुरन्यदिवाकार्षुरुत्साहामर्षचेष्टितैः ।,(३)महातेजाः (for योगी );.

(०७)(तमापतन्तमुद्दीक्ष्य.

**तमासीनमुपासीनः शुश्रूषुर्नियतेन्द्रियः ।**
**तोषयन्प्रणिपातेन व्यासं पाण्डवनन्दनः ।। १० ।।** (०१)

**तानवेक्ष्य कृशान्पौत्रान्वने वन्येन जीवतः ।**
**महर्षिरनुकम्पार्थमब्रवीद्बाष्पगद्गदम् ।। ११ ।।** (०२)

अस्मिन् पर्वणि २१४अध्याये ११श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि मृगस्वप्नोद्भवपर्वणि काम्यकप्रवेशे चतुर्दशाधिकद्विशततमोऽध्यायः ।। २१४ ।।

# २१५. पञ्चदशाधिकद्विशततमो अध्यायः

**युधिष्ठिरं प्रति दानप्रशंसनम् ।।**

**युधिष्ठिर महाबाहो शृणु धर्मभृतां वर ।**
**नातप्ततपसो लोके प्राप्नुवन्ति महत्सु(महासु)खम् ।। १ ।।** (०३)

**सुखदुःखे हि पुरुषः पर्यायेणोपसेवते।**
**न ह्यनन्तं सुखं कश्चित्प्राप्नोति पुरुषर्षभ ।। २ ।।** (०४)

**प्रज्ञावांस्त्वेव पुरुषः संयुक्तः परया धिया।**

---

(०१)(उपा समा (for तमा ); च शुश्रूषुर्; उपासीनं; उपासीनाः, (२)नियतो (for शुश्रूषुर् ); विजितेन्द्रियः; नियतेन्द्रिया; (३)प्रणिधानेन तोषयामास शौचेन (४)पाण्डवनन्दन; , सत्यवतीसुतं .
(०२)(समीक्ष्य; प्रेक्ष्य च (for अवेक्ष्य ); समवेक्ष्य तु तान्पौत्रान्, (२)जीवितः ( ’न); , जीवनः (३) रनुकम्पंस्तान्, (४)वाक्य (for बाष्प’ ); .
(०३)(महाप्राज्ञ महाराज, (३)कामं लोके; पुंसः शीघ्रं; पार्थ (for पुत्र ); (४)महासुखं महत्फलं.
(०४) (सुखदुःखं, (२) (उ)पभुञ्जते; च सेवते (३)न ह्यत्यन्तं सुखं; न ह्यनन्तं सुखं; नात्यंवं हि ( च) सुखं (४)भरतर्षभ पुरुषर्षभः.

उदयास्तमनज्ञो हि न हृष्यति न शोचति ।। ३ ।। (०१)

सुखमापतितं विन्तन् दुःखमापतितं वहेत्।
कालप्राप्तमुपासीत सस्यानामिव कर्षकः ।। ४ ।। (०२)

लक्षालङ्कारः - उदयास्तमयज्ञो हि इत्यत्र कदाचित्सम्पदुदयः कदाचित्सम्पदस्त- मयश्च उदयास्तमयौ ।

तपसो हि परं नास्ति तपसा विन्दते महत्।
नासाध्यं तपसः किञ्चिदिति बुद्ध्यस्य भारत ।। ५ ।। (०३)

सत्व(त्य)मार्जवमक्रोधः संविभागो दमः शमः

अनसूयाविहिंसा च शौचमिन्द्रियसंयमः ।
पावनानि महाराज नराणां पुण्यकर्मणाम् ।। ६ ।। (०४)

अधर्मरुचयो मूढास्तिर्यग्गतिपरायणाः ।
कृच्छ्र(कृच्छ्रां)योनिमनुप्राप्ता न सुखं विन्दते जनाः ।। ७ ।। (०५)

कर्मभूमिरियं तात फलभूमिरसौ परा ।

इह यत्क्रियते कर्म तत्परत्रोपयुज्यते ।। ८ ।। (०६)

---

(०१)(भाग्य (for प्रज्ञा ); एव; चैव; त्वेष (for त्वेव ); (२)संसक्तः; स युक्तः, युक्तः परमया धिया, (३)’स्तमनज्ञो, (४)शोचति हृष्यति, कुप्यति (for हृष्य );.

(०२) (सेहेद्; , विद्वान् (for सेवेद् ); दुःखं च पतितं से (२)तथा’; वहेत्; महत्; सहन्; सहे; सह (३) प्राप्तकाल; काल्यप्राप्ति (for कालप्राप्त ); (४)इव कर्षुकः उपकर्षकः.

(०३) (३)तपसां सा.

(०४)(२)संविभागे दमश्च सः (३)अहिंसा चानसूया च अनसूयाप्य ( यापि; या त्व ) हिंसा च (४)निग्रहः; सङ्गमः; संयमं, साधकानि; पावनानि, महाबाहो नृणां वै (for नराणां ); .

(०५) (२)तिर्यग्योनि, गतिं (३) (for योनि ); अनुप्राप्ता, (४)महत् (for जनाः ); न विदन्ते ( ति) सुखं जनाः; सुखं विदन्ति नो जनाः.

(०६) (कुरुते (for क्रियते );.

तस्माच्छरीरं युञ्जीत तपसा नियमेन च ।(०१)

मूलसिक्तस्य वृक्षस्य फलं शाखासु दृश्यते।
यथाशक्ति प्रयच्छेत सम्पूज्याभिप्रणम्य च ।। ९ ।।

काले प्राप्ते च हृष्टात्मा राजन्विर(ग)तमत्सरः ।(०२)
सत्यवादी लभेतायुरनायासमथार्जवम् ।। १० ।।(०३)

अक्रोधनोऽनसूयश्च निर्वृतिं लभते पराम्।(०४)

दान्तः शमपरः शश्वत्परिक्लेशं न विन्दति।
न च तप्यति दान्तात्मा दृष्ट्वा परगतां श्रियम् ।। ११ ।।(०५)

संविभक्ता च दाता च भोगवान्सुखवान्नरः ।
भवत्यहिंसकश्चैव परमारोग्यमश्नुते ।। १२ ।। (०६)

मान्यमानयिता जन्म कुले महति विन्दति।
व्यसनैर्न तु संयोगं प्राप्नोति विजितेन्द्रियः ।। १३ ।। (०७)

विन्दते सुखमत्यन्तमिह लोके परत्र च ।(०८)

शुभानुशयबुद्धिर्हि संयुक्तः कालधर्मणा ।। १४ ।।

---

(०१) (युज्यते (for भुज्यते );.
(०२) (प्रयच्छेत (for च्छेच्च ); (३)प्राप्ते (for पात्रे );.
(०३)(लभत्यायुर्; लभेदायुर्, (२)अथार्जकः; अथार्जवं; अथार्जवात्; अनामयः.
(०४) (३) ()नसूयुश्च (४)निवृत्ति.
(०५) (प्रेत्य (for शश्वत् ); परिक्लेशान्, कुप्यति (for त ); शान्तात्मा; दीनात्मा। .
(०६) (४)'रोग्य संयुतः.
(०७)(मान्य; मान्यं; मान्या (for मान्यान् );.
(०८)(३)नैव; न च.

प्रादुर्भवति तद्योगात्कल्याणमतिरेव सः ।। १५ ।।(०१)

भगवन्दानधर्माणां तपसो वा महामुने।
किंस्विद्बहुगुणं प्रेत्य किं वा दुष्करमुच्यते ।। १६ ।।

**व्यासः**

दानान्न दुष्करं तात पृथिव्यामस्ति किञ्चन।
अर्थे च महती तृष्णा स च दुःखेन लभ्यते ।। १७ ।।(०२)

राजन्प्रत्यक्षमेवै तदृश्यते लोकसाक्षिकम्।

परित्यज्य प्रियान्प्राणान्धनार्थं हि महामते।
प्रविशन्ति नरा वीराः समुद्रमटवीं तथा।(०३)
तथैव प्रतिपद्यन्ते समुद्रमटवीं तथा ।। १८ ।।(०४)

कृषिगोरक्ष्यमित्येके प्रतिपद्यन्ति मानवाः ।
पुरुषाः प्रेष्यतामेके निर्गच्छन्ति धनार्थिनः ।। १९ ।।(०५)

तस्माद्दुःखार्जितस्यैव परित्यागः सुदुष्करः ।
न दुष्करतरं दानात्तस्माद्दानं मतं मम ।। २० ।।(०६)

---

(०१)(शुभानुबन्ध, (२)कालकर्मणा (३)संयोगात् (for तद्योगात् ); (४)ह; हि; च (for सः ); युधिष्ठिरः
(३)किञ्चिद्बहु प्राप्य (for प्रेत्य );.
(०२) (दुष्करं तात (पार्थ) (for दुष्करतरं ); (३)अर्थे तु; अर्थेषु; अर्थे च; अर्थेन; , अर्थेति, (४)कृच्छ्रेण (for दुःखेन );.
(०३)(२)धनार्थे; परार्थं, मते (for हवम् ); प्रविशन्ति रणाजिरं; धनार्थे दुर्गमं स्थलं (३)आविशन्ति, नरा (महा) धीरः महावीराः,तथैव प्रतिपद्यन्ते; प्रविशन्ते महाधीराः.
(०४) (४)धनार्थ (for समुद्रं ); अटवीस.
(०५)(कृषिगोरक्षम्; कृषिं गोरक्षम् (क्ष्यम्); कृषिः (षि) गौरक्ष्यम् इत्येते; अप्यन्ये (for इत्येके ); (२) प्रति- पश्यन्ति (३)प्रेत्यताम्, गच्छन्ति हि; नियच्छति.
(०६) (तस्माद् (for तस्य ); (ए) व (for (ए) वं) (२)हि (for सु ); (३)सु (for न ); दानं; तात (for दानात् ); सुदुष्करकरं दानं, (४)दानात् (for तस्मात् ); राजन्; तस्मान् (for दानं ); परं

तद्दुष्करतरं दानं तस्माद्दानं विशिष्यते ।

विशेषस्त्वत्र विज्ञेयो न्यायेनोपार्जितं धनम्।
पात्रे काले च देशे च साधुभ्यः प्रतिपादयेत् ।। २१ ।।(०१)

श्रद्धया विधिवत्पात्रे दत्तस्यान्तो न विद्यते ।

अन्यायात्समुपात्तेन दानधर्मो धनेन यः ।
क्रियते न स कर्तारं त्रायते महतो भयात् ।। २२ ।।(०२)

पात्रे दानं स्वल्पमपि काले दत्तं युधिष्ठिर ।
मनसा हि विशुद्धेन प्रेत्यानन्तफलं स्मृतम् ।। २३ ।।(०३)

देशे काले च पात्रे च मुद्गलः श्रद्धयान्वितः ।

व्रीहिद्रोणं प्रदायाथ परं पदमवाप्तवान्।

श्रद्धा धर्मानुगा देवी पावनी विश्वधारिणी।

सावित्रीप्रसवित्री च संसारार्णवतारिणी।

श्रद्धया धार्यते धर्मो महद्भिर्नार्थदर्शिभिः ।

सधना अपि राजानो विःश्रद्धा नरकं गताः ।

निष्किञ्चनाश्च मुनयो श्रद्धवन्तो दिवं गताः ।

अत्राप्युदाहरन्तीमं इतिहासं पुरातनम्।

---

मतं (for मतं मम);.

(०१)(तत्र; तस्य , (for त्वत्र ); (२)’नैवा (for नोपा ); (३)देशे काले (४)प्रयतः (for साधुभ्यः ); प्रतिपादनं.

(०२)(अन्यायात् (for अन्याय ); (२)दातधर्मौ; दानं सम्यग् न चोदयः; विशां पते (for धनेन यः ); (३)कुरुते (for क्रियते ); .

(०३) (न्यायार्जितं (for पात्रे दानं ); (२)दानं; दत्वा (for दत्तं ); (३)हि ( तु) (for सु ); मनसा तु विशिष्टेन, (४)प्रेत्यानन्तफलप्रदं.

व्रीहिद्रोणपरित्यागाद्यत्फलं प्राप मुद्गलः ।। २४ ।।[०१]

लक्षालङ्कारः - व्रीहिद्रोणपरित्यागात् इत्यत्र द्रोणः प्रस्थविशेषः ।

अस्मिन् पर्वणि २१५ अध्याये २४श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि व्रीहिद्रौणिकपर्वणि दानदुष्करत्वकथने पञ्चदशाधिकद्विशततमोऽध्यायः ।। २१५ ।।

# २१६. षोडशाधिकद्विशततमोऽध्यायः

मुद्गलचित्तपरीक्षणाय दुर्वाससा षट्कृत्वो याचने अप्यविकृतमनसा तेन तदा तदा अन्नदानेन तत्तोषणम् ।। १ ।। तन्महिम्ना सविमानेन देवदूतेन सशरीरस्यैव मुद्गलस्य स्वर्गप्रत्याह्वानम् ।। २ ।। मुद्गलेन तं प्रति स्वर्ग्यस्वरूपनिरूपणप्रार्थना ।। ३ ।।

दुर्वाससा कृतं मुद्गलस्य दानधर्मधैर्यादिपरीक्षणं मुद्गलस्य देवदूतं प्रत्यनुयोगश्च

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
व्रीहिद्रोणपरित्यागात्यत्फलं प्राप मुद्गलः ।

**युधिष्ठिरः**

व्रीहिद्रोणः परित्यक्तः कथं तेन महात्मना।
कस्मै दत्तश्च भगवन्विधिना केन चात्थ मे ।। १ ।।[०२]

---

(०१)(४)यत् फलं .
(०२)('द्रोणं त्यक्तं, (२)महर्षिणा (for महा ); (३)दत्तं च, (४)तदूद; शंस मे; वा विभो; वात्थ मे ,

प्रत्यक्षधर्मा भगवान्यस्य तुष्टो हि कर्मभिः ।
सफलं तस्य जन्माहं मन्ये सद्धर्मचारिणः ॥ २ ॥[०१]

**व्यासः**

शिलोञ्छवृत्तिधर्मात्मा मुद्गलः संयतेन्द्रियः ।
आसीद्राजन्कुरुक्षेत्रे सत्यवागनसूयकः ॥ ३ ॥[०२]

अतिथिव्रती क्रियावांश्च कापोतीं वृत्तिमास्थितः ।
सत्रमिष्टीकृतं नाम समुपास्ते महातपाः ॥ ४ ॥[०३]

लक्षालङ्कारः - कापोतीं वृत्तिमाश्रि इत्यत्र यथा कपोतः शिलायाः कणं कणमार्जयति, तद्वच्छिलोञ्छवृत्त्या अल्पाल्पसङ्ग्रहरूपा वृत्तिः कापोतीत्युच्यते, ताम् ।

सपुत्रदारो हि मुनिः पक्षाहारो बभूव ह ।
कपोतवृत्त्या पक्षेण व्रीहिद्रोणमुपार्जयत् ॥ ५ ॥[०४]

मुनिः स तु महाराज महात्मा नियतव्रतः ।[०५]

दर्शं च पौर्णमासं च कुर्वन्विगतमत्सरः ।
देवतातिथिशेषेण कुरुते देहयापनम् ॥ ६ ॥ [०६]

तस्येन्द्रः सहितो देवैः साक्षात्त्रिभुवनेश्वरः ।

---

चार्थिने.

(०१)('धर्मो; धर्म-; तुष्टो; , कर्मा (for धर्मा ); (२)तुष्टोसि, कर्मतः, (३)जन्मेति (for जन्माहं); (४) तद्धर्म; षद्धधर्म; सद्ब्रह्म.

(०२)(सिलोञ्छ, (२)शंसितव्रतः; संयतें- द्रियः, (४)सत्यवान्.

(०३)(अतिव्रत-; अतिव्रतः; अतिथिव्रतः; अतिथिप्रियः अतिथिव्रतचर्यायां, (२)आश्रिः (for आस्थितः ); तथा धर्मप्रियो ह्यति (३)इष्टा; दृष्टि; इष्टं, (४)समु- पास्थ; स्त.

(०४) (स (for हि ); (२)पक्षान्ते च भैक्षाहारो, ह (for सः );.

(०५) (२)कपोतवृत्तिः (४)उपार्जयन्.

(०६)(दाशं पौर्णमास्यं (२) क-कुर्वीत कृत; ख-कुर्वन् विगत; घ-कुर्वीत गत, (४)देहपालनम्; , पोषणम्.

प्रत्यगृह्णान्महाराज भागं पर्वणि पर्वणि ।। ७ ।। (०१)

स पर्वकालं कृत्वा तु मुनिवृत्त्या समन्वितः ।
अतिथिभ्यो ददावन्नं प्रहृष्टेनान्तरात्मन ।। ८ ।। (०२)

व्रीहिद्रोणस्य तद्ध्यस्य ददतोऽन्नं महात्मनः ।
शिष्टं मात्सर्यहीनस्य वर्धतेऽतिथिदर्शनात्।(०३)
तच्छतान्यपि भुञ्जन्ति ब्राह्मणानां मनीषिणाम् ।। ९ ।। (०४)

मुनेस्त्यागविशुद्ध्या तु तदन्नं वृद्धिमृच्छति ।। १० ।। (०५)

तं तु शुश्राव धर्मिष्ठं मुद्गलं संशितव्रतम्।
दुर्वासा नृप दिग्वासास्तमथाभ्याजगाम ह ।। ११ ।। (०६)

बिभ्रच्चानियतं वेषमुन्मत्त इव पाण्डव ।
विकचः परुषा वाचो व्याहरन्विविधा मुनिः ।(०७)

अभिगम्याथ तं विप्रमुवाच मुनिसत्तमः ।। १२ ।।

लक्षालङ्कारः - विकचः परुषा वाच इत्यत्र विगतः कचः केशभारो यस्य स तथोक्तः।

---

(०१)(तदेद्रः; तत्रेन्द्रः, (४)यागं;.

(०२)(काल्यं (for कालं ); च (for तु ); सर्वकालेषु भागं तु, (२)मुनि-धृत्या मुनिः प्रीत्या, समुत्थितः (for समन्वितः ); मुनिर्भूत्यसम (३)ददा- त्यन्नं; गतेभ्योयं (for ददावन्नं );.

(०३)(सद्धस्य; तद्धयस्य; तदहर्; तत्प्रीत्या; तद्ध्यन्न (for तदहो ); (२) ()स्य (for न्नं ); (३)सृष्टं; मृष्टं; दृष्टं ऋषेर् (for शिष्टं ); (४)वर्धते; वर्धता; पर्वण्य.

(०४)(अयुतान्यपि; तच्छेषा; तच्छिष्टा, (२)महात्मनां; तपस्विनां (for मनी' ); .

(०५)(३)पुन (for मुने ); हि; च (for तु ); स नेष्ट्या परिशुद्धात्मा (४)ऋद्धिम् (for वृद्धिम् ); इच्छति (तः); अर्छति; अर्ह (for ऋच्छ );.

(०६)(तत्र; तत्तु, धर्मज्ञं तं तु शुद्धं सुधर्मिष्ठं, (२)स्वकुलं (for मुद्गलं ); शंसित; संयतेंद्रियं (for संशित ); (३)दुर्वासो नृप दुर्वासास्, (४)तत्राथा- ( प्य )भ्या; स तमभ्या.

(०७)(सुनियतं; न (स) नि; अनि; त्वनि (for चानि ); वेशं, (२)भारत (for पाण्डव ); (३)परुषाकारो (for षा वाचो, ); (४)विविधं; विविधान्, गिरः (for मुनिः);.

**दुर्वासाः-**

अन्नार्थिनमनुप्राप्तं विद्धि मां द्विजसत्तम ।। १३ ।। (०१)

स्वागतं तेऽस्त्विति मुनिं मुद्गलः प्रत्यभाषत।
पाद्यमाचमनीयं च प्रतिपाद्यार्घ्यमुत्तमम् ।। १४ ।।

**वैशम्पायनः-**

प्रादात्स तापसायान्नं क्षुधितायातिथिव्रती।
उन्मत्ताय परां श्रद्धामास्थाय स धृतव्रतः ।। १५ ।। (०२)

ततस्तदन्नं रसवत्स एव क्षुधयान्वितः ।
बुभुजे कृत्स्नमुन्मत्तः प्रादात्तस्मै च मुद्गलः ।। १६ ।। (०३)

भुक्त्वा च ततः सर्वमुच्छिष्टेनात्मनस्ततः ।
अथाङ्गं लिलिपेऽन्नानि(न्नेन) यथागतमगाच्च सः ।। १७ ।। (०४)

तेनैवात्मानमालिप्य हसन्गायन्प्रधावति।
ऋत्यते धावते चैव बुद्ध्वा तत्क्रोशते तथा।

एवं द्वितीये सम्प्राप्ते यथाकाले मनीषिणः ।

---

(०१) (देशम् (for विप्रम् ); (२)मुनिसत्तमं; पुङ्गवः (३)अर्थार्थिनम् इह; अभि- (for अनु- ); (४) द्विज ( नृप) (for मुनि ); (मुनिर्; मुहुर्; मुने, (२)स्वकुलः (for मुद्गलः ); (४)’पाद्या (for वेद्या );.

(०२)(प्रादाद्य( त्त); त् प्रदाय; प्रासा- दात् (for प्रादात्स ); तापसोपात्तं; तपसो- पातुं तापसायान्नं; मनसोपात्तं, (२)’तिथिप्रियः (४)स दृढ; सुदृढ’; सुधृत .

(०३)(सकलं (बलवत्); सर्वं हि (for रस- वत् ); (२)’र्दितः (for न्वितः );(३) क-ख-घ-अथानु, (४)स (for च );.

(०४) (चात्रं सर्वं, (२)तनुं (for ततः ); उच्छिष्टेनान्तरात्मना (३)अथाङ्गं लिलिपेन्नानि (पेङ्गानि; पेन्नेन); अथाङ्गानि लिपेत्तानि, (४)यथासुखं, यथागतमगाच्च सः.

आगम्य बुभुजे सर्वमन्नमुञ्छोपजीविनः ॥ १८ ॥ (०१)

निराहारस्तु स मुनिरुञ्छमार्जयते पुनः ।
न चैनं विक्रियां नेतुमशकन्मुद्गलं क्षुधा ॥ १९ ॥ (०२)

न क्रोधो न च मात्सर्यं नावमानो न सम्भ्रमः ।
सपुत्रदारमुञ्छं तमाविवेश द्विजोत्तमम् ॥ २० ॥

लक्षालङ्कारः - सपुत्रदारमुञ्छं तम् इत्यत्र उञ्छम् उञ्छवृत्तिमन्तम् ।

तथा तमुञ्छधर्माणं दुर्वासा मुनिसत्तमम्।
उपतस्थे यथाकालं षट्कृत्वः कृतनिश्चयः ॥ २१ ॥ (०३)

न चास्य मनसं कश्चिद्विकारं ददृशे मुनिः ।
शुद्धसत्त्वस्य शुद्ध स ददृशे निर्मल पुनः ।(०४)

तमुवाच ततः प्रीतः स मुनिर्मुद्गलं ततः ॥ २२ ॥ (०५)

लक्षालङ्कारः - मानसं मनस्सम्बन्धिनं विकारम् ।

## दुर्वासाः-

त्वत्समो नास्ति लोकेऽस्मिन्दातामात्सर्यवर्जितः ॥ २३ ॥

क्षुद्धर्मसञ्ज्ञां प्रणुदत्यादत्ते धैर्यमेव च ।
रसानुसारिणी जिह्वा कर्षत्येव रसान्प्रति ॥ २४ ॥ (०६)

---

(०१) (ततो (for एवं ); (३) पूर्व' सर्व; यथा (for पर्व' );, (३)आगत्य, (४)जीवनः.

(०२)(तु स, च (for तु ); (२)मर्जयते (३)चैवं, (४)दुर्बलं; मुद्गलः.

(०३) (२)सत्तमः (३)यथाकामं, (४)मुनिपुङ्गवः(for कृत' ); .

(०४)(मनसः कश्चिद्; मनसः कश्चिद्; मनसः किश्चिद्; मनसा कश्चिद्; , मानसः किचिद्, (२)विकारो दृश्यते मुनेः, (३) अ-घ-पकश्चदषार्धनि न सन्ति, सत्वं स (तु) शुद्धस्य; सदृशो; शुद्धान्तं; ददृशे (for शुद्धं स ); तु (for स ); सत्वशुद्धस्य शुद्धं हि ( तु ) (४)ददर्श, विशुद्धं (for ददृशे );.

(०५) (मुनिः (for ततः ); (२)तथा; ततः (for तदा );.

(०६) (प्रणुदन् (for प्रणुदति, ); (२) (आ)धत्ते; नादातुं , नादत्ते (for (आ)दत्ते ); वा (for च

**आहारप्रभवाः प्राणा मनो दुर्निग्रहं चलम्।**
**मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं निश्चितं तपः ।। २५ ।।** [०१]

**श्रमेणोपार्जितं त्यक्तुं न च दुःखेन चेतसा।**
**तत्सर्वं भवता साधो यथावदुपपादितम् ।। २६ ।।** [०२]

**लक्षालङ्कारः - मनसश्चेन्द्रियाणाम् इत्यत्र मनसः इन्द्रियाणां च दुःखं यथा भवति तथा श्रमेण उपार्जितं वित्तं युक्तेन वैराग्ययोगवता चेतसा त्यक्तुम् एकाग्रं मनः त्वया निश्चितमिति सम्बन्धः ।**

**प्रीताः स्मोऽनुगृहीताश्च समेत्य भवता सह ।**
**पावनं परमं मन्ये दर्शनं ते महामुने ।। २७ ।।** [०३]

**इन्द्रियाभिजयो धैर्यं संविभागो दमः शमः ।**[०४]

**दया सत्यं च धर्मश्च त्वयि सर्वं प्रतिष्ठितम् ।। २८ ।।** [०५]

**विशुद्धसत्त्वसम्पन्नो न त्वदन्योऽस्ति कश्चन।**
**जितास्ते कर्मभिर्लोकाः प्राप्तोऽसि परमां गतिम् ।। २९ ।।**

**सद्भिः समागमो नित्यं सर्वपापहरः स्मृतः ।;**

After Menction by. in TRK 25 . लोकास्समस्ता धर्मेष धार्यन्ते सचराचराः ।
**धर्मोऽपि धार्यते येन धृतियुक्तत्वायात्मना।**

**अहो दानं विघुष्टं ते सुमहत्स्वर्गवासिभिः ।**

---

); यो दत्ते धर्ममास्थितः (३)रसानुसारिणी विषयास्वादिनी, (४)कर्षत्यय; कर्षते च; कर्षत्येनं (for कर्षत्येव ); रसं कस्मात्त्वां न प्रबाधते; क्षरत्येव रसं प्रति.

(०१) (आहारं; आहारः (for आहार- ); (३)वा (for च ); (४) ( अ)प्येकाग्रं; निग्रहं; , एकाग्रं (for ( अ ) प्यैकाग्रं ); निष्ठितं; , श्चलं (for श्चितं );.

(०२) (त्यक्तं; दत्तं, (२)दुःखे, तेजसा (for चेतसा );न च दुःखेन चेतसा; दुःख ( खं ) युक्तेन चे।.

(०३)

(०४)(स्म (for च ); प्रीतोस्म्यनुग्य्हीतश्च ( ’तोस्मि ), (२)सत्येन (for समेत्य ); समेत्य भरतर्षभ.

(०५)(दयालुत्वं; तथा सत्यं; , दयार्थत्वं (for दया सत्यं ’);(२)सत्यं (for सर्वं );.

सशरीरो भवान्गन्ता स्वर्गं सुचरितव्रत ॥ ३० ॥ [०१]

**वैशम्पायनः-**

इत्येवं वदतस्तस्य तदा दुर्वाससो मुनेः ।
देवदूतो विमानेन मुद्गलं प्रत्युपस्थितः ॥ ३१ ॥ [०२]

हंससारसयुक्तेन किङ्किणीजालमालिना।
कामगेन विचित्रेण दिव्यगन्धवता तथा।[०३]

उवाच चैनं विप्रर्षिं विमानं कर्मभिर्जितम् ॥ ३२ ॥

**देवदूतः-**

समुपारोह संसिद्धिं प्राप्तोऽसि परमां मुने।[०४]

**वैशम्पायलः-**

तमेवंवादिनमृषिर्देवदूतमुवाच ह ॥ ३३ ॥

**मुद्गलः-**

इच्छामि भवता प्रोक्तान्गुणान्स्वर्गनिवासिनाम् ॥ ३४ ॥ [०५]

के गुणास्तत्र वसतां कि तपः कश्च निश्चयः ।
स्वर्गे तत्र सुखं किं च दोषो वा देवदूतक ॥ ३५ ॥ [०६]

सतां साप्तपदं मैत्रमाहुः सन्तः कुलोचितः ।

---

(०१)(विसङ्कुष्टं; विशिष्टं ते, (२)कामकृत्स्वर्गवासिनः (४)व्रतः.
(०२)(४)समुपास्थितः; प्रत्यपद्यत; प्रत्यभाषत.
(०३) (२)शोभिना; नादिना, (३)विमानेन (for विचित्रेण ); (४)तदा (for तथा ); .
(०४)(विप्रर्षे; विप्रर्षिर्, (२)कर्मनिर्जि ('र्मि) तं, (३)त्वमु' (for 'समु' ); (४)गीत (for मुने ); सम्प्राप्तोसि परां मुने.
(०५) (३)भगवत् (for भवता ); (४)वासिनं; वासिन;.
(०६)(३)तत्र सुखं; स्वर्गफलं, किञ्चिद्; किं स्विद्; , किं तु; किं नु (for किं च ); (४)दोषा दूत के.

**मित्रतां च पुरस्कृत्य पृच्छामि त्वामहं विभो ।। ३६ ।।** (०१)

**लक्षालङ्कारः - सतां सप्तपदम् इत्यत्र सप्त पदानि अभ्युत्थानपदानि प्रियवाक्य- पदानि वा यस्य तम् ।**

**यदत्र तथ्यं पथ्यं च तद्ब्रवीह्यविचारयन्।**
**श्रुत्वा तथा करिष्यामि व्यवसायं गिरा तव ।। ३७ ।।** (०२)

अस्मिन् पर्वणि २१६अध्याये ३७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि व्रीहिद्रौणिकपर्वणि मुद्गलोपाख्याने षोडशाधिकद्विशततमोऽध्यायः ।। २१६ ।।

# २१७. सप्तदशाधिकद्विशततमोऽध्यायः

**देवदूतात्स्वर्गसुशस्यस्थिररतां परिजानता मुदूगलेन स्वर्गानभिरोचनपूर्वकं देवदूतस्य स्वर्ग प्रति प्रस्थापनम् ।। १ ।। व्यासेन युधिष्ठिरं प्रति मुदूकलोपाख्यानकथनपूर्वकं स्वाश्रमं प्रति गमनम् ।। २ ।। देवदूतमुखेन गुणदोषवतः स्वर्गस्य निर्दोषस्य विष्णुधाम्नश्च वर्णनमाकर्ण्य मुद्गलकृतं सविमानस्य देवदूतस्य विनिवर्तनं युधिष्ठिरं बोधयित्वा व्यासस्य स्वाश्रमं प्रति गमनं च**

---

(०१)(साप्तपदं, मैत्रम्, (२)प्राहुः कुलोदिताः; द्वहाः द्रताः, (३)तु (for च ); (४)विभो ह्यहं; अहं प्रभो.
(०२) (तथ्यं पथ्यं, तत्र (for तथ्यं ); यत् (for च ); (२)तत्त्वं ब्रूहि; तद्रकहि त्वं; प्रब्रवीहि (for तद्ब्रवीहि ); महामते; विचारयन् (for (अ) विचारयन् ); (३)तदा (for तथा ); (४)गिरां; गिरं, .

## देवदूतः

महर्षे आर्यबुद्धिस्त्वं यः स्वर्गसुखमुत्तमम्।
सम्प्राप्तं बहु मन्तव्यं विमृशस्यबुधो यथा ॥ १ ॥ (०१)

नन्दनादीनि रम्याणि तत्रोद्यानानि मुद्गल ।
सर्वकामफलैर्वृक्षः शोभितानि समन्ततः ।

उपरिष्टाच्च स्वर्लो(दसौ)को योऽयं स्वरिति सञ्ज्ञितः।
ऊर्ध्वगः सत्पथः शश्वद्देवयानचरो मुने ॥ २ ॥

नातप्ततपसः पुंसो नामहायज्ञयाजिनः।
नानृता नास्तिकाश्चैव तत्र गच्छन्ति मुद्गल ॥ ३ ॥ (०२)

धर्मात्मानो जितात्मानः शान्ता दान्ता विमत्सराः।
दानधर्मरताः(ता) पुंसः(मर्त्याः) शूराश्चाहवलक्षणाः ॥ ४ ॥ (०३)

तत्र गच्छन्ति धर्माग्र्यं कृत्वा शमदमात्मकम्।
लोकान्पुण्यकृतां ब्रह्मन्सद्भिराचरितान्नृभिः ॥ ५ ॥ (०४)

देवाः साध्यास्तथा विश्वे तथैव च महर्षयः।

---

(०१) (आर्यबुद्धि पात्रमुरध्य; ()कल्यबुद्धि, (२)यत् (for यः-); (३)प्तं प्रतिपत्त( वक्त )ण्यं, (४)विमृष; विमृष्य; विमृक्ष्य; विमृज्य, (च स्वर्; अयं (for असौ ); (२)सञ्ज्ञकः; शब्दितः (for सञ्ज्ञितः ); यः स्वर्ग इति सञ्ज्ञितः.

(०२)(चैव; धैर्य; चर्या; पुंसा; मर्त्या (for पुंसो ); (२)याचकाः (for याजिनः ); (३)नादृता, स्तेनास् (for चैव );.

(०३)(हि पुरुषाः; महात्मानः (for जिता ); (२)जितेन्द्रियाः (for विमत्सराः ); (३)पराः(for रताः' ); प्रज्ञाः; यज्ञा प्राज्ञा मर्त्याः; नित्य (for पुंसः ); (४)शूरास्तेजोमयाः शुभाः; शूराश्चाहवलक्षणाः; श्चाहितल.

(०४) (ते कर्म; धर्माग्र्य; कृत्वाग्रयं; धामाग्रं (for कर्माग्र्य ); (२)शम- दमादिकं; दमशमात्मकं, (३) पुण्यकृतान्; तमान्, (४)चरितात्मभिः चरिलाङ्गुभिः सेवितात्मभिः; चरितं नृप.

**यामा धामाश्च मौद्गल्य गन्धर्वाप्सरसस्तथा ।। ६ ।।** [०१]

**देवानामपि मौद्गल्य काङ्क्षिता सा परा गतिः ।**

**न दुःखमसुखं चापि रागद्वेषौ कुतो मुने ।**

एषां देवनिकायानां पृथक्पृथगनेकशः ।
**भास्वन्तः कामसम्पन्ना लोकास्तेजोमयाः शुभाः ।। ७ ।।** [०२]

त्रयस्त्रिंशत्सहस्राणि योजनानि हिरण्मयः ।
**मेरुः पर्वतराड्यत्र देवोद्यानानि मुद्गल ।। ८ ।।** [०३]

नन्दनादीनि पुण्यानि विहाराः पुण्यकर्मणाम्।
**न क्षुत्पिपासे न ग्लानिर्न शीतोष्णे भयं तथा ।। ९ ।।** [०४]

**नन्दनान्यतिरम्याणि तत्रोद्यानानि मुद्गल । ****

**सर्वकायफलैर्वृक्षैः शोभितानि समन्ततः ।**

बीभत्समशुभं वापि तत्र किञ्चिन्न विद्यते।
**मनोज्ञाः सर्वतो गन्धाः सुखस्पर्शाश्च सर्वशः ।। १० ।।** [०५]

शब्दाः श्रुतिमनोग्राह्याः सर्वतस्तत्र वै मुने।

---

(०१)(२)महर्षयः; सहर्षिभिः तथैव च महर्षयः (३)यामायामाश्च यमो धाता च; यामा वामाश्च, सौकुल्य (for मौद्गल्य );.

(०२) (एवं; एतद्; येषां (for एषां ); एते देव- निकायास्ते - योजना नां (३)ततो वै; भ्राजन्तः (for भास्वन्तः ); (४)स्मृताः । (for शुभाः ); .

(०३) योजनानां योजनानि (३)अत्र; तत्र (for यत्र ); मेरुः पर्वतराजानं; मेरोः पर्वतराजस्य.

(०४)(चत्वारि (for पुण्यानि ); (२)विहारः, कर्मणः (३) न क्षुध्वष्णे न च ग्लानिर्, (४)शीतोष्णे; ष्णौ; ष्णं (for ष्ण ),

(०५) (अश्विगं; वाशुभं (for अशुभं ); चापि; चैव (for वापि ); (२)न च (for तत्र); तत्र किञ्चिन्न (for च न); विद्यते रोगो वा तत्र कश्चन, (३)सर्वशो (४)च सर्वतः; च मारुतः; समन्ततः; च वायवः (for च सर्वशः);.

न शोको न जरा तत्र नायासपरिदेवने ॥ ११ ॥ [०१]

ईदृशः स मुने लोकः स्वकर्मफलहेतुकः ।
सुकृतैस्तत्र पुरुषाः सम्भवन्त्यात्मकर्मभिः ॥ १२ ॥ [०२]

तैजसानि शरीराणि भवन्त्यत्रोपपद्यताम्।
कर्मजान्येव मौद्गल्य न मातृपितृजान्युत ॥ १३ ॥ [०३]

न संस्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव च ।
तेषां न च रजो वस्त्रं बाधते तत्र वै मुने ॥ १४ ॥ [०४]

न म्लायन्ति स्रजस्तेषां दिव्यगन्धा मनोरमाः ।
संयुज्यन्ते विमानैश्च ब्रह्मन्नेवंविधैश्च ते ॥ १५ ॥ [०५]

ईर्षा(ष्र्या)शोकक्लमापेता मोहमात्सर्यवर्जिताः ।
सुखं स्वर्गजितस्तत्र वर्तयन्ते महामुने ॥ १६ ॥ [०६]

तेषां तथाविधानां तु लोकानां मुनिपुङ्गवः ।
उपर्युपरि लोकस्य लोका दिव्या गुणान्विताः ॥ १७ ॥ [०७]

---

(०१) (गन्धाः (for शब्दाः ); शब्द श्रुतिमनोग्राह्यः, (२)श्रूयेते (for सर्वतस् ); नायासः परिदेवनं ( ने'; ना); नायासपरिवेदनं; परिदेवना,(३)अ-घ-सकप्तार्धानि न सन्ति.

(०२)(न ईर्ष्या तु (for ईदृशः स ); स मुनेर्; सुमनो- (for स मुने ); (२)सुकर्म; स्वधर्म, (३)पुरुषः, सुकृतस्तत्र पुरुषः, (४)सम्भवति; सञ्चरति, कर्मसु.

(०३) (तेजसानि (२)युज्यतां (for पद्मताम् ); (३)धर्म (for कर्म ); सौकुल्य (for मौद्ग' ); (४) (अ) तः; तु; च; (अ)पि (for (उ)त ); .

(०४) (वा (for च ); न स्वेदो न च दौ'; न संस्वेदो न दौ, (२)पुरीषो, वा (for च); (३)एषां,च न; , तु न जरा (for रजो ); (४)न बाधा (for बाधते ); बाधते नाधयो मुने; बाधते हि तपोधन.

(०५)(न ग्लायन्ति, म्लायन्ति न, सर्वा (for तेषां ); (३)पर्युज्यन्ते; प्रयुज्यन्ते; संयुज्य (ज्य )ते; पर्यटन्ति; सम् ( मु ) ह्येते, (४)ब्रह्मन्नेवंविधैश्; न्नैवंविधैश्, हि (for च ); ताः; ये (for ते );.

(०६) ('क्लमोपेता; मोहक्लमा; शोकसमो, (२)मद (४)वर्तयन्ते, मनोरमाः (for महा );.

(०७)(तेषां तथा विमानानां (३)लोकस्य (for शक्र ); (४)लोका दिव्या गुणा; लोको 'न्वितः; दिव्यो लोकगुणान्वितः.

परस्ताद्ब्राह्मणास्तत्र लोकास्तेजोमयाः शुभाः ।
यत्र यान्त्यृषयो ब्रह्मन्पूताः स्वैः कर्मभिः शुभैः ।। १८ ।।(०१)

ऋभवो नाम तत्रान्ये देवानामपि देवताः ।
तेषां लोकात्परतरे यान्यजन्तीह देवताः ।। १९ ।। (०२)

स्वयम्प्रभास्ते भास्वन्तो लोकाः कामदुघाः परे।
न तेषां स्त्रीकृतस्तापो न लोकैश्वर्यमत्सरः ।। २० ।। (०३)

न वर्तयन्त्याहुतिभिस्ते नाप्यमृतभोजनाः ।
तथा दिव्यशरीरास्ते न च विग्रहमूर्तयः ।। २१ ।। (०४)

न सुखे सुखकामास्ते देवदेवाः सनातनाः ।
न कल्पपरिवर्तेषु परिवर्तन्ति ते तथा ।। २२ ।। (०५)

जरा मृत्युः कुतस्तेषां हर्षः प्रीतिः सुखं न च ।
न दुःखं न सुखं चापि रागद्वेषौ कुतो मुने ।। २३ ।। (०६)

देवानामपि मौद्गल्य काङ्क्षिता सा गतिः परा।

---

(०१)(परितो; परस्ताद्; परतो (for पुरस्ताद् ); ब्राह्मण, तस्य (for तत्र ); (२)लोकस्तेजोमयः शुभः, (४)सुखैः (for शुभैः ); पूताः स्वैः स्वैस्तु कर्मभिः’.

(०२)(ऋषयो मानवा (for ऋभवो ); लोकः लोकात, परतरम्, (४)क्षरन्तीह; जयतीह .

(०३)(वा (for ते); भासन्तो, (२)कामदुहः (३)श्री (for स्त्री ); (४)लोकैश्वर्यमत्सरा; भोगैः ( लोभै ) श्वर्यमत्सरः.

(०४) (ते (for न ); वर्तयन्त्याहुतिभिस्ते; न वर्तयन्त्याहुतिस्ते (२)ते न वा; न च च; न चापि (for ते नापि ); भोजिनः ते नानामृतभो- जिनः, (४)रूपिणः (for मूर्तयः );.

(०५) (निमेषाः; नासुखाः; नासुखे (for न सुखे ); ते (for च); न च सुखे सुखकामा, (३)न कल्पे परिवर्तेत; न कल्पपरिवृत्तेषु; ने वर्तन्ते.

(०६)( ख-रागद्वेषो कुतो मुनेमध्ये अर्धं नास्ति, जरामृत्यु; जरामृत्यू, (२)तथैव; सुखानि (for सुखं न ); हर्षः (र्ष र्ष) प्रीतिसुखं न च; हर्षः प्रीति कथञ्चन; हर्षः (र्ष) प्रीतिसुस्वानि च, (३)च दुःखं (for दुःखं न ); असुखं; वासुखं (for न सुखं ); चास्ति; वापि (for चापि ); दुःखं वाप्यसुखं वापि.

दुष्प्रापा परमा सिद्धिरगम्या कामगोचरैः ।। २४ ।। (०१)

त्रयस्त्रिंशदिमे देवा येषां लोका मनीषिभिः ।
गम्यन्ते नियमैः श्रेष्ठैर्दानैर्वा विधिपूर्वकैः ।। २५ ।। (०२)

सेयं दानकृता व्युष्टिरनुप्राप्ता सुखं त्वया।
तां भुङ्क्ष्व सुकृतैर्लब्धां तपसा द्योतितप्रभः ।। २६ ।। (०३)

एतत्स्वर्गसुखं विप्र लोका नानाविधास्तथा।
गुणाः स्वर्गस्य प्रोक्तास्ते दोषानपि निबोध मे ।। २७ ।। (०४)

कृतस्य कर्मणस्तत्र भुज्यते यत्फलं दिवि।
न चान्यत्क्रियते कर्म मूलच्छेदेन भुज्यते ।। २८ ।। (०५)

सोऽत्र दोषो मम मतस्तस्यान्ते पतनं च यत्।
सुखव्याप्तमनस्कानां पतनं यच्च मुद्गल ।। २९ ।। (०६)

असन्तोषः परीतापो दृष्ट्वा दीप्ततराः श्रियः ।
यद्भवत्यवरे स्थाने स्थितानां तत्सुदुष्करम् ।। ३० ।। (०७)

---

(०१) (२)पुरा (for परा ); (३)पुष्पोपमा परा सिद्धिर्, (४)अकान्या का,.

(०२)(अमी (for इमे ); देवाः ( भावाः) (for लोकाः); (२)येषां ( तेषां) (for शेषा ); (३)नियतैद् दान्तैद्; शीतैर् (for श्रेष्ठैर् ); (४)दान्तै (for दानै ); वृद्धि (for विधि );.

(०३)(सेयं दानवतां वीर (२)त्वया; अनु' (for अत्र ); त्वया प्राप्ता ह्यनुत्तमा; अनुप्राप्ता सुख त्वया, (३) प्रकृतैर्ता तां भुङ्क्ष्व सुकृतेनाद्य, .

(०४)(एवं (for एतत्); स्वर्गफलं, (३)ते प्रोक्ता चोक्तास्ते; भोग्यास्ते, उक्ता गुणास्ते स्वर्गस्य.

(०५)(तात; , तस्य (for तत्र ); (२)सृज्यते तत् (for यत्); यत्फलं भुज्यते दिवि, (४)मूलभेदेन; , सूत्रछेदेन.

(०६)(तत्र (for सोत्र ); (२)तस्याधः (for तस्यान्ते ); गमनं (for पतनं ); (४)सहसा (for पतनं ); यत्र; तच्च; यं च सहश्लाघश्च मुद्गल.

(०७)(असन्तोषपरीतापो ('पौ; नां ) (२)दीप्ततरां श्रियं; दीप्ताः परश्रियं; दीप्तां परश्रियं परगतां श्रियं, (३) तद् (for यद्); 'त्यमरस्थाने; त्वरम'; 'त्यधरे स्थाने; त्वपरे स्थाने; त्यातुले ज्ञाते; त्या (त्या)तुले स्थाने 'त्यातुरे स्थाने, (४)यच्च; तत्सु चेन्न (for तच्च); दुःखदं; , दुष्कृतं; दुष्षहं (for दुष्करम् );.

सञ्ज्ञामोहश्च पततां रजसा च प्रधर्षणम्।
प्रम्लानेषु च माल्येषु ततः पिपतिषोर्भयम् ।। ३१ ।। (०१)

आब्रह्मभवनादेते दोषा मौद्गल्य दारुणाः ।
नाकलोके सुकृतिनां गुणास्त्वयुतशो नृणाम् ।। ३२ ।। (०२)

अयं त्वन्यो गुणः श्रेष्ठश्च्युतानां स्वर्गतो मुने।
शुभानुशययोगेन मनुष्येषूपजायते ।। ३३ ।। (०३)

तत्रापि स महाभागः सुखभागभिजायते।
न चेत्सम्बुध्यते तत्र गच्छत्यधमतां ततः ।। ३४ ।। (०४)

तत्र गत्वा निवर्तन्ते न बुधा योगिनस्तथा ।

इह यत्क्रियते कर्म तत्परत्रोपभुज्यते।
कर्मभूमिरियं ब्रह्मन्फलभूमिरसौ मता ।। ३५ ।। (०५)

एतत्ते सर्वमाख्यातं यन्मां पृच्छसि मुद्गल।
तवानुकम्पया साधो साधु गच्छाम माचिरम् ।। ३६ ।। (०६)

**व्यासः**

---

(०१)('मोहाश्च (२)स्रं (for च ); (३)अम्ला; प्रमादेषु (for प्रम्ला ); तु; , हि (for च ); मानेषु; पुष्ये' (for मत्त्यें ); (४)तस्मात् (for ततः ); प्रपतितोर्; पिबतिषोर् भृशं; शयं (for भयम्); तस्माच्च पततो भयं.
(०२) (भुवनाद्, (२)मौकुल्य, (३)नाक(देव) लोकेषु कृ; नागः(देव) लोके सु, (४)मिताः; मताः (for नृणाम् );.
(०३)(अन्यस्त्वयं (for अयं त्वन्यो ); त्वल्पो गुणः; त्वन्यो गुण-; तुल्यो गुण-(for त्वन्यो गुणः ); (२)सर्व (for स्वर्ग ); गुणैः (for मुने); (३)सु (दुः )खानु, (४) मानुषेषु प्र, (ए)व (for (उ)प- );.
(०४)(सुमहा- भाग; स महाभागः ( ग ) (२)आपि (for अभि- ); सुखभो( भा )गी हि जायते; कुले महति जा (३)स; , सु- (for सं- ); (४)प्राप्तो- धमतां ततः गच्छत्ययमतन्द्रितः.
(०५)(लोके (for कर्म ); (२) (उ)पयुज्यते, (४)असौ परा; अतो परा; , तु स स्मृतः भोगभूमिरसौ स्मृता.
(०६)(२)यन्मां त्वं परिपृच्छसि; , यन्मा पृच्छति मुद्गल, (४)तत्र (for साधु ); गच्छामि; व.

एतच्छ्रुत्वा तु मौद्गल्यो वाक्यं विममृशे धिया।
विमृश्य च मुनिश्रेष्ठो देवदूतमुवाच ह ।। ३७ ।।[०१]

देवदूत नमस्तेऽस्तु गच्छ तात यथासुखम्।
महादोषेण मे कार्यं न स्वर्गेण सुखेन वा ।। ३८ ।।

पतनान्ते महद्दुःखं परितापः सुदारुणः ।
स्वर्गभाजश्चरन्तीह तस्मात्स्वर्गं न कामये ।। ३९ ।।[०२]

यत्र गत्वा न शोचन्ति न व्यथन्ति चलन्ति वा।
तदहं स्थानमत्यन्तं मार्गयिष्यामि केवलम् ।। ४० ।।[०३]

(११९३) अधिकपाठः - मुद्गलः

महान्त एते दोषास्तु त्वया(स्तु अमी दोषास्त्वया)

स्वर्गस्य कीर्तिताः ।

निर्दोष एव यस्त्वन्यो लोकं तं प्रवदस्व मे।

देवदूतः

ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदम्।

शुद्धं सनातनं ज्योतिः परं ब्रह्मेति यं(यद्) विदुः ।

---

(०१) श्रीव्यासः (for व्यास उ );(१)(एवमुक्तस्; (for एतच्छ्रुत्वा ) ; च (for तु ); (२)विममृषे; विमृशते; स विमृशद्; सोवि (प) मृशद्, (३)विमृष्य च; , विमृशन्त; विमृष्यन्त मौद्गल्यः- मुनिः, (३) महादोषेन, वाक्यं (for कार्यं); (४)स्वर्गे न, च (for वा );.

(०२) (पतनान्तं; नान्ते; तां तन्; तु ’ तां तु (for नं तन् ); महादुःखं, (२)परितापं; पततोपि, सुदारुणं, (३) (अ)श्रु वन्ति; चरन्ति; भवन्ति; पतन्ति; स्रवन्ति (for च्यवन्ति );.

(०३) (२)ह्यथन्ते, च (for वा );न च्यवन्ति पतन्त्वितः (’ त्युत ); (३)ततोहं, अव्यग्रं’; अन्यत्तन् (for अत्यन्तं ); (४)जन; अर्ज (for मार्ग ); माचिरं (for केवलम् );.

न तत्र विप्र गच्छन्ति पुरुषा विषयात्मकाः ।
दम्भलोभमहाक्रोधमोहद्रोहैरभिद्रुताः ।
निर्ममा निरहङ्कारा निर्द्वन्द्वाः संयतेन्द्रियाः ।
ध्यानयोगपराश्चैव तत्र गच्छन्ति मानवाः ।

**व्यासः-**

इत्युक्त्वा स मुनिर्वाक्यं देवदूतं विसृज्य तम्।
शिलोञ्छवृत्तिर्धर्मात्मा शममातिष्ठदुत्तमम् ।। ४१ ।। [०१]

तुल्यनिन्दास्तुतिर्भूत्वा समलोष्टाश्मकाञ्चनः ।
ज्ञानयोगेन शुद्धेन ध्याननित्यो बभूव ह ।। ४२ ।। [०२]

निगृहीतेन्द्रियग्रामः समयोजयदात्मनि।
युक्तचिन्तं यथात्मानं ययोज परमेश्वरे।

ध्यानयोगाद्बलं लब्ध्वा प्राप्य बुद्धिमनुत्तमाम्।
जगाम शाश्वतीं सिद्धिं परां निर्वाणलक्षणाम् ।। ४३ ।। [०३]

तस्मात्त्वमपि कौन्तेय न शोकं कर्तुमर्हसि।
राज्यात्स्फीतात्परिभ्रष्टस्तपसा तदवाप्स्यसि ।। ४४ ।। [०४]

सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्।

---

(०१) व्यास उ (एवमुक्त्वा (for इत्युक्त्वा स); (२)विसर्ज्य, च; वै (for तम् ); (३)वृत्ति- धैर्मात्मा .
(०२) (३)ज्ञानशुद्धेन योगेन - (४)ज्ञान- नित्यो, .
(०३)(ध्यानयोगे फलं; वरं (for बलं ); योगबलं लब्ध्वा; योगे मनो बध्वा; ज्ञानयोगफलं लब्ध्वा (२)वृद्धिम्; बुद्धिम्; ऋद्धिम् (for चर्द्धिम् ); च उत्तमां (for अनुं ); (३)वृद्धि; ऋद्धि (for सिद्धि ); (४)निर्वेद (for निर्वाण );.
(०४) (३)राज्यस्यातात्; राज्या- त्सिथारात्.

पर्यायेणोपसर्पन्ते नरं नेमिमरा इव ।। ४५ ।। (०१)

पितृपैतामहं राज्यं प्राप्स्यस्यमितविक्रम।
वर्षात्त्रयोदशादूर्ध्वं व्येतु ते मानसो ज्वरः ।। ४६ ।। (०२)

**वैशम्पायनः**

स एवमुक्त्वा भगवान्व्यासः पाण्डवनन्दनम्।
जगाम तपसे धीमान्पुनरेवाश्रमं प्रति ।। ४७ ।।(०३)

अस्मिन् पर्वणि २१७अध्याये ४७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि व्रीहिद्रौणिकपर्वणि मुद्गलदेवदूतसंवादे सप्तदशाधिकद्विशततमोऽध्यायः ।। २१७ ।।

(समाप्तं व्रीहीद्रौणिकपर्व)

# द्रौपदीहरणपर्व

महाभारततात्पर्यनिर्णये २२ अध्याये

ततः कतिपयाहानि निरुष्यात्र जनार्दनः ।

ययौ सभार्यः स्वपुरीं पाण्डवाननुमान्य च ।। ३६२ ।।

ततः कदाचिन्मृगयां गतेषु पार्थेषु राजा सैन्धव आससाद ।

---

(०१) (३)'णोपवर्तेत (ते) णैव वर्तन्ते; 'णोपसर्पन्ति (ते); 'णोपगच्छन्ते (ति); 'णानुवर्तन्ते, (४)नरं नेमिचरा; नरं नेमिपरा; रथं नेमिनरा; नरा नेमिचरा ( गता; मरा); नरान्नेवमरा,.
(०२)(२)लप्स्यसे; प्राप्स्यसे .
(०३) (स एव- मुक्त्वा तु (for स ); (२)व्यास सत्यवतीसुतः.

सकोटिकाश्यः सबलश्च तेषां वराश्रमं सोऽत्र ददर्श कृष्णाम् ।। ३६३ ।।
व्रजन् विवाहार्थमसौ निशाम्य कृष्णां कोटिं प्रेषयित्वैव काश्यम् ।
आयाहि मामित्यवदत् सुपापस्तया निरस्तो जगृहे करे च ।। ३६४ ।।
तया धूतो निपपाताऽशु भूमौ पुनस्ससञ्ज्ञोऽभ्यगमद् विलज्जः ।
ततोऽसहायत्वत एव कृष्णा धौम्यार्योक्त्वा साग्निरन्वेहि मेति ।
समारुहत् सैन्धवस्यैव यानं सुखं न यासीति तमीरयित्वा ।। ३६५ ।।
तदा निमित्तानि निशाम्य पार्थाः समाययुस्त्वरयैवाऽश्रमाय ।
श्रुत्वा दासीवचनात् सर्वमेव चक्रुः क्षिप्रं सैन्धवस्यानुयानम् ।। ३६६ ।।
आक्रोशमानं भीमसेनेति धौम्यं दृष्ट्वा तस्याग्रे सैन्धवं चातिपापम् ।
चक्रुर्नादान् सिंहवत् पाण्डुपुत्रा दृष्ट्वा कृष्णा चावतरद् रथात् तदा ।
धौम्येन सार्द्धं सा ययौ चाऽश्रमाय सैन्यं पार्थास्तत्र निजघ्नुरोजसा ।। ३६७ ।।
अग्रे कृष्णां योऽवदत् सिन्धुराजं याहीति तं कोटिकाश्यं सुपापम् ।
छित्वा शिरो मृत्यवे भीमसेनो निवेदयामास तमः स चागात् ।। ३६८ ।।
हत्वा सेनामखिलां सैन्धवस्य भीमार्जुनौ सयमं धर्मराजम् ।
विसृज्य धावन्तमथानुजग्मतुर्जयद्रथं विरथं फल्गुनोऽकः ।। ३६९ ।।
पद्भं धावन्तं भीमसेनो निगृह्य दत्वा प्रहारांश्च भृशं तमार्तम् ।
आदायाधाद् द्रौपदीपादयोश्च तं मोचयामास च धर्मसूनुः ।। ३७० ।।
दासो द्रौपद्या अहमित्येव वाक्ये तेनैवोक्ते भीमसेनोऽप्यमुञ्चत् ।
स व्रीडितोऽवाग्वदनो ययौ वनं पार्थाश्च तत्रोषुरतिप्रमोदिनः ।। ३७१ ।।
जयद्रथस्तु भीमेन तदा पञ्चशिखीकृतः ।
तपसा शिवमारध्य वव्रे पाण्डवरोधनम् ।
ऋतेऽर्जुनादर्जुनस्य तुष्टो हि तपसा शिवः ।। ३७६ ।।

# २१८. अष्टादशाधिकद्विशततमोऽध्यायः

पञ्चस्वपि पाण्डवेषु मृगयार्थं गतेषु सपरिजनेन सैन्धवेन मार्गवशात्तदाश्रमाभिगमनम् ।। १ ।। तत्र द्रौपदीदर्शनक्षुभितहृदा जयद्रथेन तत्तत्वजिज्ञासया तन्निकटं प्रति कोटिकाश्यस्य प्रेषणम् ।। २ ।।

**वैशम्पायनः**

तस्मिन्बहुमृगेऽरण्ये अटमाना महारथाः।
काम्यके भरतश्रेष्ठा विजह्रुस्ते यथामराः ।। १ ।।[०१]

प्रेक्षमाणा बहुविधान्वनोद्देशान्समन्ततः।
यथर्तुकालरम्याश्च वनराजीः सुपुष्पिताः ।। २ ।।[०२]

पाण्डवा मृगयाशीलाश्चरन्तस्तन्महद्वनम्।
विजह्रुरिन्द्रप्रतिमाः कञ्चित्कालमरिन्दम ।। ३ ।।[०३]

ततस्ते यौगपद्येन ययुः सर्वे चतुर्दशिम्।
मृगयां पुरुषव्याघ्रा ब्राह्मणार्थे पनन्तपाः ।। ४ ।।[०४]

द्रौपदीमाश्रमे न्यस्य तृणबिन्दोरनुज्ञया।

---

(०१)( रम्ये (for ऽरण्ये ), अटमाना; वसमाना (for रममाणा ), महाबलाः, (३) भरतश्रेष्ठ. यथा सुराः (for मराः), महात्मानो महाबलाः.
(०२)( प्रेक्ष्य''; वक्षि ( प्रेक्ष ), (२) मुदा युताः (for समन्ततः), (३) अथर्तु'; सर्वतु (for यथर्तु),
(०३)(२) च (for तन् ), महद्वनं (वनं महत्); महावने.(४)क-दृप्त घ-कालदृप्त ख-कश्चित्कालं, किञ्चित्; क्वचित. अरिन्दम कालशेषमीरदमाः .
(०४)(४);ययुः प्रतिदिशो नृप.

**महर्षेर्दीप्ततपसो धौम्यस्य च पुरोधसः ।। ५ ।।** (०१)

ततस्तु राजा सिन्धूनां वार्द्धक्षत्रिर्महायशाः।
**विवाहकामः शाल्वेयान्प्रयातः सोऽभवत्तदा ।। ६ ।।** (०२)

महता परिबर्हेण राजयोग्येन संवृतः।
**राजभिर्बहुभिः सार्धमुपायात्काम्यकं च सः ।। ७ ।।** (०३)

तत्रापश्यत्प्रियां भार्यां पाण्डवानां यशस्विनीम्।
**तिष्ठन्तीमाश्रमद्वारि द्रौपदीं निर्जने वने ।। ८ ।।** (०४)

विभ्राजमानां वपुषा बिभ्रतीं रूपमुत्तमम्।
**भ्राजयन्तीं वनोद्देशं नीलाभ्रमिव विद्युतम् ।। ९ ।।** (०५)

अप्सरा देवकन्या वा माया वा देवनिर्मिता।
**इति कृत्वाञ्जलिं सर्वे ददृशुस्तामनिन्दिताम् ।। १० ।।** (०६)

ततः स राजा सिन्धूनां वार्द्धक्षत्रिर्जयद्रथः।
**विस्मितस्त्वनवद्याङ्गीं दृष्ट्वा तां दुष्टमानसः।** (०७)
**स कोटिकास्यं राजानमब्रवीत्काममोहितः** ।। ११ ।।**

**जयद्रथः-**

---

(०१)( ३४ ) महर्षि दीप्ततपसं धौम्यं चापि पुरोहितं ( नृप पुरोधसं; चैव पुरोहितं; चापि पुरोधसं),
(०२)( च; स (for तु), सिंहानां (for सिन्धु), (२) वार्धक्षत्रो; वार्धक्षेमिर; वर्धक्षत्रिद्; महाबलः; जयद्रथः (३) कर्तुं विवाहं (for विवाह ), साल्वे; पार्थे (for शाल्वे'), (४) स्म; (अ)थ (for सः), भवत्तदा.
(०३) ( पारिबर्हेण, (२) सम्भृतः; संयुतः; (४) सरः सः; वनं (for च सः),
(०४)(२) मनस्विनीं; यशस्विनां.(३) द्वारे .
(०५)(२) बिभ्रती. कालम् (for रूपम्), अद्भुतं (for उत्तमम्),(३) भ्राजयन्ती. बिभ्राजतीं वनोद्देशे. राजयन्तीं (for भ्राज),
(०६)( देवकाया, (२) मायया (for माया वा), (३) (अं)जलीन्; (अं)जलीः; मतिं; (अं)जसा.
(०७) ( तु (for स) वार्धक्षत्रो; (२) वार्धक्षेमिद् (३) विस्मितस्त्वननिद्यागीं; विस्मितो ह्यनवद्याङ्गीं; विस्मितस्त्वनवद्यागीं; विष्ठितामनवद्याङ्गीं (४) दुष्ट-मानसः; दुष्टचेतनः (सः) दृष्ट्वा तां दुसंह ष्टमानसः.

कस्य त्वेषानवद्याङ्गी यदि वापि न मानुषी।(०१)
**विवाहार्थो न मे कश्चिदिमां प्राप्यातिसुन्दरीम् ।। १२ ।।(०२)**
**एतामेवाहमादाय गमिष्यामि स्वमालयम् ।। १३ ।।(०३)**

गच्छ जानीहि सौम्येमां कस्य वात्र कुतोऽपि वा।
**किमर्थमागता सुभ्रूरिदं कण्टकितं वनम् ।। १४ ।।(०४)**

अपि नाम वरारोहा मामेषा लोकसुन्दरी।
**भजेदद्यायतापाङ्गी सुदती तनुमध्यमा ।। १५ ।।(०५)**

अप्यहं कृतकामः स्यामिमां प्राप्य वरस्त्रियम्।
**गच्छ जानीहि को न्वस्या नाथ इत्येव कोटिक ।। १६ ।।(०६)**

स कोटिकास्यस्तच्छ्रुत्वा रथात्प्रस्कन्द्य कुण्डली।
**उपेत्य पप्रच्छ तदा क्रोष्टा व्याघ्रवधूमिव ।। १७ ।।(०७)**

अस्मिन् पर्वणि २१८अध्याये १७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि द्रौपदीहरणपर्वणि
जयद्रथागमने अष्टादशाधिकद्विशततमोऽध्यायः ।। २१८ ।।

---

(०१) ( कोटिकास्यं; श्व; स्व्यं; कैषा(for त्वेषा); ह्यनि द्याङ्गी(for (अ)नवद्याङ्गी) (३)यदि वा नाप्यमानुषी; देवा वा मानुषी यदि; .

(०२) ( विवाहेच्छा (for हार्थो); काचिद् (२) प्राप्य (for दृष्ट्वा); तु सुन्दरीं;.

(०३)( अ-क-घ-पश्चार्धानि न सन्ति, तिमानुषीं (३) एनाम् (for एताम्); (२) सुरालयं;.

(०४)( सौम्य तां; सौरय्य; सौम्यैतां (२) वापि; वा नु; वाथ; वात्र; वा त्वं; का वा; का नु; कापि (for का च) (३) चागता (for आगता);.

(०५) (३); भजेत व्यायतापाङ्गी (गां) ; दद्यासितापाङ्गी (४) सुन्दरी (for सुदती) .

(०६)(१ /२) कोन्त्योस्या; को वास्या नाथः (४) सम्यग्विचारय; .व्याधूयमाना पवनेन सुभ्रूः

(०७)वैशं ( कोटिकाख्यं कास्यं (२) मैत्र्यात्प्रस्कन्द्य तद्रथात् सिंह (for व्याघ्रं),

# २१९. एकओलविंशत्यधिकद्विशततमो अध्यायः ।।

जयद्रचोदनया कोटिकाश्येन द्रौपदीं प्रति तत्प्रितृभतर्त्रृकुलादिप्रश्नः ।। द्रौपदीहरणपर्व कोटिकास्यस्य द्रौपदीं प्रति सानुगस्य जयद्रथस्य परिचयं दत्त्वा तस्याऽपि परिचयजिज्ञासा

**कोटिकः**

का त्वं कदम्बस्य विनाम्य शाखांमेकिमाश्रमे तिष्ठसि शोभमाना।
देदीप्यमानाग्निशिखेव नक्तं आचक्ष्व शीघ्रं वृजीनाग्रकेशि।। १ ।।(०१)

लक्षालङ्कारः - वृजिनाग्रकेशि इत्यत्र वृजिनं कौटिल्यम् ।

अतीव रूपेण समन्विता त्वं न चाप्यरण्येषु बिभेषि किं नु।
देवी नु यक्षी यदि दानवी वा वराप्सरा दैत्यवराङ्गना वा ।। २ ।। (०२)

वपुष्मती वोरगराजकन्या वनेचरी वा क्षणदाचलस्त्री।
यद्येव राज्ञो वरुणस्य पत्नी यमस्य सोमस्य धनेश्वरस्य ।। ३ ।। (०३)

धातुर्विधातुः सवितुर्विभोर्वा शक्रस्य वा त्वं सदनात्प्रपन्ना।
न ह्येव नः पृच्छसि ये वयं स्म न चापि जानीम तवेह नाथम् ।। ४ ।।

---

(०१)कोटिक उ; कोटिकास्य (रव्य) उं ( विनाम्य; नियम्यः (२) किमाश्रमे (for एका') (३) प्रदीप्यं (४) व्याधूं (for दोधूं); सुभ्रु; सुभ्रू आचक्ष्व शीघ्रं (तत्वं) व्रजिनाग्रकेशि (केशिनी);.

(०२)(२); बिभर्षि किं तु; का नु; देवि (३) च; तु; न (for नु); न च (for यदि); दानवीं स्वं; मानवी वा; मानुषी वा; वापि मानुषी; वा मनुष्याः.

(०३) ( च (for वा); नाग-कन्या; राजकक्तयका; कन्यका वा (for राजकन्या) (२) वनेचरा वनेचरी वा कुसुमा युधस्त्री (३) किं देव त्वं देव (for यद्येव);.

(०१)

वयं हि मानं तव वर्धयन्तः पृच्छाम भद्रे प्रभवं प्रभुं च ।
आचक्ष्व बन्धूंश्च पतिं कुलं च तत्त्वेन यच्चेह करोषि कार्यम् ।। ५ ।।

(०२)

अहं तु राज्ञः सुरथस्य पुत्रो यं कोटिकास्येति विदुर्मनुष्याः।
असौ तु यस्तिष्ठति काञ्चनाङ्गे रथे हुतोऽग्निश्चयने यथैव।
त्रिगर्तराजः कमलायताक्षि क्षेमङ्करो नाम स एष वीरः ।। ६ ।। [०३]

पश्येन्द्रियः सत्यरतिर्हहोरू वृद्धोपसेवी गुरुपूजकश्च ।

अस्मात्परस्त्वेष महाधनुष्मान्पुत्रः कुलिन्दाधिपतेर्वरिष्ठः।
निरीक्षते त्वां विपुलायताक्षः सुपुष्पितः पर्वतवासनित्यः ।। ८ ।।[०४]

सुविस्मित पर्वतवासविद्रो न चापि जानीम तवेह नाथम्

असौ तु यः पुष्करिणीसमीपे श्यामो युवा तिष्ठति दर्शनीयः।
इक्ष्वाकुराज्ञः सुबलस्य पुत्रः स एव हन्ता द्विषतां सुगात्रि ।। ९ ।।[०५]

---

(०१) ( प्रभोर्वा; प्रभा वा (for विभोर्वा); (३) चैव (for ह्येव) सं (for नः) के (for ये) (४) वयं न (for न चापि) जाता कुले कस्य हि चन्द्रवक्; .

(०२) (२); भवनं (for प्रभवं) पतिं; भुवं (for प्रभुं); (३) पतिं कुलं (४) यच्चेह; जातिं च; गतिं च; ज्ञातिं च; ज्ञातींश्च (for तत्त्वेन); भद्रे प्र-; किं वाद्य; लोको हिं(for यच्चेह) .

(०३) ( हि; च (for तु); (२) मां (for यं); कोटिकास्येष्ठा (श्वे) ति; काख्येति; ’शश्चाति, (३); अथो नु (न) (for असौ तु) काञ्चनाङ्के (४) हुताग्निशू; नतोग्निशू चितोग्निशू स वने;(५) ’यताक्षः ममर्ष; स एव(for स एष),

(०४)( तस्मात्; अस्मत् पुरस्त्वेष (२) कुलिन्दां (३ ४) त्वा(for त्वां); पुलायताक्षः; कमलायताक्षि (क्षः) सुपुष्पितः; शुचिस्मितः; आविस्मितः; भुवि स्थितः; सुरस्मिते (for सुविस्मितः) वासमुरव्यः.

(०५) (३); राजः (for राज्ञः) सुभवस्य (for सुबलस्य); (४) एव (for एष); .

यस्यानुचक्रं ध्वजिनः प्रयान्ति सौवीरका द्वादश राजपुत्राः।
**शोणाश्वयुक्तेषु रथेषु सर्वे मखेषु दीप्ता इव हव्यवाहाः ।। १० ।।** (०१)

अङ्गारकः कुञ्जरो गुप्तकश्च शत्रुञ्जयः सञ्जयसुप्रवृद्धौ।
**भयङ्करोऽथ भ्रमरो रविश्च शूरः प्रतापः कुहनश्च नाम ।। ११ ।।** (०२)

यं षट्सहस्रा रथिनोऽनुयान्ति नागा हयाश्चैवपदातिनश्च।
**जयद्रथो नाम यदि श्रुतस्ते सौवीरराजः सुभगे स एषः ।। १२ ।।** (०३)

तस्यापरे भ्रातरोऽदीनसत्त्वा बलाहक अनीकविदारण आद्याः।
**सौवीरवीराः प्रवरा युवानो राजानमेते बलिनोऽनुयान्ति ।। १३ ।।**(०४)

एतैः सहायैरुपयाति राजा मरुद्गणैरिन्द्र इवाभिगुप्तः।
सा **जानती ख्यापयः सुकेशि कस्यासि भार्या दुहिता च कस्य ।। १४ ।।** (०५)

**लक्षालङ्कारः - सा जानती व्यापनयः सुकेशि इत्यत्र व्यापनयः ताल्वोष्ठपुटयोरप- सरणं कुरु व्यवहरेत्यर्थः ।**

अस्मिन् पर्वणि २१९अध्याये १४श्लोकाः सन्ति

---

(०१)( यस्यानुचक्रं; नुयात्रां; नुयात्र अनुयात्रा() (४) मध्येषु; कुण्डें(for मखें); तप्ता (for दीप्ता );.
(०२)( कुञ्जरो गुप्तकश्च; कुञ्जरगुप्तकठ;; गुप्तकौ च (२) शत्रुन्तपः पुत्रबुद्धौ; सुप्रबुद्धौ; सुप्रवृत्तौ; सम्प्रवृतौ; सप्रबुद्धौ; सुप्रसिद्धो (३) भ्रूभङ्गुरोथ; भयङ्करोथ प्रभां'; शुभं; भ्रमं भ्रमरोथ विश्वः (४) प्रतीपः; परागः; पतङ्गः (for प्रतापः) कुररश्च; सहश्च; कुहकं कुहनं नात्रा; नात्रः .
(०३) (२) चापि (for चैव); पदातयश्च; (३) यथा (for यदि); (४) सुभगः य (for स);.
(०४) ( अस्यापरे (२) कामित्र विदाः (चा); रणाद्याः; का भीरविचारणाद्याः (३) सुवीरं (४) याताः (for यान्ति);.
(०५)(२); इवावगुप्तः; इवार्तिं; इवानुयातः (३); सा जानती; न जानतां; साजानतां आख्याहि मे शीघ्र; सजानमख्यापय नः सुकेशि (४) (अ)सि; (अ)थ (for च); .

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि द्रौपदीहरणपर्वणि कोटिकास्यप्रश्ने एकोनविंशत्यधिकद्विशततमोऽध्यायः ।। २१९ ।।

# २२०. विंशत्यधिकद्विशततमो अध्यायः ।।

कोटिकाश्यं प्रति द्रौपद्या जननादिस्वीयवृत्तान्तकथनम् ।।

**वैशम्पायनः**

अथाब्रवीद्द्रौपदी राजपुत्री पृष्टा शिबीनां प्रवरेण तेन।
अवेक्ष्य मन्दं प्रविमुच्य शाखां सङ्गृह्णती कौशिकमुत्तरीयम् ।। १ ।। (०१)

बुद्ध्याभिजानामि नरेन्द्रपुत्र न मादृशी त्वामभिभाष्टुमर्हति।
न त्वेह वक्तास्ति तवेह वाक्यमन्ये नरो वाप्यथवापि नारी ।। २ ।। (०२)

एका ह्यहं सम्प्रति तेन वाचं ददामि वै भद्र निबोध चेदम्।
अहं ह्यरण्ये कथमेकमेका त्वामालपेयं निरता स्वधर्मे ।। ३ ।। (०३)

जानामि च त्वां सुरथस्य पुत्रं यं कोटिकास्येति विदुर्मनुष्याः।
तस्मादहं शैब्य तथैव तुभ्यमाख्यामि बन्धून्प्रथितं कुलं च ।। ४ ।।

---

(०१)( राजपुत्रं (for पुत्री) अथाब्रवीद्रा जपुत्री तदानीं (२) ऋषभेण (for प्रवरेण) (३) सर्वं (for मन्दं); शालां (for शाखां); (४) क-घ-सग्गृह्य सा, सङ्गृह्य सा; सङ्गृह्णती; .

(०२) ( बुद्ध्या विजानामि; शुद्धाभिजां; बुद्ध्याभिजानासि; अन्यापि जानामि; अद्याभिजानीहि (नामि) (२) अभिभाष्यमाना; अभिभाष्टुमर्हति अभिप्रष्टुमही; अभि-द्रष्टमही मादृशी त्वाद्दशैः (त्वद्विधैः) प्रष्टुमर्हा; (३) त्वेव (for त्वेह); न त्वेव वक्ता हि न मेद्य वाक्यं;.

(०३) (१ २); एकाप्यहं नैव (for तेन) वाक्यं वाचा (२) ददामि ते'; तद् (for वै); (३) अरण्ये (हि); त्वरण्ये (४) समां; त्वां वां; यामां (for त्वामां); नियता;.

(०१)

अपत्यमस्मि द्रुपदस्य राज्ञः कृष्णेति मां शैब्य विदुर्मनुष्याः।
साहं वृणे पञ्च जनान्पतित्वे ये खाण्डवप्रस्थगताः श्रुतास्ते ।। ५ ।।(०२)

युधिष्ठिरो भीमसेनार्जुनौ च माद्र्याश्च पुत्रौ पुरुषप्रवीरौ।
ते मां निवेश्येह दिशश्चतस्रो विभज्य पार्था मृगयां प्रयाताः ।। ६ ।।
(०३)

प्राचीं राजा दक्षिणां भीममेनो जयः प्रतीचीं यमजावुदीचीम्।
मन्ये तु तेषां रथसत्तमानां कालोऽवहु(भितः) प्राप्त इहोपयातुम् ।। ७ ।। (०४)

सम्मानिता यास्यथ तैर्यथेष्टं विमुच्य वाहानवरोहयध्वम्।
प्रियातिथिर्धर्मसुतो महात्मा प्रीतो भविष्यत्यभिवीक्ष्य युष्मान् ।। ८ ।।
(०५)

एतावदुक्त्वा द्रुपदात्मजा सा शैब्यात्मजं चन्द्रमुखी प्रतीता।
विवेश तां पर्णशालां प्रशस्तां सञ्चिन्त्य तेषामतिथित्वधर्म (मर्थे) ।। ९ ।। (०६)

---

(०१)( त्वा (for त्वां); (२) कास्यें; काश्वे; 'काख्यें'(for काश्यें); तुभ्यं हि सर्वम् (for तथैव);तथैव तुभ्यम्); (४) ते तान् (for तन्) आख्यामि बन्धून्प्रथितं कुलं च; अख्यामि बन्धुप्रतिमं निबोध; .

(०२) (२) ; मा (for मां); (३) वृता (for वृणे); पतीन्वै (for पतित्वे); .

(०३) ( भीमसेनोर्जुनश्च;.

(०४) ( भीमसेनोप्यवाचीं (for दक्षिणां भीं); (२) जिष्णुः (for जयः); च यमां (for यमजां); (४) कालोचितः; कालोतीतः; कालो बहु कालोभीतः प्रातरिहोपयातुं;.

(०५)( संमानिताश्चाप्यथ वा यथेष्टं; (२) अवरोह ('प)यध्वं; अवगाहयन्तु (४) सर्वान् (for युष्मान्);.

(०६) (२) प्रशस्ता (for प्रतीता); (३) पर्णशालां; पत्रकुटीं (४) अति-थिस्वधमं अतिथित्वमर्थे (for स्वधर्मम्) .

अस्मिन् पर्वणि २२०अध्याये ९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि द्रौपदीहरणपर्वणि द्रौपदीवाक्ये विंशखत्यधिकद्विशततमोऽध्यायः ।। २२० ।।

# २१. एकविंशत्यधिकद्विशततमो अध्यायः ।।

**कोटिकाश्याद्द्रौपदीतत्वं विदितवता जयद्रथेन द्रौपदीमेत्य स्वभार्यात्वयाचना ।।**

**वैशम्पायनः**

तथाऽऽसीनेषु सर्वेषु तेषु राजासु भारत।
कोटिकास्यो जगामाशु स्निग्धराज निवेशनम् ।। १ ।।[०१]

यदा वाचं व्याहरन्त्यामस्यां मे रमते मनः।
सीमन्तिनीनां मुख्यायां विनिवृत्तः कथं भवान् ।। २ ।।

यदुक्तं कृष्णया सार्धं तत्सर्वं प्रत्यवेदयत्।[०२][०३]
कोटिकाश्यो जगामाशु सिन्धुराजनिवेशनम् ।[०४]

एतां दृष्ट्वा स्त्रियो मेऽन्या यथा शाखामृगस्त्रियः।

---

(०१)( तथां (for अथां);(३) ख-कोटिकाश्यो जगामाशु सिन्धुराजनिवेशनम् ।.

(०२) वीर (for सार्ध); समवर्धयत्; कोटिकोब्रवित् (for प्रत्यं);.

(०३) वाक्यं यथार्य तच्छ्रुत्वा कोटिकाश्यमुखोद्गतम् ।.

(०४) (३); कास्यं; काख्यं; काश्वं, श्रेतुं (for श्वा); (४) सैब्यं;

( यदा वाचो; पाश्चालीति; यदुवाच (२) निरतं; नियतं (for रमते); (३) मुख्यानां; मुख्या सा; मुख्येयं (४) विनियुक्तः भवेत्; तदा; पुमान् (for भवान्); .

प्रतिभान्ति महाबाहो सत्यमेतद्ब्रवीमि ते ॥ ३ ॥ (०१)

दर्शनादेव हि मनस्तया मेऽपहृतं भृशम्।
तां समाचक्ष्व कल्याणीं यदि स्याच्छैब्य मानुषी ॥ ४ ॥ (०२)

**कोटिकः**

एषा वै द्रौपदी कृष्णा राजपुत्री यशास्विनी।
पञ्चानां पाण्डुपुत्राणां महिषी सम्मता भृशम् ॥ ५ ॥ (०३)

सर्वेषां चैव पार्थानां प्रिया बहुमता सती।
तया समेत्य सौवीर सौवीराभिमुखो व्राज ॥ ६ ॥ (०४)

**वैशम्पायनः**

एवमुक्तः प्रत्युवाच पश्यामि द्रौपदीमिति।
पतिः सौवीरसिन्धूनां दुष्टभावो जयद्रथः ॥ ७ ॥ (०५)

स प्रविश्याश्रमं पुण्यं सिंहगोष्ठं वृको यथा।
आत्मना सप्तमः कृष्णामिदं वचनमब्रवीत् ॥ ८ ॥ (०६)

**जयद्रथः-**

---

(०१) ( स्त्रिया; स्त्रियं (ऽ)प्यन्या; (ऽ)न्या मे; मन्ये; मेन्यां;.

(०२) (१ २)मनो यया; मनोनया (for मनस्तया); प्रसभं (for ऽपहृतं); बलात् (for भृशम्); (३) (for भृशम्); (३) तां ममाचक्ष्व; नाममाचक्ष्व (४) मानुषीं .

(०३) कोटिकास्य उं (उं); काश्वः; कोटिक उं; काख्य उं; शैब्यः (२) राजपत्नी तरं(for यशं) (४) महिषी संमता;.

(०४)( च (२)या वै प्रियतमा सती (३)यथा; तथा (for तया) सौवीरान् (४) सुवीरां;
सौवीरान्; प्रयाहि सुमुखीं; सुमुखी; सुकृती सौवीराभिमुखो व्रज; .

(०५) (२) ; पश्याम; पश्यामि; नापश्यं प्रति (for इति) (३) नृपः (for पतिः); सौवीर- सिहानां; सुवीरसिन्धूनां;.

(०६) ( तत् सं (for स); पुण्यं (for शून्यं); स प्रविश्याश्रमपदं (२) सिंहीगोष्ट सिंहपत्नीं; सिंहकोष्ठं; सिंहकोष्ठ मृगो (for वृको); (३) आत्मनः मुदितः (for सप्तमः) आत्म नाभिमुखः कृष्णाम्; आत्मना सप्तदशमः (४) कृष्णां (for इदं); इदमित्यब्रवीद्वचः; अथोवाच हसन्निव (महीपते);.

कुशलं ते वहारोहे भर्तारस्तेऽप्यनामयाः।
येषां कुशलकामासि तेऽपि कच्चिदनामयाः ।। ९ ।। (०७)

## द्रौपदी

कौरव्यः कुशली राजा कुन्तीपुत्रो युधिष्ठिरः।
अहं च भ्रातरश्चास्य यांश्चान्यान्परिपृच्छसि ।। १० ।।

अपि त्वं कुशली राजन्सहामात्यः सहप्रजः।
अपि ते कुशलं राजन्राष्ट्रे कोशे बले तथा। ।। ११ ।। (०८)

कच्चिदेकः शिबीनाढ्यान्सौवीरान्सह सिन्धुभिः।
अनुतिष्ठसि धर्मेण ये चान्ये विजितास्त्वया ।। १२ ।। (०९)

This Stanga is Interchanged in TRK After 10.

पाद्यं प्रतिगृहाणेदमासनं च नृपात्मज ।
मृगान्पञ्चशतं चैव प्रातराशं ददानि ते ।। १३ ।। (१०)

ऐतेयान्पृषतां न्यङ्कुन्हरिणान्शरभान्शशान्।
ऋक्षान्रुरून्शरबरांश्च गवयांश्च मृगान्बहून् ।। १४ ।। (११)

---

(०७) (२) ; हि (for ऽपि); (३)येषां कुशलकामासीत् (४) तेषां (for तेऽपि); अनामयं तेषां सम्प्रत्यनामयं; .

(०८) राष्ट्रे (for राज्ये); तथा कोशे च सैधव; अद्य; सर्वान्.

(०९) (for आढ्यान्); सह बन्धुभि; चाय्यकण्टकान् विजिताः स्मृताः (for त्वया); धर्मं (for कुन्तीं); (४) अनुं (for परिं); .

(१०) ( त्वम् (for (इ)दम्); (३) पञ्चशतं चापि; चास्य (for चैव); मृगान्हत्वा मृगीं चैव; मृगान्हतान्यतांश्चैव; मृगान्विता मृगीश्चैव प्रातराशीन् ददामि;.

(११)( एणेयान् न्यङ्कुकांश्चैव (for पृषतान्रङ्कून्); (२) शलभाञ्जू शकान्; शलान् (for शशान्); (३) ऋष्यान्; ऋक्षान् कूरूञ्जू (for रुरुञ्जू); शम्भरांश्च; च सृमरान्;

वराहान्महिषांश्चैव याश्चान्या मृगजातयः।
**प्रदास्यति स्वयं तुभ्यं कुन्तीपुत्रो युधिष्ठिरः ॥ १५ ॥**

**जयद्रथः**

कुशलं प्रातरुशस्य सर्वं मे..पचितिःकृता।
**एहि मे रथामारोह सुखमाप्नुहि केवलम् ॥ १६ ॥ (०१)**

लक्षालङ्कारः - सर्वा मेऽपचितिः कृता इत्यत्र अपचितिः पूजा कृता ।

गतश्रीकांश्च्युतान्राज्यात्कृपणान्गतचेतसः।
**अरण्यवासिनः पार्थान्नानुरोद्धुं त्वमर्हसि ॥ १७ ॥ (०२)**

नैव प्राज्ञा गतश्रीकं भर्तारमुपयुञ्जते।
**युञ्जानमनुयुञ्जीत न श्रियः सङ्क्षये वसेत् ॥ १८ ॥ (०३)**

श्रिया विहीना राष्ट्राच्च विनष्टाः शाश्वतीः समाः।
**अलं ते पाण्डुपुत्राणां भक्त्या क्लेशमुपासितुम् ॥ १९ ॥ (०४)**

भार्या मे भव सुश्रेणि त्यजैनान्सुखमाप्नुहि।
**अखिलान्सिन्धुसौवीरानाप्नुहि त्वं मया सह ॥ २० ॥ (०५)**

**वैशम्पयानः**

इत्युक्ता सिन्धुराजेन वाक्यं हृदयकम्पनम्।

---

वराहांश्च; च चमरान्;.

(०१)(२) सर्वस्य सर्वापि; सदा मे; सर्वा च (for सर्वा मे); सर्वं मे दित्सितं (तृषितं); त्वया (३) आरुह्य;.

(०२)( हतं (for गतं); हृतराज्यान् (२) नष्टं (for गतं); (३) आरण्यं; इहां (for त्वमं);.

(०३) ( नैव; न तु; न हि (for न वै); पूज्या; प्रज्ञा गतश्रीकान् न तु प्राज्ञान्गतश्रीकान्; (२) उपभुञ्जते; युञ्जसे(भुञ्जसे); युज्यते; भर्तॄन्समुपयुं (भुं); जते (३) भुञ्जानम् उपयुं (भुं)जीत; (४) श्रिया न; श्रियश्च (for न श्रियः); सङ्क्षयं; प्रक्षये; सङ्क्षयो; भवेत् (for वसेत्);.

(०४) ( विहीनान् राष्ट्राच्च; (२) च्युतास्ते (for विनष्टाः); (३) अनष्टे (for अलं ते);.

(०५) (२) ; त्यजैतान् (४) तानाप्नुहि; आप्नहि त्वं; प्राप्नुहि रवं (for अवाप्नुहि);.

कृष्णा तस्मादपाक्रामद्देशात्सभ्रुकुटीमुखी ।। २१ ।।(०१)

अवमत्यास्य तद्वाक्यमाक्षिप्य च सुमध्यमा।
मैवमित्यब्रवीत्कृष्णा लज्जस्वेति च सैन्धव ।। २२ ।।(०२)

सा काङ्क्षमाणा भर्तणामुपयातमनिन्दिता।
विलोभयामास परं वाक्यैर्वाक्यानि युञ्जती।(०३)

## द्रौपदी

नैवं वद महाबाहो न्याय्यं त्वं न च मन्यसे(बुध्यसे)** ।। २३ ।।

पाण्डूनां धार्तराष्ट्राणां स्वसा चैव कनीयसी।
दुःशला नाम तस्यास्त्वं भर्ता राजकुलोद्वह ** ।। २४ ।।

मम भ्राता च न्याय्येन त्वया रक्ष्या महारथ ।
धर्मिष्ठानां कुले जातो न धर्मं त्वमवेक्षसे ।। २५ ।।

## वैशम्पायनः

इत्युक्तः सिन्धुराजोऽथ वाक्यमुत्तरमब्रवीत् ।। २६ ।।

## जयद्रथ उवा

राज्ञां धर्मं न जीनीषे स्त्रियो रत्नानि चैव हि।
साधारणानि लोकेऽस्मिन्प्रवदन्ति मनीषिणः ।। २७ ।।

स्वपा च स्वश्रिया चैव भ्रातृभार्या तथैव च ।
सुखं गृह्णन्ति राजा न स्ताश्च तत्रनृपोदभवाः ।। २८ ।।(०४)

---

(०१)(४); क्रोधात् (for देशात्); सा (for स);.

(०२)( अनादृत्य तु (च); अवमन्यास्य तद् वाक्यं (२) तदाक्षिप्य (for आक्षिप्य च); (३) वाक्यं (for कृष्णा); (४) वधस्वेति; त्यजं (for लज्जं); लज्जसे नेति सैन्धवं; न लज्जस्वेति सैन्धव; .

(०३)(२) ; उपयातम्; उपस्थानम् (३) विलम्बं (for विलोभं); परैर् (for परं); (४) (अ)योजयत्; योजयत् (for दुञ्जति); वाक्यैर्वाक्यं न योजयत् (न्ययोजयेत्);.

(०४) मैवं (for नैवं); बुध्यसे (for मन्यसे); राजकुलोद्रह; अपें; उपें (for अवें);

अस्मिन् पर्वणि २२१ अध्याये २८श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्त्र्यां वैयासिक्यां संहितायां वनपर्वणि द्रौपदीहरणपर्वणि जयद्रथद्रौपदीसंवादे एकविंशत्यधिकद्विशततमोऽध्यायः ।। २२१ ।।

# २२२. द्वाविंशत्यधिकद्विशततमो अध्यायः।

**द्रौपद्या स्वभिलाषिणो जयद्रथस्य गर्हणम् ।। १ ।। तथा बलात्स्ववस्त्रान्तकर्षिणस्त ास्याक्षेपादधः पातनपूर्वकं स्यमेव तर्दथारोहणम् ।। २ ।।**

**वैशम्पायनः**

**सरोषरागोपहतेन वल्गुना सरागनेत्रेण नतोन्नतभ्रुवा।**

**मुखेन विस्फूर्य सुवीरराष्ट्रपं ततोऽब्रवीत्तं द्रुपदात्मजा पुनः ।। १ ।।** (०१)

**लक्षालङ्कारः - मुखेन विष्फूर्य इत्यत्र सुवीरराष्ट्रकं प्रति विष्फूर्य कोपेन ओष्ठस्फुरणं कृत्वा ।**

**यशस्विनस्तीक्ष्णविषान्महारथानभिब्रुवन्मूढ न लज्जसे कथम्।**

**महेन्द्रकल्पान्निरतान्स्वकर्मसु स्थितान्समूहेष्वपि यक्षरक्षसाम् ।। २ ।।**(०२)

---

सङ्गृह्णन्ति राजानस्; नृपोतमाः.(२) (अ)तिरथो; पुनर् (for पुरुषो); .

(०१) ( सा रागरोषोपहतेन; सरागरोषों; सा रागदोषोपं; सा रोषरागोपं सा रागरोषापं सरोषवाचो-पहितेन; सा रोषवाचोपहतेन फल्गुना; पङ्क चक्षुषा (for वल्गुना); (२) नतो' तथो; ततो न्नतभ्रुणा; ततो (थो) न्नतभ्रुवा; ततौ नतभ्रू; (३) विस्फूर्ज्य; विस्फार्य; राष्ट्रजं; राजं; राष्ट्रकं;.

(०२) ( तीक्ष्णमुखान् महोरगान् (for महारथान्); (२)अभिबुवन् (for अधिक्षिपन्); वि (for न); क-ख-ग-यमेन्दं, नरेद्र; यमेन्द्रं' (for महेन्द्रं); स्वधर्मे (for स्वकर्मसु); (४) स्थिरान् समृद्धे (for समूहे);.

न किञ्चिदीड्यं प्रवदन्ति पापं वनेचरं वा गृहमेधिनं वा।
तपस्विनं सम्परिपूर्णविद्यं भषन्ति हैवं श्वनराः सुवीर ।। ३ ।। [०१]

अहं तु मन्ये तव नास्ति कश्चिदेतादृशे क्षत्रियसंनिवेशे।
यस्त्वाद्य पातालमुखे पतन्तं पाणौ गृहीत्वा प्रतिसंहरेत ।। ४ ।। [०२]

नागं प्रभिन्नं गिरिकूटकल्पमुपे(प)त्यकां हैमवतीं चरन्तम्।
दण्डीव यूथादपसेधसि त्वं यो जेतुमाशंससि धर्मराजम् ।। ५ ।। [०३]

लक्षालङ्कारः - दण्डीव यूथात् इत्यत्र दण्डीव लगुडधारीव अपषेधसे निवर्तयसि ।

बाल्यात्प्रसुप्तस्य महाबलस्य सिंहस्य पक्ष्माणि मुखाल्लुनासि।
पदा समाहत्य पलायमानः क्रुद्धं यदा द्रक्ष्यसि भीमसेनम् ।। ६ ।। [०४]

लक्षालङ्कारः - लुनासि । पदा समाहत्य इत्यत्र पदा सिंहस्याङ्गं समाहत्य पक्ष्माणि लुनासीति पूर्वेणान्वयः ।

महाबलं घोरतरं प्रवृद्धं जातं हरिं पर्वतकन्दरेषु।
प्रसुप्तमुग्रं प्रपदेन हंसि यः क्रुद्धमायोत्स्यसि जिष्णुमुग्रम् ।। ७ ।। [०५]

लक्षालङ्कारः -'आशंससि जिष्णुमुग्रम्' इति पाठे तुच्छमित्याशंससि ।

कृष्णोरगौ तीक्ष्णमुखौ द्विजिह्वौ मत्तः पदाऽऽक्रामसि पुच्छदेशे।

---

(०१)( कश्चिद् अन्यं; ईड्याः; इष्टं; एवं; आर्यं; आर्याः (for ईडयं); पापा; पार्था; वाचा (for पापं); (२) ’मेधिनां (४) भवन्ति; भजन्ति (for भषन्ति); श्वानाः; नैवं; नैव; चैवं; चैव (for हैवं); स्वनराः; शुनका; च नराः; सुनराः (for श्वनराः);.

(०२)(३) यस्त्वान्ध;यस्त्वां हि; (४) पाणिं प्रतिसंरभेत;.

(०३) ( मात्रम्; कायम् (for कल्पम्); (२) उपत्यकां; उत्पतिकां; उपेत्य तां; उपेत्य गां; हैमवतं (३) अपसेवसे; अपकर्षसे (सि); अपसेधसि; अवधावसे दण्डेन युद्धादवसेधसि त्वं; दण्डीव दण्डेन हि धावसि; (से) त्वं; (४) धर्मपुत्रं; .

(०४) ( बलात् (for बाल्यात्); महाधनस्य (३) पलायमानं; पलायसे त्वं ;.

(०५)( घोरतमं च(for प्र); (२) कन्दरासु (४) आपतस्यसि; आपश्यं ; आयोत्स्यं;

यः पाण्डवाभ्यां पुरुषोत्तमाभ्यां जघन्यजाभ्यां प्रयुयुत्ससे त्वम् ।। ८ ।। (०१)

यथा च वेमुः कदली नलो वा फलन्त्यभावाय न भूतयेऽस्यहि(ऽत्मनः)।
तथैव मां तैः परिरक्ष्यमाणामादास्यसे कर्कटकीव गर्भम् ।। ९ ।। (०२)

**जयद्रथः**

जानामि कृष्णे विदितं ममैतद्यथाविधास्ते नरदेवपुत्राः।
न त्वेवमेतेन विभीषणेन शक्या वयं त्रासयितुं त्वयाद्य ।। १० ।। (०३)

वयं पुनः सप्तदशेषु कृष्णे कुलेषु सर्वेऽनवमेषु जाताः।
षड्भ्यो गुणेभ्योऽभ्यधिका विहीनान्मन्यामहे द्रौपदि पाण्डुपुत्रान् ।। ११ ।। (०४)

सा क्षिप्रमातिष्ठ गजं रथं वा न वाक्यमात्रेण वयं हि शक्याः।
आशंस वा त्वं कृपणं वदन्ती सौवीरराजस्य पुनः प्रसादम् ।। १२ ।।(०५)

**द्रौपदी**

महाबला किन्त्विह दुर्बलेव सौवीरराजस्य मताहमस्मि।

---

आशंसं (for आसेत्स्यं); मूढ जिष्णुं (for जिष्णुमुग्रम्);.

(०१) ( तीक्ष्णों (for कृष्णो); दीप्तविषो; तीक्ष्णमुखौ; दीप्तमुखौ; तीव्रभुजौ; तीव्रविषौ; सुजिह्वौ; भुजङ्गमौ (२) मुग्धः; मत्तौ पुच्छमूले (३) यत् (for यः);.

(०२)( कदलीदले च; कदलीदलो वा (२) फलत्यं पुनः (for ऽऽत्मनः); पराभवायैव फलं बिभर्ति (४) ककं (for गर्भम्); .

(०३) (२) यथागता (for विधा); द्रौपदि पाण्डुपुत्राः (३) बिभर्षि तेन (for विभीषणेन) (४) भवत्या (for त्वयाद्य);.

(०४) त्विमे (for पुनः); (३)(ऽ)प्यधिकाः; (ऽ)भ्यधिकान्; (ऽ)भ्यधिकं; ह्यधिकं न हीनान्; (अ)वहीनान्; निहीनान् (for विहीं) (४) सन्ध्यां (for मन्यां); .

(०५) चित्रसेन उं' कोटिः; ( एहि त्वमातिष्ठ रथं गजं वा (२) स्म (क्य हि); (३) आशंस वाक्यं; आशंससे त्वं; आशाससे त्वा (क्य आशंस वो त्वं); (४) सौवीरराज्यस्य; सुवीरराजस्य; पुरः; हि नः; कुरु (क्य पुनः); प्रवादम्;.

नाहं प्रमाथादिह सम्प्रतीता सौवीरराजं कृपणं वदेयम् ।। १३ ।। (०१)

यस्या हि कृष्णौ पदवीं चरेतां समास्थितावेकरथे समेतौ।

इन्द्रोऽपि तां नापहरेत्कथञ्चिन्मनुष्यमात्रः कृपणः कुतोऽन्यः ।। १४ ।। (०२)

यदा किरीटी परवीरघाती निघ्नन्रथस्थो द्विषतां मनांसि।

मदन्तरे त्वद्ध्वजिनीं प्रवेष्टा कक्षं दहन्नग्निरिवोष्णगेषु ।। १५ ।। (०३)

जनार्दनः सान्धकवृष्णिवीरो महेष्वासः केकयाश्चापि सर्वे।
एते हि सर्वे मम राजपुत्राः प्रहृष्टरूपाः पदवीं चरेयुः ।। १६ ।। (०४)

मौर्वीविसृष्टाः स्तनयित्नुघोषा गाण्डीवमुक्तास्त्वतिवेगवन्तः।

हस्तं समाहत्य धनञ्जयस्य भीमाः शब्दं घोरतरं नदन्ति ।। १७ ।। (०५)

गाण्डीवमुक्तांश्च महाशरौघान्पतङ्गसङ्घानिव शीघ्रवेगान्।

सशङ्खघोषः सतलत्रघोषो गाण्डीवधन्वा मुहुरुद्वहंश्च ।
यदा शरानर्पयिता तवोरसि तदा मनस्ते किमिवाभविष्यत् ।। १८ ।।

यदा द्रष्टास्यर्जुनं वीर्यशालिनं तदा स्वबुद्धिं प्रतिनिन्दितासि।(०६)

---

(०१) ( महाबलाः न्विह; वै (for (इ)व); पञ्चालं; सुवीरं; पाञ्चालं (for सौवीरं);
सुताहम्; नताहम् (for मताहम्); अस्य; अद्य (for अस्मि); (३) नाहं; कथं; साहं (for याहं); प्रमादादिह सम्प्रभीता; वृत्ता; 'हीणा (४) सुवीरं';.

(०२) ( यस्याश्च; यस्यां च; (२) समासितान् एकरथौ ('थं); सखायौ; समेतौ (for सहायौ); नोत (प); हरेत्; नाभिभवेत्; .

(०३) ( यथा; सदा (for यदा); (३) मां नन्दयसू; मासां तरे; सामन्तरे; तदन्तरे (for मदतेरे); तद्; तु; ते (for त्वद्); ध्वजिनी; प्रविष्टः; प्रवेष्टः (४) दहत्यग्निर्; इवोष्ण(ग्र) तेजाः; इवोष्णकाले; इवोष्णकेषु;.

(०४) ( जनार्दनस्थाप्यनुगा वृष्णिवीरा; जनार्दनः सां (सों)धकवृष्णिवीरो; 'नस्थाहुकवृष्णिवीरो (रा) (२) कैकयां चैव पञ्च (for चापि सर्वे); (३)समेता (for हि सर्वे);.

(०५)( प्रसृष्टाः; विमुक्ताः; निसृष्टाः धोरा (for घोषा); (२) ह्यतिवेगवन्तः; ह्यतिवेलमुग्राः (४)शरा (for शब्दं); घोषतरं; घोररवं; धोरभयं पतन्ति (for नदन्ति);.

(०६) (१)द्रष्टा यदा; यदा सृष्टा; दृष्टवा ह्यथा (for (अ)सि); (अ)र्जुनेन प्रयु (मु); क्तानू; (अ)र्जुन वीर्यशालिन; वै सृजन्तं; वीर (र्य); शालिं (for वीर्यशालिनं);(२) स्वयुद्धं (for स्वबुद्धिं); परि (for प्रति);(३) सतनुत्रं

गदाहस्तं भीममभिद्रवन्तं माद्रीपुत्रौ सम्पतन्तौ दिशश्च ।
अमर्षजं क्रोधविषं वमन्तौ दृष्ट्वा चिरं तापमुपैष्यसेऽधम ।। २९ ।। [०१]

यथा चालक्षालङ्कारः -हं नातिचरे कथञ्चित्पतीन्महार्हान्मनसापि जातु।
तेनाद्य सत्येन वशीकृतं त्वां द्रष्टास्मि पार्थैः परिकृष्यमाणम् ।। ३० ।। [०२]

न सम्भ्रमं गन्तुमहं हि शक्ष्ये त्वया नृशंसेन विकृष्यमाणा।
समागताहं हि कुरुप्रवीरैः पुनर्वनं काम्यकमागतास्मि ।। २१ ।। [०३]

**वैशम्पायनः**

**इत्येव मुक्तस्तु स सिन्धुनाथ स्तां द्रौपदीमाह विशाल नेत्राम्।**
**आरुह्यतामासु रथं मदीयं मा त्वां बलाद्द्रौपदि कर्षयेऽहम्।**

साताननुप्रेक्ष्य विशालनेत्रा जिघृक्षमाणानवभर्त्सयन्ती।
प्रोवाच मा मा स्पृशतेति भीता धौम्यं प्रचुक्रोश पुरोहितं सा ।। २२ ।। [०४]

जग्राह तामुत्तरवस्त्रदेशे जयद्रथस्तं समवाक्षिपत्सा।
तया समाक्षिप्ततनुः स पापः पपात शाखीव निकृत्तमूलः ।। २३ ।। [०५]

---

(४) मुहुरुद्वहंश्च; 'रन्वहंश्च;.

(०१)(२) ; सञ्चरन्तौ हि दृष्ट्; दृष्ट्(for दिशश्च); (३) यदाजय्यौ (for अमर्षजं); वहन्तौ (for वमन्तौ); (४) भृशं परं; ध्रुवं (for चिरं); नाशम् (for तापम्); उपे (पै); ष्यसि; अवेक्ष्यसे; उपेष्यसे; (for ऽधम); दृष्ट्वा भृशं तापयसे नृपाधम; दृष्ट् समन्तादुपवेक्ष्य (दभिवीक्ष्य); सेथ;.

(०२) ( यदा (for यथा); वाहं; चरन् (for चाहं); नाभिचरे; नाभिचरेत्; कदाचित् (३) तेनास्य (४) द्रक्ष्यामि; पश्यामि परिक्लिश्यमाणं; शुष्यमाणं;.

(०३) ( कर्तुम् (for गन्तुम्); प्रसह्ये; हि शक्ये; हि शक्या (४) (अ)स्मि (for च);.

(०४) ( अभिप्रेक्ष्य; उपतें'; समुत्प्रें विशालं; जिधृक्षमाणा; विशालनेत्रां; स तामभिप्रेक्ष्य विशालनेत्रां (२) परि; अपि; अभि(for अव); सौवीरराजेन न भर्त्स; जिघृक्षमाणा न च भर्त्सं ; माणो न च भर्त्सयन्तीं; उवाच मा संस्पृशतीति मत्वा; पुरा हायं मा (नराधमो मां; पुरा हाधर्मा; पुरा ह्यधमा); स्पृशतीति मत्वा (४)च; वै(for सा);.

(०५) ( उत्तमं (for उत्तरं); (२) सहसां; स समां (for समवां); (३)समु- त्क्षिप्ततनु; पापी (for पापः);.

प्रगृह्यमाणा तु महाजवेन मुहुर्विनिःश्वस्य च राजपुत्री।
सा कृष्यमाणा रथमारुरोह धौम्यस्य पादावभिवाद्य कृष्णा ।। २४ ।। (०१)

**धौम्यः**

नेयं शक्या त्वया नेतुमविजित्य महारथान्।
धर्मं क्षत्रस्य पौराणमवेक्षस्व जयद्रथ ।। २५ ।। (०२)

क्षुद्रं कृत्वा फलं पापं त्वं प्राप्स्यसि न संशयः।
आसाद्य पाण्डवान्वीरान्धर्मराजपुरोगमान् ।। २६ ।। (०३)

**वैशम्पायनः**

इत्युक्त्वा ह्रियमाणां तां राजपुत्रीं यशस्विनीम्।
अन्वगच्छत्तदा धौम्यः पदातिगणमध्यगः ।। २७ ।।

अस्मिन् पर्वणि २२२अध्याये २७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि द्रौपदीहरणपर्वणि द्वाविंशत्य
ाधिकद्विशततमोऽध्यायः ।। २२२ ।।

# २२३. त्रयोविंशत्यधिकद्विशततमो अध्यायः ।

---

(०१)( महाजनेन (२) विनिश्वस्य तु (for च); (३) विकृष्यं; सामृष्यं (४) सा (for धौम्यस्य); (अ) भिनन्द्य; (अ)भिवन्द्य;.

(०२)( बलान् (for त्वया); (आ)दातुम्; जेतुम् (for नेतुम्); (२) अभिजित्य; अवजित्य; अवमत्य; (३) क्षत्रधर्मस्य; तत्र धर्मं न; धर्म क्षत्रस्य पौराणाम्;.

(०३) ( फले'; बले (for फलं); पाप क्षुद्रं खलु नृशंसात्मन् (२) प्राप्स्यसि त्वं;
संशय; असंशय; .

मृगतयागतैः पाण्जवैर्दुर्निमित्तदर्षनाद्विपदाशङ्कया सत्वरं स्वाश्रमाभिगनम् ।। १ ।। तदा दास्या दास्या द्रौपदीव-त्तान्तावगमेन जयद्रथपथानुगतैस्तदवलोकनेन कोपत्समुत्क्रोशनम् ।। २ ।।

**वैशम्पायनः**

ततो दिशः सम्प्रविहृत्य पार्था मृगान्वराहान्महिषांश्च हत्वा।
धनुर्धराः श्रेष्ठतमाः पृथिव्यां पृथक्चरन्तः सहिता बभूवुः ।। १ ।। (०१)

ततो मृगव्यालगणानुकीर्णं महावनं तद्विहगोपघुष्टम्।
भ्रातंश्च तानभ्यवदद्युधिष्ठिरः श्रुत्वा गिरो व्याहरतां मृगाणाम् ।। २ ।। (०२)

**युधिष्टिरः-**

आदित्यदीप्तां दिशमभ्युपेत्य मृगा द्विजाः क्रूरमिमे वदन्ति।
आयासमुग्रं प्रतिवेदयन्तो महावनं शत्रुभिर्बाध्यमानम् ।। ३ ।। (०३)

क्षिप्रं निवर्तध्वमलं मृगैर्नो(विलम्बै-) म(र्म)नो हि मे दूयति दह्यते च ।
**बुद्धि समाच्छाद्य च मे समन्युरुद्धूयते प्राणपतिः शरीरे ।। ४ ।। (०४)**

सरः सुपर्णेन हृतोरगेन्द्रमराजकं राज्यमिवेह शास्त्रम् ।
**(सरः सुपर्णेन हृतोरगं यथा राष्ट्रं यथाराजकमात्तलक्ष्मि।)**

---

(०१) ( सम्परिहृ (कृ) त्य; सम्परिवृत्य; सम्परिसृत्य (for पार्था); (३) श्रेष्ठतराः (४) सह सं (for सहिता);.
(०२) ( गजा; मृगां; जनां (for गणां); (२) महद्वनं जुष्टं (for घुष्टम्); (३) त्वरन्;
चरन्; चरन्तो (for च तान्); न्यवदद्; अभ्यवदन् (४) वचो (for गिरो); .
(०३) ( आदीप्तदीप्तां; आदित्यजुष्टां अभ्युपेता; अभ्युपेतुद् (२)मृगा (for मृग); यथा समग्रं (for आयासमुग्रं); वेदयन्ते; 'वेदयन्ति (४) महाहवे; वनं; भयं; धनं बाधं'; चावं; बाध्यं; आह्वमाने; वध्यं (for वावं); .
(०४) ( विलबैद्; मनो हि (for मृगैर्नो); (२) मृगैश्च (for मनो हि); दह्यति; दूयते; दह्यते; ग्लायते; ग्लायति (for दूयति); दूयते; दुह्यते (for दह्यते); (३) समासाद्य; स्थाय (for च्छाद्य); (४) उद्धय्यायते; आधू-यते प्राणमतिः; 'मिमं (for पतिः);.

एवं विधं मे प्रतिभाति काम्यकं शौण्डैर्यथा पीतरसश्च कुम्भः ।। ५ ।। (०१)

लक्षालङ्कारः - राज्यमिवेह शास्त्रम् इत्यत्र इह कलिकाले शास्त्रमिवेत्यपरो दृष्टान्तः ।

**वैशम्पायनः-**

ते सैन्धवैरत्यनिलोग्रवेगैर्महाजवैर्वाजिभिरुह्यमानाः।

युक्तैर्बृहद्भिः सुरथैर्नृवीरास्तदाऽऽश्रमायाभिमुखा बभूवुः ।। ६ ।। (०२)

तेषां तु गोमायुरनल्पघोषो निवर्ततां वास(म)मुपेत्य पार्श्र्वम्।

प्रव्याहरत्तत्प्रविमृश्य राजा प्रोवाच भीमं च धनञ्जयं च ।। ७ ।। (०३)

यथा वदत्येष विहीनयोनिः शालावृको वाममुपेत्य पार्श्वम्।

सुव्यक्तमस्मानवमन्य पापैः कृतोऽभिमर्दः कुरुभिः प्रसह्य ।। ८ ।। (०४)

लक्षालङ्कारः - यदा वदत्येष निहीनयोनिः इत्यत्र 'निहीनोऽपशदो जाल्मः' इत्य-भिधानात् अपशदयोनिः ।

इत्येव ते तद्वनमाविशन्तो महत्यरण्ये मृगयां चरित्वा।

बालामपश्यन्त तदा रुदन्तीं धात्रेयिकां प्रेष्यवधूं प्रियायाः ।। ९ ।। (०५)

तामिन्द्रसेनस्त्वरितोऽभिसृत्य रथादवप्लुत्य ततोऽभ्यधावत्।

---

(०१) ( हृतोरगेन्द्रं (for हृतोरगं यथा); (२)राज्यं यथा राजसमाप्तलक्ष्मः अ(ह्य); राजकं राष्ट्रमिवेह शान्तं (४) रसं च कुण्डं; सुरश्च कुम्भः;.

(०२)( तैः (for ते); अत्य-निलोग्रवेगैद्; अत्य निलौधवर्णैर्; अग्र्यनि-लोद्ध ('लार्थ); (लोत्थ)वेगैर् (२) महाबलैर् (३)महद्भिः (for बृहद्भिः); पुरुषैं; स्वरयैं; सरथैं.

(०३) ( च (for तु); तेजा (for घोषो); (२) निवर्त्यतां (३)प्रव्याहरन्तं; प्रत्याहरत्तं तत् (for तं); मृष्य;.

(०४) ( ख-वि;, घ-नि, विहीन-हानिः; निहीनयोनिः (for )सृगा-लको; सालावृको; पार्थं (for पार्श्र्वम्);(३) परिभूय; अभिभूय (for अवमन्य); (४) कृतो विमर्दः; कृतोवमर्दः; कृतोवमानः .

(०५) ( एत्याथ (for इत्येव); आवि-शत्यो; आचरन्तो (२) दहत्यरण्ये (४) प्रेक्ष्य; वीक्ष्य (for प्रेष्य); धात्रीं तदा प्राणसमां प्रियां तां; .

प्रोवाच चैनां वचनं नरेन्द्र धात्रेयिकामन्तितरस्तदानीम् ॥ १० ॥ [०१]

**इन्द्रसैनः-**

किं रोदिषि त्वं पतिता धरण्यां किं ते मुखं शुष्यति दीनवर्णम्।

कच्चिन्न पापैः सुनृशंसकृद्भिः प्रमाथिता द्रौपदी राजपुत्री ॥ ११ ॥ [०२]

**गतेष्वरण्यं हि सुतेषु पाण्डोः कच्चित्परैर्नापकृतं वनेस्मिन्।**

पर्याकुला साधु समीक्ष्य सूतमभ्यापतन्तं द्रुतमिन्ध्रसेनम्।

उरो घ्नती कष्टतरं तदानी मुच्चैः प्रचुक्रोश हतेति देवी ॥ १२ ॥ [०३]

**पतिव्रता सत्यसन्धा तथैव क्व सा नीता केन वा शंस तथ्यम्;**

**इद्रसेनः**

अचिन्त्यरूपा तु विशालनेत्रा शरीरतुल्या कुरुपुङ्गवानाम्।

**केनात्मनाशाय पदापनीता छिद्रं समासाद्य नरेन्द्रपत्नी ॥ १३ ॥**

**लक्षालङ्कारः - पदाऽपनीता इत्यत्र पदा पादसञ्चारेण ।**

After Mension in TRK 12.[04]

**यद्येव देवी पृथिवीं प्रविष्टा दिवं प्रपन्नाप्यथवा समुद्रम्।**

---

(०१) ( तो विसृत्य; तोपसृत्य (४) अन्तिं;.

(०२) ( धरित्र्यां'; धरिण्यां (२) त्वन् (for ते); दीनकण्ठं;.

(०३) समां (for अभ्यां'); क्लिष्टतरं; प्रचक्रन्द (for प्रचुक्रोश); (५) अचिन्त्यं (for अनिन्द्यं); .

(०४) हृतो; विदों; पथां (for वदां); रन्ध्रं (for छिद्रं); नरेन्द्रपुत्री; (३) क-इन्द्रस्समासद्य नरेन्द्रपत्री; ख-धिद्रं समासाद्य नरेन्द्रपकत्री घ-मितस्समासाद्य नरेन्द्रत्री, घ-म्तस्समासाद्य नरेन्द्रपत्री.

तस्या गमिष्यन्ति पदे हि पार्था यथा हि सन्तप्स्यति धर्मपुत्रः ।। १४ ।। [०१]

को हीदृशानामरिमर्दनानां क्लेशक्षमानामपराजितानाम्

प्राणैः समामिष्टतमां जिहीर्षेदनुत्तमं रत्नमिव प्रमूढः। ।। १५ ।।

न बुध्यते नाथवतीमिहाद्य बहिश्चरं हृदयं पाण्डवानाम्।[०२]

कस्याद्य कायं प्रतिभिद्य घोरा महीं प्रवेक्ष्यन्ति शिताः शराग्र्याः ।। १६ ।।

मां त्वं शुचस्तां प्रति भीरु विद्धि यथाद्य कृष्णा पुनरेष्यतीति।

निहत्य सर्वान्द्विषतः समग्रान्पार्थाः समेष्यन्त्यथ याज्ञसेन्या।[०३]

अथाब्रवीच्चारु मुखं विमृश्य(प्रमृज्य) धात्रेयिका सारथिमिन्द्रसेनम्।

जयद्रथेनापहृता प्रमथ्य पञ्चेन्द्रकल्पान्परिभूय कृष्णा।[०४]

तिष्ठन्ति वर्त्मानि नवान्यमूनि वृक्षाश्च न म्लान्ति तथैव भग्नाः।

आवर्तयध्वं ह्यनुयात शीघ्रं न दूरयातैव हि राजपुत्री ।। १७ ।। [०५]

संनह्यध्वं सर्व एवेन्द्रकल्पा महान्ति चारूणि च दंशनानि।

गृह्णीत चापानि महाधनानि शरांश्च शीघ्रं पदवीं चरध्वम् ।। १८ ।।[०६]

---

(०१)( यदीह (for यद्येव); देवीं यदाप्यसौ पृथिवीं सम्प्रविष्टा (२) प्रपन्नां यदि वा; ह्यथ वा (३) पथं; पदे (for पदं); पदं गमिष्यन्ति हि तस्य (तत्र); पार्थास् (४)यथा (for तथा); धर्मपुत्रः;.

(०२)( माहं (for हीदृं); नरपुङ्गवानां (for अरिमर्द); (२)क्षमानाम् (३) जिहीर्षुद् (४) इव प्रमूढं; इव प्रमूष्मान्; इव प्रमूषुः; इवामुमूर्षुः .

(०३) ( प्रविभिद्य; प्रवि-शन्ति; प्रतिपद्य; प्रतिबिभ्य घोरं; बाणा; बाला (for घोरा); आच्छाद्य कामं प्रविविश्य घोरा (२) अभि (for महीं); प्रविष्यन्ति) सुपुङ्खाः (for शराग्र्याः); (४) यथा च (for यथाद्य); (५) द्विषतान् समेताः; समेतान्; समग्राः; ससैन्यान्; .

(०४) ( चाश्रुमुखी; सा तु मुखं; साश्रुमुखं विमृष्यु; विसृज्य; विमृश्य; विमृज्य; प्रमृष्य धात्रेयिका; धात्री (२) नोपहृतां; ’नापहृतां; प्रमाथ्य; प्रपश्य (४) कृष्णां; पार्थान् ;.

(०५) ( तिष्ठत्यवर्त्मानि; वनानि; बहूनि; पद्मानि; चर्माणि (for नवानि); (२) द्रुमां (for वृक्षां) नश्यन्ति ; लम्बन्ति; नम्राश्च; न ग्लान्ति; म्लायन्ति वृक्षाश्च तथातिभग्राः (३) अनुयात; ह्यनुयान्तु; (४)अदूरं; न दूरयातेव; ह (for हि);.

(; दंशितानि; दंसितानि; महान्ति दारूणि वतंसितानि; महार्हरूपाणि च दंसनानि (३) गृहीत ससाधनानि;

पुरा हि निर्भर्त्सनदण्डमोहिता प्रमोहचित्ता वदनेन शुष्यता।*

ददाति कस्मैचिदनर्हते तनुं वराज्यपूर्णामिव भस्मनि स्रुचम् ।। १९ ।। (०१)

पुरा तुषाग्नाविव हूयते हविः पुरा श्मशाने स्रगिवापविद्ध्यते।

पुरा च सोमोऽध्वरगोऽवलिह्यते शुना यथा विप्रजने प्रमोहिते ।। २० ।। (०२)

**पुरा हि पार्थाश्च दृतौ च कापिली प्रशिच्यते क्षीरधारा यतध्वम्।(०३)**

**श्रुतिं च सम्यक्प्रकृतिं महाध्वरे ग्राम्यो जनो यद्वदसौ न नाशयेत् ।**

महत्यरण्ये मृगयां चरित्वा पुरा शृगालो नलिनीं विगाहते।

पुरा हि मन्त्राहुति पूजितायां हुताग्नि वेत्यां भक्तिभूग्निलियते ।। २१ ।।

मा वः प्रियायाः सुनसं सुलोचनं चन्द्रप्रभाच्छं वदनं प्रसन्नम्

स्पृश्याच्छुभं कश्चिदकृत्यकारी श्वा वै पुरोडाशमिवाध्वरस्थम्** ।। २२ ।।
(०४)

एतानि वर्त्मान्यनुयात शीघ्रं मा वः कालः क्षिप्रमिहात्यगाद्वै।(०५)

शीघ्रं प्रधावध्वमितो नरेन्द्राः यावन्नदूरं व्रजतीति पापः।

---

शरांश्च शीघ्रं; पतध्वं; चरध्वं; प्रपद्य (for व्रजध्वम्); बध्नीत तूणौ पदवीं च लब्धं; भस्मनि.

(०१) ( दडताडिता (२) प्रमोहचित्ता; प्रमूढचेता; शुष्यति; (४) श्रुतं; स्रुवं (for स्रु चम्); .

(२);स्मशाने स्रगिवावविध्यते; वोपद्धश्यते; वोपविध्यते; वावबध्यते;(३) पुरे च; पुरा हि ध्वरजो विलुप्य (प्यते); विलिह्य; विलिप्य; विलिह्यते (४)वोमों (for प्रभों); .

(०३) (५) गतानां (for चरित्वा); सृगालो; प्रगाहते; .

(०४) २) प्रभाभं; प्रभं तद्; प्रभासं; चन्द्रप्रभं वदनं तत्पुरस्तात् (नं सुप्रसन्नं); (३) पश्चाच्छुभं; स्पृशेच्छुभं; रागान्वितः; रागान्नरः (४) इवोपयोक्ष्य; पयोक्षीत् पयुं ज्यात्; इवाध्वरस्थं; इवोपयुज्यते; पभोक्ष्येत्.

(०५) (५) वाक्यानि; वर्णानि (for वर्त्मानि); (अ) नुयान्तु (for यात); मा वः (for शीघ्रं); कालः प्रति(for मा वः कालः); दीर्घ (for क्षिप्रम्); इहातिगाद्वै; इहात्ययाद्वै; .

प्रत्याहरध्वं द्विशतां सकाशा ल्लक्ष्मिमिव स्वां दयितां नृसिंहः ।। २३ ।। (०१)

**युधिष्ठिरः**

भद्रे प्रतिक्राम नियच्छ वाचं मास्मत्सकाशे परुषाण्यवोचः।

राजानो वा यदि वा राजपुत्रा बलेन मत्ता वञ्चनां प्राप्नुवन्ति ।। २४ ।। (०२)

**वैशम्पायनः**

एतावदुक्त्वा प्रययुर्हि शीघ्रं तान्येव वर्त्मान्यनुवर्तमानाः।

मुहुर्मुहुर्व्यालवदुच्छ्वसन्तो ज्या(ज्यां) विक्षिपन्तश्च महाधनुर्भ्यः ।। २५ ।। (०३)

ततोऽपश्यंस्तस्य सैन्यस्य रेणुमुद्धू(द्धू)तं वै वाजिखुरप्रणुन्नम्।

पदातीनां मध्यगतं च धौम्यं विक्रोशन्तं भीममभिद्रवेति ।। २६ ।। (०४)

ते सान्त्व्य धौम्यं परिदीनसत्त्वाः सुखं भवानेत्विति राजपुत्राः।

श्येना यथैवामिषसम्प्रयुक्ता जवेन तत्सैन्यमथाभ्यधावन् ।। २७ ।। (०५)

तेषां महेन्द्रोपमविक्रमाणां संरब्धानां धर्षणाद्याज्ञसेन्याः।

क्रोधः प्रजज्वाल जयद्रथं च दृष्ट्वा प्रियां तस्य रथे स्थितां च ।। २८ ।। (०६)

प्रचुक्रुशुश्चाप्यथ सिन्धुराजं वृकोदरश्चैव धनञ्जयश्च ।

---

(०१)(३) क-ख-घ-पदाति.

(०२)( तूर्णमाशु; प्रतिक्राम (for तूष्णीमास्स्व); भद्रे प्रतीपं विनयाच्च वाचं (२) वाचः (for (अ)वोचः); बलेन युक्ताः पञ्चतामाप्नुं (for वञ्चनां प्राप्तं); .

(०३)(३) ; मुहुर्मुहुर्व्यालवनं विशन्तो (४) ज्या (for ज्यां); उत्क्षिं (for विक्षिं); महाधनुर्भृतः;.

(०४) ( ततोपश्यं रेणुसमुद्धूतं वै (२) उद्धूकयतं; समुद्धूतं; उद्धूतं वै; निपीडितं; आधूयन्तं (for उद्धूतं वै); खुप्रपन्नं (३) हि (for च); पदातिमध्ये विचरन्तं च धौम्यं; (४) अभ्याद्रवेति; अभिद्रवन्तं; अभ्यद्रवन्तं विक्रोशन्तं भीम भीमाद्रवेति; विक्रो- शन्तं भीम पार्थेत्यभीक्ष्णं;.

(०५) ( धौम्यं परि-दीनसत्वं; तं धौ (तद्धौ); म्यमदीनसत्वाः (२) सुखी भवानस्त्विति राजं (३) सम्प्रसक्ता;.

(०६)(२) कोपः (for क्रोधः); तु (for च); (४) स्थितां (for प्रियां); चास्य (for तस्य); रथस्थितां; रथे प्रियां; .

यमौ च राजा च महाधनुर्धरास्ततो दिशः सम्मुमुहुः परेषाम् ।। २९ ।। (०१)

अस्मिन् पर्वणि २२३अध्याये २९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि द्रौपदीहरणपर्वणि पार्थागमने त्रयोविंशत्यधिकद्विशततमोऽध्यायः ।। २२३ ।।

# २२४. चतुर्विंशत्यधिकद्विशततमो अध्यायः।

द्रौपद्या जयद्रथं प्रति तत्तल्लक्षणप्रदर्शनपूर्वकं युधिष्ठिरादिनिर्देशः ।।

**वैशम्पायनः**

ततो घोरतरः शब्दो वने समभवत्तदा।
भीमसेनार्जुनौ दृष्ट्वा क्षत्रियाणाममर्षिणाम् ।। १ ।। (०२)

तेषां ध्वजाग्राण्यभिवीक्ष्य राजा स्वयं दुरात्मा कुरु(नर)पुङ्गवानाम्।
जयद्रथो राज्ञसेनीमुवाच रथे स्थितां भानुमतीं हतौजाः ।। २ ।। (०३)

लक्षालङ्कारः - भानुमतीं यतौजा इत्यत्र भानुमतीं स्वभर्तॄन् दृष्ट्वा कान्तिमतीम् ।

**जयद्रथः-**

आयान्तीमे पञ्च रथा महान्तो मन्ये च कृष्णे पतयस्तवैते।

---

(०१) (अ)भि (for (अ)पि); (३) धनुर्धरास्तदा (तो); (४) दिशो (for ततो) सम्प्रमुहुः परेतरां; .

(०२) (३) अमर्षणं; मनीषिणां; अमर्षिणौ; महर्षिणां;.

(०३) ( ध्वजाम्याणि; ध्वजा-ग्रान् राजन्.(२) स्मयन् (for स्वयं); कुरुपाण्डवानां.(४) स्थितो (for स्थितां); कान्तिमर्तीं; भर्तृमतीं. हृ(त )तौजाः; महौजाः; विहस्य.

सा जानती ख्यापय नः सुकेशि परं परं पाण्डवानां रथस्थम् ।। ३ ।। (०१)

**लक्षालङ्कारः - परावरं पाण्डवानां रथस्थम् इत्यत्र पाण्डवानां मध्ये रथस्थं परावरं ज्येष्ठं कनिष्ठं च नः ख्यापयेति सम्बन्धः ।**

## द्रौपदी

किं ते ज्ञातै(शातै)र्मूढ महाधनुर्धैरैरनायुष्यं कर्म कृत्वातिघोरम्।
एते वीराः पतयो मे समेता न वः शेषः कश्चिदिहास्ति युद्धे ।। ४ ।। (०२)

आख्यातव्यं त्वेव सर्वं मुमूर्षोर्मया तुभ्यं पृष्टया धर्म एषः।
न मे व्यथा विद्यते त्वद्भयं वा सम्पश्यन्त्याः सानुजं धर्मराजम् ।। ५ ।। (०३)

यस्य ध्वजाग्रे नदतो मृदङ्गौ नन्दोपनन्दौ मधुरौ युक्तरूपौ।
एतं स्वधर्मार्थविनिश्चयज्ञं सदा जनाः कृत्यवन्तोऽनुयान्ति ।। ६ ।। (०४)

य एष जाम्बूनदशुद्धगौरः प्रचण्डघोणस्तनुरायताक्षः।
एनं(तं) कुरुश्रेष्ठतमं वदन्ति युधिष्ठिरं धर्मसुतं पतिं मे ।। ७ ।। (०५)

अप्येष शत्रोः शरणागतस्य दद्यात्प्राणान्धर्मचारी नृवीरः **
परे ह्येनं मूढं जवेन भूतये त्वमात्मनः प्राञ्जलिन्यस्तशस्त्रः ।। ८ ।। (०६)

---

(०१)( आयातेमे पे (for (इ)मे); तथैते; तवेति; तवेमे; (३) मा जानतां; सेमानिति; सञ्जानति; (४) परस्परां; परावरं; परम्परां (for परं परं); रथस्था; रथस्थां; रथानां; .

(०२) ( तैर् (for ते); (२) अनायोध्यं; अमानुषं कृत्वा सुघोरं (षं);(३) ऋद्धा (for एते);.प्रियाः (for वीराः); (४) ते (for वः);.शेषं. किञ्चिद्; .

(०३) ( आख्याताया. चैव; तव; तच्च (for . त्वेव); मुमूर्षोः सर्वं (for तुभ्यं); (३)क-व्यथा; व्यथात्वद्भये विद्यते वा । घ-व्यथा त्वद्भयाद्, विद्यते त्वद्भयं; (४) सम्प्रेक्षन्त्याः .

(०४) ( ध्वजाग्रौं नदतौ; मृदङ्गैर; मृदङ्गो, (२)मधुरं युक्तरूपौ;. रं सुरूपौ; रं सुयुक्तौ.(३)एवं; एनं (for एतं); सु. स्म (for स्व);.(४) कृतवन्तो.सदा जनाः सत्यवन्तो वदन्ति; .

(०५) ( स' (for य); (२) घोरं; 'धोषं (for . धोणं); (३) एनं (४) प्रियं (for पतिं); .

(०६)( शरणं गतस्य (२) प्राणं (for प्राणान्); (३)क-यत्त्वात्मनः प्राञ्जलिं न्यस्तशस्त्रमथाप्येन पश्यसियं रथे स्थिम् ।। ख-इदमर्धं नास्ति, घ-त्वय्यात्मनि प्राञ्जलि न्यस्तशस्त्रे,दद्यादेव प्राणमसौ तवापि ।, परेह्येनं; परैर्ह्येनं;

अथप्येनं पश्यसि यं रथस्थं महाभुजं शालमिव प्रवृद्धम्।
सन्दष्टौष्ठ(ष्ठं) भ्रुकुटीसंहतभ्रुवं वृकोदरो नाम पतिर्ममैषः ॥ ९ ॥ (०१)

आजानेया बलिनः साधुदान्ता महाबलाः शूरमुदावहन्ति।
एतस्य कर्माण्यतिमानुषाणि भीमेति शब्दोऽस्य गतः पृथिव्याम् ॥ १० ॥ (०२)

लक्षालङ्कारः - आजानेया बलिन इत्यत्र 'आजानेयाः कुलीनाः स्युः' इत्यभिधानात् आजानेयाः कुलीनाः सदश्वाः ।

नास्यापराद्धाः शेषमवाप्नुवन्ति नायं वैरं विस्मरते कदाचित्।
वैरस्यान्तं संविधायोपयाति पश्चाच्छान्तिं न तत्तप्यतीह ॥ ११ ॥ (०३)

लक्षालङ्कारः - न च तत्तप्यतीह इत्यत्र तत् वैरं इह जीवनावस्थायां न तप्यति पश्चात्तापं न करोति ।

धनुर्धराग्र्यो धृतिमान्यशस्वी जितेन्द्रियो वृद्धसेवी नृवीरः।
भ्राता च शिष्यश्च युधिष्ठिरस्य धनञ्जयो नाम पतिर्ममैषः ॥ १२ ॥ (०४)

यो वै न कामान्न भयान्न लोभात्त्यजेद्धर्मं न नृशंस्यं(सं) च कुर्यात्।
स एष वैश्वानरतुल्यतेजाः कुन्तीसुतः शत्रुसहः प्रमाथी ॥ १३ ॥ (०५)

---

पुरोहितं; परो ह्येतं. प्रेत्य ह्येनं मूढ भजस्व तूर्णं (४) त्वमात्मना; दुरात्मनः; महात्मानं; तवात्मानः.

(०१) ( अथाप्येतं पश्यसे रथे स्थितं (for रथस्थं);(२) महाबलं (सालं (for शालं); प्रविद्धं.(३) सन्दष्टौष्ठ भृकुटी सनतभ्रूर्; संहतभ्रूं; संहतभ्रूर्; संहतभ्रुवो;.

(०२) ( आजानीया; आजानया; अजानेया.बलिनां; वाजिनः.(२) महाबलं; महाजवाः.
शूरमुदाहरन्ति; तमं वहन्ति (४) ततः (for गतः);.

(०३)( अपराधात्. शेषमिहानुयान्ति; मंवाप्नुवन्ति.; (२) नायं; त नायं च (for नाप्यस्य); विस्मरन्ते; संनिधा; (४) तन्तप्यतिह (for गच्छत्यतीव); .

(०४)( धनुर्धराग्र्यो (for मृदुर्वदान्यो); मतिं (for .धृतिं); मनस्वी (for यशस्वी);.तथैव (for . नृवीरः); (३) श्रुता (for . भ्राता);.

(०५)(क-कदा..पि कोपान्न भयान्न कामात्; ख-यो वै न कोपान्नङ्यान्नकामात्;, घ-यौ नैव- न्नकामात्, नैव (for वै न); कोपान्न (for कामां); कोपात्; कामात्; मोहात् (for लोभात्); कदापि कोपान्न भिया न

यः सर्वधर्मार्थविनिश्चयज्ञो भयार्तानां भयहर्ता मनीषी।

बन्धुप्रियः शस्त्रभृतां वरिष्ठो महाबलेष्वप्रतिवार्यवीर्यः** ।। १४ ।।

यस्योत्तमं रूपमाहुः पृथिव्यां यं पाण्डवाः परिरक्षन्ति सर्वे।

प्राणैर्गरीयांसमनुव्रतं वै स एष वीरो नकुलः पतिर्मे** ।। १५ ।।

यः खड्गयोधी लघुचित्रहस्तो महांश्च धीमान्सहदेवोऽद्वितीयः।(०१)

शूरः कृतज्ञो दृढसौहृदश्च । महाहवे यश्च रिपुप्रमाथी.(०२)

यस्याद्य कर्म द्रक्ष्यसे मूढसत्त्व शतक्रतोर्वा दैत्यसेनासु सङ्ख्ये। ।। १६ ।।

शूरः कृतास्त्रो मतिमान्मनस्वी प्रियङ्करो धर्मसुतस्य राज्ञः।(०३)

य एष चन्द्रार्कसमानतेजाः(जा) जघन्यजः पाण्डवानां प्रियश्च ।। १७ ।।

बुद्ध्या समो यस्य नरो न विद्यते वक्ता तथा सत्सु विनिश्चयज्ञः।(०४)

स एष शूरो नित्यममर्षणश्च धीमान्प्राज्ञः सहदेवः पतिर्मे ।। १८ ।।

त्यजेत्प्राणान्प्रविशेद्धव्यवाहं न त्वेवैष व्याहरेद्धर्मबाह्यम्।

सदा मनस्वी क्षत्रधर्मे रतश्च कुन्त्याः प्राणैरिष्टतमो नृवीरः ।। १९ ।। (०५)

विशीर्यन्तीं नावमिवार्णवान्ते रत्नाभिपूर्णां मकरस्य पृष्ठे।

---

कामात्; (२) धर्मं त्यजेन् नानृशंस्यं; न नृशंस्यं (४)माद्रीसुतः; कुन्तीपुत्रः सहदेवः; शत्रुसङ्घ; शत्रुगण;.

(०१) ( प्राणैर्गरीयान्पाण्डवानां महात्मा; प्राणैर्गरीयान्समनुव्रतश्च;.

(०२) (२) खड्गवेधी; सङ्गयोधा; यः खङ्ग-हस्तो लघुचित्रयोधी; (४) मतो; मानी; मतौ च (for महांश्च); बलदेवो द्विः (वाद् द्वि); (वह्नि) तीयः.

(०३)( तस्याद्य; यस्मात्; तस्मात . द्रक्ष्यसि. मूढभावः; .सत्त्वः, (२) वा दैत्यसैन्यस्य; मन्यसे साधु; अद्य सेनासु; दैत्यसैन्येषु मध्ये; सङ्के; सङ्घे; (३) धृतिमान. मनस्वी (for मनीषी); (४) धर्मराजस्य; .

(०४) ( स एष; ये .) हुताश.

(०५)( य एष (४) न त्वैवेव; न त्वेष वै; न त्वैवैष; धर्मवाक्यं; राज्यं (५)मनीषी (for मनस्वी); सत्यधर्मे रतश्च (for निविष्टः);.

सेनान्तरे(सेनां तवे)मां हतसर्वयोधां विक्षोभितां द्रक्ष्यसि पाण्डुपुत्रैः ।। २० ।।
(०१)

इत्येते वै कथिताः पाण्डुपुत्रा यांस्त्वं मोहादवमन्य प्रवृत्तः।

यद्येतेभ्यो मुच्यसेऽरिष्टदेहः पुनर्जन्म प्राप्स्यसे जीव एव ।। २१ ।। (०२)

**वैशम्पायनः**

ततः पार्थाः पञ्च पञ्चेन्द्रकल्पास्त्यक्त्वा त्रस्तान्प्राञ्जलींस्तान्पदातीन्।

य(र)थानीकं शरवर्षान्धकारं चक्रुः क्रुद्धाः सर्वतः संनिगृह्य ।। २२ ।। (०३)

अस्मिन् पर्वणि २२४अध्याये २२श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि द्रौपदीहरणपर्वणि द्रौपदीवाक्ये चतुर्विंशत्यधिकद्विशततमोऽध्यायः ।। २२४ ।।

# २२५. चञ्चविंसथ्यधिकद्विशततमो अध्यायः ।

(०१) ( विशीर्यती; व्यशीर्यतीं; विशीर्य-तीर्; वशीयतिर् विशीर्यतीं; विशीर्यतीं;
र्णवान्तरे (रं); (३) तथेमां (४)पश्यसि (for द्रक्ष्यं);.
(०२) ( इत्येवं ते; इत्येवमेते; इत्येते ते (for इत्येते वै); (२)अवमत्य (३)यद्येतेभ्यो (for तैस्त्वं); मुच्यते (ऽ)निष्टं, (४) प्राप्स्यसि; जीव एषः; सत्यमेव; जीवितं च; जीवनं च; जीवमानः.
(०३)(२) द्विज-तीन् (for पदां) (३)यथानीकं; (४) संनिरुद्धाः; ते निगृह्य; .

**युधिष्ठिरादीनांजयद्रथादिभिरायोधनम् ।। १ ।। जयद्रथेन भीमादिभिः स्वसहायनांनिधने द्रौपदीविमोजनपुर्वकं पलायनम् ।। २ ।। भीमार्जुनाभ्यां परुषोक्तिपूर्वकं तदनुधावनम् ।। ३ ।।**

### वैशम्पायनः

सन्तिष्ठत प्रहरत तूर्णं विपरिधावत।
**इति स्म सैन्धवो राजा चोदयामास तान्नृपान् ।। १ ।।** (०१)

ततो घोरतमः शब्दो रणे समभवत्तदा।
**भीमार्जुनयमान्दृष्ट्वा सैन्यानां सयुधिष्ठिरान् ।। २ ।।** (०२)

शिबिसौवीरसिन्धूनां विषादश्चाप्यजायत।
**तान्दृष्ट्वा पुरुषव्याघ्रान्व्याघ्रानिव बलोत्कटान् ।। ३ ।।** (०३)

है(हे)मचित्रसमुत्सेधां सर्वशैक्यायसीं गदाम्।
**प्रगृह्याभ्यद्रवद्भीमः सैन्धवं कालचोदितम् ।। ४ ।।** (०४)

तदन्तरमथावृत्य कोटिकास्योऽभ्यहारयत्।
**महता रथवंशेन परिवार्य वृकोदरम् ।। ५ ।।** (०५)

शक्तितोमरनाराचैर्वीरबाहुप्रचोदितैः।

---

(०१) ( सं (आ)तिष्ठध्वं (for ष्ठत); (२) द्रुतं; तूष्णीं (for तूर्णं); दुवन्ति परिं; तूर्ण न परिं; (३) तस्मिन् (for इति); स; वै (for स्म); (४) सैनिकान् (for ताघृपान्);.

(०२)( घोरतमः (४) ससैन्यान् (for सैन्यानां);.

(०३)( शिबिसौवीरसिन्धूनां; (२) चोपजायते; समजायत (३) तान्दृष्ट्वा पुरुषाङ्शूरान् (४) अतीव च (for व्याघ्रा-निव); मदों (for बलों); .

(०४) ( हेमबिन्दुसमुं; हेमबन्धसमु; हेमबिन्दुं महोत्सेधां; हेमबिन्दुमयोत्सेधां (२) सैक्यां (३) प्राद्रं (for (अ) भ्यद्रं (४) सैन्धवं काममोहितं; .

(०५) ( तदन्तरं समासाद्य (for विश्य); तयोरं (तोनं) तरमासाद्य (२) कोटिकाश्वो; कास्यो; काख्यो; व्यदाहरत्; ह्यधारयत्; ह्यवां; न्यवां; (ऽ)भ्यवा (३) महता शरवर्षेण;.

**कीर्यमाणोऽपि बहुभिर्न स्म भिमोऽभ्यकम्पत ।। ६ ।।** (०१)

**गजं तु सगजारोहं पदातींश्च चतुर्दश ।**
**जघान गदया भीमः सैन्धवध्वजिनीमुखे ।। ७ ।।** (०२)

**लक्षालङ्कारः - पदातींश्च चतुर्दश इत्यत्र एकैकगजरक्षकान् चतुर्दश चतुर्दश पदातीन् ।**

**पार्थः पञ्च शतान्शूरान्पा(प)र्वतीयान्महारथान्।**
**परीप्समानः सौवीरं जघान ध्वजिनीमुखे ।। ८ ।।** (०३)

**राजा स्वयं सुवीराणां प्रवराणां प्रहारिणाम्।**
**निमेषमात्रेण शतं जघान समरे तदा ।। ९ ।।** (०४)

**ददृशे नकुलस्तत्र रथात्प्रस्कन्द्य खड्गधृक्।**
**शिरांसि पादरक्षाणां बीजवत्प्रवपन्मुहुः ।। १० ।।** (०५)

**सहदेवस्तु सन्धा(या)य रथेन गजयोधिनः।**
**पातयामास नाराचैर्द्रुमेभ्य इव ब्रार्हिणः ।। ११ ।।** (०६)

**ततस्त्रिगर्तः सधनुरवतीर्य महारथान्(त)।**
**गदया चतुरो वाहान्राज्ञस्तस्य तदावधीत् ।। १२ ।।** (०७)

---

(०१)( यष्टि (४)स; च (for स्म); व्यकम्पत; व्यकम्पयत्; (ऽ)प्यर्कपत;.

(०२)( च (for तु); (२) पदातांश्च; पादातांश्च; सहस्रशः (for चतुर्दश); (३)वीरः (for भीमः); (४) सैन्धवस्य महारणे; .

(०३) ( पञ्चाशतं; पञ्च-रथाञ्; पञ्चशतं वीरान् (for शूरान्); (३) परीप्समानान् सौवीरञ्जू);.

(०४) ( युधिष्ठिरः; स्वयं राजा स (for सु); (२) प्रवीराणां महीभुजां (for प्रहां); (४) शतं; तथा (for तदा) जघानाजौ युधिष्ठिर .

(०५)( नकुलोपि (थ); क-ख-घ-तदा क्रुद्धो (२) खड्गभृत्; वित्; धृत् (३) शतानि(for शिरांसि); (४) प्रावपन्; प्रावपद् भुवि (for मुहुः);.

(०६) ( संवार्य; जघ्ने; प्राप्य; धाय; ग्रामे (for याय); (२) शतं (for गजं);.

(०७) ( सु (for स); (२) रथोत्तमात् (for महारथात्); (३) वीरान् (for वाहान्); (४) सर्वान् (for

तमभ्याशगतं राजा पदातिं कुन्तिनन्दनः।
अर्धचन्द्रेण बाणेन विव्याधोरसि धर्मराट् ।। १३ ।। [०१]

स भिन्नहृदयो वीरो वक्राच्छोणितमुद्वमन्।
पपाताभिमुखः पार्थं छिन्नमूल इव द्रुमः ।। १४ ।। [०२]

इन्द्रसेनद्वितीयस्तु रथात्प्रस्कन्द्य धर्मराट्।
हताश्वः सहदेवस्य प्रतिपेदे महारथम् ।। १५ ।। [०३]

नकुलं त्वभिसन्धाय क्षेमङ्करमहामुखौ।
उभावुभयतस्तीक्ष्णैः शरवर्षैरवर्षताम् ।। १६ ।। [०४]

तौ शरैरभिवर्षन्तौ जीमूताविव वार्षिकौ।
एकैकेन विपाठेन जघ्ने माद्रवतीसुतः ।। १७ ।। [०५]

लक्षालङ्कारः - विपाठेन शरेण ।

त्रिगर्तराजः सुरथः तस्याथ रथधूर्गतः।
रथमाक्षेपयामास गजेन गजयानवित् ।। १८ ।। [०६]

नकुलस्त्वपभीस्तस्माद्रथाच्चर्मासिपाणिमान्।
उद्भ्राम्य(द्भ्रान्तं) स्थानमास्थाय तस्थौ गिरिरिवाचलः ।। १९ ।। [०७]

---

तस्य); राज्ञस्त स्यावधीत्पुनः;.

(०१)( अभ्याशे गतं; अभ्यासे गतं; अभ्यासं; अथाभ्यां (२) पदातिः पाण्डुं (for कन्तिं);.

(०२) ( धीरो (२) उद्वहन् (३)(अ)भिमुखं तस्य (for पार्थं); पपात सहसा भूमौ; भिमुखं प्राप्तश् (४)जीर्णं (for छिन्नं);.

(०३) (३); अथास्य; हताश्वात्;.

(०४)( त्वभिसंयाय; त्वभिसम्प्राप्य; चापि संवार्य; त्वभिसंवार्य (२) सु-मालवौ; महामलौ (४) अवाकिरत् (for अवर्षताम्); .

(०५) ( तोमरैर्; तौ शराव् अभिवर्षन्तां (२) पार्थिवौ (for वार्षिकौ); (३) एकैकेनैव बाणेन;.

(०६)(२) गजधूर्गतः; गजयूथपः तत्पार्श्र्वगजधूर्गतः (३) आरोपं (for आक्षेपं) (४) न गजयूथवत्;.

(०७) ( तम- भीस् त्वपतत् (for त्वपभीसू); (२); खड्गधृक् (for पाणिमान्); (३) उद्राम्य उद्धान्तः.

सुरथस्तं गजवरं वधाय नकुलस्य तु।
प्रेषयामास सक्रोधमत्युच्छ्रितकरं ततः ।। २० ।। (०१)

नकुलस्तस्य नागस्य समीपे(प) परिवर्तिनः।
सविषाणं भुजं मूले खड्गेन निरकृन्तत ।। २१ ।। (०२)

स विनद्य महानादं गजः किङ्किणिभूषणः।
पतन्नवाक्शिरा भूमौ हस्त्यारोहमपोथयत् ।। २२ ।। (०३)

स तत्कर्म महत्कृत्वा शूरो माद्रवतीसुतः।
भीमसेनरथं प्राप्य शर्म लेभे महारथः ।। २३ ।। (०४)

भीमस्त्वापततो राज्ञः कोटिकास्यस्य सङ्गरे।
सूतस्य नुदतो वाहान्क्षुरेणापाहरच्छिरः ।। २४ ।। (०५)

न बुबोध हतं सूतं स राजा बाहुशालिना।
तस्याश्वा व्यद्रवन्सङ्ख्ये हतसूतास्ततस्ततः ।। २५ ।। (०६)

विमुखं हतसूतं तं भीमः प्रहरतां वरः।

---

(०१)( सुरथस्थं (२) रथाय (for वधाय); च (for तु); (३) सङ्क्रुद्धम् (४) अत्युं (for अम्भ्युं); तदा; तथा;.

(०२) ( राज्ञस्य (for नागं); (३) परं (for भुजं); मूलं; मूलात् (४) निकृतं ततः; विनिकृन्तत;.

(०३)(२); किङ्किणिं; कण्टकं; कङ्कटं; कनकं; धण्टाविं (for कङ्कणं); (३) पपा-ताथ (for पतन्नवाक्); राजन् (for भूमौ); (४) क-दन्तौ मोहादपोथयत् ,ख-हस्तान्मोहादपोथयत्, घ-प्राणांस्तत्याज संयुगे, दन्तमोहाद्; हस्तिगोपान्; हस्तमोहाद्; हस्त्या-रोहम्;.

(०४)( स तत्कृत्वा महत्कर्म (४) परन्तपः (for महां); .

(०५) (२) कोटिकाश्वस्य; स्वस्य; ख्यस्य; ख्येन (३)ख-सूतस्य तु ततो बाणं विससर्ज चमूमुखे । स बाणस्तत्र तीश्णाग्रो वेगेनापाहरच्छिरः । ल बुबोध हते सूतं स राजा बाहुशालिना ।, तुदतो; तु ततो; नकुलो (for नुदतो); (४) शरेण (for क्षुरेण); (अ)पहरच् क्षुरप्रेणाहरच्छिरः;.

(०६) ( बुधोपहतं; प्रबोधहतं (२) बहुशालिना; बा (ब)हुशालिनः (३) अश्वः प्राद्रवत्; व्यद्रवत्; (अ) भ्याद्रवन्; ह्यद्रवन्; प्राद्रवन्; (अ)भ्यद्रवन्; व्याद्रवन् संस्वे (४) इतस्ततः (for ततस्ततः) हतसूतरथास्ततः (for थे स्थितः); .

जघान तलयुक्तेन प्रासेनाभ्येत्य पाण्डवः ।। २६ ।। (०१)

- तदा तु सम्प्रवृत्ते तु तुमुले योधसङ्क्ये ।

*अधिकपाठः

अङ्गारकः कुञ्जरश्च सञ्जयो गुप्तकस्तथा ।

शत्रुञ्जयः सुप्रबुद्धो शुभकृद्भ्रमका अपि ।

शूरः पराकुः कुहको द्वादशैते महारथाः ।

सुबलाः सैन्धवाश्चैव त्रिगर्ताश्च महाबलाः ।

इक्ष्वाकुयोधाः प्रबला रथिनः सह यद् द्विपाः ।

कोटीकृत्य च पार्थं तु शरवर्षैरवाकिरन् ।

अर्जुनस्तु ततः क्रुःद्धः शरवर्षं निहत्य च ।

द्वादशानां तु सर्वेषां सौवीराणां धनञ्जयः।
चकर्त निशितैर्भल्लैर्धनूंषि च शिरांसि च ।। २७ ।। (०२)

शिबीनिक्ष्वाकुमुख्यांश्च त्रिगर्तान्सैन्धवानपि।
जघानातिरथः सङ्ख्ये बाणगोचरमागतान् ।। २८ ।। (०३)

सादिताः प्रत्यदृश्यन्त बहुशः(बहवः) सव्यसाचिना।
सपताकाश्च मातङ्गाः सध्वजाश्च महारथाः ।। २९ ।। (०४)

प्रच्छाद्य पृथिवीं तस्थुः सर्वमायोधनं प्रति।
शरीराण्यशिरस्कानि विदेहानि शिरांसि च ।। ३० ।।

---

(०१)( विरथं (for मुखं); (३) मुक्तेन (for युक्तेन); निजघानाति-यत्नेन; निजघान रथस्थेन (४) (आ)वृत्य (for (अ) भ्येत्य); .

(०२) (१ २) वीराणां (for सर्वेषां); सर्वेषां वा (for सौवीराणां);(३) बाणैर्; फलैर्; .

(०३) ( वीरांश्च (for मुख्यांश्च); (३) रथिनः (for (अ)तिरथः); सङ्घे;.

(०४)( सागताः; सूदिताः (२) बहुधा; बलिना (for बहवः); .

श्वगृध्रकङ्ककाकोलभासगोमायुवायसाः।
अतृप्यंस्तत्र वीराणां हतानां मांसशोणितैः ।। ३१ ।।

एवं तीक्ष्णशरज्वालैर्गाण्डवानल चोदितैः।
सेनेन्धनं ददाहाशु सरोषः पार्थपावकः।

चक्राणां पतितानां च युगानां च महीपते।
तूणीराणां पताकानां ध्वजानां च रथैस्सह ।

ईषाणमनुकर्षाणां त्रिवेणूनां तथैव च।
अक्षाणामथ योक्त्रणां प्रतोदानां च राशयः।

शिरसां पतितानां च कुण्डलोष्णीषधारिणाम्।
भुजानां च मकुटानां च हाराणामङ्गदैस्सह ।

छत्राणां व्यजनानां च चर्माणां वर्माणां तथा।
छिन्नानां कार्मुकानां च पट्टसानां तथैव च ।

शक्तीनामथ खड्गानां दण्डानां सह तोमरैः।
राशयश्चात्र दृश्यन्ते तत्र तत्र विशाम्पते।

पतितैश्चैव मातङ्गैः सयोधैः पर्वतोपमैः।
हयैर्द्विधाकृतैः सार्धं सादिभिः सायुधैस्तथा।

विप्रविद्धैः रथैश्चैव निहतैश्च पदातिभिः।
आगम्यरूपा पृथिवी मांसशोणितकर्दमा।(०१)

हतेषु तेषु वीरेषु सिन्धुराजो जयद्रथः।

---

(०१)(१२) सगृध्रकङ्कं; श्वगृध्रकङ्ककोलोकभासं; श्वगृध्रकङ्ककाकोला भासागोमायुं; श्वकङ्कगृध्राः पृथुला भासं; श० ागृध्रकङ्ककाकोलश्येनगोमायुं; श्वगृध्रकङ्कगोमायु- काकोलूकाः सवायसाः; श्वकङ्कगृध्रकाकोलं; श्वकाकगृध्रकाकोल (गाकोलो) भासं.

विमुच्य कृष्णां सन्त्रस्तः पलायनपरोऽभवत् ।। ३२ ।। (०१)

विद्राव्यमाने सैन्ये तु मकरैरर्णवो यथा ।

स तस्मिन्सङ्कुले सैन्ये द्रौपदीमवतार्य ताम्।
प्राणप्रेप्सुरुपाधावद्वनं येन नराधमः ।। ३३ ।। (०२)

द्रौपदीं धर्मराजस्तु दृष्ट्वा धौम्यपुरस्कृताम्।
माद्रीपुत्रेण वीरेण रथमारोपयत्तदा ।। ३४ ।। (०३)

ततस्तद्विद्रुतं सैन्यमपयाते जयद्रथे।
आदिश्यादिश्य नाराचैराजघान वृकोदरः ।। ३५ ।। (०४)

सव्यसाची तु तं दृष्ट्वा पलायन्तं जयद्रथम्।
वारयामास निघ्नन्तं भीमं सैन्धवसैनिकान् ।। ३६ ।।

**अर्जुनः**

यस्यापचारात्प्राप्तोऽयमस्मान्क्लेशो दुरासदः।
तमस्मिन्समरोद्देशे न पश्यामि जयद्रथम् ।। ३७ ।। (०५)

मूढं नैकृतिकं दुष्टं द्रौपद्याक्लेशकारिणम्।

तमेवान्विष भद्रं ते किं ते योधैर्निपातितैः।

---

(०१) (३) मनां (for परों);.

(०२)( आकुले (for सङ्कुले); (२) अपहाय वै अवतार्य तां; र्य च; (४)ये च; वीरो; तत्र (for येन); नराधिपः; जनाधिपः वनायैव नराधिपः;.

(०३)(२) कृत्वा (for दृष्ट्वा पुरःसरां; धौम्य दृष्टिपुरस्कृता (३) माद्रीसुतेन (४) आरोहयत् ततः(for तदा); .

(०४) ( तं; तु (for तद्); विहतं (२) उपयाते; (३) नाराचान्; (४) निचखान; निर्जघान; निजघान(for आजघान);.

(०५) (अ)पराधात् (२)अस्मत्-; अस्याः; अस्मात् (for अस्मान्) (४) क्लेशोस्माकं (for अस्मान्क्लेशो); (३)स तस्मिन्; एतस्मिन् (for तमस्मिन्); शरणोद्देशे (४) पश्याम;.

**अनामिषमिदं कर्म कथं वा मन्यते भवान्  ॥ ३८ ॥** [०१]

**लक्षालङ्कारः - अनामिषमिदं कर्म इत्यत्र अनामिषं हननादिना अस्माकं तृप्ति- करत्वात् आमिषस्थानीयजयद्रथरहितम् इदं कर्म योधहननाख्यं कर्म ।**

## वैशम्पायनः

इत्युक्तो भीमसेनस्तु गुडाकेशेन धीमता।
**युधिष्ठिरमभिप्रेक्ष्य वाग्मी वचनमब्रवीत्  ॥ ३९ ॥** [०२]

हतप्रवीरा रिपवो भूयिष्ठं विद्रुता दिशः।
**गृहीत्वा द्रौपदीं राजन्निवर्ततु भवानितः  ॥ ४० ॥** [०३]

यमाभ्यां सह राजेन्द्र धौम्येन च महात्मना।
**प्राप्याश्रमपदं राजन्द्रौपदीं परिसान्त्वय  ॥ ४१ ॥** [०४]

न हि मे मोक्ष्यते जीवन्मूढः सैन्धवको नृपः।
**पातालतलसंस्थोऽपि यदि शक्रोऽस्य सारथिः  ॥ ४२ ॥** [०५]

## युधिष्ठिरः

न हन्तव्यो महाबाहो दुरात्मापि स सैन्धवः।

---

(०१)(क-अनामिषमिदं, अन्वेष; अन्विच्छ (२)नो; तैर् (for ते); अमानुषम्; अनामृष्यम्; अनार्याणाम् (for अनामिषम्); अनामकं कर्म कथं (४) कर्तुं वै (for कथं वा),

(०२) (२) भारत (for धीमतो); (३) अभिप्रेत्य (४) वाडन्नी; इदं; .

(०३) भीमः ( बहवो (for रिपवो); (२) भूयिष्ठं वि (प्र) द्रुतं बलं (३) प्रगृह्य (for गृहीत्वा) (४) इति (for इतः);.

(०४) (२); तु (for च); (४) परिसान्त्वयन्; .

(०५)( मे मोक्षसे; संमोक्ष्य('क्ष); मोक्ष्यति मे; मूढो; वीर(for जीवन्); (२) वीर (for मूढः); (४) शक्रस्य (for शक्रोऽस्य);.

दुःशलामभिसंस्मृत्य गान्धारीं च यशस्विनीम् ।। ४३ ।। (०१)

**वैशम्पायनः**

तच्छ्रुत्वा द्रौपदी भीममुवाच व्याकुलेन्द्रिया।
कुपिता ह्रीमती प्राज्ञा पती भीमार्जुनावुभौ ।। ४४ ।। (०२)

**द्रौपदी-**

कर्तव्यं चेत्प्रियं मह्यं वध्यः स पुरुषाधमः।
सैन्धवापसदः पापो दुर्मतिः कुलपांसनः ।। ४५ ।। (०३)

भार्याभिमर्ष्टा निर्वैरी यश्च राज्यापहारकः ।
याचमानोऽपि सङ्ग्रामे न मोक्तव्यः कथञ्चन ।। ४६ ।। (०४)

लक्षालङ्कारः - भार्याभिमर्ष्टा निर्वैर इत्यत्र भार्याभिमर्ष्टा यश्च राज्यापहारकः, स निर्वैरः सङ्ग्रामे याचमानोऽपि जीवितुं नार्हति ।

**वैशम्पायनः-**

इत्युक्तौ तौ नरव्याघ्रौ ययतुर्यत्र सैन्धवः।
राजा निववृते कृष्णामादाय सपुरोहितः ।। ४७ ।। (०५)

स प्रविश्याश्रमपदमपविद्धबृसीकट(मठ)म्।
मार्कण्डेयादिभिर्विप्रैरनुकीर्णं ददर्श ह ।। ४८ ।। (०६)

---

(०१)(२) चापि (for (अ)पि स) (३)अपि संस्मृत्य; अभि-(भीम) सम्प्रेक्ष्य;.

(०२) ( साध्वी (for भीमम्); (३) बाला (for प्राज्ञा); कुपिताङ्गी गत-प्रज्ञा (नरव्याघ्र); कुपिता स्त्री महाप्राज्ञा; .

(०३) द्रौपदी (२) हि (for चेत्); (३) पंशदः (४)दुर्बुद्धिः (for दुर्मतिः); .

(०४) ( भार्या विहर्ता; र्या हि हर्ता; पहर्ता; भिमन्ता; वमन्ता; र्या हि मन्ता; यः पापो; वै भीमो; (२) वैरी यो; निर्वीर्यो; निर्वीरो (४) न मोक्तव्यः कथञ्चन (च नः);.

(०५) वैशं; (२) पर्यनप्यत सैन्धवः; (३) निवर्तते;.

(०६) ( विवेशां (for प्रविश्यां); (२) वृषी (वृशी)धटं; वृषीमठं; विप्रविद्धवृषी(सी)मठं; अपविद्धवृसी(षी) मठं; अपविद्धवृसीकटं; अप्रसिद्धवृषीमठं; हापविद्धबृषीकटं (४) अनुकीर्णैर्; अवकीणं; समन्ततः; सहस्रशः (for

द्रौपदीमनुशोचद्भिर्ब्राह्मणैस्तैः समाहितैः।
समियाय महाप्राज्ञः सभार्यो भ्रातृमध्यगः ।। ४९ ।। (०१)

ते स्म तं मुदिता दृष्ट्वा पुनरत्यागतं नृपम्।
जित्वा तान्सिन्धुसौवीरान्द्रौपदीं चाहृतां पुनः।(०२)

स तैः परिवृतो राजा तत्रैवोपविवेश ह ।। ५० ।।

लक्षालङ्कारः - ते स्म तं मुदिता दृष्ट्वा इत्यत्र दृष्ट्वा मुदिता इति सम्बन्धः ।

प्रविवेशाश्रमं कृष्णा यमाभ्यां सह भामि(वि)नी ।। ५१ ।। (०३)

भीमसेनार्जुनौ चापि श्रुत्वा क्रोशगतं रिपुम्।
स्वयमश्वांस्तुदन्तौ तौ जवेनैवाभ्यधावताम् ।। ५२ ।। (०४)

इदमत्यद्भुतं चात्र चकार पुरुषोऽर्जुनः।
क्रोशमात्रगतानश्वान्सैन्धवस्य जघान यत् ।। ५३ ।। (०५)

स हि दिव्यास्त्रसम्पन्नः कृच्छ्रकालेऽप्यसम्भ्रमः।
अकरोद्दुष्करं कर्म शरैरस्त्रानुमन्त्रितैः ।। ५४ ।। (०६)

ततोऽभ्यधावतां वीरावुभौ भीमधनञ्जयौ।

---

ददर्श ह);.

(०१) (२) समन्ततः; समाहितैः; हितः (३) समेयाय महाबाहुः; प्राज्ञैः; (४) भृत्यमध्यगः धर्मनन्दनः; भ्रातृनन्दनः;.

(०२) ( तं बुदितं; प्रबुदिताः तां मुदितां; भृत्यैः सपदि तं दृष्ट्वा; (२)प्रत्यां (for अभ्यां); (३) च (for तान्); (४) च (आ)गतां (for (आ)हृतां);.

(०३) (२) च (for ( ए) व); (४) भाविनी;.

(०४) ( अपि श्रुत्य; अभिक्रुद्धौ; च सङ्क्रुद्धौ भीमसेनार्जुनौ चापि; (२)श्रुत्वा क्रोशगतं रिपुं; क्रोशमात्रं रिपुं गतं (३) चोदयन्तौ (for तुदन्तौ तौ); (४) (अ)थाभ्यं; ह्यभ्यं (for (ए)वाभ्यं);.

(०५)

(०६) (२); कृच्छ्र(कष्ट); कालेष्वसम्भ्रमः ’ष्वसम्भ्रमन् (४) अस्त्राभिमन्त्रितैः .

हताश्वं सैन्धवं भीतमेकं व्याकुलचेतसम् ।। ५५ ।।[०१]

सैन्धवस्तु हतान्दृष्ट्वा तथाऽश्वान्स्वान्सुदुःखितः
रथात्प्रस्कन्द्य पद्भ्यां वै पलायनपरोऽभवत् ।। ५६ ।।

दृष्ट्वा विक्लवकर्माणि कुर्वाणं च धनञ्जयम्।
पलायनकृतोत्साहः प्राद्रवद्येन वै वनम् ।। ५७ ।।[०२]

- रथात्प्रस्कन्द्य पद्भ्यां वै पलायनपरोऽभवत् ।[०३]

सैन्धवं त्वभिसम्प्रेक्ष्य पराक्रान्तं पलायने।

लक्षालङ्कारः - दृष्ट्वा विक्लवकर्माणि इत्यत्र विक्लवो भीतः तस्य कर्माणि स्खलन-पतनादीनि ।

अनुयाय महाबाहुः फाल्गुनो वाक्यमब्रवीत् ।। ५८ ।।[०४]

**अर्जुनः-**

अनेन वीर्येण कथं स्त्रियं प्रार्थयसे बलात्

राजपुत्र निवर्तस्व न ते युक्तं पलायनम्।
कथं ह्यनुचरान्हित्वा शत्रुमध्ये पलायसे ।। ५९ ।।[०५]

**वैशम्पायनः-**

इत्युच्यमानः पार्थेन सैन्धवो न न्यवर्तत ।। ६० ।।

तिष्ठ तिष्ठेति तं भीमः सहसाभ्यद्रवद्बली।
मा वधीरिति पार्थस्तं दयावान्प्रत्यभाषत ।। ६१ ।।

---

(०१)( दृष्ट्वा (for वीरौ); (४) अवेक्ष्याकुलं.
(०२)(२) तान्सदश्वान्; तत्राश्वान्स्वान्; तत्राश्वान्भृशदःखितः .
(०३) (३) दृष्ट्वा विक्रम्य कर्माणि; अतिविक्रम(for मानुष)कर्माणि; सैन्धवं (for वै वनं) प्राद्रवन्वै वनं ततः; प्रायाद्येव वनं प्रति;.
(०४) (३)अनुज्ञाय; अन्वधावन् अनुयात्वा महाप्राज्ञः (४) फाल्गुनो; .
(०५) (२);स्त्रियं बलात् (३) वानुं; हानुं; त्वानु(for चानुं); प्रधावसि (for पलां);.

**अर्जुनेन च धीमता । सैन्धवोऽपि च पापात्मा** (०१)

अस्मिन् पर्वणि २२५अध्याये ६१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि द्रौपदीहरणपर्वणि जयद्रथपलायने पञ्चविंशत्यधिकद्विशततमोऽध्यायः ।। २२५ ।।

# २२६. षड्विंशत्यधिकद्विशततमोऽध्यायः

**भीमेन केशग्रहणेन निपातितस्य जयद्रथस्य मूर्ध्नि पादप्रहारपूर्वकं श्रुरप्रेण पञ्चचूडीनिर्माणम् ।। १ ।। भीमेन बन्धनपूर्वकमानीतस्य तस्य युधिष्ठिरेण मोजनम् ।। २ ।। जयद्रथेन तपःप्रसादितान्महादेवादर्जुनवर्जमेकस्मिन्दिने पाण्डवजयरूपवरा....दानम् ।। ३ ।।**

**वैशम्पायनः**

जयद्रथस्तु सम्प्रेक्ष्य भ्रातरावुद्यतावुभौ।
प्राधावत्तूर्णमव्यग्रो जीवितेप्सुः सुदुःखितः ।। १ ।।

लताभिः संवृते कक्षे किरीटं रत्नभास्वरम्।
अपविध्य प्रधावन्तं निलीयन्तं वनान्तरे।

भीमसेनस्तु तं कक्षे नियमानं भयाकुलम्।
मार्गमाणोऽवतीर्याशु रथाद्रत्नविभूषितात्।(०२)

---

(०१) (२); यातीति (for सैन्धवो); नाभ्यं; न निं (for न न्यं); (४)प्राद्रवद् (for (अ) (अ)भ्यङ्गं) (५) मावधीद् तु (for तं); (६) प्रत्यं (for अभ्यं); .
(०२) ( सम्प्राप्य; तं प्रेक्ष्य (२) वुद्यतावुभौ; (३) प्राधावत् (for प्राद्रां); आधूर्णो (for अव्यग्रो);.

तं भीमसेनो धावन्तमवतीर्य रथाद्बली।
अभिद्रुत्य निजग्राह केशपक्षे ह्यमर्षणः ।। २ ।। (०१)

समुद्यम्य च तं भीमो निष्पिपेष महीतले।
शिरो गृहीत्वा राजानं ताडयामास चैव हि ।। ३ ।। (०२)

पुनः सञ्जीवमानस्य तस्योत्पतितुमिच्छतः।
पदा मूर्ध्नि महाबाहुः प्राहरद्विलपिष्यतः ।। ४ ।। (०३)

तस्य जानू ददौ भीमो जघ्ने चैनमरत्निना।
स मोहमगमद्राजा प्रहारवरपीडितः ।। ५ ।। (०४)

लक्षालङ्कारः - जघ्ने चैनमरत्निना इत्यत्र 'अरत्निस्तु निष्कनिष्ठेन मुष्टिना' इत्यमरः । अतिदृढमुष्ट्याघाते सति मरिष्यतीति भीत्या कनिष्ठाङ्गुलि- रहितमुष्टिना ।

सरोषं भीमसेनं तु वारयामास फाल्गुनः।
दुःशालायाः कृते राजा यत्तदाहेति कौरवः(व) ।। ६ ।। (०५)

**भीमसेनः**

नायं पापसमाचारो मत्तो जीवितुमर्हति।
कृष्णायास्तदनर्हायाः परिक्लेष्टा नराधमः ।। ७ ।। (०६)

किं नु शक्यं मया कर्तुं यद्राजा सततं घृणी।

---

(०१) (२) क-ख-घ-धावन्तं, जयद्रथं च जग्राह; अभिद्रुत्याभिजं; अभिद्रुतं तं जं (४) क्षे ह्यमर्षणः; .
(०२) ( भीमो (for रोषान्); (३) शिरो (for गले); (४) त्रासयामास; भ्रामं; पातं; पोथं चैव हि; भूतले;.
(०३) ( पुनः स जीव-मासाद्य (२) सद्योत्पतितुं; सद्योत्पादितुं; (४) प्राहनद्; .
(०४) ( जानु; जानू तदा (for ददौ); (२) जघान (for जघ्ने च); चैवम् जघ्ने
चैवमरत्रिणा (३) राजन् (४) बलं; परिं (for वरं);.
(०५) ( विज्ञप्ति; विक्रोशं; विरोषो; सरोषं (२) स्मारं (for वारं); फाल्गुनः (४) त्वाम् (for तदा); (उ)वाच (for (आ)हेति); स (for (इ)ति); कौरवः; धर्मराट्;.
(०६)भीम उं भीमः (२) मर्त्यो; मुक्तो (for मत्तो); भवितुं (for जीवितुं); (३) कृष्णायास् (for द्रौपद्यास्); (म) नार्हायाः; यस्त्वनर्हायाः;.

त्वं च बालिशयाबुद्ध्या सदैवास्मान्प्रबाधसे ।। ८ ।। (०१)

**वैशम्पायनः-**

एवमुक्त्वा सटास्तस्य पञ्च चक्रे वृकोदरः।
अर्धचन्द्रेण बाणेन किञ्चिदब्रुवतस्तदा।(०२)
विकत्थयित्वा राजानं ततः प्राह वृकोदरः ** ।। ९ ।।

**भीमः-**

जीवितुं चेच्छसे मूढ हेतुं मे गदतः शृणु ।। १० ।। (०३)

लक्षालङ्कारः - विकल्पयित्वा शिरसि पञ्चधाराकरणेन विकारं कल्पयित्वा ।

तं तथा न विचेष्टन्तमबुध्वाप वृकोदरः ।(०४)

दासोऽस्मीति तथा वाच्यं संसत्सु च सभासु च ।
एवं चेज्जीवितं दद्यां एष युद्धजितो विधिः ।। ११ ।। (०५)

लक्षालङ्कारः - संसत्सु सुसभासु च इत्यत्र सं सम्यक् सन्तो यासु ताः संसतः तासु ।

**वैशम्पायनः-**

एवमस्त्विति तं राजा कृष्यमाणो जयद्रथः।
प्रोवाच पुरुषव्याघ्रं भीममाहवशोभिनम् ।। १२ ।। (०६)

तत एनं विचेष्टन्तं बद्ध्वा पार्थो वृकोदरः।

---

(०१)(२)स(for यद्); (३) तु (for च); (४)सततं स्म; यततो स्मान् प्रभाषसे; .
(०२) वैशं उं (वैशं') ( सटा चक्रे (for तस्य); (२) तस्य पञ्च वृकों (४) ब्रुवतं; उद्रवतं (अब्रुं) मुण्डयित्वा शिरस्तथा; .
(०३)( विकल्पबुद्ध्या; विकत्थं; विरूपं (२) त्वाह (for प्राह); .
(०४) (२) जीवितं; जीवित्वं (४) ह्येतन् (for हेतुं) वदतः .
(०५) ( तथा (for त्वया); (२) सस्तु चैव (for संसत्सु च); (३) चेत् (for ते); (४)ते युज्यते; युद्धजिते;.
(०६)(२) कृष्यमाणो; कृच्छ्रप्राप्तो जितेन्द्रियः (for जयं); (४) शोभनं; शोभितं दासोहं वो वृकोदर .

रथमारोपयामास विसञ्ज्ञं पांसुगुण्ठितम् ॥ १३ ॥ [०१]

ततस्तं रथमास्थाय भीमः पार्थानुगस्तदा।
अभ्येत्याश्रममध्यस्थमभ्यगच्छद्युधिष्ठिरम् ॥ १४ ॥ [०२]

दर्शयामास भीमस्तु तदवस्थं जयद्रथम्।
स(तं) राजा प्राहसद्दृष्ट्वामुच्यतामिति चाब्रवीत् ॥ १५ ॥ [०३]

राजानं चाब्रवीद्भीमो द्रौपद्याः कथ्यतामिति।
दासभावगतो ह्येष पाण्डूनां पापचेतनः।[०४]
तमुवाच ततो ज्येष्ठो भ्राता सप्रणयं वचः ** ॥ १६ ॥

**युधिष्ठिरः-**

मुञ्चैनमधमाचारं प्रमाणा यदि ते वयम् ।[०५]

**वैशम्पायनः-**

द्रौपदी चाब्रवीद्भीममभिप्रेक्ष्य युधिष्ठिरम् ** ॥ १७ ॥

**द्रौपदी-**

दासोऽयं मुच्यतां राज्ञस्त्वया पञ्चसटः कृतः ॥ १८ ॥

एवमुक्तस्सभीमस्तु भ्रात्रा चैव च कृष्णया।
मुमोच तं महापापं जयद्रथमचेतनम्।[०६]

---

(०१)(३) पाशैर् (for पार्थो); (४) पांशुगुण्ठितं; पांसुकुण्ठितं; .

(०२)(२); तथा (३)अग्र्यम् (for अभ्येत्य);.

(०३)( बीभत्सुम् (२) युधिष्ठिरं (for जयं); (३) प्राह स दृष्ट्वा; प्राह सन्दृष्ट्वा; प्रहसन्दृष्ट्वा; तं दृष्ट्वा प्राहसद्राजा;.

(०४)(२) द्रौपदी ' दीं); कथयत्विति; द्रौपद्याः कथ्यता मिति (४) चेतसः .

(०५) ( युधां श्रेष्ठो; ततो हृष्टो (२) राजा (for भ्राता); (अ)सौ (for स); (३) मुञ्चेमम् (४) प्रमाणा;.

(०६)(२) अभिगम्य; वीक्ष्य वि (for ऽयं); राजन्; पापः (for राज्ञः) (४) पञ्चशिरः; शिखः त्वया पञ्च-सटाः कृताः .

- एवमुक्तः स भीमस्तु भ्रात्रा चैव च कृष्णया ।

मुमोच तं महापापं जयद्रथमचेतसम् ।;

- स्म मुमोऽचैवमुक्तस्तु भीमस्तं बन्धनात्तदा ।

**वैशम्पायनः-**

स मुक्तोऽभ्येत्य राजानमभिवाद्य युधिष्ठिरम्।
ववन्दे विह्वलो राजंस्तांश्च दृष्ट्वा मुनींस्तदा ।। १९ ।। (०१)

तमुवाच घृणी राजा धर्मपुत्रो युधिष्ठिरः।
तथा जयद्रथं दृष्ट्वा गृहीतं सव्यसाचिना ।। २० ।।

**युधिष्टिरः-**

अदासो गच्छ मुक्तोसि मैवं कार्षीः पुनः क्वचित्।
स्त्रीकामुक धिगस्तु त्वां क्षुद्रः क्षुद्रसहायवान् ।। २१ ।।

लक्षालङ्कारः - अदासो गच्छ इत्यत्र अदासः अस्मन्निकटे दास्यकर्माकुर्वन् ।

एवंविधं हि कः कुर्यात्त्वदन्यः पुरुषाधमः।
कर्म धर्मविरुद्धं वै लोकदुष्टं च दुर्मते(कर्म ते) ।। २२ ।। (०२)

**वैशम्पायनः-**

गतसत्त्वमिव ज्ञात्वा कर्तारमशुभस्य तम्।
त(स)म्प्रेक्ष्य भरतश्रेष्ठः कृपां चक्रे नराधिपः ।। २३ ।। (०३)

---

(०१)( एवमुक्तो हि राजानमूं (३) राजन् (for राजा); (४) दृष्ट्वा; सिद्धान्; वृद्धान् (for सर्वान्); तथा (for तदा); .

(०२) ( अभीतो; अभितो (for अदासो) (२) त्विति (for क्वचित्); (३)स्त्रीकामं च; कामं वा; कामुका; कामुकं त्वा (for त्वां); (४) क्षुद्रकर्म; क्षुद्रं क्षुद्रं; क्षुद्र क्षुद्रं; क्षुद्रक्षत्रं (५) एवं विहिंसकः कुर्यात् (६) पुरुषाधम;- कर्म धर्मविरुद्धं वै लोकदुष्टं च दुर्मते ।.

(०३) ( इति; इदं; अपि (for इव); (३) सम्प्रेष्य भरतश्रेष्ठ (४) नराधिप; युधिष्ठिरः .

**युधिष्ठिरः-**

धर्मे ते वर्धतां बुद्धिः क्षुद्रधर्मे मनः कृथाः।
**साश्वः सरथपादातः स्वस्ति गच्छ जयद्रथ ।। २४ ।।** (०१)

लक्षालङ्कारः - 'क्षु धर्मे मनः कृथा' इति पाठे हे क्षुद्र अतः परं वा धर्मे मनः कृथा इति योजना ।

**वैशम्पायनः-**

एवमुक्तस्तु सव्रीडं तूष्णी किञ्चिदवाङ्मुखः।
**जगाम राजन्दुःखार्तो गङ्गाद्वाराय भारत ।। २५ ।।** (०२)

स देवं शरणं गत्वा विरूपाक्षमुमापतिम्।
**तपश्चचार विपुलं तस्य प्रीतो वृषध्वजः ।। २६ ।।** (०३)

**निराहारो जितक्रोधः पादाङ्गुष्ठाग्रविष्ठितः ।**(०४)

बलिं स्वयं प्रत्यगृह्णात्प्रीयमाणस्त्रिलोचनः
**वरं चास्मै ददौ देवः स जग्राह च तच्छृणु ।**(०५)

**जयद्रथः**

**समस्तान्सरथान्पञ्च जयेयं युधि पाण्डवान् ।। २७ ।।**

**वैशम्पायनः-**

इति राजाब्रवीद्देवं नेति देवस्तमब्रवीत् ।। २८ ।। (०६)

---

(०१)( वर्ततां; रमतां (२) मतिं (for मनः) (४) तेस्तु (for गच्छ);.
(०२) ( स (for तु); सव्रीडम्; व्रीात्; (२)अधोमुखः (३) राजन् (for राजा);.
(०३) ( कृत्वा (for गत्वा);-.
(०४) (४);(ऽ)भवद्भवः; (ऽ)भवत्तदा (for वृषं);.
(०५) ( पूजां (for बलिं); (३)प्रीतः (for देवः); वरं चास्याददत्प्रीतः (४) च जग्राह तं (for तत्); .
(०६) जयद्रथ उ (४) ततो(for तम्);.

**श्रीभगवान्-**

अजय्यांश्चाप्यवध्यांश्च वारयिष्यसि तान्युधि।
ऋ तेऽर्जुनं महाबाहुं नरं नाम सुरेश्वरम् ।। २९ ।। (०१)

- नरं नाम सुरेश्वरम् ।
बदर्यां तप्ततपसं नारायणसहायकम् ।
अजितं सर्वलोकानां(०२)

- मम पाशुपतास्त्रेण गुप्तं सर्वत्र सर्वदा ।
बदर्यां तप्ततपसं नारायणसहायकम् ।। ३४ ।।
अजितं सर्वलोकानां देवैरपि दुरासदम्।

मया दत्तं पाशुपतं दिव्यमप्रतिमं शरम्।
अवाप लोकपालेभ्यो वज्रादीन्स महाशरान् ।। ३५ ।।

देवदेवो ह्यनन्तात्मा विष्णुः सुरगुरुः प्रभुः।
प्रधानपुरुषोऽव्यक्तो विश्वात्मा विश्वमूर्तिमान् ।। ३६ ।।

युगान्तकाले सम्प्राप्ते कालाग्निर्दहते जगत्।
सपर्वतार्णवद्वीपं सशैलवनकाननम् ।। ३७ ।।

निर्दहन्नागलोकांश्च पातालतलचारिणः।
अथान्तरिक्षे सुमहन्नानावर्णाः पयोधराः ।। ३८ ।।

घोरस्वरा विनदिनस्तडिन्मालावलम्बिनः।
समुत्तिष्ठन्दिशः सर्वा विवर्षन्तः समन्ततः ।। ३९ ।।

ततोऽग्निं नाशयामासुः संवर्ताग्निनियामकाः।

---

(०१) देवः; महेश्वर उं; शिव उं; देवदेव उं (२)धारं (for वारं); शृणु (for युधि); .
(०२)( देवैरपि सुदुःसहं सहायवान्) (४) दुरुत्सहं (for दुरासदम्); .

अक्षमात्रैश्च धाराभिस्तिष्ठन्त्यापूर्य सर्वशः ।। ४० ।।

एकार्णवे तदा तस्मिन्नुपशान्तचराचरे।
नष्टचन्द्रार्कपवने ग्रहनक्षत्रवर्जिते ।। ४१ ।।

चतुर्युगसहस्रान्ते सलिलेनाप्लुता मही।
ततो नारायणाख्यस्तु सहस्राक्षः सहस्रपात् ।। ४२ ।।

सहस्रशीर्षा पुरुषः स्वप्तुकामस्त्वतीन्द्रियः।
फटासहस्रविकटं शेषं पर्यङ्कभाजनम् ।। ४३ ।।

सहस्रमिव तिग्मांशुसङ्घातममितद्युतिम्।
कुन्देन्दुहारगोक्षीरमृणालकुमुदप्रभम् ।। ४४ ।।

तत्रासौ भगवान्देवः स्वपञ्जलनिधौ तदा।
नैशेन तमसा व्याप्तां स्वां रात्रि कुरुते विभुः ।। ४५ ।।

सत्त्वोद्रेकात्प्रबुद्धस्तु शून्यं लोकमपश्यत।
इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ।। ४६ ।।

आपो नारास्तु(स्त)त्तनव इत्यपां नाम शुश्रुम।
अयनं तेन चैवास्ते तेन नारायणः स्मृतः ।। ४७ ।।

प्रध्यानसमकालं तु प्रजाहेतोः सनातनः।
ध्यातमात्रे तु भगवन्नाभ्यां पद्मः समुत्थितः ।। ४८ ।।

तत्तश्चतुर्मुखो ब्रह्मा नाभिपद्माद्विनिःसृतः।
तत्रोपविष्टः सहसा पद्मे लोकपितामहः ।। ४९ ।।

शून्यं दृष्ट्वा जगत्कृत्स्नं मानसानात्मनः समान्।
ततो मरीचिप्रमुखान्महर्षीनसृजन्नव ।। ५० ।।

ते भूत्वा(तेऽसृजन्) सर्वभूतानि त्रस्थानि(त्रसानि) स्थावराणि च ।

यक्षराक्षसभूतानि पिशाचोरगमानुषान् ॥ ५१ ॥

सृज्यते ब्रह्ममूर्तिस्तु रक्षते पौरुषी तनुः।
रौद्रीभावेन शमयेत्तिस्रोऽवस्थाः प्रजापतेः ॥ ५२ ॥

न श्रुतं ते सिन्धुपते विष्णोरद्भुतकर्मणः।
कथ्यमानानि मुनिभिर्ब्राह्मणैर्वेदापरगैः ॥ ५३ ॥

जलेन समानुप्राप्ते सर्वतः पृथिवीतले।
तदा चैकार्णवे तस्मिन्नेकाकाशे प्रभुश्चरन् ॥ ५४ ॥

निशायामिव खद्योतः प्रावृट्काले समन्ततः।
प्रतिष्ठानाय पृथिवीं मार्गमाणस्तदाभवत् ॥ ५५ ॥

जले निमग्नां गां दृष्ट्वा चोद्धर्तुं मनसेच्छति।
किं नु रूपमहं कृत्वा सलिलादुद्धरे महीम् ॥ ५६ ॥

एवं सञ्चिन्त्य मनसा दृष्ट्वा दिव्येन चक्षुषा।
जलक्रीडाभिरुचितं वाराहं रूपमस्मरत् ॥ ५७ ॥

कृत्वा वराहवपुषं वाङ्मयं वेदसम्मितम्।
दशयोजनविस्तीर्णमायतं शतयोजनम् ॥ ५८ ॥

महापर्वतवर्ष्माभं तीक्ष्णदंष्ट्रं प्रदीप्तिमत्।
महामेघौघनिर्घोषं नीलजीमूतसंनिभम् ॥ ५९ ॥

भूत्वा यज्ञवराहो वै अपः सम्प्राविशत्प्रभुः।
दंष्ट्रेणैकेन चोद्धृत्य स्वे स्थाने न्यविशन्महीम् ॥ ६० ॥

पुनरेव महाबाहुरपूर्वां तनुमाश्रितः।
नरस्य कृत्वार्धतनुं सिंहस्यार्धतनुं प्रभुः ॥ ६१ ॥

दैत्येन्द्रस्य सभां गत्वा पाणिं संस्पृश्य पाणिना।

दैत्यानामादिपुरुषुः सुरारिर्दितिनन्दनः ॥ ६२ ॥

दृष्ट्वा चापूर्वपुरुषं क्रोधात्संरक्तलोचनः।
शूलोद्यतकरः स्रग्वी हिरण्यकशिपुस्तदा ॥ ६३ ॥

मेघस्तनितनिर्घोषो नीलाभ्रचयसंनिभः।
देवारिर्दितिजो वीरो नृसिंहं समुपाद्रवत् ॥ ६४ ॥

समुपेत्य ततस्तीक्ष्णैर्मृगेन्द्रेण बलीयसा।
नारसिंहेन वपुषा दारितः करजैर्भृशम् ॥ ६५ ॥

एवं निहत्य भगवान्दैत्येन्द्रं रिपुघातिनम्।
भूयोऽन्यः पुण्डरीकाक्षः प्रभुर्लोकहिताय च ॥ ६६ ॥

कश्यपस्यात्मजः श्रीमानदित्या गर्भधारितः।
पूर्णे वर्षसहस्रे तु प्रसूता गर्भमुत्तमम् ॥ ६७ ॥

दुर्दिनाम्भोदसदृशो दीप्ताक्षो वामनाकृतिः।
दण्डी कमण्डलुधरः श्रीवत्सोरसि भूषितः ॥ ६८ ॥

जटी यज्ञोपवीती च भगवान्बालरूपधृक्।
यज्ञवाटं गतः श्रीमान्दानवेन्द्रस्य वै तदा ॥ ६९ ॥

बृहस्पतिसहायोऽसौ प्रविष्टो बलिनो मखे।
तं दृष्ट्वा वामनतनुं प्रहृष्टो बलिरब्रवीत् ॥ ७० ॥

प्रीतोऽस्मि दर्शने विप्र ब्रूहि त्वं किं ददानि ते।
एवमुक्तस्तु बलिना वामनः प्रत्युवाच ह ॥ ७१ ॥

स्वस्तीत्युक्त्वा बलिं देवः स्मयमानोऽभ्यभाषत।
मेदिनीं दानवपते देहि मे विक्रमत्रयम् ॥ ७२ ॥

बलिर्ददौ प्रसन्नात्मा विप्रायामिततेजसे।

ततो दिव्याद्भुततमं रूपं विक्रमतो हरेः ।। ७३ ।।

विक्रमैस्त्रिभिरक्षोभ्यो जहाराशु स मेदिनीम्।
ददौ शक्राय च महीं विष्णुर्देवः सनातनः ।। ७४ ।।

एष ते वामनो नाम प्रादुर्भावः प्रकीर्तितः।
तेन देवाः प्रादुरासन्वैष्णवं चोच्यते जगत् ।। ७५ ।।

असतां निग्रहार्थाय धर्मसंरक्षणाय च ।
अवतीर्णो मनुष्याणामजायत यदुक्षये ।। ७६ ।।

स एवं भगवान्विष्णुः कृष्णेति परिकीर्त्यते।
अनाद्यन्तमजं देवं प्रभुं लोकनमस्कृतम् ।। ७७ ।।

यं देवं विदुषो गान्ति तस्य कर्माणि सैन्धव।

यामाहुरजितं कृष्णं शङ्खचक्रगदाधरम्

श्रीवत्सधारिणं देवं पीतकौशेयवाससम्।
प्रधानः सोऽस्त्रविदुषां तेन कृष्णेन रक्ष्यते ।। ७८ ।।(०१)

- श्रीवत्सधारिणं देवं पीतकौशेयवाससम् ।(०२)

- सहायः पुण्डरीकाक्षः श्रीमानतुलविक्रमः ।

समानस्यन्दने पार्थमास्थाय परवीरहा ।*

न शक्यते तेन जेतुं त्रिदशैरपि दुःसहः ।*

कः पुनर्मानुषो भावो रणे पार्थं विजेष्यति ।*

तमेकं वर्जयित्वा तु सर्वं यौधिष्ठिरं बलम् ।*

कपाठे ( वृ)

---

(०१) ( कृष्णं (for देवं);.

(०२) (३)प्रधानं श (नं शा;) नः श; नं सो) स्त्रविदुषां;(४) तेन कृष्णेति कीर्त्यते; तेन द्रक्ष्यसि रक्षितं;.

चतुरः पाण्डवान्राजन्दिनेकं जेष्यसे रिपून् ।*
कपाठे

वेशम्पायन उवाच ।

इत्येवमुक्त्वा नृपतिं सर्वपापहरो हरः ।
उमापतिः पशुपतिर्यज्ञहा त्रिपुरार्दनः
वामनैर्विकटैः स्तजैरुग्रश्रवणदर्शनैः ।
वृतः पारिषदैर्घो रैर्नानाप्रहरणोद्यतैः ।
त्र्यम्बको राजशार्दूल भगनेत्रनिपातनः ।
उमासहायो भगवांस्तत्रैवान्तरधीयत ।(०१)

- तस्मात्त्वं पार्थरहितान्पाषडवान्वारयिच्यसि ।
एकदा पुरुषव्याघ्र मया दत्तं वरं तव ।

सहायः पुण्डरीकाक्षः श्रीमानतुलविक्रमः।
समानस्यन्दने पार्थमास्थाय परवीरहा।

न शक्यते तेन जेतुं त्रिदशैरपि दुःसहः।
कः पुनर्मानुषो भावो रणे पार्थं विजेष्यति।

तमेकं वर्जयित्वा तु सर्वं यौधिष्ठिरं बलम्।
चतुरः पाण्डवान्राजन्दिनैकं जेष्यसे रिपून्।

तस्मात्त्वं पार्थरहितान्पाण्डवान्वारयिष्यसि।
एतद्धि पुरुषव्याघ्र मया दत्तो वरस्त०।

---

(०१) (स जेतुं वै (for तेन जेतुं); कः पुमान्; किं पुनर्; क एष (for कः पुनर); त्वया; त्वं वै (for सर्वं) इत्युक्त्वा नृपतिं राजन् त्रिपुरातकः (for रार्दनः); विकचैः; बटुकैः (for विकटैः); उग्रश्चरणं (for उग्रश्रवणं); परिषदैर् (for पारिं);) .

**वैशम्पायनः**

इत्येवमुक्त्वा नृपतिं सर्वपापहरो हरः।
उमापतिः पशुपतिर्यज्ञहा त्रिपुरार्दनः।

वामनैर्विकटैः कुब्जैरुग्रश्रवणदर्शनैः।
वृतः पारिषदैर्घोरैर्नानाप्रहरणोद्यनः(तैः)।

त्र्यम्बको राजशार्दूल भगनेत्रनिपातनः।
उमासाहायो भगवांस्तत्रैवान्तरधीयत।

जयद्रथोऽपि मन्दात्मा स्वमेव भवनं ययौ।
पाण्डवाश्च वने तस्मिन्न्यवसन्काम्यके तथा ।। ७९ ।। (०१)

अस्मिन् पर्वणि २२६अध्याये ७९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि जयद्रथविमोक्षणपर्वणि षड्विंशत्यधिकद्विशततमोऽध्यायः ।। २२६ ।।

# २२७. सप्तविंशत्यधिकद्विशततमो अध्यायः ।

युधिष्ठिरेण मार्गण्डेयं प्रति स्वसमानदुःखिसत्ताप्रश्नः ।।

**जनमेजयः**

एवं हृतायां कृष्णायां प्राप्य क्लेशमनुत्तमम्।

---

(०१)( जयद्रथोपि मन्दात्मा (२) स्वयमेव वनं ययौ (३) च तदा; च हते; विपिने (for च वने); (४) न्यवसन् काम्यके; तथा; .

अत ऊर्ध्वं नरव्याघ्राः किमकुर्वत पाण्डवाः ।। १ ।। (०१)

**वैशम्पायनः**

एवं कृष्णां मोक्षयित्वा विनिर्जित्य यजद्रथम्।
आसाश्चक्रे मुनिगणैर्धर्मराजो युधिष्ठिरः ।। २ ।। (०२)

तेषां मध्ये महर्षीणां शृण्वतामनुशोचताम्।
मार्कण्डेयमिदं वाक्यमब्रवीत्पाण्डुनन्दनः ।। ३ ।। (०३)

**युधिष्ठरः**

भगवन्देवर्षीणां त्वं ख्यातो भूतभविष्यवित्।
संशयं परिपृच्छामि छिन्धि मे हृदि संस्थितम् ।। ४ ।।

(०४)

द्रुपदस्य सुता ह्येषा वेदिमध्यात्समुत्थिता।
अयोनिजा महाभागा स्नुषा पाण्डोर्महात्मनः।
ज्येष्ठा (क्य ह्येषा); दुहिता द्रुपदस्यैषा;

मन्ये कालश्च भगवन्दैवं च विधिनिर्मितम्।
भवितव्यं च भूतानां यस्य नास्ति व्यतिक्रमः।(०५)

इमां हि पत्नीमस्माकं धर्मज्ञां धर्मचारिणीम्।

---

(०१) (गतायां (for हं); (२) प्राप्ताः (for प्राप्य); (४)अकुर्वत (for 'र्वत);.
(०२)(१ २); मोचं; मोहं (for मोक्षं) मोक्षं विनिं.
(०३)( महर्षिणां मध्ये .
(०४) देवर्षीणां त्वं प्रवरः तं छिन्धि (for छिन्धि मे); तं मे छिन्धि हृदि स्थितं; छिन्धि तं च हृदि स्थितं.
(०५) युधिष्ठिरः ( कालं च; भगवान्; भगवन् (for बलवान्); (२) विधिनिर्जितं; दुरतिक्रमं; .

संस्पृशेदीदृशो भावः शुचिं स्तैन्यमिवानृतम् ।। ५ ।। (०१)

लक्षालङ्कारः - संस्पृशेदीदृशो भावः शुचिं स्तैन्यमिवानृतम् इत्यत्र अनृतं न विद्यते ऋतं सत्यवचनं यत्र तत्तथोक्तं स्तैन्यं स्तेनस्य भावः तस्करत्वं शुचिं सत्कुलप्रसूतमिव ईद्दशो भावः परपुरुषस्पर्शाख्यो भावः द्रौपदीं कथं वा संस्पृशेत् ।

न हि पापं कृतं किञ्चित्कर्म वा निन्दितं क्वचित्।
द्रौपद्या ब्राह्मणेष्वेव धर्मः सुचरितो महान् ।। ६ ।। (०२)

तां जहार बलाद्राजा मूढबुद्धिर्जयद्रथः।
तस्याः संहरणात्पापः शिरसः केशपातनम् ** ।। ७ ।।

लक्षालङ्कारः - तस्याः संहरणात् इत्यत्र संहरणात् सम्यगपहरणात् ।

पराजयं च सङ्ग्रामे ससहायः समाप्तवान्।(०३)
प्रत्याहृता तथास्माभिर्हत्वा तत्सैन्धवं बलम् ** ।। ८ ।।

तद्दारहरणं प्राप्तमस्माभिरवितर्कितम्।(०४)
दुःखश्चायं वने वासो मृगयायां च जीविका ।। ९ ।।

हिंसा च मृगजातीनां वनौकोभिर्वनौकसाम्।
ज्ञातिभिर्विप्रवासश्च मिथ्याव्यवसितैरय(रिय)म् ।। १० ।। (०५)

अस्ति कश्चिन्मया नूनं अल्पभाग्यतरो नरः।

---

(०१)( इमां (for कथं); पाञ्चालीं (for धर्मज्ञां); धर्मभाविनी; चारिणां (४) शुचीन्; शुचि (अ)मृतं (for (अ)नृतम्);.

(०२)(२) कर्मणा (for कर्म वा); निर्मितं (for निन्दितं) (३)(ए)वं (for (ए)व); .

(०३) ( स यत् (for बलाद्); पापो; पुण्यां (for राजा); (३) तस्य (for तस्याः); स्म; स (for सं); संहरणोपायः; संहरणार्थाय प्राप्तं; पापः; पार्थाः (for प्राप्तः); (४) पातनं (for वापनम्); (५) ससहायैः स आप्तवान्; स पाण्डवान् सहायः समवाप्तवान्;.

(०४) ( सहां; तदां (for तथां); (२)जित्वा (for हत्वा); (३) तद्वीरग्रहणं; ततोनुग्रहणं; तत्तोदा हरणं;.

(०५)(२) जीवनं (for जीविका); (४) वनौको हि (for कोभिर्) (५) इयं; अपि (for अयम्); .

भवता दृष्टपूर्वो वा श्रुतपूर्वोऽपि वा क्वचित् ।। ११ ।।[०१]

लक्षालङ्कारः - अस्ति कश्चित् इत्यत्र मया विना, मया मत्त इति विभक्तिव्यत्यासो वा ।

अस्मिन् पर्वणि २२७अध्याये ११श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि युधिष्ठिरप्रश्ने सप्तविंशत्यधिकद्विशततमोऽध्यायः ।। २२७ ।।

# २२८. अष्टविंशत्यधिकद्विशततमो अध्यायः ।

मार्कण्डेयेन युधिष्ठिरं प्रति रामोपास्यानकथनारम्भः ।। १ ।। तत्र रामाद्युत्पत्तिकथनपूर्वकं रावणोत्पत्त्युपोद्घाततया कुबेरोत्पक्तिकथनम् ।। २ ।।

**मार्कण्डेयः**

प्राप्तमप्रतिमं दुःखं रामेण भरतर्षभ।

---

(०१)( लोके (for नूनं) (४) भवेदिति (for ऽपि वो भवेत्); क्वचित् (for भवेत्); आरण्यः रामो (श्रीरामो)पाख्यान; रामायणो पाख्यान;.

रक्षसा जानकी तस्य हृता भार्या बलीयसा ।। १ ।। (०१)

पितुर्निदेशाद्वसतो वनेऽस्य स्वर्गतः पिता ।

आश्रमाद्राक्षसेन्द्रेण रावणेन दुरात्मना।
मायामास्थाय तरसा हत्वा गृध्रं जटायुषम् ।। २ ।। (०२)

प्रत्याजहार तां रामः सुग्रीवबलमाश्रितः।
बद्धवा सेतुं समुद्रस्य दग्ध्वा लङ्कां शितैः शरैः ।। ३ ।। (०३)

- ततस्तं बलवान्नामो रिपुं भार्यापहारिणम् ।

सह वानरसैन्येन जघान रणमूर्धनि ।

**युधिष्ठिरः**

कस्मिन्रामः कुले जातः किंवीर्यः किम्पराक्रमः।
रावणः कस्य पुत्रो वा किं वैरं तस्य तेन ह ।। ४ ।। (०४)

एतन्मे भगवन्सर्वं सम्यगाख्यातुमर्हसि।

त्वया प्रत्यक्षो दृष्टं यथा सर्वमशेषतः।

ेतुमिच्छामि चरितं रामस्याक्लिष्टकर्मणः। ।। ५ ।।

- त्वया प्रत्यक्षतो दृष्टं यथा सर्वमशेषतः ।। ५ ।। (०५)

**मार्कण्डेयः**

---

(०१) ( मतिमता (for अप्रतिमं); रूपं (for दुःखं) (२)दुःख रामेण भारत; रामेणाक्लिष्टकर्मणा

- ज्ञश 'या हरण महत्.

(०२) ( रक्षसा तेन (for राक्षसेन्द्रेण); (२)दुरात्मना; बलीयसा (for विहायसा);.

(०३) ( राजन् (for रामः); (३) समुद्रे स (for द्रस्य); .

(०४) (२) पुत्रो वा (४) च; वै (for ह); .

(०५)(३) भगवन् (for चरितं);.

अजो नामाभवद्राजा महानिक्ष्वाकुवंशजः।
तस्य पुत्रो दशरथः शश्वत्स्वाध्यायवाञ्छुचिः ॥ ६ ॥

- शृणु राजन्पुरा वृत्तमितिहासं सुरातनम् ।
सभार्येण यथा प्राप्तं दुःखं रामेण भारत ।(०१)

अभवंस्तस्य चत्वारः पुत्रा धर्मार्थकोविदाः।
रामलक्ष्मणशत्रुघ्ना भरतश्च महाबलः ॥ ७ ॥ (०२)

रामस्य माता कौसल्या कैकेयी भरतस्य तु।
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायाः परन्तपौ ॥ ८ ॥ (०३)

विदेहराजो जनकः सीता तस्यात्मजा विभो।
यां चकार स्वयं त्वष्टा रामस्य महिषीं प्रियाम् ॥ ९ ॥ (०४)

एतद्रामस्य ते जन्म सीतायाश्च प्रकीर्तितम्।
रावणस्यापि ते जन्म व्याख्यास्यामि जनेश्वर ॥ १० ॥ (०५)

पितामहो रावणस्य साक्षाद्देवः प्रजापतिः।
स्वयम्भूः सर्वलोकानां प्रभुः स्रष्टा महातपाः ॥ ११ ॥ (०६)

लक्षालङ्कारः - पितामहो रावणस्य इत्यत्र रावणपितुर्विश्रवसः पुलस्त्यस्य देहार्धरूपत्वात्

---

(०१) (२) सम्भवः (for वंशजः); (४) तत्परः (for वाङ्शुचिः); .

(०२) (२);चारिणः; वेदिनः; वादिनः (for कोविदाः); (३ ४) शत्रुघ्नभरता (त) श्व; महाबलाः रामलक्ष्मणभरतशत्रुध्रा इति विश्रुताः.

(०३)( कौशल्या (२) च (for तु); (४) सुमित्रायां बभूवतुः; .

(०४)( राजा (for राजो); (२) (अ)भवत् (for विभो); (३) स्त्रियं (for स्वयं); स्रष्टा; तुष्टो; हृष्टो (for त्वष्टा); (४) यो राम (for रामस्य); महिषी प्रिया;.

(०५) ( जन्मासीत् (for ते जन्म); (२)सम्प्रकीं; चापि कीं (for च प्रकीं); (३) च(for (अ)पि); (४) नरेश्वर; विशेषतः (for जनें); .

(०६)(२) पितामहः (for प्रजां); (३) भूतानां (for लोकानां); (४) त्वष्टा; ब्रह्मा (for स्रष्टा); प्रजा- पतिः (for महां);.

ब्रह्मा रावणस्य पितामहः ।

पुलस्त्यो नाम तस्यासीन्मानसो दयितः सुतः।
तस्य वैश्रवणो नाम गवि पुत्रोऽभवत्प्रभुः ।। १२ ।। (०१)

पितरं स समुत्सृज्य पितामहमुपस्थितः।
तस्य कोपात्पिता राजन्ससर्जात्मानमात्मना।(०२)
स जज्ञे विश्रवा नाम तस्यात्मार्धेन वै द्विजः** ।। १३ ।।
प्रतीकाराय सक्रोधस्ततो वैश्रवणस्य वै।(०३)

पितामहस्तु प्रीतात्मा ददौ वैश्रवणस्य ह ।
अमरत्वं धनेशत्वं लोकपालत्वमेव च ।। १४ ।। (०४)

ईशानेन तथा सख्यं पुत्रं च नलकूबरम्।
राजधानीनिवेशं च लङ्कां रक्षोगणान्विताम् ।। १५ ।।

विमानं पुष्पकं नाम कामगं च ददौ प्रभुः।
यक्षाणामाधिपत्यं च राजराजत्वमेव च ।(०५)

अस्मिन् पर्वणि २२८अध्याये १५ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि रामरावणयोर्जन्मकथने अष्टाविंशत्यधिकद्विशततमोऽध्यायः ।। २२८ ।।

---

(०१)(२); मनसो (for मां); विदितः (for दयितः); (३) विश्रवसो; वैश्रवसो (४) ऋषेः; ऋषिः (for गवि); पौत्रो; .

(०२) ( स्वं (for स); (२) उपाशिः; उपा-स्थितः (३) रोषात् (for कोपात्); (४) विसृज्य; विनिन्द्य (for ससर्ज);.

(०३) ( सञ्जज्ञे (२) तस्यार्धेन च (स); तस्यैवार्धेनः (for तस्मात्मार्धेन); प्रतिकाराय सक्रोधं; स क्रोधात् (४) तदा; तस्माद् (for ततो); हि (for वै); .

(०४) ( धर्मात्मा (for प्रीतां); (२) वैश्रवणाय च; वै(for ह); .

(०५)(२) पुत्रस्तु (for पुत्रं च); नडं (for नल); (३) राजधानीं; .

# २२९. एकोनत्रिंशदधिकद्विसशततमो अध्यायः ।

मुलिवरेण विश्रवसा भार्यात्रये रावणादीनामुत्पादनम् ।। १ ।। सानुजेन रावणेन तपस्तोषितस्य ब्रह्मणा वरात्पुष्पकापहरणपूर्वकं कुबेरस्य निष्कासनेन तङ्कायां निवीसः ।। २ ।।

**मार्कण्डेयः**

पुलस्त्यस्य तु यः क्रोधादर्धदेहोऽभवन्मुनिः।
विश्रवा नाम सक्रोधः स वैश्रवणमैक्षत ।। १ ।। (०१)

बुबुधे तं तु सक्रोधं पितरं राक्षसेश्वरः।
कुबेरस्तु प्रसादार्थं यतते स्म सदा नृप ।। २ ।। (०२)

लक्षालङ्कारः - राक्षसेश्वरः राक्षसानां राजा कुबेरः ।

स राजराजो लङ्कायां न्यवसन्नरवाहनः।
राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः ।। ३ ।। (०३)

ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः।
ऋषिं भरतशार्दूल नृत्यगीतविशारदाः ।। ४ ।। (०४)

---

(०१) ( च (for तु); कोपाद्; क्रोधो (for क्रोधाद्); (२) अर्धहेतो; दग्धदेहो (for अर्धदेहो);.
(०२) ( च (for तु); सक्रोधः (२) श्वरं (for श्वरः); (तं); यतति स्म तदा(for सदा) नृपः (for नृप);.
(०३)(२) तोषयन्; न्यवसन् (for निवसन्); (३) राक्षस्यः (for सौः); विप्र (for तिस्रः); (४) परिचारकाः; वारकाः; .
(०४) तं ( सदा(!); तथा (for तदा) वै (for तं); (४) नृत्यं .

पुष्पोत्कटा च राका च मानिनी च विशाम्पते।
अन्योन्यस्पर्धया राजन्श्रेयस्कामाः सुमध्यमाः ।। ५ ।। (०१)

स तासां भगवांस्तुष्टो महात्मा प्रददौ वरान्।
लोकपालोपमान्पुत्रानेकैकस्या यथेप्सितान् ।। ६ ।। (०२)

पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ।
कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि ।। ७ ।। (०३)

मानिली जनयामास पुत्रमेकं विभीषणम्।
राकायां मिथुनं जज्ञे खरः शूर्पणखा तथा ।। ८ ।। (०४)

विभीषणस्तु रूपेण सर्वेभ्योऽभ्यधिकोऽभवत्।
स बभूव महाभागो धर्मगोप्ता क्रियारतिः ।। ९ ।। (०५)

दशग्रीवस्तु सर्वेषां श्रेष्ठो राक्षसपुङ्गवः।
महोत्साहो महावीर्यो महासत्त्वपराक्रमः ।। १० ।। (०६)

कुम्भकर्णो बलेनासीत्सर्वेभ्योऽभ्यधिको युधि।
मायावी रणशौण्डश्च रौद्रश्च रजनीचरः ।। ११ ।। (०७)

---

(०१)( च बालक्षालङ्कारः -का च; बका-चेति(चैव) (for च राका च); (२) (इ)ति (for च);
(३) अन्योन्यं स्पं (४) जय कामाः (for श्रेयं);.
(०२)( स तासां; (२) वरं (for वरान्); (४) एकैकस्यै; कस्यां;.
(०३) ( पुष्पोत्कटाया; .
(०४)(२) एकं पुत्रं (३)वाकाया; राकायाः बकायां; बलायां (४) शूर्पनखा; णखी तदा (for तथा); स्वरं शूर्प-णखीं तथा;.
(०५)( च (for तु); धर्मात्मा (for रूपेण) (२) (ऽ)पि; हि (for ऽभि); तदा (अ)भवत्); (३/४) बभूव च; ( ह च; स) (for स बभूव); 'बाहो (for भागो) रतः (for रतिः); महाभागो धर्मगोप्ता स बभूव क्रियारतः (रतिः); .
(०६)(२); श्रेष्ठो (for ज्येष्ठो); (३)बाहुर् (for वीर्यो);.
(०७)( बले राजन्; महानासीत् (for बलेनां); (२) (ऽ)पि; हि (for ऽभि); तथा; युधि; (अ)भवत् (for तदा); (३)रणशूरश्च; युद्धशौडश्चः रणचण्डश्च; .

खरो धनुषि विक्रान्तो ब्रह्मद्विट्पिशिताशनः।
**सिद्धविघ्नकरी चापि रौद्री शूर्पणखा तथा ।। १२ ।।** [०१]

सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः।
**ऊषुः पित्रा सह रता गन्धमादनपर्वते ।। १३ ।।** [०२]

ततो वैश्रवणं तत्र ददृशुर्नरवाहनम्।
**पित्रा सार्धं समासीनमृद्ध्या परमया युतम् ।। १४ ।।** [०३]

जातामर्षास्ततस्ते तु तपसे धृतनिश्चयाः।
**ब्रह्माणं तोषयामासुर्घोरेण तपसा तदा ।। १५ ।।** [०४]

अतिष्ठदेकपादेन सहस्रं परिवत्सरान्।
**वायुभक्षो दशग्रीवः पञ्चाग्निः सुसमाहितः ।। १६ ।।** [०५]

अधःशायी कुम्भकर्णो यताहारो यतव्रतः।
**विभीषणः शीर्णपर्णमेकमभ्यवहारयन् ।। १७ ।।** [०६]

उपवासरतिर्धीमान्सदा जप्यपरायणः।
**तमेव कालमातिष्ठत्तीव्रं तप उदारधीः ।। १८ ।।** [०७]

खरः शूर्पणखा चैव तेषां वै तप्यतां तपः।

---

(०१) ( भयङ्करोपि (for स्वरो धनुषि); (२) ब्रह्मविद; ब्रह्मर्षि; ब्रह्महा (for ब्रह्मद्विट्); (३) सिद्धिविन्धं; (न्ध) करी (४) रौद्री शूर्पनखा; णरवी सदा; तदा (for तथा); .
(०२) (२) च; तु (for सु); (३) तदा (for रता) ऊषुः पिता च सह ते (४) पर्वतं; .
(०३)(३) अथां (for समां); (४) च परया (for परमया); .
(०४) ( जातस्पर्शासू; जातामर्षासू तत्र (for ततसू); जातस्पर्धान्वितास्ते तु (२) कृत (for धृत); मानसाः (for निश्चयाः);.
(०५) (२) सहस्र (४) पञ्चाग्निसु; पञ्चभिः सु-; पञ्चाग्निषु; .
(०६)(२); जिताहारो; यताहारी धृतव्रतः; दृढं (३) पत्रम् (for पर्णम्); (४) हारयन्; हारवान्;.
(०७) ( व्रती (for रतिर्); (२) अभूत् (for सदा); (४) तीव्रं तपः; .

परिचर्यां च रक्षां च चक्रतुर्हृष्टमानसौ ॥ १९ ॥ [०१]

- विभीषणदशग्रीवौ तेपाते उत्तमं तपः ।

दश वर्षसहस्राणि वायुभक्षौ परन्तपौ ।

सरके दश वर्षाणि अष्ट वर्षाणि सागरे ।

ऊषुर्वर्षसहस्राणि गोकर्णेऽस्मिंस्तपोवने ।

चेरतुस्तृणपर्णानि मृगैः सार्धमरिन्दमौ ।

बादर्यास्त्वाश्रमे राजन्तेपाते परमं तपः ।

आराधयन्त चन ब्रह्माण सुतपस्वन ।

पूर्णे वर्षसहस्रे तु शिरश्छित्त्वा दशाननः।
जुहोत्यग्नौ दुराधर्षस्तेनातुष्यज्जगत्प्रभुः ॥ २० ॥ [०२]

तोत ब्रह्मा स्वयं गत्वा तपसस्तान्न्यवारयत्।
प्रलोभ्य वरदानेन सर्वानेव पृथक्पृथक् ॥ २१ ॥

**ब्रह्मा**

प्रीतोऽस्मि वो निवर्तध्वं वरान्वृणुत पुत्रकाः।
यद्यदिष्टमृते त्वेकममरत्वं तथास्तु तत् ॥ २२ ॥ [०३]

यद्यदग्नौ हुतं सर्वं शिरस्ते महदीप्सया।
तथैव तानि ते देहे भविष्यन्ति यथेप्सया ॥ २३ ॥ [०४]

---

(०१) ( शूर्पनखा; णरवी; चापि (for चैव); (२) पुनः (for तपः); रक्षसां (for च रक्षां) (४) चक्राते (for चक्रतुर्); .

(०२) ( वर्षे (for वर्ष); सहस्रेण; सहस्रेषु(for सहस्रेषु); (३) जुहाव (for जुहोति); दशग्रीवम् (for दुराधर्षम्); (४) तुष्यत् (अ)तुष्यज् जगत्पतिः; प्रजापतिः; जगद्गुरुः; पितामहः .

(०३) ( वि (for वो); वरदोस्मि निवं (२) वरं (४) वः (for तत्);.

(०४) ( यद्यच्चाग्नौ पूर्वं; सम्यक् (for सर्वं); शिरांसि यानि पूर्व ते (२) हुतानि (for शिरस्ते); मदभीप्सया; महदीप्सिता प्सितं;(प्सता) देहे तु; वै देहे; देहाद् देहे ते देहेस्मिन् यथेप्सया; यथेच्छया; .

वैरूप्यं च न ते देहे कामरूपधरस्तथा।
भविष्यसि रणेऽरीणां विजेता न च संशयः ।। २४ ।। (०१)

**रावणः**

गन्धर्वदेवासुरतो यक्षराक्षसतस्तथा।
सर्पकिन्नरभूतेभ्यो न मे भूयात्पराभवः ।। २५ ।। (०२)

**ब्रह्मा**

य एते कीर्तिताः सर्वे न तेभ्योऽस्ति भयं तव ।
ऋते मनुष्याद्भद्रं ते तथा तद्विहितं मया ।। २६ ।। (०३)

**मार्कण्डेयः**

एवमुक्तो दशग्रीवस्तुष्टः समभवत्तदा।
अवमेने हि दुर्बुद्धिर्मनुष्यान्पुरुषादकः ।। २७ ।। (०४)

कुम्भकर्णमथोवाच तथैव प्रपितामहः।
वरं वृणीष्व भद्रं ते प्रीतोऽस्मीति पुनः पुनः ।। २८ ।।

स वव्रे महतीं निद्रां तमसा ग्रस्तचेतनः।
कुम्भकर्ण महाबाहो वरं वरय सुव्रत ।

This Stanga is Interchanged in TRK after 27.(05)

तथा भविष्यतीत्युक्त्वा विभीषणमुवाच ह ।

---

(०१)( न च ते; (३) भवि-ष्यति (for ष्यन्ते; ष्यते); वीराः (for ऽरीणां) (४)विजेता च न; ता न च ता नात्र; ता हि न (for तासि न);.
(०२)(२) राक्षसयोस्तथा; (३) नागेभ्यो; .
(०३) (३) (ए)तेभ्यो (for तेभ्यों); पराभवः (for भयं तव); तत्तथा ते (for तद्); विदितं (for विहितं);.
(०४)( उक्ते (for उक्तो); (२) सन्तुष्टः सोभवतदा (३)च (for हि) अधर्मेणैव दुर्बुद्धिर्; .
(०५)(३); वव्रे स (४) तपसा नष्टचेतनः;.

**ब्रह्मा-**

वरं वृष्णीष्व पुत्र त्वं प्रीतोऽस्मीति पुनः पुनः ।। २९ ।। (०१)

**विभीषणः**

परमापद्गतस्यापि नाधर्मे मे मतिर्भवेत्।
अशिक्षितं च भगवन्ब्रह्मास्त्रं प्रतिभातु मे ।। ३० ।। (०२)

**ब्रह्मा**

यस्माद्राक्षसयोनौ ते जातस्यामित्रकर्शन।
नाधर्मे धीयते बुद्धिरमरत्वं ददामि ते ।। ३१ ।। (०३)

लक्षालङ्कारः - अमरत्वं ददामि त इत्यत्र कल्पावसानपर्यन्तं मरणराहित्यं अमृतत्व-रूपमुक्तत्वं च अमरत्वम् ।

**मार्कण्डेयः**

राक्षसस्तु वरं लब्ध्वा दशग्रीवो विशाम्पते।
लङ्कायाश्च्यावयामास युधि जित्वा धनेश्वरम् ।। ३२ ।। (०४)

हित्वा स भगवाँल्लङ्कामाविशद्गन्धमादनम्।
गन्धर्वयक्षानुगतो रक्षःकिम्पुरुषैः सह ।। ३३ ।। (०५)

विमानं पुष्पकं तस्य जहाराक्रम्य रावणः।

---

(०१)(३); पुत्रो वै (for पुत्र त्वं); (४) पुनरेव च (तत्) (for (इ) ति पुनः पुनः);.
(०२) (२) माधर्मे मे; धर्मे चैव; धर्म एव (for नाधर्मे मे); रतिर्; गतिद् (for मतिर्); भगवन् ब्रह्मास्त्रं प्रतिभाति; .
(०३)( तु; हि (for ते); (२) मित्रकर्षण (३) धीयते (for रमते); (४)ददानि (for मि);.
(०४)(१/२) वरान् (for वरं); वरं लब्ध्वा दशग्रीवो; (३) लङ्कायां वासयामास (४) युद्धे (for युधि); जनें (for धनें);.
(०५)( जित्वा; त्यक्त्वा (for हित्वा); (२) प्रा (प्र) विशद् (for आविं) गन्धमादनमाविशत् (३) रक्षों (रक्षां) (for यक्षां); (४) यक्ष (यक्षः) (for रक्षः); वृतः (for सह); .

शशाप तं वैश्रवणो न त्वामेतद्वहिष्यति ।। ३४ ।।[०१]

यस्तु त्वां समरे हन्ता तमेवैतद्वहिष्यति।
अवमन्य गुरुं मां च क्षिप्रं त्वं न भविष्यसि ।। ३५ ।।[०२]

विभीषणस्तु धर्मात्मा सतां मार्गमनुस्मरन्।
अन्वगच्छन्महाराज श्रिया परमया युतः ।। ३६ ।।[०३]

तस्मै स भगवांस्तुष्टो भ्राता भ्रात्रे धनेश्वरः।
सैनापत्यं ददौ धीमान्यक्षराक्षससेनयोः ।। ३७ ।।[०४]

राक्षसाः पुरुषादाश्च पिशाचाश्च महाबलाः।
सर्वे समेत्य राजानमभ्यषिञ्चन्दशाननम् ।। ३८ ।।[०५]

दशग्रीवश्च दैत्यानां देवानां च बलोत्कटः।
आक्रम्य रत्नान्यहरत्कामरूपी विहङ्गमः ।। ३९ ।।[०६]

रावयामास लोकान्यत्तस्माद्रावण उच्यते।
दशग्रीवः कामबलो देवानां भयमादधत् ।। ४० ।।[०७]

अस्मिन् पर्वणि २२९अध्याये ४० श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि एकोनत्रिंशधिकद्विशततमोऽध्यायः ।। २७५ ।।

---

(०१)( तस्य सहसा (for पुष्पकं तस्य); नाम; चास्य (for तस्य); (२) राक्षसः (for रावणः); (४)भविं (for वहिं); .

(०२) त्वं न (३) मत्य (for मन्य); .

(०३) (२) मार्गम्; धर्मान् (for धर्मम्); (३)राजं (for राज); (४) युतं; ज्वलन् (for युतः); .

(०४) (२); भ्रात्रे भ्राता (३)सैनां (for सेनां); श्रीमान् (for धीं); .

(०५) (४); अभिर्षिचन् नराधिपं (for दशां); .

(०६) (१/२) च (for तु); दैत्यानां देवानां दानवानां (for देवानां च) (४) रूपो (for रूपी); .

(०७)( यम् (for यत्) (३) लोभाद्; रूपो (for बलो) (४)आवहत्; आद्रवत् (for आदधत्); .

# २३०. त्रिंशदधिकद्विशततमो अध्यायः ।

रावणोपद्रितदेवगणाप्रर्थितेन ब्रह्मणा श्रीहरे रामत्वेन प्रादुर्भावानिवेदनपूर्वकं तान्प्रति तत्साहाय्यार्थ वानरादिभावेन जननचोदना ।।

**मार्कण्डेयः**

ततो ब्रह्मर्षयः सर्वे सिद्धा देवर्षयस्तथा।
हव्यवाहं पुरस्कृत्य ब्रह्माणं शरणं गताः ।। १ ।। (०१)

- ततो देवाः समागम्य सर्वे शक्रपुरोगमाः ।
अग्नौ वाक्यं समाधाय ब्रह्मणे तेटेभ्यवादयन् ।
ततः कृशानुर्भगवान्भगवन्तं पितामहम् ।
प्रणम्योवाच लोकेशं कृताञ्जलिरिदं वचः ।

**अग्निः**

योऽसौ विश्रवसः पुत्रो दशग्रीवो महाबलः।
अवध्यो वरदानेन कृतो भगवता पुरा ।। २ ।। (०२)

स बाधते प्रजाः सर्वा विप्रकारैर्महाबलः।
ततो नस्त्रातु भगवन्नान्यस्त्राता हि विद्यते ।। ३ ।। (०३)

**ब्रह्मा**

न स देवासुरैः शक्यो युद्धे जेतुं विभावसो।

---

(०१) (१/२) ततो ब्रहार्षयः सर्वे सिद्धा देव (ब्रह्म)र्षयस्तथा; देवाश्च मुनयः (ऋषय)-स्तथा(२) .
(०२) ( योसौ; स च (for यः स);.
(०३) (३) तु (हि) अन्यस्त्राता न विद्यते; .

विहितं तत्र यत्कार्यमभितस्तस्य निग्रहः ॥ ४ ॥ (०१)

तदर्थमवतीर्णोऽसौ मन्नियोगाच्चतुर्भुजः।
विष्णुः प्रहरतां श्रेष्ठः स तत्कर्म करिष्यति ॥ ५ ॥ (०२)
मार्कण्डेयः

पितामहस्ततस्तेषां संनिधौ शक्रमब्रवीत्।
ब्रह्मा-
सर्वैर्देवगणैः सार्धं सम्भव त्वं महीतले ॥ ६ ॥ (०३)

विष्णोः सहायानृक्षीषु वानरीषु च सर्वशः।
जनयध्वं सुतान्वीरान्कामरूपबलान्वितान् ॥ ७ ॥

तेययोक्त भगवता तत्प्रतिश्रुत्य शासनम्।
ससृजुर्देवगन्धर्वाः पुत्रान्वानररूपिणः।(०४)

ततो भागानुभागेन देवगन्धर्वपन्नगाः।
अवततुं महीं सर्वे मन्त्रयामासुरञ्जसा ॥ ८ ॥

अवतेरुर्महीं स्वर्गादंश्चैश्च सहिताः सुराः।
ऋषयश्चमहात्मानः सिद्धाश्च सह किन्नरैः।
चारणाश्चासृजन्घोरान्वानरान्वनचारिणः।

यस्य देवस्य यद्रूपं वेषस्तेजश्च यद्विधम्।
अजायन्त समास्तेन तस्य तस्य सुतास्तदा।(०५)

---

(०१)(३); तस्य; त्वत्र (for तत्र); तत्कार्यम् (४) अचिरात्; अहितम् (for अभितस्); निग्रहः (for हे);.
(०२) (४); तत्कर्म (for कर्मैतत्); .
(०३) (४); शक्रम् (for वाक्यम्); (३) सर्वे (for सर्वैर्); यात देवाः सुरैः सर्वैः (४)सम्भवन्तु; भवध्वं च; सम्भव त्वं (for सम्भवध्वं);.
(०४)(सहायाद् (for यान्); ऋक्षेषु (४) वानरेषु च सर्वतः.
(०५) ( क-ख-न्वै महाभगान्, ततो भागेन भागेन; वानरान्भागभागेन (२) पन्नगाः (३) अवतेरुर्; अवातरन्

- ऋषयश्च महात्मानः सिद्धाश्च सह किंनरैः ।*
चारणाश्चासृजन्घोरान्वानरान्वनचारिणः ।*
ते सृष्टा बहुसाहस्रा दशग्रीववधे रताः ।
अप्रमेयबलाः शूरा वानराः कामरूपिणः ।
यस्य देवस्य यद्रूपं वेषस्तेजश्च यद्विधम् । ( ऽ)
अजायन्त समास्तेन तस्य तस्य सुतास्तदा ।(०१)

तेषां समक्षं गन्धर्वीं दुन्दुभीं नाम नामतः।
शशास वरदो देवो गच्छ कार्यार्थसिद्धये ।। ९ ।। (०२)

पितामहवचः श्रुत्वा गन्धर्वी दुन्दुभी ततः।
मन्थरा मानुषे लोके कुब्जा समभवत्तदा ।। १० ।। (०३)

शक्रप्रभृतयश्चैव सर्वे ते सुरसत्तमाः।
वानरर्क्षवरस्त्रीषु जनयामासुरात्मजान्। ।। ११ ।।

This Stanga is Interchanged in TRK after12 .भेत्तारो
गिरिशृङ्गाणां शालतालशिलायुधाः।
वज्रसंहननाः सर्वे सर्वे चौघबलास्तथा ।। १२ ।। (०४)

---

(for अवतर्तुं); सर्वाम्; स्वर्गाद् (for सर्वे) (४)अंशशः सर्वतः सुराः; अशैश्च (दशमः) सहिताः सुरैः; .
(०१) वानरानं (for चारणाश्चां); भलिनो (for वानरान्); बलं (for वनं); दशं (for बहुं); वृताः; धृताः (for रताः) सर्वे (for शूरा); वेशं (for वेषं) सुतास् (for समास्); तेन तस्य (for तस्य तस्य);.
(०२)( गान्धर्वी; गन्धर्वा; गन्धर्वी; (२) दुन्दुभिद्; (३) वरदां; परतो (for वरदो) (४)गच्छ (for देव); देवानां कार्यसिद्धये;.
(०३)(२) दुन्दुभिम् तदा (for ततः) (४) नामां (for समं);.
(०४)( भङ्क्तारो; भोक्तां; भर्ता (for भेत्तां) (२)शालतालं; तालसालं; सालतालं (३) शूराः (for सर्वे); (४) (ऽ)मोघं; घोरं; सारं (for चौघं);.

तेऽन्ववर्तन्पितन्सर्वे यशसा च बलेन च ।
**कामवीर्यबलाश्चैव सर्वे युद्धविशारदाः ।। १३ ।।** [०१]

नागायुतसमप्राणा वायुवेगसमा जवे।
**यथे(त्रे)च्छकनिवासाश्च केचिदत्र वनौकसः ।। १४ ।।** [०२]

एवं विधाय तत्सर्वं भगवाँलोकभावनः।
**मन्थरां बोधयामास यद्यत्कार्यं यथा यथा ।। १५ ।।** [०३]

सा तद्वचः समाज्ञाय तथा चक्रे मनोजवा।
**इतश्चेतश्च गच्छन्ती वैरसन्धुक्षणे रता ।। १६ ।।** [०४]

**लक्षालङ्कारः - वैरसन्धुक्षणे रता इत्यत्र वैरसन्धाने ।**

अस्मिन् पर्वणि २३० अध्याये १६श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि वानराद्युत्पत्तौ त्रिंशदधिकद्विशततमोऽध्यायः ।। २३० ।।

---

(०१)(३)ऋक्षवानरनारीषु (३) ते तु वं; तेत्यवं; तेभ्यवं (for तेऽन्ववं); ओजसा तेजसा युक्तान्; .

(०२)(बलाः (for धराः); सर्वे (for चैव); (२)बुद्धि (for युद्धं); बलं (for समं); मनोजवाः (for समा जवे); (३) ताश्च (for निवासाश्च); केचिच्छकुनिपाताश्च; यथेच्छविनि (क्रम); पाताश्च; तत्र (for अत्र); दिवौ (for वनौं);.

(०३)(२) चोदं (क्य बोधं); (४) त्वया (यया) तथा; तथं; तदा (यथा);

(०४)( तद्वचः समाज्ञाय; तदैव समाज्ञाय; तद्वचनमास्थाय (२) यथा(for तथा); (३) इतस्ततश्च धावन्ती (for गच्छन्ती); .

# २३१. एकत्रिंदशदधिकद्विशततमो अध्यायः ।

रामेण स्वस्य यौवराज्याभिषेचनोद्युक्ते दशरथे मन्थराबोधितायाकैकेय्या वचनात्सीतालक्ष्मणाभ्यां सह वनगमनम् ।।

**युधिष्ठिरः**

उक्तं भगवता जन्म रामादीनां पृथक्पृथक्।
प्रस्थानकारणं ब्रह्मच्छ्रोतुमिच्छामि कथ्यताम् ।। १ ।। (०१)

लक्षालङ्कारः - प्रस्थानशमने ब्रह्मन् इत्यत्र प्रस्थानं यात्रा तस्याः शमनं च प्रस्थानशमने । रामलक्ष्मणयोः प्रस्थानं भरतशत्रुघ्नयोस्तदभावं चेत्यर्थः ।

जन्मादि चरितं सर्वं विवाहादि मया श्रुतम् ।। (०२)

कथं दाशरथी वीरौ भ्रातरौ रामलक्ष्मणौ।
सम्प्रस्थितौ वने ब्रह्मन्मैथिली च यशस्विनी ।। २ ।। (०३)

**मार्कण्डेयः**

जातपुत्रो दशरथः प्रीतिमानभवन्नृप।
क्रियारतिर्धर्मरतः सततं वृद्धसेविता ।। ३ ।।

---

(०१)( ब्रह्मन् (for जन्म); .
(०२) (३); गमने; गमनं (for कारणं); (४) तत्वतः; कारणं (for कथ्यताम्);.
(०३)( दाशरथौ (for रथी); (३) सम्प्रस्थितौ (for प्रस्थां); वने; कथं (for वनं); वीरौ (for ब्रह्मन्); (४)तपं (for यशं); .

वृष्टिर्जयन्तो विजयः सिद्धार्थो राष्ट्रवर्धनः ।

अशोको धर्मपालश्च सुमन्त्रश्चाष्टमोऽभवत् ।
एतष्टौ दशरथामात्याः ।(०१)

क्रमेण चास्य ते पुत्रा व्यवर्धन्त महौजसः।
वेदेषु सरहस्येषु धनुर्वेदेषु पारगाः।(०२)

चरितब्रह्मचर्यास्ते कृतदाराश्च पाार्थिव ।। ४ ।। (०३)
यदा तदा दशरथः प्रीतिमानभवत्सुखी ।। ५ ।। (०४)

ज्येष्ठो रामोऽभवत्तेषां रमयामास हि प्रजाः।
मनोहरतया धीमान्पितुर्हृदयनन्दनः ।। ६ ।। (०५)

ततः स राजा मतिमान्मत्वाऽऽत्मानं वयोऽधिकम्।
मन्त्रयामास सचिवैर्धर्मज्ञैश्च पुरोहितैः ।। ७ ।। (०६)

अभिषेकाय रामस्य यौवराज्येन भारत।
प्राप्तकालं च ते सर्वे मेनिरे मन्त्रिसत्तमाः ।। ८ ।। (०७)

लोहिताक्षं महाबाहुं मत्तमातङ्गगामिनम्।
दीर्घबाहुं महोरस्तं(कम्बुग्रीवं महोरस्कं) नीलकुञ्चितमूर्धजम् ।। ९ ।।

---

(०१)( जातः पुत्रो; जाते पुत्रे (for जातपुत्रो;); (२) नृप; पुनः (for नृपः); (३) रतिः; रतः(for परः); (४) धर्मसेविता; ब्रह्मसेवकः.
(०२)( ते चास्य; राजन्ते; (ए)वास्य ते (२)(अ)मितौं (for महैं); (३) च (for स) (४) धनुर्वेदेषु पां;.
(०३)( व्रतं (for ब्रह्मं); च(for ते); चरन्ति ब्रह्मचर्यं ते;.
(०४)(२) पार्थिवाः यथा तथा; दृष्ट्वा रामं (for यदा तदा); .
(०५)( भवेत्; प्रजाम् (for ऽभवत्); (२) ख-घ-हअयामास, रजं (for रमं); स प्रजाः; तेजसा (for हि प्रजाः); (३) श्रीमान् (for धीं); (४) नन्दनः तोषकः;.
(०६)(२) दृष्ट्वा (for मत्वां); विविधैर् (for सचिवैर्); (४)मत्रं (for धर्मं);.
(०७)(२); यौवराज्ये च; राज्याय (४) मन्त्रं (for मन्त्रिं);.

(कम्बुग्रीवं महोरस्कं नीलकुञ्चितमूर्धजम् ।। )(०१)

दीप्यमानं श्रिया वीरं शक्रादनवरं रणे।
पारगं सर्वधर्माणां बृहस्पतिसमं मतौ ।। १० ।। (०२)

सर्वानुरक्तप्रकृतिं सर्वविद्याविशारदम्।
जितेन्द्रियममित्राणामपि दृष्टिमनोहरम् ।। ११ ।। (०३)

नियन्तारमसाधूनां गोप्तारं धर्मचारिणाम्।
धृतिमन्तमनाधृष्यं जेतारमपराजितम् ।। १२ ।। (०४)

पुत्रं राजा दशरथः कौसल्यानन्दवर्धनम्।
सन्दृश्य परमां प्रीतिमगच्छत्कुरुनन्दन ।। १३ ।। (०५)

चिन्तयंश्च महातेजा गुणाग्रामस्य वीर्यवान्।
अभ्यभाशषत भद्रं ते प्रीयमाणः पुरोहितम् ।। १४ ।।

**दशरथः-**

अद्य पुष्यो निशि ब्रह्मन्पुण्यं योगमुपैष्यति।
सम्भाराः सम्भ्रियन्तां वै(मे) रामश्चोपनिमन्त्र्यताम् ।। १५ ।।

श्व एव पुष्यो भविता यत्र रामः सुतो मया।
यौवराज्येऽभिषेक्तव्यः पौरेषु सह मन्त्रिभिः।(०६)

---

(०१) (२); वारण (for मातङ्ग); विक्रमं (for गामिनम्); (३) कम्बुग्रीवं (for दीर्घं); .

(०२) ( जुष्टं (for वीरं); (२) अप्यधिकं बले; अनवरं रणे; अनुपमं बले (४)नये (for मतौ);.

(०३) ( सदानुं (४) रथं; रमं (for हरम्); .

(०४) ( निहन्तारम्; नाशितारम् महाधृतिम्; मतिमतम् (for धृतिमन्तम्); च दातं च (for अनाधृष्यं); .

(०५) (२) कौशल्या नदिं (for -नन्दं); (३) संस्पृश्य (for दृश्य); (४) अगमत् (for अगच्छत्); रघुनन्दनः (for नं); नृपसत्तमः; कुलनन्दन (नं);.

(०६) दशरथ उं ( पुष्ये निशि; पुण्यतिथिद् (२) पुण्य योगम्; पुष्ययोगम्; उपेष्यति

इति तद्राजवचनं प्रतिश्रुत्याथ मन्थरा।
**कैकेयीमभिगम्येदं काले वचनमब्रवीत्** ।। १६ ।।

-श्व एष पुष्यो भविता यत्र रामः सुतो मया ।।
**यौवराज्येऽभिषेक्तव्यः पौरैश्च सह मन्त्रिभिः ।(०१)**

अद्य कैकेयि दौर्भाग्यं राज्ञा ते ख्यापितं महत्।
आशीविष इव(स्त्वां सं)क्रुद्धश्चन्नो(ण्डो) दशतु दुर्भगे ।। १७ ।।(०२)

सुभगा खलु कौसल्या यस्याः पुत्रोऽभिषेक्ष्यते।
कुतो हि तव सौभाग्यं यस्याः पुत्रो न राज्यभाक् ।। १८ ।। (०३)

सा तद्वचनमाज्ञाय सर्वाभरणभूषिता।
**देवी विलग्नमध्येव बिभ्रती रूपमुत्तमम्** ।। १९ ।। (०४)

विविक्ते पतिमासाद्य हसन्तीव शुचिस्मिता।
**प्रणयं व्यञ्जयन्तीव मधुरं वाक्यमब्रवीत्** ।। २० ।। (०५)

**कैकेयी-**

सत्यप्रतिज्ञ यन्मे त्वं काममेकं निसृष्टवान्।

---

(३) वै (for मे); सम्भारान्संश्चयन्तो मे; सम्भ्रियन्तां मे सम्भारा (४) चैवोपमं (for चोपनिमं),
(०१)मार्कण्डेय उं ( रामं (for राजं); (३) गम्यैवं; सङ्गम्य (for गम्येदं);.
(०२) ( ज्ञापितं (for ख्यां); (२) अ-घ- यस्याः पुत्रो न राज्यभाक् (३) त्वा; तु (for त्वां); (४)छन्नो (for चण्डो); दशतु (for दशति); .
(०३)(१/२) (अ)थ सु (for खलु); कौशल्या (ऽ)भिषि (षे)च्यते (for ऽभिषेक्ष्यते); (३)(ऽ)पि (for हि); खलु (for तव);.
(०४) ( एतद्वचनमास्था (ज्ञा)य; (३) देवी (for वेदी); च; स(for (इ)व);.
(०५)( नतिमां; तं समां (for पतिमां); (२) हसन्ति च; विहसन्ती; हसन्तीह; सुवि स्मिता सिमध्यमा; भुवि स्मिता (for शुचिं); (३) राजानं तर्जयन्तीव; .

उपाकुरुष्व तद्राजंस्तस्मान्मुच्यस्व सङ्कटात्।
तदद्य कुरु सत्यं मे वरं वरद भूपते ।। २१ ।। (०१)

**दशरथाः-**

वरं ददानि ते हन्त तद्गृहाण यदिच्छसि।
अबध्यो बध्यतां कोऽद्य बध्यः कोऽद्य विमुच्यताम् ।। २२ ।। (०२)

धनं ददानि कस्याद्य ह्रियतां कस्य वा पुनः।
ब्राह्मणस्वादिहान्यत्र यत्किञ्चिद्वित्तमस्ति मे ।। २३ ।। (०३)

- पृथिव्यां राजराजोऽस्मि चातुर्वर्ण्यस्य रक्षिता ।
यस्तेऽभिलषितः कामो ब्रूहि कल्याणि माचिरम् ।

**मार्कण्डेयः-**

सा तद्वचनमाज्ञाय परिगृह्य नराधिपम्।
आत्मनो बलमाज्ञाय तत एनमुवाच ह ।। २४ ।। (०४)

**कैकेयी-**

आभिषेचनिकं यत्ते रामार्थमुपकल्पितम्।
भरतस्तदवाप्नोतु वनं गच्छतु राघवः ।। २५ ।।

---

(०१) कैकेयी; ( यं (for यन्); पुरा मां प्रति यन्मे त्वं (२) वरम् (for कामम्); एवं (for एकं); विं (for निं); (३/४) अपां (for उपां); तं; मां (for तद्); किल्बिषात् सङ्गरात् (for सङ्कटात्); तदद्य कुरू सत्यं मे वरं वरध भूपते;.

(०२) दशरथः (for राजा); ( ददामि; भद्रे (for हन्त); (२) यम्; यथा(for यद्); (३) वध्यो बध्यतां; कोत्र; को नु (for कोऽद्य); अवध्यतां कोद्यः; (४) बद्धः; बन्धः; बध्यः(for वध्यः); कोत्र; वापि; को नु; वाद्य; को वा (for कोऽद्य); को वा वध्यो विमुच्यतां;.

(०३) ( ददामि (२) क्रियतां; गृह्यतां (for ह्रियतां); धनं (for पुनः); कस्य वा ह्रियतां पुनः; (३) स्वानि चां (for स्वादिहां);.

(०४) ( एतद् (for सा तद्); आस्थाय (for आज्ञाय) (३) आस्थाय (for आज्ञाय); .

नवपश्च च वर्षाणि दण्डकारण्यमाश्रितः।
चीराजिनजटाधरी रामो भवतु तापसः।[०१]
- नव पश्च च वर्षाणि दण्डकारण्यमाश्रितः ।
चीराजिनजटाधारी रामो वसतु तापसः ।

**मार्गण्डेयः-**

स तद्राजा वचः श्रुत्वा विप्रियं दारुणोदयम्।
**दुःखार्तो भरतश्रेष्ठ न किञ्चिद्व्याजहार ह ।। २६ ।।** [०२]

ततस्तथोक्तं पितरं रामो विज्ञाय वीर्यवान्।
**वनं प्रतस्थे धर्मात्मा राजा सत्यो भवत्विति ।। २७ ।।** [०३]

तमन्वगच्छल्लक्ष्मीवान्धनुष्माँल्लक्ष्मणस्तदा।
**सीता च भार्या भद्रं ते वैदेही जनकात्मजा ।। २८ ।।** [०४]

ततो वनं गते रामे राजा दशरथस्तदा।
**समयुज्यत धर्मात्मा(देहस्य) कालपर्यायधर्मणा ।। २९ ।।** [०५]

रामं तु गतमाज्ञाय राजानं च तथागतम्।
**आनाय्य भरतं देवी कैकेयी वाक्यमब्रवीत् ।। ३० ।।** [०६]

**कैकेयी-**

गतो दशरथः स्वर्गं वनस्थौ रामलक्ष्मणौ।

---

(०१) ( अभिं (for आभिं); तु(for ते); (४) व्रजं (for गच्छं);.
(०२) ( स तु; तस्या (for स तद्) वरं (for वचः); (२) प्रियाया दुःसहं तदा (४) प्रत्युवाच (for व्याजहार); च; सः (for ह);.
(०३) ( तदवश्यं तु पितरं (४) सत्यो राजा;.
(०४)(२) वपुं (for धनुं); तथा; ततः (for तदा); (३)भार्या च रामं (for भार्या);.
(०५)( वन (for वनं); गतो रामो (३) देहोस्य; धर्मात्मा (for देहस्य); .
(०६)( रामस्य मतमाज्ञाय; रामागमनमां (२) मृतं (for गतम्); (३) आनय्य; आनद्य (for आनाय्य); .

गृहाण राज्यं विपुलं क्षेमं निहतकण्टकम् ।। ३१ ।।

**मार्कण्डेयः-**

तामुवाच स धर्मात्मा नृशंसं बत ते कृतम्।
पतिं हत्वा कुलं चेदमुत्साद्य धनलुब्धया ।। ३२ ।।(०१)

अयशः पातयित्वा मे मूर्ध्नि त्वं कुलपांसने।
सकामा भव मे मातरित्युक्त्वा प्ररुरोद ह ।। ३३ ।।(०२)

स चारित्रं विशोध्याथ सर्वप्रकृतिसंनिधौ।
अन्वयाद्भ्रातरं रामं विनिवर्तनलालसः ।। ३४ ।।(०३)

- संस्कृत्य पितरं वृत्तं भरतो धर्मवत्सलः ।(०४)

कौसल्यां च सुमित्रां च कैकेयीं च सुदुःखितः।
अग्रे प्रस्थाप्य यानैः स शत्रुघ्नसहितो ययौ ।। ३५ ।।(०५)

वसिष्ठवामदेवाभ्यां विप्रैश्चान्यैः सहस्रशः।
पौरजानपदैः सार्धं रामानयनकाङ्क्षया ।। ३६ ।।(०६)

ददर्श चित्रकूटस्थं स रामं सहलक्ष्मणम्।
तापसानामलङ्कारं धारयन्तं धनुर्धरम् ।। ३७ ।।

उवाच प्राञ्जलिर्भूत्वा प्रणिपत्य रघूत्तमम्।

---

(०१) (२) वै; मे (for ते); (३) हित्वा (for हत्वा); कुलं त्वेमम्; मूलछेदम् (for कुलं); (चेदम्); .
(०२)(३) मूढे (for मूर्ध्नि); कुलपांसनि; पांसिनि (३) तात (for मातर्);.
(०३)( स्व (for स); चापि तं; चारित्र्यं; स चारित्र(त्र्य) विशुद्धचर्थं (२) सर्वं (for सर्व); .
(०४) (३); वीरं (for रामं); (४) विनिर्वर्तन; अभिवर्तनं; संनिवर्तनं;.
(०५)( कौशल्यां (२) सुदुःखितां (३) यानेन (for यानैःस); अग्रे प्रस्थापयामास (४) ययुः (for ययौ);.
(०६)(२)क-ख-घ-समन्वितः, अन्यैर्विप्रैः (for विप्रैं); समन्वितः (for सहं); (३) पौररै (for पौर); (४) गमन; नुनय (for नयन); काम्यया (for काङ्क्षया); .

शशंस मरणं राज्ञः सोऽनाथांश्चापि कोसलान्।
नाथ त्वं प्रतिपद्यस्व स्वराज्यमिति चोक्तवान्।

स तस्य वचनं श्रुत्वा रामः परमदुःखितः।
चकार देवकल्पस्य पितुः स्नात्वोदकक्रियाम्।
अब्रवीत्स तदा रामो भ्रातरं भ्रातृवत्सलम्।

पादुके मे भविष्येते राज्यगोप्त्र्यौ परन्तप।
एवमस्त्विति तं प्राह भरतः प्रणतस्तदा।

**(श्रीराम)ः**

स रामो भरतं दृष्ट्वा श्रुत्वा स्वर्गगति पितुः
कृत्वा तस्योदकं सम्यगुवाच भ्रातरं प्रियम्।
गच्छ तात प्रजा रक्ष्याः सत्यं रक्षाम्यहं पितुः ॥ ३८ ॥

**मार्कण्डेयः-**

विसर्जितः स रामेण पितुर्वचनकारिणा।
नन्दिग्रामेऽकरोद्राज्यं पुरुस्कृत्यास्य पादुके ॥ ३९ ॥ (०१)

रामस्तु पुनराशङ्क्य पौरजानपदागमम्।
प्रविवेश महारण्यं शरभङ्गाश्रमं प्रति ॥ ४० ॥ (०२)

सत्कृत्य शरभङ्गं स दण्डकारण्यमाश्रितः।
नदीं गोदावरीं रम्यामाश्रिय न्यवसत्तदा ॥ ४१ ॥(०३)

---

(०१)(३) महद् (for ऽकरोद्); (४) च; स (for (अ)स्य); भारत (for पादुके); .
(०२) ( शङ्कन् (for शङ्क्य); (२) गतिं (for गमम्); (३) विवेश महदारण्यं; .
(०३)( च; तु (for स); (२) वासिनः (for माश्रितः); (३) नदीं गोदावरी नाम (for रम्याम्); .

अस्मिन्पर्वणि २३१ अध्याये ४१ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि वानराद्युत्पत्तौ एकत्रिंशदधिकद्विशततमोऽध्यायः ।। २३१ ।।

# २३२. द्वात्रिंशदधिकद्विशततमो अध्यायः ।।

**तथा लश्माणकरेण शूर्पणखीवैरूप्यकरणपूर्वकं खरादि हननम् ।। १ ।। ततः क्रुद्धेन रावणेन रामविप्रियचिकीर्षया मारीचरमीपं प्रति गमनम् ।। २ ।।**

वसतस्तस्य रामस्य ततः शूर्पणखाकृतम्।
खरेणासीन्महद् वैरं जनस्थाननिवासिना ।। १ ।। (०१)

रक्षार्थं तापसानां तु राघवो धर्मवत्सलः।
चतुर्दश सहस्राणि जघान भुवि रक्षसाम् ।। २ ।। (०२)

दूषणं च खरं चैव निहत्य सुमहाबलौ।
चक्रे क्षेमं पुनर्धीमान्धर्मारण्यं च राघवः ।। ३ ।। (०३)

- तेन शूर्पणखा दृष्ट्वा सहस्राणि चतुर्दश ।
हतानि युधि रामेण शरैस्तीक्ष्णैः पदातिना ।

हतेषु तेषु रक्षःसु ततः शूर्पणखा पुनः।

---

(०१)( तत्र (for तस्य) (२) यत्र; तत्र; वने (for ततः); सूर्प; शूर्पणरवीकृनं (ते); शुर्पणखाकृते; (३) खरेणाभून् महावैरं; महद्युद्धं;.

(०२)( तु; स (for च); (२)भक्तं (for धर्मं); (४) युधि; सह (for भुवि); राक्षसान् (for रक्षसाम्); .

(०३)( दूषणं स्वरं (२) स निहत्य (for निहत्य सु); स; च (for सु); (३) क्षेत्रं; क्षेम (for क्षेमं); .

ययौ निकृत्तनासोष्ठी लङ्कां भ्रातुर्निवेशनम् ।। ४ ।। (०१)

ततो रावणमभ्येत्य राक्षसी दुःखमूर्च्छिता।
पपात पादयोर्भ्रातुः संशुष्करुधिरानना ।। ५ ।। (०२)

तां तथा विकृतां दृष्ट्वा रावणः क्रोधमूर्च्छितः।
उत्पपातासनात्क्रुद्धो दन्तैर्दन्तानुपस्पृशन्।(०३)
स्वानमात्यान्विसृज्याथ विविक्ते तामुवाच सः** ।। ६ ।।

**रावणः-**

केनास्येवं कृता भद्रे मामचिन्त्यावमन्य च ।(०४)

कः शूलं तीक्ष्णमासाद्य सर्वगात्रैर्निषेवते। ।। ७ ।। (०५)

कः शिरस्यग्निमाधाय विश्वस्तः स्वपते सुखम्।(०६)
आशीविषं घोरतरं पादेन स्पृशतीह कः** ।। ८ ।।
सिंहं केसरिणं कश्च दंष्ट्रायां स्पृश्य तिष्ठति ।। ९ ।। (०७)

**मार्कण्डेयः-**

इत्येवं ब्रुवतस्तस्य स्रोतोभ्यस्तेजसोऽर्चिष।

---

(०१)(२) सूर्प; शूर्पनखा; णरवी। (३)नासौ ष्ठा; नासोष्ठा (४) भ्रातृ (for भ्रातुर्);.

(०२)( आश्यि (for अभ्येत्य); अब्रवीद्रावणं सा तु (२) क्रोध (for दुःखं); (३) मूले (for भ्रातुः); (४) रुधिराशना; हृदयानना; रुधिरेक्षणा; रुधिराप्लुता; रुधिरा तदा;.

(०३)( तदा (for तथा); (२) क्रोध वर्जितः (४)अनुस्पृशन्; उपस्पृशत्;.

(०४)( तान् (for स्वान्); (२) ह (for सः); (३)(अ)पि (for (अ)सि); (४) अस्मृत्वा (for त्य); (for अचिन्त्य) (अ)वमत्य;.

(०५)( स (for कः) आक्रम्य (for आसाद्य); (२) गात्रेषु सें (for गात्रैर्निषें);.

(०६)(१)आदाय; आसाद्य (for आधाय); (४)विस्रब्धः (for श्वस्तः); सुखी (for सुखम्); .

(०७)( विषं; तमं (for तरं); (२)स्पर्शते (इ)व कः; (इ)व च; हतः (for (इ)ह कः); (३) सिंह (for सिंहं) केशरिणं शश्वद्; चैव; पश्च; मत्तो (for कश्च); कश्चित्केसरिणो दंष्ट्रां (४) दंष्ट्रायां; दंष्ट्रया सुखं संस्पृश्य तिष्ठति; स्पृष्ट्वा दंष्ट्रासु तिं; .

**निश्चेरुर्दह्यतो रात्रौ वृक्षस्येव स्वरन्ध्रतः ।। १० ।।** (०१)

**लक्षालङ्कारः - स्रोतोभ्यस्तेजसोऽर्चिष इत्यत्र स्रवन्ति येभ्यो जलमलादीनीति स्रोतांसि नवद्वाराणि ।**

**तस्य तत्सर्वमाचख्यौ भगिनी रामविक्रमम्।**
**खरदूषणसंयुक्तं राक्षसानां पराभवम् ।। ११ ।।** (०२)

**- ततो ज्ञातिवधं श्रुत्वा रावणः कालनोदितः ।**

**रामस्य वधमाकाङ्क्षन्मारीच मनसागमत् ।**

ज्ञात्वा (क्य श्रुत्वा); स्मरन् (क्य (अ)गमत्);

**स निश्चित्य ततः कृत्यं स्वसारमुपसान्त्व्य च।**
**ऊर्ध्वमाचक्रमे राजा विधाय नगरे विधिम् ।। १२ ।।** (०३)

**त्रिकूटं समतिक्रम्य कालपर्वतमेव च ।**
**ददर्श मकरावासं गम्भीरोदं महोदधिम् ।। १३ ।।** (०४)

**तमतीत्याथ गोकर्णमभ्यगच्छद्दशाननः।**
**दयितं स्थानमव्यग्रं शूलपाणेर्महात्मनः ।। १४ ।।** (०५)

**तत्राभ्यगच्छन्मारीचं पूर्वमात्यं दशाननः।**

---

(०१) ( वदतस् (for ब्रुवतस्); स्रोतों स्वर (२) वक्रें; श्त्रें; नेत्रें (for स्रोतों); (३) दह्यमानस्य; दह्यते रात्रौ;.

(०२)( सा तस्य (for तस्य तत्); पूर्वम् (for सर्वम्); (२); भग्नी रामस्य विक्रमं (३) युक्तानां (for संयुक्तं); (४)तुः बलं हतं; भयावहं; वधं तथा (for पराभवम्);.

(०३)( तु तत्; स तत् (for ततः); स विनिश्चित्य तत्कृत्यं (for ) अभि(for उप); सागरं बहुलाकरं (कृतं); सागरं लवणाकरं (for र्णवं); आकाशं बहुलाकरं (३) राजन् (for राजा); .

(०४)(३); स ददर्श खगावासं (४)अम्भोराशि महोदधिं; सागरं बहुलाकरं आकाशं बहुलारवं; सागरं सरितां पतिं .

(०५) (२) अभि; अभ्यां (for अभ्यं); (३)अत्युग्रं (for अव्यग्रं); .

पुरा रामभयादेव तापस्यं समुपाश्रिम् ।। १९ ।। [०१]

अस्मिन् पर्वणि २३२अध्याये १९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि रामवनाभिगमने द्वात्रिंशदधिकद्विशततमोऽध्यायः ।। २३२ ।।

# २३३. त्रयस्त्रिंशदधिकद्विशततमो अध्यायः ।

Consept Pest Maadi. Page. No.1341

**मार्कण्डेयः**

मारीचस्त्वथ सम्भ्रान्तो दृष्ट्वा रावणमागतम्।
पूजयामास सत्कारैः फलमूलादिभिस्ततः ।। १ ।। [०२]

विश्रन्तं चैनमासीनमन्वासीनः स राक्षसः।

---

(०१)( ततो भ्यगं (२) स रावणः (for दशां); (४) तापसं; तपस्यां शिः तापसं स्यं) प्रिय (चिर) जीवितं; .
(०२) ( मारीचस्तमसम्भ्रान्तं (४) ततः; तदा (for तथा); .

उवाच प्रश्रिं वाक्यं वाक्यज्ञो वाक्यकोविदम् ॥ २ ॥ [०१]

**मरीचः-**

न ते प्रकृतिमान्वर्णः कच्चित्क्षेमं पुरे तव ।
कच्चित्प्रकृतयः सर्वा भजन्ते त्वां यथा पुरा ॥ ३ ॥ [०२]

किमिहागमने चापि कार्यं ते राक्षसेश्वर ।
कृतमित्येव तद्विद्धि यद्यपि स्यात्सुदुष्करम् ॥ ४ ॥ [०३]

**मार्कण्डेयः-**

शशंस रावणस्तस्मै तत्सर्वं रामचेष्टितम्।
समासेनैव कार्याणि क्रोधामर्षसमन्वितः।
मारीचस्त्वब्रवीच्छ्रुत्वा समासेनैव रावणम् ॥ ५ ॥

**मार्कंडेय उं**

**- समासेनैंव कार्याणि क्रोधामर्षसमन्वितः ।**

**मारीचः-**

अलं ते राममासाद्य वीर्यज्ञो ह्यस्मि तस्य वै।
बाणवेगं हि कस्तस्य शक्तः सोढुं महात्मनः ॥ ६ ॥ [०४]

प्रव्रज्यायां हि मे हेतुः स एव पुरुषर्षभः।
विनाशमुखमेतत्ते केनाख्यातं दुरात्मना।[०५]
तमुवाचाथ सक्रोधो रावणः परिभर्त्सयन्** ॥ ७ ॥

---

(०१)( चैवम् (for चैनम्); (२) तु (for स); रावणं; रावणः (for राक्षसः); रावणं राक्षसाधिपं (३) प्रसृतं; प्राञ्जलिर् प्रश्रुतं (for प्रश्रिं); (४) वाक्यज्ञैद्; वाक्यकोविदः.

(०२)( ते न भजन्ति (भवन्तं) च (for त्वां); सुखं; पुरं (for पुरा);.

(०३)( गमने चैव; गमने वापि; गमनेनापि (२) कृत्यं (for कार्यं);.

(०४) (२) ह्यसि; (ऽ)स्मि हि वीर्यस्यास्य च तस्य वै (३)बाणमेकं; त्वस्य; (for तस्य); .

(०५) ( प्रव्र (for व्रा); ज्याया; प्रव्राज्यायां (२) पुरुषर्षभ; .

**रावणः-**

अकुर्वतोऽस्मद्वचनं स्यान्मृत्युरपि ते ध्रुवम् ।। ८ ।। [०१]

**मार्कंडेयः-**

मारीचश्चिन्तयामास विशिष्टान्मरणं वरम्।
अवश्यं मरणे प्राप्ते करिष्याम्यस्य यन्मतम्।[०२]

ततस्तं प्रत्युवाचाथ मारीचो राक्षसेश्वरम्(रक्षसां वरम)। ।। ९ ।।

**मारीचः-**

किं ते साह्यं मया कार्यं करिष्याम्यवशोऽपि तत् ।। १० ।। [०३]

तमब्रवीद्दशग्रीवो गच्छ सीतां फलोभय।
रत्नशृङ्गो मृगो भूत्वा रत्नचित्रतनूरुहः ।। ११ ।। [०४]

ध्रुवं सीता समालक्ष्य त्वां रामं चोदयिष्यति।
अप्रकान्ते च काकुत्स्थे सीता वश्या भविष्यति ।। १२ ।। [०५]

तामादायापनेष्यामि ततः स न भविष्यति।
भार्यावियोगादुर्बुद्धिरेतत्साह्यं कुरुष्व मे ।। १३ ।। [०६]

लक्षालङ्कारः - ततः स न भविष्यति इत्यत्र न भविष्यति मरिष्यतीत्यर्थः ।

---

(०१) (सङ्क्रुद्धो (for सक्रोधो); (२) प्रतिं (for परिं); (३) मे; मद् (for (ऽ)स्मद्र);.

(०२)(२); ध्रुव (for वरम्); (३) अवश्य(for इयं); (४) (अ)द्य (for (अ)स्य); यद्धितं (for यन्मतम्);.

(०३)(२); रक्षसां वरं; राक्षसे श्वरः (३) सह्यं; वाक्यान् (for साह्यं); कि ते शक्यं मया कर्तुं; किं ते कार्यं दशग्रीव (४) (अ)वशोषितं; (अ)यशोपि तत्; (अ)वशोपि ते; .

(०४) (२); शीतां (for सीतां); विलो (३)रत्नशृङ्गी (४) चित्रं रुहं; .

(०५)( एवं (for ध्रुवं); समालोक्य; वेक्ष्य; समीक्ष्य त्वां (for लक्ष्य) (२) राधवं (for त्वां रामं); नोदं; प्रेरं (for चोदं); (३) तु (for च) (४) नेतुमाशा (for सीता वश्या);.

(०६) ( यस्यामि (for नेष्यामि); (३) भार्या योगाच्च; तस्या वियोगाद्; भार्यावियोगी

(४) कार्यं्। शक्यं; सह्यं (for साह्यं); .

इत्येवमुक्तो मारीचः कृत्वोदकमथात्मनः।
रावणं पुरतो यान्तमन्वगच्छत्सुदुःखितः ॥ १४ ॥ (०१)

ततस्तस्याश्रमं गत्वा रामस्याक्लिष्टकर्मणः।
चक्रतुस्तद्‌तथा सर्वमुभौ यत्पूर्वमन्त्रितम् ॥ १५ ॥ (०२)

रावणस्तु यतिर्भूत्वा मुण्डः कुण्डी त्रिदण्डधृत्।
मृगश्च भूत्वा मारीचस्तं देशमुपजग्मतुः ॥ १६ ॥ (०३)

लक्षालङ्कारः - मुण्डः कुण्डी इत्यत्र कुण्डी 'कुण्डिका च कमण्डलुः' इत्यभिधानात् कुण्डिकावान् ।

दर्शयामास मारीचो वैदेहीं मृगरूपधृक्।
चोदयामास तस्यार्थे सा रामं विधिचोदिता ॥ १७ ॥ (०४)

रामस्तस्याः प्रियं कुर्वन्धनुरादाय सत्वरः।
रक्षार्थे लक्ष्मणं न्यस्य प्रययौ मृगलिप्सया ॥ १८ ॥ (०५)

स धन्वी बद्धतूणीरः खङ्गगोधाङ्गुलित्रवान्।
अन्वधावन्मृगं रामो रुद्रस्तारामृगं यथा ॥ १९ ॥ (०६)

लक्षालङ्कारः - रुद्रस्तारामृगं यथा इत्यत्र संहारकाले मृगशीर्षाख्यतारामृगम् ।

---

(०१) (२) कृत्वोदर्कम्; कृत्वा रूपम् (४) अनुं (for अन्वं); सुयोधनः (for सुदुः);.

(०२)(२); चेतसः; ती कारिणः (for कर्मणः); (३) तौ; च (for तत्); यथा; ततः (for तथा); (४) तत् (for यत्); माशिं (for मन्त्रितम्); .

(०३) (२); मुण्डमुण्डी; मुण्डकुण्डी; मुण्डमण्डी भृत्; धृत्; भाक्; वान् (for धृक्); (३) तु (for च); मृगो भूत्वा स मारीचम्; .

(०४) (१/२) वैदेहीं मारीचो मृगरूपधृत्; मृगपश्यते (३) नोदं (for चोदं); तत्पार्श्वे (for तस्यार्थे); (४) नोदिता (for चोदिता); .

(०५)(३) रक्षार्थं; लक्ष्मणस्तस्य;.

(०६)(२) खङ्गी; बद्ध(for खङ्ग); (४) क्रतुं (for तारां);.

सोऽन्तर्हितः पुनस्तस्य दर्शनं राक्षसो व्रजन्।
चकर्ष च महा(हद)ध्वानं रामस्तं बुबुधे ततः ॥ २० ॥ [०१]

निशाचरं विदित्वा तं राघवः प्रतिभानवान्।
अमोघं शरमादाय जघान मृगरूपिणम् ॥ २१ ॥ [०२]

स रामबाणाभिहतः कृत्वा रामस्वरं तदा।
हा सीते लक्ष्मणेत्येवं चुक्रोशार्तस्वरेण ह ॥ २२ ॥ [०३]

शुश्रव तस्य वैदेही ततस्तां करुणां गिरम्।
सा प्राद्रवद्यतः शब्दस्तामुवाचाथ लक्ष्मणः ॥ २३ ॥ [०४]

**लक्ष्मणः-**

अलं ते शङ्कया भीरु को रामं प्रहरिष्यति।
मुहूर्ताद्द्रक्ष्यसे रामं भर्तारं त्वं शुचिस्मिते ॥ २४ ॥ [०५]

**मार्कण्डेयः-**

इत्युक्ता सा प्ररुदती पर्यशङ्कत लक्ष्मणम्।
हता वै स्त्रीस्वभावेन शुक्लचारित्रभूषणा।[०६]

---

(०१) ( ततं (for पुनं); (२) राक्षसोव्रजत्; सोगमत्; सो गतः; साधमः; सेश्वरः दीर्घम् (for महद्); (४) तद् (for तं); बुबुधेश्वरः.

(०२)( तं विदित्वा (२) रामस्तु (for राघवः); प्रणिधानवान् बहुं (for मृगं); .

(०३)(२) चार्त स्वरं (स्वनं; रवं); (for रामं); तथा; ततः (for तदा); (३) त्येव (for त्येवं); (४) वै (for ह); .

(०४) ( श्रुत्वा तु (for शुश्रव); (३) सम्प्रधावद्; स प्राधा (द्र); सा प्राधां; सा पपात;
सा प्रापतद् ततः सीता (for यतः शब्दस्);.

(०५) ( देवि (for भीरु); (२) विषहिष्यते; प्रहरि(विहनि) ष्यति; (४) आगतं त्वं; भर्तारं त्वं; शुचिस्मितं मातङ्गमिव शुष्मिणं;.

(०६)( शुचिदती; सुरुदती; शुक्लद (दं)ती; च रुदती; तु रुं (२) त लक्ष्मणं (३) हृता; धृत्या; भीता (for हता); (४) शुक्ल; शुद्धा (for शुद्ध); (भूषणं); दूषणं; दूषणा; .

सा तं परुषमारब्धा वक्तुं साध्वी पतिव्रता ** ।। २५ ।।

**सीता-**

नैष कामो भवेन्मूढ यं त्वं प्रार्थयसे हृदा ।। २६ ।।(०१)

अप्यहं शस्त्रमादाय हन्यामात्मानमात्मना।
पतेयं गिरिशृङ्गाद्वा विशेयं वा हुताशनम् ।। २७ ।।(०२)

- पिबेयं वा विषं घोरं त्यजाम्यात्मानमद्य वै ।

रामं भर्तारमुत्सृज्य न त्वहं त्वां कथञ्चन।
न (नि)हीनमुपतिष्ठेयं शार्दूली क्रोष्टुकं यथा ।। २८ ।।(०३)

**मार्कण्डेयः-**

एतादृशं वचः श्रुत्वा लक्ष्मणः प्रियराघवः
पिधाय कर्णौ सद्वृत्तः प्रस्थितो येन राघवः।
स रामस्य पदं गृह्य प्रससार धनुर्धरः ** ।। २९ ।।

(१२५४) अधिकपाठः - कपाठे

अवीक्षमाणो बिम्बोष्ठीं प्रययौ लक्ष्मणस्तदा।(०४)

- अवेक्षमाणो वैदेहीं प्रययौ लक्ष्मणस्तदा ।(०५)

एतस्मिन्नन्तरे रक्षो रावणः प्रत्यदृश्यत

---

(०१)( आस्थाय (for आरब्धा); सा तं परुषया वाचा (२)वाक्यं (for वक्तुं); व्रते स्थिता (for पतिं) (३) नैष कामो; नैव कालो ह्ययं (for भवेन्); (४) यत्; यस् (for यं); तदा; वृथा (for हृदा);.
(०२) शृगेभ्यो (for शृङ्गाद्वा); .
(०३) ( आसाद्य (for उत्सृज्य); (२) त्वा (for त्वां); कदां (for कथं); (३) छः ङ्ग लु कु। न हीनम्; -ह्न गः ङ्ग विहीनम् अपि; छे। अनु उप-),
(०४)(२) सीतायाः स वचः श्रुत्वा; तादृशं वचनं श्रु (२) राघवप्रियः (for प्रियं); (४) प्रययौ; प्रतस्थे (for प्रस्थितो); राक्षसः (for राघवः); .
(०५)(अवीक्षमाणो बिम्बोष्ठीं (for वैदेहीं) .

अभव्यो भव्यरूपेण भस्मच्छन्न इवानलः ॥ ३० ॥

यतिवेषप्रतिच्छन्नो जिहीर्षुस्तामनिन्दिताम्।
उपागच्छत्स वैदेही रावणः पापनिश्चयः ॥ ३१ ॥ (०१)

- उपागच्छत्स वैदेहीं रावणः पापनिश्चयः ।

सा तमालक्ष्य सम्प्राप्तं धर्मज्ञा जनकात्मजा।
निमन्त्रयामास तदा फलमूलाशनादिभिः ॥ ३२ ॥ (०२)

अवमन्य ततः सर्वं स्वरूपं प्रत्यपद्यत।
सान्त्वयामास वैदेहीमिति राक्षसपुङ्गवः ॥ ३३ ॥ (०३)

**रावणः-**

सीते राक्षसराजोऽहं रावणो नाम विश्रुतः।
मम लङ्का पुरी नाम्ना रम्या पारे महोदधेः ॥ ३४ ॥ (०४)

तत्र त्वं नरनारीषु शोभिष्यसि मया सह।
भार्या मे भव सुश्रेणि तापसं त्यज राघवम् ॥ ३५ ॥ (०५)

**मार्कण्डेयः-**

एवमादीनि वाक्यानि श्रुत्वा तस्याथ जानकी।
पिधाय कर्णौ सुश्रेणी मैवमित्यब्रवीद्वचः ॥ ३६ ॥ (०६)

**जानकी-**

---

(०१) ( दुष्टो (for रक्षो); (३) वेश (for वेष); प्रविवेश प्रतिं; यतिवेषेण प्रं .

(०२) (१/२) आलोक्य (for आलक्ष्य); सम्प्राप्तं धर्मज्ञा सम्भ्रान्ता (for सम्प्राप्तं) (४) लासनादिभिः;.

(०३)( अवमत्य (for मन्य); च तत्; ततः (for स तत्); अवमन्यत तत्सर्वं; अथावमत्य तत्सर्वं; अवमन्यत्ततः (२) स रूपं; स्वं रूपं प्रत्यपद्यत (४) कामी (for इति);.

(०४) (२) पुङ्गवः; नामतः (for विश्रुतः); (३/४) नात्रा, सम्या; महोदधौ; .

(०५) ( व (न)रनारीभिः; नरनारीषु; वनराजीषु;.

(०६) एवमादि ब्रवीद्वचः; (२) नस्यथ (for सीताथ); .

प्रपतेद्द्यौः सनक्षत्रा पृथिवी शकलीभवेत्।
शुष्येतोयं निधौ तोयं चन्द्रः शीतांशुतां त्यजेत् ।। ३७ ।।

उष्णांशुत्वमथो जह्यादुदित्यो वह्निरुष्णताम्।
शैत्यमग्निरियान्नाहं त्यजेयं रघुनन्दनम् ।। ३८ ।। (०१)

कथं हि भिन्नकरटं हस्तिनं(पद्मिनं) वनगोचरम्।
उपस्थाय महानागं करेणुः सूकरं स्पृशेत् ।। ३९ ।। (०२)

कथं हि पीत्वा माध्वीकं पीत्वा च मधुमाधवीम्।
लोभं सौवीरके कुर्यान्नारी काचिदिति स्मरेत् ।। ४० ।। (०३)

लक्षालङ्कारः - लोभं सौवीरके कुर्यात् इत्यत्र 'आरनालकसौवीरकुल्माषाभिषुतानि तु' इत्यभिधानात् सौवीरमारनालकम् । 'अम्बली'त्यपभ्रंशभाषा ।

**मार्कण्डेयः-**

इति ता तं समाभाष्य प्रविवेशाश्रमं ततः।
क्रोधात्प्रस्फुरमाणौष्ठी विधिन्वाना करौ मुहुः।
तामभिद्रुत्य सुश्रेर्णी रावणः प्रत्यषेधयत् ।। ४१ ।। (०४)
- क्रोधात्प्रस्फुरमाणौष्ठी विधुन्वाना करौ मुहुः ।(०५)

भर्त्सयित्वा तु रूक्षेण स्वरेण गतचेतनाम्।

---

(०१)(२) त्यक्त्वा शौत्यमिया (त्यं भजे); त्राहं; .
(०२)( प्र (हि); करकं; करणं (२) पह्मिनी (for पह्मिनं); (३) अपहाय ( उपस्थाय);
(४); करभं; शूकरं (for सूकरं); व्रजेत्) (for स्पृशेत्);.
(०३)( तु; तु (for हि); पित्वा च; पीत्वाथ (for हि पीत्वा); भ्रमरो (for माध्वीकं); कयं हि भुक्तवा स्वादूनि; (२) हित्वा (for पीत्वा); मधुमाधवं; माधवे; रासवं (३) लोभं इतरपानेषु (४) स्मर स्मरेत् स्मरेः; .
(०४)( सीता; चाथ(for सा तं); समालक्ष्य; लोक्य (२) ततः (for पुनः);.
(०५)(३); अभिद्रुत्य; अनुसृत्य; (४) 'षेधत; भाषत; धर्षयत् (for षेधयत्); .

मूर्धजेषु निजग्राह ऊर्ध्वमाचक्रमे ततः ।। ४२ ।।(०१)

तां ददर्श ततो गृध्रो जटायुर्गिरिगोचरः।
रुदतीं राम रामेति ह्रियमाणां तपस्विनीम् ।। ४३ ।।(०२)

अस्मिन् पर्वणि २३३अध्याये ४३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि मारीचवधे सीताहरणे च अष्टसप्तत्यधिकद्विशततमोऽध्यायः ।। २३३ ।।

# २३४. चतुस्त्रिंशदधिकद्विशततमो अध्यायः ।

Consept Paste P.No.1347 .

**मार्कण्डेयः**

सखा दशरथस्यासीज्जटायुररुणात्मजः।
गृध्रराजो महावीरः सम्पातिः यस्य सोदरः ।। १ ।।(०३)

---

(०१) ( च; स; स्व (for तु); कात्स्र्येन; सुश्रेणीं; रूपेण (for रूक्षेण); रूक्षेण (for स्वरेण); (४) ऊर्ध्वमाचक्रमे पुनः (for ततः);.

(०२)( ततो (for तदा); (२) वनं (for गिरिं); (३) रुदन्तीं (for रुदतीं); .

(०३) (अ)पि (for (आ)सीज्); (३) वीरः (for वीर्यः);.

स ददर्श तदा सीतां रावणाङ्कगदां स्नुषाम्।
सक्रोधोऽभ्यद्रवत्पक्षी रावणं राक्षसेश्वरम् ॥ २ ॥(०१)

अथैनमब्रवीद्गृध्रो मुञ्च मुञ्चेति मैथिलीम्।
ध्रियमाणे मयि कथं हरिष्यसि निशाचर। ॥ ३ ॥

न हि मे मोक्ष्यसे जीवन्यदि नोत्सृजसे वधूम्।(०२)
उक्त्वैवं राक्षसेन्द्रं तं चकर्त नखरैर्भृशम् ॥ ४ ॥ (०३)

पक्षतुण्डप्रहारैश्च शतशो जर्जरीकृतम्।
चक्षार रुधिरं भूरि गिरिः प्रस्रवणैरिव ॥ ५ ॥(०४)

स वध्यमानो गृध्रेण रामप्रियहितैषिणा।
खड्गमादाय चिच्छेद भुजौ तस्य पतत्रिणः ॥ ६ ॥

- अभिदुद्राव सक्रुद्धः पतगेन्द्रं दशाननः ।(०५)

निहत्य गृधराजं स भिन्नाभ्रशिखरोपमम्।
ऊर्ध्वमाचक्रमे सीतां गृहीत्वाङ्केन राक्षसः ॥ ७ ॥(०६)

यत्र यत्र तु वैदेही पश्यत्याश्रममण्डलम्।

---

(०१) ( ततः (for तदा); (२) रावणाङ्कागतां; (३) सक्रोधो (for क्रोधाद्); अनु-; अथ; उप; चैव (for अभि); .

(०२)( क्रुद्धो; क्षुद्रं; पक्षी (for गृध्रो); (२) मुञ्चस्व; मुञ्चाशु; मुञ्चाद्य (for मुञ्चेति); (३)जीवं ह्रियं (for ध्रियं); (४) हनिष्यसि निशाकर (५) वीर्याद् (for जीवन्) (६) नोत्सृज्यसे; नोत्सहसे; .

(०३)( राक्षसेन्द्रस्य (for द्रं तं); स (for तं) (२) तं चकर्त नखैर्भृशं.

(०४)( पक्षिं; पञ्च (for पक्षं) तु (for च); (२) शतशो (for बहुशो); कृतं (३) सुस्राव चकार; अक्षरद् (for चक्षार); भूमौ (for भूरि); (४)भूरि (for गिरिः); प्रस्रवणानिव (नि च); .

(०५) (४) पक्षौ (for भुजौ);.

(०६)( सं (स) छिद्य (for निहत्य); राजं तु; राजानं (for राजं स); (२) छित्राग्र; चञ्छित्र; भित्राग्र; भित्राभ्र (for छित्राभ्र); निचयों (for शिस्वरों); (४) प्रगृह्य (for गृहीत्वा); (अ)के च (for (अ)ङ्केन); रावणः (for राक्षसः); .

सरो वा सरितो वापि तत्र मुञ्चति भूषणम् ।। ८ ।। [०१]

सा ददर्श गिरिप्रस्थे पञ्च वानरपुङ्गवान्।
तत्र वासो महद्दिव्यमुत्ससर्ज मनस्विनी ।। ९ ।। [०२]

तत्तेषां वानरेन्द्राणां पपात पवनोद्धतम्।
मध्ये सुपीतं पञ्चानां विद्युन्मेघान्तरे यथा ।। १० ।। [०३]

अचिरेणातिचक्राम खेचरः खे चरन्निव ।
ददर्शाथ पुरीं रम्यां बहुद्वारां मनोरमाम्।
प्राकारवप्रसम्बाधां निर्मितां विश्वकर्मणा।
प्रविवेश पुरीं लङ्कां ससीतो राक्षसेश्वरः।

एवं हृतायां वैदेह्यां रामो हत्वा महामृगम्।
निवृत्तो ददृशे धीमान्भ्रातरं लक्ष्मणं तथा।[०४]

**श्रीरामः-**

कथमुत्सृज्य वैदेहीं वने राक्षससेविते। ।। ११ ।।

**मार्कण्डेयः-**

इति तं भ्रातरं दृष्ट्वा प्राप्तोऽसीति व्यगर्हयत् ।। १२ ।। [०५]

मृगरूपधरेणाथ रक्षसा सोऽपकर्षणम्।

---

(०१)( हि; च (for तु); (३) सरितो (for तं); (४) दुःस्वरं (for भूषणम्); .
(०२)(१/२) पृष्ठे (for प्रस्थे); (३) बहिर् (for महद्); (४) तपं (for मनं); .
(०३)( तत्रैषां (for तत्तेषां); (२) पवनोद्धतं; द्धूतं द्यतं (३) मुखेषु पीतं (for मध्ये सुपीतं); (४) न्मालाम्बरे (for न्मेघान्तरे); तथा (for यथा); .
(०४) ( सीतायां (for वैदेह्यां); (२) हत्वा रामो (३) निवर्तन् (for निवृत्तो); दूराद् (for धीमान्); (४) लक्ष्मणं भ्रातरं तथा (for तदा);.
(०५)(३); तं (स) (for (ए)वं); लक्ष्मणं (for भ्रातरं); (४) सम्प्राप्तोसि (for प्राप्तोऽसीति); विगर्हयन्; विगर्हयत्; विमर्शयन्; व्यगर्हन्; (इ)ति गर्हयन्; .

भ्रातुरागमनं चैव चिन्तयन्पर्यतप्यत।[०१]

गर्हयन्नेव रामस्तु त्वरितस्तं समासदत्। ।। १३ ।।[०२]

**श्रीरामः-**

अपि जीवति वैदेही नेति पश्यामि लक्ष्मण ।। १४ ।।[०३]

तस्य तत्सर्वमाचख्यौ सीताया लक्ष्मणो वचः।
यदुक्तवत्यसदृशं वैदेही पश्चिमं वचः ।। १५ ।।[०४]

दह्यमानेन तु हृदा रामोऽभ्यपतदाश्रमम्।
स ददर्श तदा गृध्रं निहतं पर्वतोपमम् ।। १६ ।।[०५]

राक्षसं शङ्कमानस्तं विकृष्य बलवद्धनुः।
अभ्यधावत काकुत्स्थस्ततस्तं सहलक्ष्मणः।[०६]
स तावुवाच तेजस्वी सहितौ रामलक्ष्मणौ** ।। १७ ।।

**जठायुः-**

गृध्रराजोऽस्मि भद्रं वां सखा दशरथस्य वै ।। १८ ।।[०७]

तस्य तद्वचनं श्रुत्वा सङ्गृह्य धनुषी शुभे।
कोऽयं पितरमस्माकं नाम्नाऽऽहेत्यूचतुश्च तौ।[०८]

---

(०१) (अ)पि (for (अ)य); (२)चोपं; सोपि कर्षणं; सोपकर्शितं; (आ)त्मोपकर्षणं; चापं; पापं; .

(०२) (गर्हंत्रेव तु (for यत्रेव) (२) त्वरितं स (for त्वरितस्तं); समाददत्; सदन्;.

(०३)(वैदेहीम् (२) इति; वैति (for नेति); लक्ष्मणः णं;.

(०४) (२) सीतां लक्ष्मणमेव च (४) वैदेह्या परुषं (for पश्चिमं ); .

(०५) ( च (for तु); तदा (for हृदा); दह्यमाने तु हृदये (२) (ऽ)भ्यापतद्रू; (ऽ)भ्यागमद्र-(ऽ)भ्यायात्तदा; ह्यापतद्रू; ह्यपं शापतः (३) ततो (for तदा);.

(०६)( तं (for तु); .

(०७) (३); वै; ते; मे; वः (for वां); (४) च; वै (for ह); .

(०८)(२) संहृत्य (for गृह्य); उभे(for शुभे); (३) सोयं (for कोऽयं); (४) स्म तौ; तदा (for च तौ);.

ततो ददृशतुस्तौ तं छिन्नपक्षद्वयं खगम्। ।। १९ ।।(०१)

तयोः शशंस गृध्रस्तु सीतार्थे रावणाद्वधम् ।। २० ।।(०२)

अपृच्छद्राघवो गृध्रं रावणः कां दिशं गतः।
तस्य गृध्रः शिरःकम्पैराचचक्षे ममार च ।। २१ ।।(०३)

दक्षिणामिति काकुत्स्थो विदित्वास्य तदिङ्गितम्।
संस्कारं लम्भयामास सखायं पूजयन्पितुः ।। २२ ।।(०४)

- अहो धन्यः सुभाग्योऽसौ जटायुरिति भारतीम् ।
दिवि शृण्वागतः सिद्धि सिद्धानामपि दुर्लभाम् ।

ततो दृष्ट्वाऽऽश्रमपदं व्यपविद्धबृसीमठम्।
विध्वस्तकलशं शून्यं गोमायुशतसङ्कुलम् ।। २३ ।।(०५)

दुःखशोकसमाविष्टौ वैदेहीहरणार्दितौ।
जग्मतुर्दण्डकारण्यं दक्षिणेन परन्तपौ ।। २४ ।।(०६)

वने महति तस्मिंस्तु रामः सौमित्रिणा सह।

ददर्श मृगयूथानि द्रवमाणानि सर्वशः। ।। २५ ।।(०७)

शब्दं च घोरं सत्त्वानां दावाग्नेरिव वर्धनः(तः)।(०८)

---

(०१) ( तौ तु; तं तौ (२)तदा; खगं (for तथा); छिन्नपक्षं जटायुषं.
(०२)(३/४) सीतार्थे स्वकीयं (for गृध्रस्तु सीतार्थे); .
(०३)(३); शिरःक्षेपैर्; (४)आचष्ट स; आचक्षन्त (for आचचक्षे); ह (for च); .
(०४) ( दक्षिणेनेति (for णामिति); काकुत्स्थौ (२) तदेङ्गितं विदित्वाशां तदिगितैः; विदित्वा तस्य चेङ्गितं (३) सत्कारं (for संस्कारं); (४) पूजयत्.
(०५)(२) बृषीधट; वृशीघटं; वृषीमठं; वृषीघटं;बृसीमठं; वृषीपटं; वृषीमकं; 'बृसीकटं (for बृसीघटम्); (३) कलसं सकलं; कुशलं गोमायुरुतनादितं; बंलनादितं; 'शतसङ्कुलं; मृगनादितं; शतनादितं; 'बलसङ्कुलं;.
(०६) ( विद्धौ; युक्तौ (३) दण्डकारण्याद्; .
(०७) ( च; स (for तु); वने तस्मिंश्च महति (३/४) मृगं द्रवं द्रावं भ्रमं (for द्रवं);.
(०८)( शब्दश्च घोरः आकर्ण्य; शब्दानां (for सत्त्वानां); (२) दवाग्नेरिव दह्यतः; वर्तते (for वर्धतः);

अपश्येतां मुहूर्ताच्च कबन्धं घोरदर्शनम् ॥ २६ ॥

मेघपर्वतसङ्काशं शालस्कन्धं महाभुजम्।
उरोगतविशालाक्षं महोदरमहामुखम् ॥ २७ ॥ (०१)

यदृच्छयाथ तद्रक्षः करे जग्राह लक्ष्मणम्।
विषादमगमत्सद्यः सौमित्रिरथ भारत ॥ २८ ॥ (०२)

स राममभिसम्प्रेक्ष्य कृष्यते येन तन्मुखम्।
विषण्णश्चाब्रवीद्रामं पश्यावस्थामिमां मम ॥ २९ ॥(०३)

हरणं चैव वैदेह्या मम चायमुपप्लवः।
राज्यभ्रंशश्च भवतस्तातस्य मरणं तथा ॥ ३० ॥ (०४)

नाहं त्वां सह वैदेह्या समेतं कोसलागतम्।
द्रक्ष्यामि पथिवीराज्ये पितृपैतामहे स्थितम् ॥ ३१ ॥ (०५)

द्रक्ष्यन्त्यार्यस्य धन्या ये कुशलाजशमीदलैः।
अभिषिक्तस्य वदनं सोमं शान्तघनं यथा ॥ ३२ ॥ (०६)

एवं बहुविधं धीमान्विललाप स लक्ष्मणः।

---

दवाग्निरिव पर्वतः;.

(०१)( अपश्यतां ते (for य) अपश्यत्तन्मुहूर्ताद्वै (२) भीमं (for घोरं); (४) सालं (for शालं); (५); उरोगत; विशालाख्यं (७) भुजं (for मुखम्);.

(०२)( च; तं (for (अ)थ); (३) तत्र; रक्षः; तस्य (for सद्यः); (४) भाषत (for भारत); .

(०३)(२) दृश्यन्ते; दृश्यन्ते; कृष्यन्ते; हृष्यते;क्लिश्यते तेन (क्य येन); द्रामं पृथिवी (३) विवर्णं (क्य विषण्णं); (४) महाभुज; इमामिति (क्य इमां मम);

(०४) ( चापि (for चेव); (४) पितुश्च (for तातस्य); यथा (for तथा); .

(०५) पृथिवी ( त्वा (for त्वां); (२)स्वां महीं गतं; स्वां पुरीं गतं (तः); कोश (ष) लागतं; स्वपुरीं गतं; त्वां पुरीं गतं; कोसलाधिपं (३) प्रथिते; प्रयतो (for पृथिवीं); (४) पित्र्ये (for पितृ); । .

(०६) (२) जलैः यवैः (४) भ्रातृलवं; शान्तधनं; साभ्रघनं; ब्यभ्रमलं; .

तमुवाचाथ काकुत्स्थः सम्भ्रमेष्वप्यसम्भ्रमः ॥ ३३ ॥ [०१]

### श्रीरामः-

मा विषीद नरव्याघ्र नैष कश्चिन्मयि स्थिते।
छिन्ध्यस्य दक्षिणं बाहुं छिन्नः सव्यो मया भुजः** ॥ ३४ ॥

शक्तो धर्जयितुं वीर सुमित्रा नन्दवर्धन।[०२]

- शक्तो धर्षयितुं वीर सुमित्रानन्दिवर्धन ।

.*/(४) भिन्नः (क्य छिन्नः) महा (क्य मया);.*/

### मार्कण्डेयः-

इत्येवं वदता तस्य भुजो रामेण पातितः।
खड्गेन भृशतीक्ष्णेन निकृत्तस्तिलकाण्डवत् ॥ ३५ ॥ [०३]

ततोऽस्य दक्षिणं बाहुं खड्गेनाजघ्निवान्बली।
सौमित्रिरपि सम्प्रेक्ष्य भ्रातरं राघवं स्थितम् ॥ ३६ ॥ [०४]

पुनर्जघान पार्श्र्वे वै तद्रक्षो लक्ष्मणो भृशम्।
गतासुरपतद्भूमौ कबन्धः सुमहांस्ततः ॥ ३७ ॥ [०५]

तस्य देहात्विनिःसृत्य पुरुषो दिव्यदर्शनः।

---

(०१) ( श्रीमान् (for धीं); (२) सु दुःखितः (for स लक्ष्मणः) (४) सङ्ग्रामेषु (for सम्भ्रमेषु); (अ)थ (for (अ)प्यसं); सम्भ्रमा कुलितेन्द्रियः.

(०२)( विषीदं (for विषीद); श्रेष्ठ (for व्याघ्र); (२) नैव (for नैष); किञ्चिन् (for कश्चिन्);.

(०३)(१/२) वदतसू (for वदता); इत्येवमुक्त्वा रामस्तु भुजमस्य न्यपातयत् (३) च सुतीक्ष्णेन; शितधारेण; शिततीक्ष्णेन (४) चकर्त; निकृत्य (for निकृत्तम्); तिलखण्डवत्; .

(०४)(२) वशी (बली); (३) अथ; चैव; अभि (for अपि); (४) राधवं वथा;रामसंस्थितं; राधवं स्थितः; .

(०५)( अभ्यं (for अभयां); पुनर्जधान पार्श्रे वै (पादेन); पुनराज ध्नतुः पद्यां; (२) भृशं तौ (तं) रामलक्ष्मणौ (४) तद्रक्षः(for कबन्धः); स; तु (for सु); सुमहबलः (for हास्ततः);.

दद‍ृशे दिवमास्थाय दिवि सूर्य इव ज्वलन्  ।। ३८ ।। (०१)

पप्रच्छ रामस्तं वाग्मी कस्त्वं प्रब्रूहि पृच्छतः।
कामया किमिदं चित्रमाश्चर्यं प्रतिभाति मे  ।। ३९ ।। (०२)

तस्याचचक्षे गन्धर्वो विश्वावसुरहं नृप।
प्राप्तो ब्राह्मणशापेन योनिं राक्षससेविताम्  ।। ४० ।। (०३)

रावणेन हृता सीता राज्ञा लङ्काधिवासिना।
सुग्रीवमभिगच्छस्व स ते साह्यं करिष्यति  ।। ४१ ।। (०४)

एषा पम्पा शिवजला हंसकारण्डवैर्यु(वायु)ता।
ऋष्यमूकस्य शैलस्य संनिकर्षे तटाकिनी  ।। ४२ ।। (०५)

तडाकिनी; तडागिनी संनिकर्षतटा नदी;

वसते तत्र सुग्रीवश्चतुर्भिः सचिवैः सह ।
भ्राता वानरराजस्य वालिनो हेममालिनः  ।। ४३ ।। (०६)

तेन त्वं सह सङ्गम्य दुःखमूलं निवेदय।

---

(०१)( विनिष्पत्य; प्क्रम्य; गंत्य (for विनिःसृत्य); (२) लक्षणः रूपधृक् (for दर्शनः); (४) दिवं; स्थितः (for दिवि); इवोज्वलनू .

(०२) (२) तद्बूहि; ब्रूहीति (for प्रब्रूहि); (३) क-ख-रामोहं गिमिदं चित्रं गर्थनं, घ-कामया चित्रमाश्वर्यं, काम्यया; कायस्य; कामाय; का माया; रामोहं; भो मया (for कामया); (४) हाश्वर्य; दर्शनं (for आश्वर्य); मां वै; मा (for मे);.

(०३) (३) नृपः; प्रभो (for नृप); (३) ब्राहाणं (for ब्रहानुं); प्राप्तोस्मि ब्रहाशापेन;.

(०४)(२) लङ्काधिवां लङ्का यां सं (सा; सु); निवेशिता (३) युक्तश्व; गच्छ त्वं(for गच्छस्व); सहां; कार्यं (for साहां स साहायं करिष्यति; स ते सखा भविष्यति;.

(०५)( ज्ञेया (for एषा); बहुं; हिमं; सितं (for शिवं); (२) कारण्डवैयुता; सेविता (३)ऋष्यं (for ऋश्यं); .

(०६) ( वसते तत्र; सम्पतत्यत्र (२) वृतः (for सह); (४) हेमशालिनः सूर्यपुत्रस्य वालिनः; .

**समानशीलो भवतः साहाय्यं स करिष्यति।**(०१)

**एतावच्छक्यमस्माभिर्वक्तुं द्रष्टासि जानकीम्।**
**ध्रुवं वानरराजस्य विदितो रावणाद(ल)यः ॥ ४४ ॥** (०२)

**इत्युक्त्वान्तर्हितो दिव्यः पुरुषः स महाप्रभः।**
**विस्मयं जग्मतुश्चोभौ प्रवीरौ रामलक्ष्मणौ ॥ ४६ ॥** (०३)

आरण्यः रामो (श्रीरामो)पाख्यान; श्रीरामायणों; रामायणों कबधवधः;

अस्मिन् पर्वणि २३४अध्याये ४५श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि कबन्धहनने चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४ ॥**

# २३५. पञ्चत्रिंशदधिकद्विशततमो अध्यायः ।

Consept Past. P.No. 1353 .

**मार्कण्डेयः**

**ततोऽविदूरे नलिनीं प्रभूतकमलोत्पलाम्।**
**सीताहरणदुःखार्तः पम्पां रामः समासदत् ॥ १ ॥** (०४)

---

(०१)( तस्य (for तेन) उप (for सह);.

(०२)(२) द्रक्ष्यसि; दृष्ट्वाथ (for द्रष्टासि); मैथिलीं (for जानकीम्);(३) श्रुतो (for ध्रुवं); वानरराजेन (४) विदिता रावणादयः.

(०३)(१/२); सु (for स); इत्युक्त्वा दिव्यपुरुषस्तदा त्वन्तर्हितोभवत् (३)वीरौ; तौ उभौ (for चोभौ); (४)वीरौ तौ; भ्रातरौ; प्रवीरौ; नृवीरौ; नृवरौ; .

(०४)(२); कुमुदोत्पलां; कमलोद्भवां; मक रोत्पलां (३) हारेण दुःखार्तः; हरणदुःखेन (४) रामः पम्पां; .

मारुतेन सुशीतेन सुखेनामृतगन्धिना।
**सेव्यमानो वने तस्मिञ्जगाम मनसा प्रियाम्** ॥ २ ॥ (०१)

विललाप स राजेन्द्रस्तत्र कान्तामनुस्मरन्।
**कामबाणाभिसन्तप्तः सौमित्रिस्तमथाब्रवीत्** ॥ ३ ॥ (०२)

**तक्ष्मणः-**

न त्वामेवंविधो भावः स्प्रष्टुमर्हति मानद्।
**आत्मवन्तमिव व्याधिः पुरुषं वृद्धशीलिनम्** ॥ ४ ॥ (०३)

प्रवृत्तिरुपलब्धा ते वैदेह्या रावणस्य च ।
**तां त्वं पुरुषकारेण बुद्ध्या चैवोपपादाय** ॥ ५ ॥ (०४)

अभिगच्छाव सुग्रीवं शैलस्थं हरिपुङ्गवम्।
**मयि शिष्ये च भृत्ये च सहाये च समाश्वस** ॥ ६ ॥ (०५)

**मार्कण्डेयः-**

एवं बहुविधैर्वाक्यैर्लक्ष्मणेन स राघवः।
**उक्तः प्रकृतिमापेदे कार्ये चानन्तरोऽभवत्** ॥ ७ ॥ (०६)

निषेव्य वारि पम्पायास्तर्पयित्वा पितनपि।
**प्रतस्थतुरुभौ वीरौ भ्रातरौ रामलक्ष्मणौ** ॥ ८ ॥ (०७)

---

(०१) ( स मारुतेन शीतेन (४) मनसि (for मनसा); .
(०२)( राजेन्द्र (२) तां स्वां (for तत्र); (३) सन्तप्तं (४)ततों (for अथां);.
(०३)( वीरः (for भावः); (२) राघव (for मानद); (३)ह्याधिः (for व्याधिः); (४) वृद्धसेविनं;.
(०४)( लभ्या (for लब्धा); (२)सीताया (for वैदेह्या); रावणालये (for णस्य च); (३) तान्त्वं; तां तां; तं तां (for तां त्वं); (४) बुद्धवा (for बुद्धया);.
(०५)(२) शौलेस्मिन् (for सौलस्थं); (३) मया (for मयि); नित्यं (for शिष्ये); शिष्ये भृत्ये (४) साहाय्ये; समाह्वय; परन्तप; पराश्वस; .
(०६)(३) आपत्रः (for आपेदे); (४) कार्यस्य; षु (for कार्ये च); त्वरितो (for (अ)नन्तरो); .
(०७) ( पम्पायां; (२) अथ (for अपि); (३) प्रतस्थेतुर् (for स्थतुर्); .

तावृष्यमूकमभ्येत्य बहुमूलफलद्रुमम्।
गिर्यग्रे वानरान्पञ्च वीरौ ददृशतुस्तदा ।। ९ ।। (०१)

सुग्रीवः प्रेषयामास सचिवं वानरं तयोः।
बुद्धिमन्तं हनूमन्तं हिमवन्तमिव स्थितम् ।। १० ।। (०२)

तेन सम्भाष्य पूर्वं तौ सुग्रीवमभिजग्मतुः।
सख्यं वानरराजेन चक्रे रामस्तदा नृप ।। ११ ।।

ततस्सीतां हृतां श्रुत्वा सुग्रीवो वालीनाकृतम्।
दुःखमाख्यातवान्सर्वं रमायामिततेजसे ।। १२ ।। (०३)

तद्वासो दर्शयामासुस्तस्य कार्ये निवेदिते।
वानराणां तु यत्सीता ह्रियमाणा व्यपासृजत् ।। १३ ।। (०४)

तत्प्रत्ययकरं लब्ध्वा सुग्रीवं प्लवगाधिपम्।
पृथिव्यां वानरैश्वर्ये स्वयं रामोऽभ्यषेचयत् ।। १४ ।। (०५)

प्रतियज्ञे च काकुत्स्थः समरे वालिनो वधम्।
सुग्रीवश्चापि वैदेह्याः पुनरानयनं नृप ।। १५ ।। (०६)

इत्युक्त्वा समयं कृत्वा विश्वास्य च परस्परम्।

---

(०१) (ऋ)ष्यं (for (ऋ)श्यं); (२) फलं शिवं; फलद्रुमं (४) ततः च तौ (for तदा); .
(०२)( सचिवं वानरस्; वानरं सचिवं (४) स्थिरं (for स्थतम्);.
(०३)(; तु (for तौ) (२) उपं (for अभिं); (३) राजेन्द्र (for राजेन); (४) रामेण च (for चके रामस्); तदा (for ततो); ततो हिय नृपः (for नृप); .
(०४) ह्रिय ( मास (for मासुस्); बुद्धचा सन्देशयामास (२) तत्र (for तस्य); कायं (for कार्ये); (३) वानरा यतदा (राय तदा); सीता (४) व्यपा लक्षालङ्कारः -; सृजत्; .
(०५) तां ( एतत्प्रियकरं; एतत्प्रियतरं; एत्प्रत्यक्षकरं (२) वानरां (for प्लवगां); (३) श्वर्यैः (for श्वर्ये); (४) न्यवेशं (for ;भ्यषेचं); .
(०६) (ऽ)थ’ स (for च); (२) वालिनः समरे; वधे (४) पुन-रानयने; ततः (for नृप); .

**अभ्येत्य सर्वे किष्किन्धां तस्थुर्युद्धाभिकाङ्क्षिणः ॥ १६ ॥** (०१)

सुग्रीवः प्राप्य किष्किन्धां ननादौघनिभस्वनः।
**नास्य तन्ममृषे वाली तारा तं प्रत्यषेधयत् ॥ १७ ॥** (०२)

यथा नदति सुग्रीवो बलवानेष वानरः।
**मन्ये चाश्रयवान्प्राप्तो न त्वं निष्क्रान्तुमर्हसि ॥ १८ ॥** (०३)

हेममाली ततो वाली तारां ताराधिपाननाम्।
**प्रोवाच वचनं वाग्मी तां वानरपतिः पतिः ॥ १९ ॥** (०४)

**वाली**

सर्वभूतरुतज्ञा त्वं पश्य बुद्ध्या समन्विता।
**केन चाश्रयवान्प्राप्तो ममैष भ्रातृगन्धिकः ॥ २० ॥** (०५)

**मार्कण्डेयः-**

चिन्तयित्वा मुहूर्तं तु तारा ताराधिपप्रभा।
**पतिमित्यब्रवीत्प्राज्ञा शृणु सर्वं कपीश्वर ॥ २१ ॥** (०६)

हृतदारो महासत्त्वो रामो दशरथात्मजः।

---

(०१)( इत्येवं (for इत्युक्त्वा); (२) विनिःश्वस्य; विश्वस्य च; पुनः पुनः (for परं); .

(०२)(२) ननादाभ्रनिभस्वनः (नं); द धननिस्वनः दोद्यत (दोद्धत)निस्वनः दोच्चैर्धनस्वनः दाब्दनिभस्वनः; (३) तं (for तन्); (४) तारा तं; तं राहं प्रत्यबोधयत्;.

(०३) (क-यथा नन्दति सुग्रीवोबलवानेष; ख-घ-यया नदति सुग्रीवो.(२); एक; त्वेष (for एष); (३) साश्रयतां; (ऽ)पाश्रयतः; चाश्रयता; (ऽ)पा (प्या); (ह्या); श्रयवान् (for चाश्रयवान्); सोन्यस्याश्रयतां प्राप्तो; मन्ये प्यपाश्रयात्प्राप्तो; (४) निष्कान्तुं (for निर्गन्तुं); .

(०४)(३) चपलं (for वचनं); स प्रोवाचाबलां स्त्रग्वी; (४) वानराधिपतिः पतिः .

(०५)(!) ऋतज्ञा; स्य तज्ज्ञा (for रुतज्ञा); तां (for त्वं); (२) पश्यन्बुद्ध्चा समन्वितां; (३) केन चां केनाप्यां; केन वां; केन ह्यां; केनोपां (for केनापां); (४) मामैष; मयैष; ममैव (for ममैष); .

(०६)(२) धिपप्रभं; धिपानना (३) राजम् (for प्राज्ञा); (४) वाक्यं (for सर्वं); .

तुल्यारिमित्रतां प्राप्तः सुग्रीवेण धनुर्धरः ।। २२ ।। (०१)

लक्षालङ्कारः - तुल्यारिमित्रतां प्राप्त इत्यत्र सुग्रीवस्य अरिः रामस्याप्यरिः, सुग्रीवस्य मित्रं रामस्यापि मित्रम्, एवं तुल्यारिमित्रतां प्राप्त इत्यर्थः ।

भ्राता चास्य महाबाहुः सौमित्रिरपराजितः।
लक्ष्मणो नाम मेधावी स्थितः कार्यार्थसिद्धये ।। २३ ।।

मैन्दश्च द्विविदश्चापि हनूमांश्चानिलात्मजः।
जाम्बवानृक्षराजश्च सुग्रीवसचिवाः स्थिताः ।। २४ ।। (०२)

सर्व एते महात्मानो बुद्धिमन्तो महाबलाः।
अलं तव विनाशाय रामवीर्यबलाश्रयात् ।। २५ ।। (०३)

तस्यास्तदाक्षिप्य वचो हितमुक्तं कपीश्वरः।
पर्यशङ्कत तामीर्षुः सुग्रीवगतमानसाम् ।। २६ ।। (०४)

तारां परुषमुक्त्वा तु निर्जगाम गुहामुखात्।
स्थितं माल्यवतोऽभ्याशे सुग्रीवं सोऽभ्यभाषत ।। २७ ।। (०५)

**वाली-**

असकृत्त्वं मया पूर्वं निर्जितो जीवितप्रियः।
मुक्तो ज्ञातिरिति ज्ञात्वा का त्वरा मरणे पुनः ।। २८ ।। (०६)

---

(०१) ( राज (for सत्त्वो); (३) तुल्यारिर्मित्रतां; एकारिमिं; सुग्रीवमिं - श्रूयते दाशरथी रामो वने पितुरनुज्ञया ।.

(०२) (२); द्विविधशू; विविधशू; विविदशू चापि (for चैव); (२) च हनूमांश्चैव; वानरः; श्चापराजितः (३) जाम्बुवान् (४) स्थिराः; तथा; तदा (for स्थिताः);.

(०३)(४); बलाश्रयाः; बलाश्रयात्; धु व्यपाश्रयाः;.

(०४) (३) वाली; ईर्ष्यात् (for ईर्षुः); .

(०५) ( परुषवक्ता तु (for स); (३) स्थितो भ्यासे (for भ्याशे); .

(०६)( असत्कृतं; असकृत्तु त्वया (for मया); पूर्वं; क्लीब (for मूढ); (२) प्रिय (३) ज्ञातिभिरज्ञात्वा; ज्ञातीति दुर्बुद्धे; गच्छसि (गर्जसि); दुर्बुद्धे (४) तव (for पुनः); कथं घोरे प (-कारं; कामो); रणे पुनः;.

**मार्कण्डेयः-**

इत्युक्तः प्राह सुग्रीवो भ्रातरं हेतुमद्वचः।
**प्राप्तकालममित्रघ्नो रामं सम्बोधयन्निव ।। २९ ।।** (०१)

**सुग्रीवः-**

इत्युक्तस्तु जहासोच्चैः सुग्रीवो भ्रातरं प्रति ।
**हेतुमद्वचनं भ्रात्रे प्रोवाचेदं महात्मने ।। ३० ।।** (०२)

हृतराज्यस्य मे राजन्हृतदारस्य च त्वया।
**किं मे जीवितसामर्थ्यमिति विद्धि समागतम्।** (०३)

एवमुक्त्वा बहुविधं ततस्तौ संनिपेततुः।
**समरे वालिसुग्रीवौ शालतालशिलायुधौ ।। ३१ ।।** (०४)

उभौ जघ्नतुरन्योन्यमुभौ भूमौ निपेततुः।
**उभौ ववल्गतुश्चित्रं मुष्टिभिश्च निजघ्नतुः ।। ३२ ।।** (०५)

उभौ रुधिरसंसिक्तौ नखदन्तपरिक्षतौ।
**शुशुभाते तदा वीरौ पुष्पिताविव किंशुकौ ।। ३३ ।।** (०६)

न विशेषस्तयोर्युद्धे यदा कश्चन दृश्यते।

---

(०१)( तेन (for प्राह);.

(०२) (३); अमित्रघ्नं;.

(०३) (१/२) दारस्य राज्यस्य मे(for च); (३) मे (for नु); (४) बुद्ध्वा (for विद्धि); (इ)दमागतं; (अ)हमागतः; समागतः; तवागतं; कपीश्वर; त्वमागतं; .

(०४) (२) तौ ततः (४) साल(for शाल); युधैः (for युधौ); .

(०५) ( जग्मतुर (for जघ्नतुर्); (२) उभौ तौ (ते) संनिपेततुः; उभौ तौ संनिवेशतुः (४) वि; (आ)भि (for नि); .

(०६) ( संसक्तौ; सिक्ताङ्गौ; संयुक्तौ; (२) क्षितौ (३) महावीरौ; रुषा वीरौ (for तदा वीरौ) (४) किंशुकाविव पुष्पितौ; किंशुकाविव पुष्पितौ;.

सुग्रीवस्य तदा मालां हनुमान्कण्ठ आसजत् ॥ ३४ ॥[०१]

स मालया तदा वीरः शुशुभे कण्ठसक्तया।
श्रीमानिव महाशैलो मलयो मेघमालया ॥ ३५ ॥[०२]

कृतचिह्नं तु सुग्रीवं रामो दृष्ट्वा महाधनुः।
विचकर्ष धनुः श्रेष्ठं वालिमुद्दिश्य लक्ष्यवत् ॥ ३६ ॥[०३]

विस्फारस्तस्य धनुषो वज्रघोष इवा(यन्त्रस्येव तदा) बभौ।
वितत्रास तदा वाली शरेणाभिहतो हृदि(रसि) ॥ ३७ ॥[०४]

स भिन्नहृदयो वाली वक्राच्छोणितमुद्गमन्।
ददर्शावस्थितं रामं ततः सौमित्रिणा सह ॥ ३८ ॥[०५]

गर्हयित्वा स काकुत्स्थं पपात भुवि मूर्च्छितः।
तारा ददर्श तं भूमौ तारापतिसमौजसम् ॥ ३९ ॥[०६]

हृते वालिनि सुग्रीवः किष्किन्धां प्रत्यपद्यत।
तां च तारापतिमुखीं तारां निपतितेश्वराम् ॥ ४० ॥[०७]

रामस्तु चतुरो मासान्पृष्ठे माल्यवतः शुभे।

---

(०१)(२) कश्चिन्न दृश्यते; कश्चित्प्रं; किश्चन डं; कश्चन विद्यते - प्रज्ञानार्थं तदा रामो निश्चित्य मनसा तदा ।कठम् द्वैकङ्कठ वै )'आसृजत् )(४); कण्ठम् (क्य कण्ठ); आसृजत्);
(०२)( मालया स ततो; तया (for तदा); वीर; (४) हेमं (for मेघं);.
(०३)( च (for तु); (२) महाहनुः; बलः;धनुर्धरः; महद्धनुः(३) रोप्य लक्ष्यं; चकर्ष च (for विचकर्ष); धनुः सक्तो; समुद्दिश्य; धनुः सेषु (४) लक्ष्यवित्; लक्षयन् (यत्); लक्षणं (for लक्ष्यवत्); लक्ष्यमुद्दिश्य वालिनं; वालिनं हेममालिनं;.
(०४) (२) मन्त्रस्येव; वज्रस्येव (३) निपपात; चिक्षेप च (for वितत्रास); ततो (for तदा); (४) भृशं; (उ)रसि (for हृदि);.
(०५) ( तेन (for भिन्न); मर्माभि (वि)मुखो; हृधयो वाली (२) मुखां (for वक्रां); (३) (अ)वसन्थ; (अ) ग्रस्थितं (for (अ)वस्थितं); (४) भ्रात्रा; ततः (for आरात्); .
(०६)( विगर्हयित्वा (for गर्हयित्वा स); तु; च (for स); (४) मिवोद्यतं; मिव स्थितं; समौजसं;.
(०७)(२) ताराधिवमुर्खी (खां); .

निवासमकरोद्धीमान्सुग्रीवेणाभ्युपस्थितः ॥ ४१ ॥ (०१)

रावणोऽपि पुरीं गत्वा लङ्कां कामबलात्कृतः।
सीतां निवेशयामास भवने नन्दनोपमे ॥ ४२ ॥

अशोकवनिकाभ्याशे तापसाश्रमसंनिभे।(०२)
भर्तृस्मरणतन्वङ्गी तापसीवेषधारिणी ॥ ४३ ॥

उपवासतपःशीला तत्रास पृथुलेक्षणा।
उवास दुःखवसतिं फलमूलकृताशना ॥ ४४ ॥ (०३)

दिदेश राक्षसीस्तत्र रक्षणे राक्षसाधिपः।
प्रासासिशूलपरशुमुद्गरालातधारिणीः ॥ ४५ ॥ (०४)

द्व्यक्षीं त्र्यक्षीं ललाटाक्षीं दीर्घजिह्वामजिह्व(ह्वि)काम्।
त्रिस्तनीमेकपादां च त्रिजटामेकलोचनाम् ॥ ४६ ॥ (०५)

एताश्चान्याश्च दीप्ताक्ष्यः करभोत्कटमूर्द्धजाः।
परिवार्यासते सीतां दिवारात्रमतन्द्रिताः ॥ ४७ ॥ (०६)

लक्षालङ्कारः - करभोत्करमूर्धजा इत्यत्र करभोत्करवत् करमूलसमूहवत् ह्रस्वाः पृथुलाश्च मूर्धजा यासां ताः ।

---

(०१) (४); भ्येकक्षितः; भिसंस्थितः; नुपस्थितः; भ्यवस्थितः; .

(०२)मार्कडेय उं; मार्कडेयः; (१/२) (ऽ)थ (for ऽपि); लङ्कां गत्वा; र्दितः (for त्कृतः); (३) यासे; वासे;.

(०३)( दुःखार्ता; (२) वेशं; (३) उपवासतनुः सीता (४) ततः सा; तत्रास; तपसा; पृष्टलक्षणा; पृथुलोचना; (५) दुःखा; दुखं (for दुःख); वसतिं वसतीं; जलां;(for कृतां); .

(०४) (१/२) राक्षसीः रक्षणे; तस्य; तस्या; तस्यां (for तत्र); रक्षार्य (for सक्षणे); रक्षसाधिपः; राक्षसेश्वरः; .

(०५)( स्वक्षी (for व्यक्षीं); शङ्खीं (for त्र्यक्षीं); (२) अजिह्वकां (३) एकपादीं; चैकपादां (for एकपादां); (४) तिग्मं; चैक । एकं.

(०६) (२) भोत्करं; भायतं; भो त्कचं (for भोत्कटं); (४) रात्रिम् (for रात्रम्); अनिद्भितां; अर्निदिताः; अनिद्रिताः (for अतन्द्रिताः);.

तास्तु तामायतापाङ्गीं पिशाच्यो दारुणस्वराः।
**तर्जयन्ति सदा रौद्राः परुषव्यञ्जनस्वराः ।। ४८ ।।** (०१)

**राक्षसायः-**

खादाम पाटयामैनां तिलशः प्रविभज्य ताम्।
**येयं भर्तारमस्माकमवमन्येह जीवति ।। ४९ ।।** (०२)

**मार्कण्डेयः-**

इत्येवं परिभर्त्सन्तीस्त्रास्यमाना पुनः पुनः।
**भर्तृशोकसमाविष्टा निःश्वस्येदमुवाच ताः ।। ५० ।।** (०३)

**लक्षालङ्कारः - इत्येवं परिभर्त्सन्ती इत्यत्र परिभर्त्सन्तीः परिभर्त्सयन्तीः ।**

आर्याः खादत मां शीघ्रं न मे लोभोऽस्ति जीविते।
**विना तं पुण्डरीकाक्षं नीलकुञ्चितमूर्धजम् ।। ५१ ।।** (०४)

अप्येवाहं निराहारा जीवितप्रियवर्जिता।
**शोषयिष्यामि गात्राणि व्याली तालगता यथा ।। ५२ ।।** (०५)

न त्वन्यमभिगच्छेयं पुमांसं राघवादृते।
**इति जानीत सत्यं मे क्रियतां यदनन्तरम् ।। ५३ ।।**

---

(०१)( स्म ताम्; सीताम् (for तु ताम्); (२) स्वराः (for स्वनाः); (३)तर्जयन्त्यःमहा; तदा(for सदा); रात्रौ (for रौद्राः); (४) व्यञ्जनक्षमाः; व्यञ्जिताक्षराः; व्यञ्जनस्वराः .

(०२)( खादामः पाटयामि; पातयाम (for पाटयाम); (for (ए)तां); (३)सेयं (for येयं); (४) मत्येह; मत्यैव (for मन्येह);.

(०३)( परिभस्त्वोंच्चैसू; भत्स्र्य (त्सं)ती; भत्स्र्यमाना सा; (२) त्रासयन्ती; भ्राम्यमाणा; त्रासयानाः; त्रास्यमानाः;ताड्यमाना; मुहुर्मुहुः (for पुनः पुनः); (४) (ए)वमू; (ए)तदू (for (इ)दम्); सा; ह (for ताः); .

(०४)( मा (for मां); (२) लाभो (for लोभो); जीवने (for जीविते); .

(०५)( अद्य; अथ (for अपि); (२)जीवितं; जीवती (for जीवित); दर्शिताः (for वर्जिता); (४)वल्ली (for व्याली); तालवने; कालगता; तलं इव (for यथा); .

**मार्कण्डेयः-**

तस्यास्तद्वचनं श्रुत्वा राक्षस्यस्ताः खरस्वनाः।
आख्यातुं राक्षसेन्द्राय जग्मुस्तत्सर्वमादितः(दृताः) ।। ५४ ।। (०१)

गतासु तासु सर्वासु त्रिजटा नाम राक्षसी।
सान्त्वयामास वैदेहीं धर्मज्ञा प्रियवादिनी ।। ५५ ।। (०२)

**त्रिजटा-**

सीते वक्ष्यामि ते किञ्चिद्विश्वासं कुरु मे सखि।
भयं त्वं त्यज वामोरु शृणु चेदं वचो मम ।। ५६ ।। (०३)

अविन्ध्यो नाम मेधावी वृद्धो राक्षसपुङ्गवः।
स रामस्य हितान्वेषी त्वदर्थे हि स मावदत्।(०४)
सीता मद्वचनाद्वाच्या समाश्वास्य प्रसाद्य च ।। ५७ ।। (०५)

**अवद्यः-**

भर्ता ते कुशली रामो लक्ष्मणानुगतो बली ।। ५८ ।।

सख्यं वानरराजेन शक्रप्रतिमतेजसा।
कृतवान्राघवः श्रीमांस्त्वदर्थे च समुद्यतः ।। ५९ ।। (०६)

मा च तेऽस्तु भयं भीरु रावणाल्लोकगर्हितात्।

---

(०१) (२) स्वराः (for स्वनाः); राक्षस्यः खरनिस्वनाः (४) ताः (for तत्); आदृताः .
(०२)(४)धर्मज्ञां वादिनीं;.
(०३) (३) त्वं त्यज (for ते व्येतु); .
(०४)( अवन्ध्यो; अविन्दो; अविध्यो; अवध्यो (for अविन्ध्यो); (३) स मां राम-; स राघव; (४) स च राम; सदा राम (for स रामस्य); (४) त्वदर्थं मां ((ऽ)ति); मे; मा (for हि); समासदत्; स मां वदत् (!); समा दधत्; अचूचुदत्; समादिशत् (for स मावदत्); .
(०५) ( मच्छुब्दचगा ऽ त इच नाद् ज्ञ साद्य ( ए श्वस्यि श.
(०६) ( राजेन्द्र (for राजेन); (३) गतं (for कृतं); (४) कृतोद्यमः (for समुं);.

नलकूबरशापेन रक्षिता ह्यसि नन्दिनि ।। ६० ।। [०१]

शप्तो ह्येष पुरा पापो वधूं रम्भां परामृशन्।
न शक्नोत्यवशां नारीमुपैतुमजितेन्द्रियः ।। ६१ ।। [०२]

क्षिप्रमेष्यति ते भर्ता सुग्रीवेणाभिरक्षितः।
सौमित्रिसहितो धीमांस्त्वां चेतो मोक्षयिष्यति ।। ६२ ।। [०३]

**लिजटा-**

स्वप्ना हि सुमहाघोरा दृष्टा मेऽनिष्टदर्शनाः।
विनाशायास्य दुर्बुद्धेः पौलस्त्यकुलघातिनः ।। ६३ ।। [०४]

दारुणो ह्येष दुष्टात्मा क्षुद्रकर्मा निशाचरः।
स्वभावाच्छीलदोषेण सर्वेषां भयवर्धनः ।। ६४ ।। [०५]

स्पर्धते सर्वदेवैर्यः कालोपहतचेतनः।
मया विनाशलिङ्गानि स्वप्ने दृष्टानि तस्य वै ।। ६५ ।। [०६]

तैलाभिषिक्तो विकचो मज्जन्पङ्के दशाननः।
असकृत्खरयुक्ते तु रथे नृत्यन्निव स्थितः ।। ६६ ।। [०७]

---

(०१)( ते भूद् (for तेऽस्तु); (४) नन्दिनि (for (अ)निन्दिते); .

(०२) ( ह्येषां (for पापो); (२) मृषन् (for मृशन्); (३) न शक्नोत्यवशां; न शक्तोभ्यवशां; अशक्तो प्यवशां (४) उपेतुम् (for उपैं); जीवितप्रियः (for अजितेन्द्रियः); .

(०३) (२); सुग्रीवसहितः प्रभुः; सुग्रीवेण सह (सम) प्रभुः; (३) सौमित्रिणा च वीरेण; (४) त्वामितो; ततस्त्वां (for त्वां चेतो); मोचं (for मोक्षं); .

(०४)( स्वप्नो धोरो (for स्वप्ना घोरा); (२) दृष्ड्वा; दृष्टो (for दृष्टा); घोरं; रौद्रं; (ऽ)रिष्टं (for ऽनिष्टं); दर्शनः (for दर्शनाः); (३) नाशायास्य सुदुर्भुद्धेः; (४) पांसनः पौलस्त्यस्य कुलस्य च;.

(०५) रौद्रं क्षौद्रं (for क्षुद्रं); (३)वशीलं (for वाच्छिलं); .

(०६) ( सर्व (सह); (४)स्वप्त; सप्त (for स्वप्ने); च (for वै );.

(०७)( वसिक्तो (for भिषिक्तो); (३) युल्तेन (for युक्ते तु); (४) चरन् (for रये); नृत्यम् (for नृत्यन्); अवस्थितः (for इव स्थितः); .

कुम्भकर्णादयश्चेमे नग्नाः पतितमूर्धजाः।
गच्छन्ति दक्षिणामाशां रक्तमाल्यानुलेपनाः ।। ६७ ।। (०१)

श्वेतातपत्रः सोष्णीषः शुक्लमाल्यानुलेपनः।
श्वेतपर्वतमारूढ एक एव विभीषणः ।। ६८ ।। (०२)

सचिवाश्चास्य चत्वारः शुक्लमाल्यानुलेपनाः।
श्वेतपर्वतमारूढा मोक्ष्यन्तेऽस्मान्महाभयात्।(०३)

रामस्यास्त्रेण पृथिवी परिक्षिप्ता ससागरा।
यशसा पृथिवीं कृत्स्नां पूरयिष्यति ते पतिः ।। ३९ ।।
मोक्षिता त्वां भयाधस्माद्रामः शत्रुनिषूदनः (०४)

अस्थिसञ्चयमारूढो भुञ्जानो मधुपायसम्।
लक्ष्मणश्च मया दृष्टो दिधक्षुः सर्वतो दिशम् ।। ७० ।। (०५)

रुदती रुधिरार्द्राङ्गी व्याघ्रेण परिरक्षिता।
असकृत्त्वं मया दृष्टा गच्छन्ती दिशमुत्तराम्।(०६)
हर्षमेष्यसि वैदेहि क्षिप्रं भर्त्रा समन्विता** ।। ७१ ।।
राघवेण सह भ्रात्रा सीते त्वमचिरादि०।(०७)

---

(०१) ( चान्ये; चैव (for चेमे); (२) नागाः; मग्रा; भग्राः (for नग्राः) पलितं (for पतितं); (३) गच्छन्ति (for कृष्यन्ते); .

(०२) (२) शुक्लमाल्यविभूषितः; माल्यो बि (माल्यवि) भीषणः माय्यानूलेयनः (३) ख-मासाद्य भुञ्जलो घृतपायसम्।, श्वेतं पर्वनम्; आस्थाय (for आरूढ); .

(०३)( तस्य (for चास्य); (३) श्वेतं; शुक्ल (for श्वेत); (४) मोक्षन्ते; दृष्टाः स्वप्ने मयानधे;.

(०४) (२); विनिं (for परिं); (३) सर्वा (for कृत्स्नां); .

(०५) ( अस्थिपर्वतमारूढो; हस्तिस्कन्धसमां (२) घृतं (for मधुं); (४) दिधक्षुः; वि (प्र); पश्यन् (for निरीक्षन्); दिशं (for दिशः); .

(०६) ( कर्षिता; रुदन्ती .

(०७)( भोक्ष्यसि (for एष्यसि); (२) भर्त्रा (for भर्तृ); (३/४) लक्ष्मणेन (for राघवेण); लक्ष्मणेन च

**मार्कण्डेयः-**

**इत्येतन्मृगशावाक्षी तच्छ्रुत्वा त्रिजटावचः।**
**बभूवाशावती बाला पुनर्भर्तृसमागमे ॥ ७२ ॥**[०१]

**यावदभ्यागता रौद्राः पिशाच्यस्ताः सुदारुणाः।**
**ददृशुस्तां त्रिजटया सहासीनां यथा पुरा ॥ ७३ ॥**[०२]

आरण्यः रामोपाख्यान; रामायणोपाख्यान त्रिजटास्वप्ननिवेदनं; त्रिजटावाक्यं; त्रिजटावाक्यसमाश्वासं;

अस्मिन् पर्वणि २३५अध्याये ७३श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि त्रिजटाकृतसीतासान्त्वने पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥**

# २३६. षट्त्रिंशदधिकद्विशततमो अध्यायः ॥

**रावणेन सीतासमीपमेत्य बहुधा प्रलोभले..प्यविकृतमानसया तया प्रत्याख्याने स्वावासं प्रती गमनम् ॥**

---

संयुक्ता सीते भर्तृहिते रता; राघवेणेति वक्तव्या (णाभिपत्तव्या) सीता भर्तृहिते रता; .
(०१) ( इत्येवं; इत्येतन् (for इति सा); (३) बभूवाशाबला सा तु (४)भर्तुरिव समागमे; .
(०२)( तावद् (for यावद्); रौद्यः (for रौद्राः); (२) महारवाः (for सुदारुणाः) (३) ताम्; हि (for तां) (४) सह सीतां; सुखासीनां यथापुरं; .(२); नडम् (for नलम्); अथाब्रवित् (for उवाच ह); (३) समुद्रस्य; समुद्रे तु (for द्रे त्वं); , (२) आदाय (for आस्थाय);दंशितैः;दंसितः;(३) (इं)द्रसहशः(for (इ) न्द्रजिद्राजन्) .

**मार्कण्डेयः**

ततस्तां भर्तृशोकार्तां दीनां मलिनवाससम्।
**मणिशेषाभ्यलङ्कारां रुदतीं च पतिव्रताम्** ।। १ ।।(०१)

राक्षसीभिरुपास्यन्तीं समासीनां शिलातले।
**रावणः कामबाणार्तो ददर्शोपससर्प च** ।। २ ।।(०२)

देवदानवगन्धर्वयक्षकिम्पुरुषैर्युधि।
**अजितोऽशोकवनिकां ययौ कन्दर्पपीडितः** ।। ३ ।।(०३)

दिव्याम्बरधरः श्रीमान्सुमृष्टमणिकुण्डलः।
**विचित्रमाल्यमुकुटो वसन्त इव मूर्तिमान्** ।। ४ ।।(०४)

न कल्पवृक्षसदृशो यत्नादपि विभूषितः।
**श्मशानचैत्यद्रुमवद्भूषितोऽपि भयङ्करः** ।। ५ ।।(०५)

स तस्यास्तनुमध्यायाः समीपे रजनीचरः।
**ददृशे रोहिणीमेत्य शनैश्चर इव ग्रहः** ।। ६ ।।(०६)

स तामामन्त्र्य सुश्रेणीं पुष्पकेतुशराहतः।
इदमित्यब्रवीद्बालां(वाक्यं) त्रस्तां मृगवधूमिव ।। ७ ।।(०७)

सीते पर्याप्तमेतावत्कृतो भर्तृरनुग्रहः।

---

(०१) (२) सलिल (for मलिन); वाससां; वाससीं; वासिनीं; (४)रुदन्तीं स्म (for च); .
(०२)( उपासतीं; अपश्यन्तीं (for उपास्यन्तीं); .
(०३) (१/२) गन्धर्वैर् (for गन्धर्व); पुरुषोरगैः (for पुरुषैर्युधि); (४) पीडितःमोहितः);.
(०४) ( दिव्यायुधधरः (३) मरीचिमाला (for विचित्रमाल्य); मकुटो (for मुकुटो); .
(०५) ( न (for स); सहितो (for सदृशो); (२) सुं (for विं); (३) प्रतिमो (for द्रुमवद्); .
(०६)( सुमनुष्यायाः (for तनुं); (३) ददर्श (for दद्रशे);.
(०७)(३); एत्य (for इति); वाक्यं (for बालां); (४) त्रस्तां व्याकुललोचनां; सन्त्रस्तामिव रो हिणीं; त्रस्तां मृगवधूमिव;, (रौहीमिवाबलाम्)

**प्रसादं कुरु तन्वङ्गि क्रियतां परिकर्म ते ॥ ८ ॥** [०१]

भजस्व मां वरारोहे माहार्हाभरणाम्बरा।
**भव मे सर्वनारीणामुत्तमा वरवर्णिनी ॥ ९ ॥** [०२]

सन्ति मे देवकन्याश्च गन्धर्वाणां च योषितः।
**सन्ति दानवकन्याश्च दैत्यानां चापि योषितः।** [०३]
**तासामद्य विशालाक्षि सर्वासां मे भवोत्तमा ॥ १० ॥**

चतुर्दश पिशाचानां कोट्यो मे वचनस्थिताः(वचने स्थिताः)।
**द्विस्तावत्पुरुषादानां रक्षसां भीमकर्मणाम् ॥ ११ ॥** [०४]

ततो मे त्रिगुणा यक्षा ये मद्वचनकारिणः।
**केचिदेव धनाध्यक्षं भ्रातरं मे समाश्रिताः ॥ १२ ॥** [०५]

गन्धर्वाप्सरसो भद्रे मामापानगतं सदा।
**उपा(प)तिष्ठन्ति वामोरु यथैव भ्रातरं मम ॥ १३ ॥** [०६]

पुत्रोऽहमपि विप्रर्षेः साक्षाद्विश्रवसो मुनेः।
**पञ्चमो लोकपालानामिति मे प्रथितं यशः ॥ १४ ॥** [०७]

दिव्यानि भक्ष्यभोज्यानि पानानि विविधानि च ।

---

(०१)(२) अनुक्रमः (for अनुग्रहः); (३) कुरु प्रसादं (४) प्रति(for परिं) च (for ते);.
(०२)(४); वरवर्णिनी.
(०३)( दानवं (for मे देवं); (२) देवं (for राजं); गन्धववर्णाणां च योषितः तासामद्य विशालाक्षि सर्वासां मे भवोत्तमा;.
(०४) ( पिशाचीनां (२) वचसि (for वचने); (४) भीमरूपिणां; .
(०५)( तत्र (for ततो); द्वि (for त्रिं); (२) मे (for मद्);.
(०६)( ख-इदमर्धं नास्ति, यज्ञे (for भद्रे); (२) मामासनगतं तदा (सदा); नानापानगतं सदा; मां विमानगतं सदा;.
(०७)(२) मुनिः (for मुनेः); (३) पञ्चमं; .

**यथैव त्रिदशेशस्य तथैव मम भामि(वि)नि ।। १५ ।।** (०१)

**क्षीयतां दुष्कृतं कर्म वनवासकृतं तव ।**
**भार्या मे भव सुश्रेणि यथा मण्डो(मन्दो)दरी तथा ।। १६ ।।** (०२)

**मार्कण्डेयः-**

**इत्युक्ता तेन वैदेही परिवृत्य शुभाननम्(नना)।**
**तृणमन्तरितं(रतः) कृत्वा क्रोधसंरक्तलोचना ।। १७ ।।** (०३)

**अशिवेनातिवामोरूरजस्रं नेत्रवारिणा।**
**स्तनावपतितौ बाला संहतावभिवर्षती** ** ।। १८ ।।**

**व्यवस्थाप्य कथञ्चित्सा विपादादतिमोहिता ।**
**उवाच वाक्यं तं क्षुद्रं वैदेही परिदेवता ।। १९ ।।** (०४)

This Stanga is Interchanged in TRK after 18 .**सीता-**

**असकृद्वदतो वाक्यमीदृशं राक्षसेश्वर ।**
**विषादयुक्तमेतत्ते मया श्रुतमभाग्यया ।। २० ।।** (०५)

---

(०१)( तु (for च); (३) त्रिदिवेशस्य; त्रिदशेन्द्रस्य; (४) अ-मम, भज (for मम); भविनि (for भामिनि);.

(०२)( दुष्करं (for दुष्कृतं); धर्म (for कर्म); (२) गतं (for कृतं); तथा (for तव); (४) मण्डोदरी (for मन्दों);.

(०३) (२) सुशोभना (for शुभां); , (तमुवाच निशाचरम्)

(०४) ( अर्दितोवं; अशीतेन; अर्दितव्यं; अर्दितेन (for अशिवेन); हि (ए)व (for (अ)ति); (२) असकृन्; (for अजस्रं); (३) पीनौ (for बाला); (४) संहताव् (for सहिताव्); अपि (for अभि); वर्षति; (२) रावणं (for वास्यं तं); कुद्धं (for क्षिद्रं); .

(०५) (३) राक्षसेश्वर सेरितं; साधम; सेश्वरं (३) अधर्म न चाचे; विवाद (for विपाद); (४) क्षणम् चैवम् (for श्रुतम्); अनार्यया; अयोग्यया (for अभाग्यया); .

तद्भद्रसुख भद्रं ते मानसं विनिवर्त्यताम्।
परदारास्म्यलभ्या च सततं च पतिव्रता ।। २१ ।। (०१)

न चैवौ(वो)पयिकी भार्या मानुषी तव राक्षस ।
विवशां धर्षयित्वा च कां त्वं प्रीतिमवाप्स्यसि ।। २२ ।। (०२)

लक्षालङ्कारः - न चैवौपयिकी भार्या इत्यत्र 'युक्तमौपयिकं लभ्यं भजमानाभि- नीतवत्' इत्यभिधानात् औपयिकी नवं नवं पुरुषं प्राप्नुवन्ती, स्वैरिणीत्यर्थः ।

प्रजापतिसमो विप्रो ब्रह्मयोनिः पिता तव ।
न च पालयसे धर्मं लोकपालसमः कथम् ।। २३ ।। (०३)

भ्रातरं राजराजं च(राजराजानं) महेश्वरसखं प्रभुम्।
धनेश्वरं व्यपदिशन्कथं त्विह न लज्जसे ।। २४ ।। (०४)

**मार्कण्डेयः-**

इत्युक्त्वा प्रारुदत्सीता कम्पयन्ती पयोधरौ।
शिरोधरां च तन्वङ्गी मुखं प्रच्छाद्य वाससा ।। २५ ।। (०५)

तस्या रुदत्या भामि(वि)न्या दीर्घा वेणी सुसंयता।

---

(०१) ( मुख (for सुख ); (२) विनिवर्ततां; वृत्यतां (३) न; हि(for (अ)स्मि); (अ)स्मि (for च); (४) सन्ततं;.

(०२)( चैव पावकी; चैवैतादृशी; चैवोपयिकी; चैवौपायिकी; चैवौपयिका; चैवापायिकी; एवोपयिकी; (२) मनुष्या (for मानुषी); कृपणा तथा; तव राक्षस (for कृपणा तव); मां; तु (for च); विहर्षा घर्मयित्वा च (४) शान्तिम् (for प्रीतिम्); .

(०३)(२) त्वं (for च); सर्वं (for धर्मं); (४) पालोपमः (for पालसमः); .

(०४)( राजराजत्वे; राजत्वं'; यक्षराजं तं; राजराजं च; राजं त्वं (२) समं विभुं; समप्रभं; समं प्रभुं; समं प्रभं (for सखं प्रभुम्); (४) इत्थं; हि त्वं; त्वं हिं; त्वं ह (for त्विह); .

(०५)( सारुदत्; प्ररुदत् (for ) कम्पयन्तौ (४) पाणिना (for वाससा);.

दद‍ृशेऽतितरां(शे स्वसिता) स्निग्धा काली व्यालीव मूर्धनि ।। २६ ।। (०१)

श्रुत्वा तद्रावणो वाक्यं सीतयोक्तं सुनिष्ठुरम्।
प्रत्याख्यातोऽपि दुर्मेधाः पुनरेवाब्रवीद्वचः ।। २७ ।। (०२)

**रावणः-**

काममङ्गानि मे सीते दुनोतु मकरध्वजः।
न त्वामकामां सुश्रेणीं समेष्ये चारुहासिनीम् ।। २८ ।। (०३)

किं नु शक्यं मया कर्तुं यत्त्वमद्यापि मानुषम्।
आहारभूतमस्माकं राममेवानुरुध्यसे ।। २९ ।। (०४)

लक्षालङ्कारः - किं नु शक्यं मया इत्यत्र यद्यस्माद्राममेव अनुरुध्यसे अङ्गीकरोषि, तस्मात् मया किं नु कर्तुं शक्यम् । अकामाया अङ्गीकारायोगात् तव मयि कामस्य चाभावात् इदानीं गृहं प्रति गमनमेव न्याय्यमिति भावः ।

**मार्कण्डेयः-**

इत्युक्त्वा तामनिन्द्याङ्गीं स राक्षसमहेश्वरः।
तत्रैवान्तर्हितो भूत्वा जगामाभिमतां दिशम् ।। ३० ।। (०५)

राक्षसीभिः परिवृता वैदेही शोककर्शिता।

---

(०१)( तस्यां रुदन्त्या; रुदत्यां भाविन्या; भामिन्यां (२) दीर्घा (for दीर्घा); वेगा (for वेणी); सुशोभना; समु द्यता; सुसंयुता ; (३) स्थगिता; त्वसिता;सविषा; सासिता (for स्वं); (४) कला; कृष्णा (for काली); व्याली कालीव; .

(०२)( श्रुत्वा तद् ; (२) अनिं; तु निं (for सुनिं); (४) ख-वीनुरुध्यते ; मध्ये अर्धचतुष्टयं नास्ति (२८.२९, श्लोकौ),

(०३)(२) धुनोतु; दुनोति (३) सुश्रेणि (४) हासिनि; .

(०४)( न; तु(for नु); (२) मानुषीं (३) आहारभूताम् (४) (अ)नु बुध्यसे; राध्यसे; .

(०५) ( इत्युक्त्वा चानवद्याङ्गीं (for ) महेश्वरः; जनेश्वरः (३) (अं)तरितो (for (अ)न्तर्हितो); (४) जगामाभीप्सितां दिशं; माभिहतं शुभं; माभिहितं शुभे;.

**सेव्यमाना त्रिजटया तत्रैव न्यवसत्तदा ।। ३१ ।।** [०१]

अस्मिन् पर्वणि २३६अध्याये ३१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि सीतारावणसंवादे षट्त्रिंशदधिकद्विशततमोऽध्यायः ।। २३६ ।।

# २३७. सप्तत्रिंषदधिकद्विशततमो अध्यायः ।।

Concept Paste .P.No. 1366 .

**मार्कण्डेयः**

राघवः सहसौमित्रिः सुग्रीवेणाभिपालितः।
**वसन्माल्यवतः पृष्ठे ददृशे विमलं नभः ।। १ ।।** [०२]

स दृष्ट्वा विमले व्योम्नि निर्मलं शशलक्ष्म(क्ष)णम्।
**ग्रहनक्षत्रताराभिरनुयातममित्रहा ।। २ ।।** [०३]

कुमुदोत्पलपद्मानां गन्धमादाय वायुना।
**महीधरस्थः शीतेन सहसा प्रतिबोधितः ।। ३ ।।** [०४]

---

(०१) (२) जानकी (for वैदेही); शोककर्षिता; (३) सान्त्व्यं (for सेव्यं); (४) तया (for तदा); .
(०२)( सहसौं (for तु ससौं) (३) पूजितः (३) (४) ददृशे (for ददर्श); .
(०३)( विपुले; विमलं (for विमले); विमलं (for निर्मलं); शशलाञ्छनं; शशिलक्षणं; .
(०४)( गन्धेन; (२)गन्धान् (for गन्धम्); गन्धमादनवायुना (३/४) महीधरस्य; धरः स पीतेन (for शीं); शीतेन सहसा; .

प्रभाते लक्ष्मणं वीरमभ्यभाषत दुर्मनाः।
सीतां संस्मृत्य धर्मात्मा रुद्धां राक्षसवेश्मनि ॥ ४ ॥ [०१]

**श्रीरामः-**

गच्छ लक्ष्मण जानीहि किष्किन्धायां कपीश्वरम्।
प्रमत्तं ग्राम्यधर्मेषु कृतघ्नं स्वार्थपण्डितम् ॥ ५ ॥ [०२]

योऽसौ कुलाधमो मूढो मया राज्येऽभिषेचितः।
सर्ववानरगोपुच्छा यमृक्षाश्च भजन्ति वै ॥ ६ ॥ [०३]

यदर्थं निहतो वाली मया रघुकुलोद्वह।
त्वया सह महाबाहो किष्किन्धोपवने तदा ॥ ७ ॥ [०४]

कृतघ्नं तमहं मन्ये वानरापसदं भुवि।
यो मामेवङ्गतं(तो) मूढो न जानीतेऽद्य लक्ष्मण ॥ ८ ॥ [०५]

असौ मन्ये न जानीते समयप्रतिपालनम्।
कृतोपकारं मां नूनमवमन्याल्पया धिया ॥ ९ ॥ [०६]

यदि तावदनुद्युक्तः शेते कामसुखात्मकः।
नेतव्यो वालिमार्गेण सर्वभूतगतिं त्वया ॥ १० ॥ [०७]

---

(०१)(२) दुःखितः (for दुर्मनाः) (३) तां संस्मृत्य च धं.
(०२)( गच्छ जानीहि सौमित्रे (३) प्रसक्तं (for प्रमत्तं); धर्मेण (for धर्मेषु); (४) प्रसक्तं (for कृतघ्नं); .
(०३) (२) (अ)रण्ये (for राज्ये); (३)सर्वे (for सर्व); (४) ये मृषा च; ऋक्षाश्चैनं (for यमृक्षाश्च); (अ)पि भेजिरे (for भजन्ति वै);.
(०४) ( धीमान् (for वाली); (४) तथा; पुरा (for तदा); .
(०५) ( तदहं (for तमहं); (२) वानरापशदं (३) गतं; गते'(for गतो); (४) जा नाति (for जानीते);.
(०६) ( व्यतिरिक्तं; योसौ मन्ये (for असौ मन्ये); जानाति; (२) प्रतिपालनं; (३) मा(for मां); (४) अवमत्य (आ)त्मपौरूष; (अ)ल्पमेधया (for (अ)ल्पया धिया); .
(०७)( अनायत्त (for अनुद्युक्तः) (२) कामवशानुगः वशात्मकः सुखाशया (४) गतिंस् (for गतिं); स्वयं (for त्वया); गतं तदा गतेन वै; .

अथापि घटतेऽस्माकमर्थे वानरपुङ्गवः।
तमादायैव काकुत्स्थ त्वरावान्भव मा चिरम् ।। ११ ।। [०१]

**मार्कण्डेयः-**

इत्युक्तो लक्ष्मणो भ्रात्रा गुरुवाक्यहिते रतः।
प्रतस्थे रुचिरं गृह्य समार्गणगुणं धनुः** ।। १२ ।।

किष्किन्धाद्वारमासाद्य प्रविवेशानिवारितः।[०२]
सक्रोध इति तं मत्वा राजा प्रत्युद(द्य)यौ हरिः ।। १३ ।।

तं सदारो विनीतात्मा सुग्रीवः प्लवगाधिपः।
पूजया प्रतिजग्राह प्रीयमाणस्तदर्हया ।। १४ ।। [०३]

तमब्रवीद्रामवचः सौमित्रिरकुतोभयः।
स तत्सर्वमशेषेण श्रुत्वा प्रह्वः कृताञ्जलिः ।। १५ ।। [०४]

सभृत्यदारो राजेन्द्रः(न्द्र) सुग्रीवो वानराधिपः।
इदमाह वचः प्रीतो लक्ष्मणं नरकुञ्जरम् ।। १६ ।। [०५]

**सुग्रीवः-**

नास्मि लक्ष्मण दुर्मेधा नाकृतज्ञो न निर्घृणः।
श्रूयतां यः प्रयत्नो मे सीतापर्येषणे कृतः ।। १७ ।। [०६]

---

(०१)( अथ वा; तथापि (for अथापि); चेष्ट; त्वरं (for घटं); (२) कृत्ये (for अर्थे) (३) यैव; यं हि (for यैह्नि); .

(०२)(२) ततो वाक्ये; गरुवाक्ये (४) गणं (for गुणं); (६) (अ)निवेदितः (for (अ)निवारितः); .

(०३)( इव (for इति); तं लक्ष्य; मत्वा स (for तं मत्वा); प्लवगेश्वरः; (६) तदा ह्रिया (for तदर्हया); .

(०४)(३); पूर्वम् (for सर्वम्); विशेषेण (४) प्राह (for प्रह्वः); शुश्व हरिपुङ्गवः .

(०५)(१/२) वानरेश्वरः (for राधिपः); सभृत्यस्तं तदा प्रह्वः स वानरगणाधिपः (४) नरपुङ्गव; वानरर्षभः; कपिपुङ्गवः .

(०६)(२) नाकृतज्ञो (for न कृतघ्नो); (४) सीतापर्यक्षणे रतः; न्वेषणकौतुकः .

दिशः प्रस्थापिताः सर्वे विनीता हरयो मया।
**सर्वेषां च कृतः कालो मासेनागमनं पुनः ।। १८ ।।** (०१)

यैरियं सवना साद्रिः सपुरा सागराम्बरा।
**विचेतव्या मही वीर सग्रामनगराकरा ।। १९ ।।** (०२)

स मासः पञ्चरात्रेण पूर्णो भवितुमर्हति।
**ततः श्रेष्यसि रामेण सहितः सुमहत्प्रियम् ।। २० ।।** (०३)

**मार्कण्डेयः-**

इत्युक्तो लक्ष्मणस्तेन वानरेन्द्रेण धीमता।
**त्यक्त्वा रोषमदीनात्मा सुग्रीवं प्रत्यपूजयत् ।। २१ ।।** (०४)

स रामं सहसुग्रीवो माल्यवत्पृष्ठमास्थितम्।
**अभिगम्योदयं तस्य कार्यस्य प्रत्यवेदयत् ।। २२ ।।** (०५)

इत्येवं वानरेन्द्रास्ते समाजग्मुः सहस्रशः।
**दिशस्तिस्रो विचित्याथ न तु ये दक्षिणां गताः ।। २३ ।।** (०६)

आचख्युस्तत्र रामाय महीं सागरमेखलाम्।

---

(०१)( सर्वाः (for सर्वे); (२) समर्था (for विनीता); (४) मासोभ्या (सो ह्या); गमने पुनः.
(०२)( तैर् (for यैद्); सनगा; ससरित्; सपुरा (for सवना); (२) सवना (for सपुरा); (३) मही सर्वा; महा वीर; (४) समग्रं; .
(०३)(३); तत्र (for ततः); .
(०४)(१/२); लक्ष्मणं वानरें;.
(०५)(२) हिमं माल्यं); पृष्ठमाश्निं; पृष्ट (for प्रस्थ )वासिनं; गिरिपृष्ठनिवासिनं (३) कार्यं (for तस्य); अभिगम्येदमन्तस्थं;.
(०६)( अत्रान्तरे वानरेद्राः; इत्येवं वादिनः (वदत) स्तस्य; इत्येवं ते वानरेन्द्राः -आयाता वानरास्तदा ।दिशस्तिस्रो वानरेन्द्राः (२) वानरेन्द्राः (for समां); आयाता वानरास्तदा (था); (३) विविच्याथ; विहृत्याथ (४) च (for तु); दिशं (for गताः);.

विचितां न तु वैदेह्या दर्शनं रावणस्य वा ।। २४ ।। (०१)

गतास्तु दक्षिणामाशां ये वै वानरपुङ्गवाः।
आशावांस्तेषु काकुत्स्थः प्राणानार्तोऽभ्यधारयत् ।। २५ ।। (०२)

द्विमासोपरमे काले व्यतीते प्लवगास्ततः।
सुग्रीवमभिगम्येदं त्वरिता वाक्यमब्रुवन् ।। २६ ।। (०३)

**वानराः-**

रक्षितं वालिना यत्तत्स्फीतं मधुवनं महत्।
त्वया च प्लवगश्रेष्ठ तद्भुङ्क्ते पवनात्मजः ।। २७ ।। (०४)

वालिपुत्रः अङ्गदःचैव ये चान्ये प्लवगर्षभाः।
विचेतुं दक्षिणामाशां राजन्प्रस्थापितास्त्वया ।। २८ ।। (०५)

**मार्कण्डेयः-**

तेषां तत्प्रणयं(षामपनयं) श्रुत्वा मेने स कृतकृत्यताम्।
कृतार्थानां हि भृत्यानामेतद्भवति चेष्टितम् ।। २९ ।। (०६)

स तद्रामाय मेधावी शशंस प्लवगर्षभः।

---

(०१) ( आचक्षुसू तेथ; तत्र; तेत्र; ते च; तेपि (for ते तु); रामस्य (२) मही मेखला (मेखलां); (३) विचिता; निचितां; च (for तु); च (for वा); .
(०२) ( वै; ते (for तु); (३) तेन (for तेषु); (४) (ऽ)द्यं; व्यं; (ऽ)भ्यं (for ऽप्यं); .
(०३)( द्विमासपरमे; से परमे; (२) वानरां (for प्लवगां); (३) गत्वा (for गंम्य); (४) त्वरितं (for तां); .
(०४) ( यत्ते (for यत्तत्); (३) वानरं (for प्लवगं);.
(०५)(२) प्लवगेश्वराः; गर्षभ; (३) विचेरूर् (for विचेतुं); .
(०६)( पत्प्रणयं; अ (त्व) पनयं; सप्रणयं; वाक्यं (for श्रुत्वा); (२) स मेने; तत् (for स); श्रुत्वा मेने कृतार्थतां; (३) भद्रानाम् (for भृत्यानाम्); (४) जीवति (for भबति); .

रामश्चाप्यनुमानेन मेने दृष्टां तु मैथिलीम् ॥ ३० ॥[०१]

हनू(नु)मत्प्रमुखाश्चापि विश्न्तास्ते प्लवङ्गमाः।
अभिजग्मुर्हरीन्द्रं तं रामलक्ष्मणसंनिधौ ॥ ३१ ॥[०२]

गतिं च मुखवर्णं च दृष्ट्वा रामो हनूमतः।
अगमत्प्रत्ययं भूयो दृष्टा सीतेति भारत ॥ ३२ ॥[०३]

हनुमत्प्रमुखास्ते तु वानराः पूर्णमानसाः।
प्रणेमुर्विधिवद्रामं सुग्रीवं लक्ष्मणं तथा।[०४]
तानुवाचाग(न)तान्रामः प्रगृह्य सशरं धनुः** ॥ ३३ ॥

**श्रीरामः-**

अपि मां जीवयिष्यध्वमपि वः कृतकृत्यता।[०५]
अपि राज्यमयोध्यायां कारयिष्याम्यहं पुनः** ॥ ३४ ॥

निहत्य समरे शत्रूनाहृत्य जनकात्मजाम्।[०६]

अमोक्षयित्वा वैदेहीमहत्वा च रणे रिपून्। ॥ ३५ ॥

हृतदारोऽवधूतश्च नाहं जीवितुमुत्सहे।[०७]

**मार्कण्डेयः-**

इत्युक्तवचनं रामं प्रत्युवाचानिलात्मजः** ॥ ३६ ॥

---

(०१)( दृष्टा (for दृष्टां); स्म; च (for तु); मैथिली;.
(०२)( हनुमत्; (२) विश्रुतां (for विश्न्तां) (३) प्रतिं; उपं (for अभिं) हरीन् तं; गिरीद्रं; हरीशं हरीद्रास् (for हरीन्द्रं); तु; ते (for तं); .
(०३)(२) रामो दृष्ट्वा; (३) अगच्छत् (for अगमत्); .
(०४)( हरीन्द्रं; हतुमत् (for हनूमत्); (३) रामे (for रामं); (४) तदा (for तथा);सुग्रीवे लक्ष्मणे तथा (तदा); .
(०५) ( तम् (for तान्); ततो; (आ)नतान् (for (आ)गतान्); (२) रूचिरं (for सशरं); .
(०६) (२) शत्रुम् (for शत्रन्); .
(०७)(३) रिपुं रणे; रणे रिपून् (पुं); अहित्वाचरितं रणे; हत्वा मम गिपूत्रणे;.

### हनुमान्-

प्रियमाख्यामि ते राम दृष्टा सा जानकी मया ।। ३७ ।। (०१)

विचित्य दक्षिणामाशां सपर्वतवनाकराम्।
श्रन्ताः काले व्यतीते स्म दृष्टवन्तो महागुहाम् ।। ३८ ।।

प्रविशामो वयं तां तु बहुयोजनमायताम्।
अ(सा)न्धकारां सुविपिनां गहनां कीटसेविताम् ।। ३९ ।। (०२)

गत्वा सुमहदध्वानमादित्यस्य प्रभां ततः।
दृष्टवन्तः स्म तत्रैव भवनं दिव्यमन्तरा ।। ४० ।। (०३)

मयस्य किल दैत्यस्य तदासीद्वेश्म राघव।
तत्र प्रभावती नाम तपोऽतप्यत तापसी ।। ४१ ।। (०४)

तया दत्तानि भोज्यानि पानानि विविधानि च ।
भुक्त्वा लब्धबलाः सन्तस्तयोक्तेन पथा ततः ।। ४२ ।। (०५)

निर्याय तस्मादुद्देशात्पश्यामो लवणाम्भसः।
समीपे सह्यमलयौ दर्दुरं च महागिरिम् ।। ४३ ।। (०६)

---

(०१) (४) प्रियामाख्याति ते राम; (४) (अ)र्या (for सा); दृष्ट्वार्यां जानकीमहं; ( विविच्य (for विचित्य); (३) तु (for स्म); (४) मही शुभां; महीगुहां;.

(०२)( प्राविशाम; विशामश्व; विशन्तश्व; विश्रराम्य च; स्म (for तु); (३) सान्धकारां (for अन्धं); सुविपुलां;.

(०३)( गत्वा सह महध्वानं (३) च (for स्म); .

(०४)(२) तदा सद्वेश्म रां (४) तपस्तप्यति;.

(०५)(२); फलानि (for पानानि); (३) चैव (for सन्तम्); (४) गताः (for ततः); .

(०६)(३) पश्याम (for मो); लवणाम्भसं (३) सह्यमलयोर्; ह्यस्य मलयौ (४) दुन्दुरं; दर्दुरशू; दुर्धरं; दर्दरं तथा (for महा-);.

ततो मलयमारुह्य पश्यन्तो वरुणालयम्।
विषण्णा व्यथिताः खिन्ना निराशा जीविते भृशम् ॥ ४४ ॥ (०१)

अनेकशतविस्तीर्णं योजनानां महोदधिम्।
तिमिनक्रझषावासं चिन्तयन्तः सुदुःखिताः ॥ ४५ ॥ (०२)

तत्रानशनसङ्कल्पं कृत्वाऽऽसीना वयं तदा।
ततः कथान्ते गृध्रस्य जटायोरभवत्कथा ॥ ४६ ॥ (०३)

ततः पर्वतशृङ्गाभं घोररूपं भयावहम्।
पक्षिणं दृष्टवन्तः स्म वैनतेयमिवापरम्।(०४)
सोऽस्मानतर्कयद्भोक्तुमथाभ्येत्य वचोऽब्रवीत्** ॥ ४७ ॥

**पक्षी-**

भोः क एष मम भ्रातुर्जटायोः कुरुते कथाम् ॥ ४८ ॥ (०५)

लक्षालङ्कारः - सोऽस्मानतर्कयद्भोक्तुम् इत्यत्र सः अस्मानभ्येत्य अतर्कयत् प्रायोपवेशगतानूहयामास । अथ भोक्तुं वचः अब्रवीदिति योजना ।

सम्पातिर्नाम तस्याहं ज्येष्ठो भ्राता खगाधिपः।
अन्योन्यस्पर्धयारूढावावामादित्यसत्पदम् ॥ ४९ ॥ (०६)

---

(०१)(३); क्षुण्णा; भिन्ना (for खिन्ना); (४) जीविते भवान्; तेभवन्; तेभवं; ते ध्रुवं; ते वयं (for ते भृशम्); .

(०२)(४) झषाकीर्णं;.

(०३) ( अत्र; तदा (for तत्र); (२) तदा (तो) वयं; वयं ततः (for वयं तदा); (३) भवत् (for ततः) कथायां (for कथान्ते); .

(०४)( सङ्काश; शृगाभिर्; श्रृङ्गाभ्यां (३) च (for स्म); .

(०५) (२) अथोपेत्य; अत्याभ्येत्य (for अथाभ्येत्य); च सो (for वचो); अहं त्यक्तमितोब्रवीत्; अथैत्य (for तान्) कुपितों ; .

(०६)(२); भ्राता ज्येष्ठः (३)मूढौ; नूढौ (रूतौ); (for (आ)रूढौ) (४)आदित्यसम्पदां; सम्पदं; मण्डलं;

ततो दग्धाविमौ पक्षौ न दग्धौ तु जटायुषः।
**तदा मे चिरदृष्टः स भ्राता गृध्रपतिः प्रियः**** ॥ ५० ॥

निर्दग्धपक्षः पतितो ह्यहमस्मिन्महागिरौ।(०१)
**द्रष्टुं वीरं न शक्नोमि भ्रातरं वै जटायुषम्** ॥ ५१ ॥

**हनुमान्-**

तस्यैवं वदतोऽस्माभिर्हतो भ्राता निवेदितः।
**व्यसनं भवतश्चेदं सङ्क्षेपाद्वै निवेदितम्** ॥ ५२ ॥ (०२)

स सम्पातिस्तदा राजञ्छ्रुत्वा सुमहदप्रियम्।
**विषण्णचेताः पप्रच्छ पुनरस्मानरिन्दम** ॥ ५३ ॥ (०३)

**सम्पातिः-**

कः स रामः कथं सीता जटायुश्च कथं हतः।
**इच्छामि सर्वमेवैतच्छ्रोतुं प्लवगसत्तमाः** ॥ ५४ ॥ (०४)

**हनुमान्-**

तस्याहं सर्वमेवैतद्भवतो व्यसनागमम्।
**प्रायोपवेशने चैव हेतुं विस्तरशोऽब्रुवम्।**(०५)

---

सत्पदं; सत्तमं; सङ्क्षयं; .

(०१)( तदा (for ततो); (२) च; तौ (for तु); (३) तस्य; तस्मान् (for तदा); तु (for स); (४) ततो (for भ्राता); स्वयं (for प्रियः); निदग्धं (५) अहम्; (अ)प्यहम् (for ह्यहम्); .

(०२)( भ्रातुर् (for (अ)स्माभिर्);.

(०३)( सम्पातिस्तु (for स सम्पातिस्); ततो (for तदा); (२) स; तु (for सु) विधिवद् (for सुमहद्) (३) विखिन्नचेताः (४)दमः (for दम); .

(०४)( कस्य; कश्च; यः स; कथं (for कः स); कथं सीता जटायुश्च (३)(इ) दं (for (ए)तत्); (४) पुङ्गवाः (for सत्तमाः); श्रेतुं व्यसनमागतं;.

(०५) (इ)मं; (इ)दं; (ए)तद्; (इ)ह (for (ए)तं); (३)वापि; चापि (for चैव); (४) विस्तरशो (for तो); ध्रुवं (for ऽब्रुवम्); .

सोऽस्मानुत्थापयामास वाक्येनानेन पक्षिराट्** ।। ५५ ।।

**सम्पतिः-**

रावणो विदितो मह्यं लङ्का चास्य महापुरी।(०१)

दृष्टा पारे समुद्रस्य त्रिकूटगिरिकन्दरे। ।। ५६ ।।

भवित्री तत्र वैदेही न मेऽस्त्यत्र विचारणा ।। ५७ ।। (०२)

**हनुमान्-**

इति तस्य वचः श्रुत्वा वयमुत्थाय सत्वराः।
सागरक्रमणे मन्त्रं मन्त्रयामः परन्तपः ।। ५८ ।। (०३)

नाध्यवास्यद्यदा कश्चित् सागरस्य विलङ्घनम्

ततः पितरमाविश्य पुप्लु(प्लु)वेऽहं महार्णवम्।
शतयोजनविस्तीर्णं निहत्य जलराक्षसीम् ।। ५९ ।। (०४)

लक्षालङ्कारः - ततः पितरमाविश्य इत्यत्र दक्षिणस्यां दिशि झंझामारुतरूपं पितरमाविश्येत्यर्थः ।

तत्र सीता मया दृष्टा रावणान्तःपुरे सती।
उपवासतपःशीला भर्तृदर्शनलालसा** ।। ६० ।। (०५)

---

(०१) ( आश्वासया (for उत्थापयां); (२) (अ)न्येन (for (अ)नेन ); .

(०२) (३); वसती; भवती (for भवित्री); (४) (ऽ)त्रास्ति (for ऽस्त्यत्र);.

(०३) ( ततस् (for इति); (२) सादराः (for सत्वराः); वयमुत्थापयत्त्वराः; (३) सागरकमणे; राप्रवणे; राकमणे; (४) मन्त्रताम; परस्परं (for परन्तप);.

(०४)( नाघ्रगच्छद्; नाष्यवस्यद् (for नाध्यं); तदा; मुदा (for यदा); (२) (अ)ति; (ए)व; (अ)पि (for वि); लङ्घनं; सागरस्यास्य वै भिलं; (३) तदा (for ततः); उदिश्य (for आविश्य); (४) सुस्तुवे (for पुप्लुवे); बलं (for र्णवम्); पुप्लुवे लवणार्णवं (५) विस्तीर्णा;.

(०५)(१/२) स्थिता (for सती);.

जटिला मलदिग्धाङ्गी कृशा दीना तपस्विनी ।। ६१ ।। (०१)

निमित्तैस्तामहं सीतामुपलभ्य पृथग्विधैः।
उपसृत्याब्रुवं चार्यामभिगम्य रहोगताम् ।। ६२ ।। (०२)

सीते रामस्य दूतोऽहं वानरो मारुतात्मजः।
त्वद्दर्शनमभिप्रेप्सुरिह प्राप्तो विहायसा ।। ६३ ।। (०३)

राजपुत्रौ कुशलिनौ भ्रातरौ रामलक्ष्मणौ।
सर्वशाखामृगेन्द्रेण सुग्रीवेणाभिपालितौ ।। ६४ ।। (०४)

कुशलं त्वाब्रवीद्रामः सीते सौमित्रिणा सह ।
सखिभावाच्च सुग्रीवः कुशलं त्वानुपृच्छति ।। ६५ ।। (०५)

क्षिप्रमेष्यति ते भर्ता सर्वशाखामृगैः सह ।
प्रत्ययं कुरु मे देवि वानरोऽस्मि न राक्षसः।(०६)

मुहूर्तमिव च ध्यात्वा सीता मां प्रत्युवाच ह ।
अवैमि त्वां हनूमन्तमविन्ध्यवचनादहम्।(०७)

---

(०१)( क-ख-दिग्दाङ्गी.

(०२) (२); तपस्विनीं (for पृथग्विधैः); (३) गम्य (for सृत्य); (अ)ब्रवं; (अ)ब्रुवन्; (अ)ब्रविन्; (अ)ब्रवन् (for (अ)ब्रुवं); वाक्यम्; पादाव्; अर्याम् (च); न्यायाद्र; स्मार्याम्; आयाद्र (for चार्याम्); उपसृत्याब्रु वन्त्यायाद्; (४) वाद्य (for गम्य);.

(०३)मारुतात्मजवानरः (३/४) अभि इह;.

(०४) ( त्वां ब्रं; चाब्रं (for त्वाब्रं) (४) चां (for त्वां); .

(०५)( त्वां ब्रं; चाब्रं (for त्वाब्रं); (४) चां (for त्वां); .

(०६)( आगमिष्यति (for क्षिप्रमेष्यति); (२) वृतः (for सह); (३) विश्वासं (for प्रत्ययं); (४) (ऽ)हं (for ऽस्मि);.

(०७)( तु; तद्; मां; सा (for च); (३) अवैहि त्वा (for त्वां); (४) अविघ्यं; अवग्घ्यं; अवध्यं (for अविन्ध्यं); इह (for अहम्); .

अविन्ध्यो हि महाबाहो राक्षसो वृद्धसम्मतः।
कथितस्तेन सुग्रीवस्त्वद्विधैः सचिवैर्वृतः।(०१)

गम्यतामिति चोक्त्वा मां सीता प्राददिमं मणिम्। ।। ६६ ।।

धारिता येन वैदेही कालमेतमनिन्दिता।(०२)
प्रत्ययार्थं कथां चेमां कथयामास जानकी ।। ६७ ।।

लक्षालङ्कारः - धारिता येन वैदेहि इत्यत्र येन मणिना धारिता जीविता ।

**जानकी-**

क्षिप्तामिषीकां काकाय चित्रकूटे महागिरौ।
भवता पुरुषव्याघ्र प्रत्यभिज्ञानकारणात्।(०३)
एकाक्षिविकलः काकः सुदुष्टात्मा कृतश्च वै ।। ६८ ।।

लक्षालङ्कारः - क्षिप्तामिषीकाम् इत्यत्र इषीकां प्रत्यभिज्ञानकारणं कथयामासेति पूर्वेण सम्बन्धः ।

**मार्कण्डेयः-**

ग्राहयित्वाहमात्मानं ततो दग्ध्वा च तां पुरीम्।
सम्प्राप्त इति तं रामः प्रियवादिनमार्चयत् ।। ६९ ।। (०४)

---

(०१)( अवघ्यो; अविघ्यो; अरण्ये (for अविन्यो); भागो (for बाहो); (३) अधीतं (for कथितं) (४) त्वद्विधः सह (for वृतः); .

(०२)( मां सीता (for चोक्त्वा मां); मा (for मां); (२) तदा (for सीता); इदं (for इमं); (३) (अ) नेन (for येन); (४) एतद्; एनम् (for एतम्);.

(०३) ( चैनां; वै मां (for चेमां); (२) कारं (for कथं); (३) काकाय; काकुस्त (for काकस्य); (४) चित्रकूटगिरौ तदा (५) ममाङ्के (for भवता); .

(०४) ( महां (अ) हमां (for तदां); अथात्मानं ग्राहः (दर्श) यित्वा; ग्राहयित्वाहमा(त्वा महा); त्मानं (२) दग्ध्वा तां च पुरीं ततः (पुनः) (३) सम्प्राप्तोस्मीति (४) दिनमा दो
सम) र्चयत्;.

अस्मिन् पर्वणि २३७अध्याये ६९३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि
हनुमत्प्रत्यागमने सप्तत्रिंशदधिकद्विशततमोऽध्यायः ।। २३७ ।।

# २३८. अष्टत्रिंशदधिकद्विशततमो अध्यायः ।

Consept Paste P.No.1375

**मार्कण्डेयः**

ततस्तत्रैव रामस्य समासीनस्य तैः सह ।
**समाजग्मुः कपिश्रेष्ठाः सुग्रीववचनात्तदा ।। १ ।।** [०१]

वृतः कोटिसहस्रेण वानराणां तरस्विनाम्।
**श्वशुरो वालिनः श्रीमान्सुषेणो राममभ्ययात् ।। २ ।।** [०२]

कोटीशतवृतो वापि गजो गवय एव च ।
**वानरेन्द्रौ महावीर्यौ पृथक्पृथगदृश्यताम् ।। ३ ।।** [०३]

**कुमुदोऽपि महावीर्यः प्लवगर्षभसत्तम ।**

षष्टिकोटिसहस्राणि प्रकर्षन्प्रत्यदृश्यत।
**गोलाङ्गूलो महाराज गवाक्षो भीमदर्शनः ।। ४ ।।** [०४]

---

(०१) ( तस्य (for तत्र); (३/४) कपिवराः (for श्रेष्ठाः); ततः (for तदा); .
(०२) ( कोटीं (for कोटिं) (२) तपं (for तरं); (३) वानरः (for वालिनः); (४) अभ्यगात्; .
(०३) ( शतवृतो; समावृतशू वा (for च) (२) गयो (for गजो); (३) महाबाहू (४) (अ)दृश्येतां पृथक्पृथक्; .
(०४)( षष्टि कोटिसह स्राणि (णां) (२) कर्षन्स (for प्रकर्षन्); (३) महारूपो (for राज;); भीमविक्रमः; नाम वानरः.

**गन्धमादनवासी तु प्रथितो गन्धमादनः।**
**कोटीशतसहस्राणि हरीणां समकर्षत ॥ ५ ॥ (०१)**

**पनसो नाम मेधावी वानरः सुमहाबलः।**
**कोटीर्दश द्वादश च त्रिशंत्पश्च प्रकर्षति ॥ ६ ॥ (०२)**

**श्रीमान्दधिमुखो नाम हरिवृद्धोऽतिवीर्यवान्।**
**प्रचकर्ष महासैन्यं हरीणां भीमतेजसाम् ॥ ७ ॥ (०३)**

**कृष्णानां मुखपुण्ड्राणामृक्षाणां भीमकर्मणाम्।**
**कोटीशतसहस्रेण जाम्बवान्प्रत्यदृश्यत ॥ ८ ॥ (०४)**

**एते चान्ये च बहवो हरियूथपयूथपाः।**
**असङ्ख्येया महाराज समीयू रामकारणात् ॥ ९ ॥ (०५)**

**गिरिकूटनिभाङ्गानां सिंहानामिव गर्जताम्।**
**श्रूयते तुमुलः शब्दस्तत्र तत्र प्रधावताम् ॥ १० ॥ (०६)**

**गिरिकूटनिभाः केचित् केचिन्महिषसंनिभाः।**
**शरदभ्रप्रतीकाशाः पिष्टहिङ्गुलकाननाः ॥ ११ ॥ (०७)**

**लक्षालङ्कारः - पिष्टहिङ्गुलिकानना इत्यत्र हिङ्गुलिका इङ्गलीकमिति रक्तधातु- विशेषः ।**

---

(०१)( च (for तु); (२) प्रस्थितो (३) कोटीसहस्रमुख्यानां; कोटी (टीः; र्टि) शतसहस्राणां (णि); सहस्राण्युग्राणां; .

(०२)(२) समदृश्यत (for सुमहां) (३) कोटिर् कोट्चो (for कोटीर्); कोट्यो द्विर्द्वा दशस्त्रिशंत् (४) त्रिशत्पश्च च कर्षति (त) त्रिशतश्व (तं च) प्रकर्षति; त्रिशतं च महाबलः; पश्च पश्च च कर्षति;.

(०३) (२); (ऽ)ति (for ऽपि); (३) प्रकर्षयन् (for प्रचकर्ष) महा (for महत्);.

(०४) ( मुखपाण्डूनाम्; सुरपुत्रा णाम्; मुखमुद्राणाम्; (२) कपीनां; मृगाणां; हरीणां (for ऋक्षाणां); (३)सहस्राणां; सहस्राणि (४) जाम्बुवान्;.

(०५) (४); समेयू; सर्वे ते (for समीयू); समीपे राममभ्ययुः (for भ्ययात्); .

(०६) ( गिरिकूटनिभाङ्गानां;शिरीषकुसुमाभासां (२) अपि (for इव) गर्जतां; दर्शं (for नर्दं);.

(०७) ( महागजं; गिरीगूढं; (२) केचिज्ज लधरोपमाः (३)क-शरद्गृह- हिङ्गुलिकाननाः, घ-शरदाक्ष-हिङ्गुलिकाननाः,

उत्पतन्तः पतन्तश्च प्लवमानाश्च वानराः।
उद्धुन्वन्तोऽपरे रेणून्समाजग्मुः समन्ततः ।। १२ ।। (०१)

स वानरमहासङ्घ(सैन्यः) पूर्णसागरसंनिभः।
निवेशमकरोत्तत्र सुग्रीवानुमते तदा ।। १३ ।। (०२)

ततस्तेषु हरीन्द्रेषु समावृत्तेषु सर्वशः।
तिथौ प्रशस्ते नक्षत्रे मुहूर्ते चाभिपूजिते ।। १४ ।। (०३)

तेन व्यूढेन सैन्येन लोकानुद्वर्तयन्निव ।
प्रययौ राघवः श्रीमान्सुग्रीवसहितस्तदा ।। १५ ।।

मुखमासीत्तु सैन्यस्य हनूमान्मारुतात्मजः।
जघनं पालयामास सौमित्रिरकुतोभयः ।। १६ ।। (०४)

बद्धगोधाङ्गुलित्राणौ राघवौ तत्र जग्मतुः।
वृतौ हरिमहामात्रैश्चन्द्रसूर्यौ ग्रहैरिव ।। १७ ।। (०५)

प्रभभौ हरिसैन्यं तत्सालतालशिलायुधम्।
सुमहच्छालिभवनं यथा सूर्योदयं प्रति ।। १८ ।। (०६)

---

शरगर्भप्रकाशाश्च; शारदाभ्रं (४)ख-अयं पादो..नन्तरश्च न स्तः, केचिद्धिङ्गुल लि); कानना:; पिष्ट(for पृष्ट; पिलु)- हिङ्गुलिं;.

(०१) ( उत्प्लवन्तः प्लवन्तश्च (३) उद्धवन्तो; उद्धून्वन्तो; उद्धमन्तो (for उद्धुन्वन्तो); पुरे (for ऽपरे); रेणुं (for रेणून्); (४) महस्त्रशः (for समं); .

(०२) ( तद् (for स); महासैन्यः (न्यं); (२)सागरसंनिभं; पूर्वसागरसंनिभः (३) निवासम् (for निवेशम्); (४) ततः (for तदा); .

(०३) (२) वर्तेषु (for वृत्तेषु); (४) वा (for च); चापि शोभने; चाभिपूजने; चापि पूजिते.

(०४)( मुख आं (for मुखमां); च (for तु); (२) हनुमान् ; .

(०५)(२) जग्मतुः (for रेजतुः); (३) मात्यैशू; मन्त्रैश्;.

(०६) (१ ) तु (for तत्); (२) शालतालं सालतालं (३) सुमहान् (for सुमहत्); वारिं (for शालिं); .

नलनीलाङ्गदक्राथमैन्दद्विविदपालिता।
ययौ सुमहती सेना राघवस्यार्थसिद्धये ॥ १९ ॥ (०१)

विविधेषु वनेष्वेव(प्रशस्तेषु) बहुमूलफलेषु च ।
प्रभूतमधुमूलेषु वारिमत्सु शिवेषु च ॥ २० ॥ (०२)

निवसन्ती नीराबाधा तथैव गिरिसानुषु।
उपायाद्धरिसेना सा क्षी(क्षा)रोदमथ सागरम् ॥ २१ ॥ (०३)

द्वितीयसागरनिभं तद्बलं बहुलध्वजम्।
वेलावनं समासाद्य निवासमकरोत्तदा ॥ २२ ॥ (०४)

ततो दाशरथिः श्रीमान्सुग्रीवं प्रत्यभाषत।
मध्ये वानरमुख्यानां प्राप्तकालमिदं वचः ॥ २३ ॥

**श्रीरामः-**

उपायः को नु भवतां मतः सागरलङ्घने।
इयं हि महती सेना सागरश्चातिदुस्तरः ॥ २४ ॥ (०५)

**मार्कण्डेयः-**

तत्रान्ये व्याहरन्ति स्म वानरा बहुमानिनः।
समर्था लङ्घने सिन्धोर्न तु तत्कृत्स्नकारकम् ॥ २५ ॥ (०६)

---

(०१)(३/४) सा (for सु) ततः प्रतस्थे त्वरिता (परितो) वानराणां महाचमूः .

(०२) ( विविधेषु (for विधिवत्सु) (२) मधुमूलं (४) वारि शीतिशिलेषु च;.

(०३)( विवसन्ति; निवसन्तो;निवसं (स) ति निराबाधम् (२)गिरिसन्धिषु (३)हरिसैन्यं तत् (for हरिसेना सा); (४) क्षीरोदम् अधि;इव (for अथ);.

(०४) ( द्वितीयं (for द्वितीय) बहुलध्वनिं (४) निवेशम् (for निवासम्); .

(०५) (ऽ)त्र (for नु); भवता; भवतो; (२) मम (for मतः); (३) हि (for च); (४) (अ)ति (for (अ)पि); गुश्वराः (रः) दुःसहः (for दुस्तरः);.

(०६) (ख-अर्धचतुष्टयं नास्ति, तस्मादेवं व्याहरन्ति; तत्र ह्येषां हरन्ति स्म; (२) बहुमानिनः; युद्धं;पटुभाषिणः; बलमानिनः; परं (ए)तत् (for तु); न तु तत्कृत्स्नकारकं (कृत्स्नं च सागरं); न तु कृत्स्नास्तु (श्च) वानराः; .

**केचिन्नौभिर्व्यवस्यन्ति केचिच्च विविधैः प्लवैः।**
**नेति रामस्तु तान्सर्वान्सान्त्वयन्प्रत्यभाषत ।। २६ ।।** (०१)

**श्रीरामः-**

शतयोजनविस्तारं न शक्ताः सर्ववानराः।
**क्रान्तुं तोयनिधिं वीरा नैषा वो नैष्ठिकी मतिः ।। २७ ।।** (०२)

नावो न सन्ति सेनाया बह्व्यस्तारयितुं तथा।
**वणिजामुपघातं च कथमस्मद्विधश्चरेत् ।। २८ ।।** (०३)

विस्तीर्णं चैव नः सैन्यं हन्याच्छिद्रेण वै परः।
**प्लवोडुपप्रतारश्च नैवात्र मम रोचते ।। २९ ।।** (०४)

अहं त्विमं जलनिधिं समारप्स्याम्भुपायतः।
**प्रतिशेष्याम्युपवसन् दर्शयिष्यति मां ततः ।। ३० ।।** (०५)

लक्षालङ्कारः - प्रतिशेष्याम्युपवसन् इत्यत्र प्रतिशेष्यामि शयनं करिष्यामि ।

न चेद्दर्शयिता मार्गं धक्ष्याम्येनमहं ततः।
**महास्त्रैरप्रतिहतैरत्यग्निपवनोज्ज्वलैः ।। ३१ ।।** (०६)

**मार्कण्डेयः-**

---

(०१)( व्यवस्यन्तः; सतः; विमिप्स्यन्ति (२) विविध(for विविधैः); तरैः(for प्लवैः) (३)तु (for च);.
(०२) (२) अशक्ताः सर्ववानराः; शक्ताः सर्वे च (न) वानराः;.
(०३)( नावा (for नावो); सेनायां; नैवात्र; च तथा (for सेनाया); (२)तदा (for तथा); (३) उपघातश्; अनुयातं; उपयातं (for उपघातं); तत् (for च); .
(०४) ( तत् (for नः) सर्वं (for सैन्यं); विस्तीर्णं च महत्सैन्यं; प्रविस्तीर्णं च नः सैन्यं (२) छिद्रेण वा परः; चापरः.
(०५) ( चेमं (for त्विमं) (२)समारप्सां; समवाप्स्यां; समाराध्यां (३)ख-शि; घ-शेष्याम्युपवरं, प्रतिशोषामि; शेष्यापि; शोष्यामि; स्येषामि (for शेष्यामि) प्रतिशेष्यमुपवसे (४) मार्णवः; मामतः (for मां ततः); .
(०६)( च (for चेद्) (२) वक्ष्याम्येनम्; शोषयिष्यामि; बध्नाम्येनम् (for धक्ष्याम्येनम्); (३) अत्यग्निज्वलनो’(पवनो)पमैः; अत्यग्निपरमोज्वलैः; अर्काग्निपवनो (वपनो)पमैः .

इत्युक्त्वा सह सौमित्रिरुपस्पृश्याथ राघवः।
प्रतिशिश्ये जलनिधिं विधिवत्कुशसंस्तरे ।। ३२ ।।(०१)

सागरस्तु ततः स्वप्ने दर्शयामास राघवम्।
देवो नदनदीभर्ता श्रीमान्यादोगणैर्वृतः ।। ३३ ।।(०२)

लक्षालङ्कारः - सागरस्तु ततः स्वप्न इत्यत्र स्वप्ने इव अन्यैरदृष्टत्वात् रामेणैकेनैव दृष्टत्वात् स्वप्न इत्युक्तम् ।

कौसल्यामातरित्येवमाभाष्य मधुरं वचः।
इदमित्याह रत्नानामाकरैः शतशो वृतः ।। ३४ ।।(०३)

लक्षालङ्कारः - कौसल्यामातरित्येवम् इत्यत्र कौसल्या माता यस्य तत्सम्बुद्धिः, हे रामेत्यर्थः ।

**सागरः-**

ब्रूहि किं ते करोम्यत्र साहाय्यं पुरुषर्षभ।
ऐश्वाको ह्यस्मि ते ज्ञातिरिति रामस्तमब्रवीत्।(०४)
एवमुक्तः समुद्रेण रामो वाक्यमथाब्रवित् ।। ३५ ।।

लक्षालङ्कारः - ऐक्ष्वाकोरस्मि ते ज्ञातिः इत्यत्र ऐक्ष्वाकोः ते अहं ज्ञातिरस्मि, ममापि सगरकुमारनिर्मितत्वेन सागरत्वात् ।

---

(०१)(सौमित्रिम्; (२) अपस्पृश्याथ; उपविश्यां (३)प्रतिशिष्ये (४)देवं; दर्भं (for कुशं);.
(०२) ( तप्तो; सुप्तं (for स्वप्ने); (३) कर्ता (for भर्ता); (४) युतः (for वृतः); .
(०३) (कौशल्यां; (३) ददामीत्याह (for इदमित्याह); मतिमान् (for रत्नानाम्); (४) मकरैः (रः); वानरैः (for आकरैः); वृतं; .
(०४) (अ)द्य (for (अ)त्र); (३) ऐक्ष्वाकुः; ऐक्ष्वाकः; इक्ष्वाकः (for इक्ष्वाकुः); ह्यस्मि; (अ)स्मि च (for अस्मि); जातिर्; ज्ञाती (for ज्ञानिर्); (४)अब्रुवन् (for अब्रवीत्); रामः सत्यपराक्रमः;.

**श्रीरामः-**

मार्गमिच्छामि सैन्यस्य दत्तं नदनदीपते** ।। ३६ ।।

येन गत्वा दशग्रीवं हन्यां पौलस्त्यपांसनम्।
राक्षसं सानुभन्धं तु मम भार्यापहारिणम् ।। ३७ ।।(०१)

यद्येवं याचतो मार्गं न प्रदास्यति मे भवान्।
शरैस्त्वां शोषयिष्यामि दिव्यास्त्रप्रतिमन्त्रितैः ।। ३८ ।।(०२)

This Stanga is Interchanged in TRK after 36 .मार्कण्डेयः-

इत्येवं ब्रुवतः श्रुत्वा रामस्य वरुणालयः।
उवाच व्यथितो वाक्यमिति बद्धाञ्जलिः स्थितः ।। ३९ ।।(०३)

**सागरः-**

नेच्छामि प्रतिघातं ते नास्मि विघ्नकरस्तव।
शृणु चेदं वचो राम श्रुत्वा कर्तव्यमाचर ।। ४० ।।(०४)

यदि दास्यामि ते मार्गं सैन्यस्य व्रजतोऽऽज्ञया।
अन्येऽप्याज्ञापयिष्यन्ति मामेवं धनुषो बलात् ।। ४१ ।।(०५)

अस्ति त्वत्र नलो नाम वानरः शिल्पिसम्मतः।
त्वष्टुर्देवस्य तनयो बलवान्विश्वकर्मणः ।। ४२ ।।(०६)

---

(०१)(४); हत्वा (for हन्यां); वै कुलं (for पौलस्त्यं); हन्याम कुलपांसनं.

(०२) ( याचितो; याचते (for तो); (२) नो (for मे); (३) त्वा (for त्वां); शोषं (for शोषं); (४) प्रतिमैः शीतैः.

(०३)( वदतः (for ब्रुवतः); (३) व्यग्रम् (for वाक्यम्) (४) इदं (for इति);.

(०४)( नेष्यामि (for नेच्छामि) (२) नाहं (for नास्मि);.

(०५)(२); मया; यथा (for ऽऽज्ञया); (४) मानुषा (for धनुषो); .

(०६) (ए)व तु (for त्वत्र); (२) शिल्पसंमतः; शिल्पिसत्तमः (३) त्वष्टु काकुत्स्थ तनयो); .

स यत्काष्ठं तृणं वापि शिलां वा क्षेप्स्यते मयि।
सर्वं तद्धारयिष्यामि स ते सेतुर्भविष्यति ।। ४३ ।।(०१)

**मार्कण्डेयः-**

इत्युक्त्वान्तर्हिते तस्मिन्रामो नलमुवाच ह ।

**श्रीरामः-**

कुरु सेतुं समुद्रे त्वं शक्तो ह्यसि मतो मम ।। ४४ ।। (०२)

**मार्कण्डेयः-**

तेनोपायेन काकुत्स्थः सेतुबन्धमकारयत्।
दशयोजनविस्तारमायतं शतयोजनम् ।। ४५ ।। (०३)

नलसेतुरिति ख्यातो योऽद्यापि प्रथितो भुवि।
रामस्याज्ञां पुरस्कृत्य धार्यतो गिरिसंनिभः ।। ४६ ।। (०४)

लक्षालङ्कारः - धार्यते गिरिसन्निभ इत्यत्र धार्यते यथा अधो न गच्छति तथा समुद्रेणैव धार्यते ।

तत्रस्थं स तु धर्मात्मा समागच्छद्विभीषणः।
भ्राता वै राक्षसेन्द्रस्य चतुर्भिः सचिवैः सह ।। ४७ ।। (०५)

प्रतिजग्राह रामस्तं स्वागतेन महामनाः।

---

(०१)( यद् (for स); (२) यत्; प्र (for वा); (३) सर्व तं; समस्तं (for सर्व तद्); सर्वमुद्धारं; .
(०२)
(०३)(३/४) विस्तीर्णम्;.
(०४)( शतयोजनविस्तारो; (३) स रामाज्ञां (for रामस्याज्ञां); (४) निर्यातो (for धार्यते); गुरूं (for गिरिं);
(०५) ( ततस्तस्य तु; तत्रस्थस्य; तु (च); तत्रैव स तु (तु स); (३) स भ्राता; भ्राता तु (for भ्राता वै); भ्राता राक्षसराजस्य; (४) वानरैः सहल सह मन्त्रिभिः; सह राक्षसैः (for सचिवैः सह); .

**सुग्रीवस्य तु शङ्काभूत्प्रणिधिः स्यादिति स्म तह ।। ४८ ।।** (०१)

**लक्षालङ्कारः - प्रणिधिः स्यादिति स्म ह इत्यत्र प्र प्रति निधीयते अनेनेति प्रणिधिः शत्रुः ।**

राघवः सत्यचेष्टाभिः सम्यक्च चरितेङ्गितैः।
**यदा तत्त्वेन तुष्टोऽभूत्तत एनमपूजयत् ।। ४९ ।।** (०२)

सर्वराक्षसराज्ये चाप्यभ्यषिञ्चद्विभीषणम्।
**चक्रे च मन्त्रिप्रवरं(न्त्रसचिवं) सुहृदं लक्ष्मणस्य च ।। ५० ।।** (०३)

विभीषणमते चैव सोऽत्यक्रामन्महार्णवम्।
**ससैन्यः सेतुना तेन मासेनैव नराधिप ।। ५१ ।।** (०४)

ततो गत्वा समासाद्य लङ्कोद्यानान्यनेकशः।
**भेदयामास कपिभिर्महान्ति च बहूनि च ।। ५२ ।।** (०५)

**लक्षालङ्कारः - ततो गत्वा समासाद्य इत्यत्र ततः तेन सेतुना लङ्काप्रदेशं गत्वा ।**

ततस्तौ रावणामात्यौ मन्त्रिणौ शुक सारणौ।
**चरौ वानररूपेण तौ जग्राह विभीषणः ।। ५३ ।।** (०६)

---

(०१) (२) महात्मना नः (३) सम्भूतः (for शङ्काभूत्); .

(०२)( राघवस्य तु चें ; राघवः सत्यचें; वायवः सत्यचें; (२) सु (for च); सम्यक्सुचरितव्रतैः (जैः) (३) तदा;यथा (for यदा); तुष्टेन (for तत्त्वेन); तत्वो; शिष्टो; दृष्टो (for तुष्टो); (४) तदैनं प्रत्यपूजयत्; तदैनमभिं; तदेनमभिं (भ्यं);.

(०३) (१/२) वा; (ऽ)थ (for च); (अ)प्यभिर्षिचद्; (अ)प्यभिषिच्य; अभ्यषिं चद् (for (अ)प्यभ्यं); (३)सुहृदं मन्त्रे; मन्त्रावरजं; बुद्धिसचिवं; मन्त्रान्नचरं; मन्त्रान्नचवं; मन्त्रसचिवं; तं सुसचिवं; मन्त्रिप्रवरं; सचिवं तं तु (for मन्त्रानुचरं); (४)सचिवं (for सुहृदं); .

(०४) ( मतेनैव; (२)सोभ्यक्रामन्; सोत्यगात्तं महोदधि; (for महार्णवम्); (४) मार्गेणैव' नराधिपः .

(०५) (२) सर्वशः (for (अ)नेकशः (३)बलिभिर् (for कपिभिर्); .

(०६) (१)ततश्च; ततस्तां; ततस्तौ (for तत्रास्तां); (२) मन्त्रिणौ (for राक्षसौ) सारिणौ; .

- द्रष्टुं सेनामनुप्राप्तौ रावणप्रियकारिणौ ।(०१)

प्रतिपन्नौ यदा रूपं राक्षसं तौ निशाचरौ।
दर्शयित्वा ततः सैन्यं रामः पश्चादवासृजत् ।। ५४ ।।(०२)

निवेश्योपवने सैन्यं तत्पुरः प्राज्ञवानरम्।
प्रेषयामास दौत्येन रावणस्य ततोऽङ्गदम् ।। ५५ ।।(०३)

अस्मिन् पर्वणि २३८अध्याये ५५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि सेतुबन्धने त्र्यशीत्यधिकद्विशततमोऽध्यायः ।। २३८ ।।

# २३९. एकोनचत्वारिंशदधिकद्विशततमो अध्यायः ।।

अङ्गदेन रावणाय रामसंदेशनिवेदनपूर्वकं पुला रामसमीपगमनम् ।। १ ।। वानरै रामाज्ञया तङ्काप्रकारादिविभेदनपूर्वकं राक्षसैस्स्ह योधनम् ।। २ ।। ततो रामेण स्वसेनानामवहारः ।। ३ ।।

**मार्कण्डेयः**

---

(०१)(३); वीरौ; चरौ; वनी (for चारौ); (४) गृहीत्वा (for जग्राह); .

(०२) (२) राक्षसौ तौ; हन्यमानौ (for राक्षसं तौ); (३) तदा (for ततः) (४) सैन्याद् (for पश्चाद्); अपासृजत् (for अवां); .

(०३) (२); तच्छूर(रं); तत्पुरः (for तच्लूरः); तच्छूरं वानरर्षभं (३) दूत्येन; .

प्रभूतान्नोदके तस्मिन्बहुमूलफले वने।
सेनां निवेश्य काकुत्स्थो विधिवत्पर्यरक्षत ॥ १ ॥

रावणः संविधं चक्रे लङ्कायां शास्त्रनिर्मिताम्।
प्रकृत्यैव दुराधर्षा दृढप्राकारतोरणा ॥ २ ॥ (०४)

लक्षालङ्कारः - शास्त्रनिर्मिता इत्यत्र शास्त्रं शासनं आज्ञा तेन निर्मिताः ।

अगाधतोयाः परिखा मीननक्रसमाकुलाः।
बभूवुः सप्त दुर्धर्षाः खादिरैः शङ्कुभिश्चिताः ॥ ३ ॥ (०५)

कपाट्टयन्त्रैर्दुर्धर्षा बभूवुः सगुलोपलाः।(०६)
साशीविषघटायोधाः ससर्जरसपांसवः ॥ ४ ॥ (०७)

लक्षालङ्कारः - कर्णाट्टयन्त्रैर्दुर्घर्षा इत्यत्र कर्णाः करोति परभटशरनिरोधं, नयति च स्वभटशरानिति कर्णपदेन कर्णाकाराः वर्तुलाः प्राकारशिरोलङ्काराः कथ्यन्ते । सगुलोपलाः गुलैः घनीभूतैः तप्तवृक्षरसविशेषैः उपलैः शिलाभिश्च सहिताः सगुलोपलाः ।

मुसलालातनाराचतोमरासिपरश्वधैः।
अन्विताश्च शतघ्नीभिः समधूच्छिष्टमुद्गराः ॥ ५ ॥ (०८)

---

(०४) ( रावणः संविधं; णस्य (णस्तु); विधिं; संविधिं; णश्च द्रिधा (२) अ-शास्त्रनिर्मीताम्, शस्त्रनिर्मितां (३) च दुर्धर्षो; सुदु धर्षा; तु दुर्धर्षा (for दुरां); .
(०५) ( अगाधतोयःपरिखा; तोया परिस्वा; तोय परिखा; तोया गम्भीरा; तोयगम्भीरा (२) झषाकुलाः; झषाकुला; भीमनकझषा (समा) कुलाः (३)परिघाः;परिखाः (for दुर्धर्षाः); बभूव सातिदुर्धर्षा; बभूवुः सुप्तपरिघाः (४)ख-बहुयन्त्रगृतोपलाः, खादिरैः शङ्कुभिः सिताः; च ताः; चितैः; तथा; युताः (for चिताः);.
(०६) कर्णाट्टयत'; कगाटयन्त्र; कनाटद्यत्र;ह्यु ॥ ळ कर्णाटयन्त्र; य।। य। ह्न कपाटा )। 'टा - ( कर्णाट्टयतं; कगाटयन्त्रं; कर्नाटद्यत्रं; कर्णाटयन्त्रं; कपाट (टा); यन्त्रं; अट्टालयन्त्रं; (२) बभूव (for बभूवुः); सुहुलोपलाः; सगुडों; सहतों; बहुविस्तराः; बहुलोपलाः; बहुधो; सहुषो; बहुशो .
(०७) (३) घटायुक्ताः; गणायोधाः; गुणोयौधाः; गुणायोधाः; 'गुणायौधाः(४) पांशवः; .
(०८) ( मुशल (for मुसल); नाराचैसू; नाराचासृ; (२)परस्वधैः तोमराणि (शि); परश्वधैः; तोमराणि

पुरद्वारेषु सर्वेषु गुल्माः स्थावरजङ्गमाः।
बभूवुः पत्तिबहुलाः प्रभूतगजवाजिनः ॥ ६ ॥ (०१)

अङ्गदस्त्वथ लङ्काया द्वारदेशमुपागतः।
विदितो राक्षसेन्द्रस्य प्रविवेश गतव्यथः ॥ ७ ॥ (०२)

मध्ये राक्षसकोटीनां बह्वीनां सुमहाबलः।
शुशुभे मेघमालाभिरादित्य इव संवृतः ॥ ८ ॥ (०३)

स समासाद्य पौलस्त्यममात्यैरभिसंवृतम्।
रामसन्देशमामन्त्र्य वाग्मी वक्तुं प्रचक्रमे।(०४)

**अङ्गदः-**

आह त्वां राघवो राजन्कोसलेन्द्रो महायशाः** ॥ ९ ॥

**श्रीरामः-**

प्राप्तकालमिदं वाक्यं तदादत्स्व कुरुष्य च ॥ १० ॥ (०५)

अकृतात्मानमासाद्य राजानमनये रतम्।
विनश्यन्त्यनयाविष्टा देशाश्च नगराणि च ॥ ११ ॥

त्वयैकेनापराद्धं मे सीतामाहरता बलात्।
वधायानपराद्धानामन्येषां तद्भविष्यति ॥ १२ ॥ (०६)

---

परश्वथाः; तोमरासिपरश्वधाः; (४) मुद्गरा; समुच्छिष्टाश्व मुद्गराः; पट्टसैश्व स मुद्गराः; .
(०१) (४); प्रभूता (for प्रभूत); वाहनाः (for वाजीनः); .
(०२) (२)द्रारदेश (for द्रारदेशम्); अथाघमत् (for उपागतः); (३) राक्षसेन्द्रेण; .
(०३) (२) बलिनां (for भह्वीनां); (for सु); (३) मेघपटलैर्; जालाभिर्; .
(०४) (३) सामात्यैर्; राक्षसैर् (for अमात्यैर्); बहुभिर्वृतं (for अभिसंवृतम्); (३) आगम्य (for आमन्ज्य); .
(०५) ( त्वा (for त्वां); राजा (for राजन्); (२) कोशं; कौशं; कौसं (for कोसं); मनाः; बलः; तपाः (for यशाः); (४) कुरूद्रह; सुदुर्मते (कुरूष्व ह) (for कुरूष्व च); .
(०६) ((अ)पराधेन (for (अ)पराद्धं मे); (२) वनात् (for बलात्); सिता होह्वता बलात्; (३)

ये त्वया बलदर्पाभ्यामाविष्टेन वनेचराः।
ऋषयो हिंसिताः पूर्वं देवाश्चाप्यवमानिताः ॥ १३ ॥ [०१]

राजर्षयश्च निहता रुदत्यश्च हृताः स्त्रियः।
तदिदं समनुप्राप्तं फलं तस्यानयस्य ते ॥ १४ ॥ [०२]

हन्तास्मि त्वां सहामात्यैर्युध्यस्य पुरुषो भव।
पश्य मे धनुषो वीर्यं मानुषस्य निशाचर ॥ १५ ॥ [०३]

मुच्यतां जानकी सीता न मे मोक्ष्यसि कर्हिचित्।
अराक्षसमिमं लोकं कर्तास्मि निशितैः शरैः ॥ १६ ॥ [०४]

**मार्कण्डेयः-**

इति तस्य ब्रुवाणस्य दूतस्य परुषं वचः।
श्रुत्वा न ममृषे राजा रावणः क्रोधमूर्च्छितः ॥ १७ ॥ [०५]

इङ्गितज्ञास्ततो भर्तुश्चत्वारो रजनीचराः।
चतुर्ष्वङ्गेषु जगृहुः शार्दूलमिव पक्षिणः ॥ १८ ॥

तांस्तथाङ्गेषु संसक्तानङ्गदो रजनीचरान्।
आदायैव खमुत्पत्य प्रासादतलमाविशत् ॥ १९ ॥ [०६]

---

वधायानपराधानाम्; वधमनपराद्धानाम्; वधायानपकाराणाम्; .

(०१) ( यत् (for ये); दर्पाणाम् (for दर्पाभ्याम्); (२) वने वने (for चराः); (४) देवताश्चापि मानिताः; .

(०२) (२); मरूतां च (for रूदन्त्यश्व); हृताः (आ)हृताः (३)यद्; तम् (for तद्); .

(०३)(३) त्वा (for त्वां); सहामात्यैर् (४)मानुष्यं च (for मानुषस्य); .

(०४) (१) मुश्च तां; मुश्चैतां (for मुच्यतां); जानकीं सीतां; मा वा (for सीता); (२) चेन्; च; वै (for मे); मोक्षाय (for मोक्ष्यसि); न मे जीवन्हि मोक्ष्यसे; .

(०५) (२) रामस्य (for दूतं); .

(०६) ( तदां (for तथां); ुक्तानाम् (for संसक्तान्); (३) आदाय च; याशु (for यैव); समुत्पत्य; खमुतप्लुत्य;.

वेगेनोत्पततस्तस्य पेतुस्ते रजनीचराः।
भुवि सम्भिन्नहृदयाः प्रहारवरपीडिताः ॥ २० ॥ (०१)

संसक्तो हर्म्यशिखरात्तस्मात्पुनरवापतत्।
लङ्घयित्वा पुरीं लङ्कां स्वब(सुवे)लस्य समीपतः ॥ २१ ॥ (०२)

कोसलेन्द्रमथागम्य सर्वमावेद्य वानरः।
विशश्रम स तेजस्वी राघवेणाभिनन्दितः ॥ २२ ॥ (०३)

ततः सर्वाभिसारेण हरीणां वातरंहसाम्।
भेदयामास लङ्कायाः प्राकारं रघुनन्दनः ॥ २३ ॥ (०४)

लक्षालङ्कारः - ततः सर्वाभिसारेण इत्यत्र सर्वतः अभिसरणं सर्वाभिसारः ।

विभीषणर्क्षाधिपती पुरस्कृत्याथ लक्ष्मणः।
दक्षिणं नगरद्वारमवामृद्नाद्दुरासदम् ॥ २४ ॥ (०५)

करभारुणगात्राणां(पाण्डूनां) हरीणां युद्धशालिनाम्।
कोटीशतसहस्रेण लङ्कामभ्यपपत्तदा ॥ २५ ॥ (०६)

प्रलम्बबाहूरुकरजङ्घान्तरविलम्बिनाम्।

---

(०१) ( वेगे नोत्पतमानस्य; वेगेन तु ततस्तस्य (४) प्रहारवर; प्रहारेणैव; प्रहारेणापि; .

(०२) ( संसक्तो; विमुक्तो (for स मुक्तो); (२) तरत् (for पतत्); (३)रम्यां (for लङ्कां); .

(०३) ( कोशलेद्रम्; कौसलेद्रम् (आ)गम्य; (आ)मन्त्र्य (अ)भ्येत्य (२) वानरः (for चाङ्गदः); (३) (अ)थ; (ह)व (for स); विशश्रम स; ख-कोशे अत्रैवाध्यसमाप्तिर्दृश्यते .

(०४) ( बिभीषणं ऋक्षपर्ति; बिभिषणं रक्षोधिपति; (४) उ (अ) पामृद्राद्; अवामृद्रन्; उपासृत्य; अमर्त्यानां; अमात्यानां; अमृद्राच्च (for अवामृद्राद्); दुरात्मनः; .

(०५) ( बिभीषणं ऋक्षपतिं; बिभीषणं रक्षोधिपतिं (४) उ (अ)पामृद्नाद्;अवामृद्नन्; उपासृत्य; अमर्त्यानां; अमात्यानां अमृद्राच्च (for अवामृद्नाद्); दुरात्मनः .

(०६) ( करभारुणया त्वन्धा; या च त्वा; घोरदंष्ट्रानला (ना)क्षाणां; एतुकरभारुणपाडूनां; दारुणारुणरूपाणां; दारुणा रुणया चम्वो; करभारुणपादानां (२) वातरंहसां (for युद्धं); (३) कोटिशत-सहस्राणि पतंस्ततः (था; दा) .

ऋक्षाणां धूम्रवर्णानां तिस्रः कोट्यो व्यवस्थिताः।(०१)

उत्पतद्भिः पतद्भिश्च निपतद्भिश्च वानरैः।
नादृश्यत तदा सूर्यो रजसा नाशितप्रभः ।। २६ ।। (०२)

शालिप्रसूनसदृशैः शिरीषकुसुमप्रभैः।
तरुणादित्यसदृशैः शणगौरैश्च वानरैः ।। २७ ।। (०३)

प्राकारं ददृशुस्ते तु समन्तात्कपिलीकृतम्।
राक्षसा विस्मिता राजन्सस्त्रीवृद्धाः समन्ततः ।। २८ ।। (०४)

बिभिदुस्ते मणिस्तम्भान्कर्णाट्टशिखराणि च ।
भग्नोन्मथितशृङ्गाणि यन्त्राणि च विचिक्षिपुः ।। २९ ।। (०५)

परिगृह्य शतघ्नीश्च सचक्राः सहुडोपलाः।
चिक्षिपुर्भुजवेगेन लङ्कामध्ये महास्वनाः ।। ३० ।। (०६)

प्राकारस्थाश्च ये केचिन्निशाचरगणास्तथा।
प्रदुद्रुवुस्ते शतशः कपिभिः समभिद्रुताः ।। ३१ ।। (०७)

ततस्तु राजवचनाद्राक्षसाः कामरूपिणः।

---

(०१) प्रलम्बबाहूरुकण्ठ; बाह्वूकण्ठश्च; बाहू रूकरं लक्ष्मणं (for ऋक्षाणां); .
(०२) ( तु (for च); (२) विपतद्भिश्च; प्रकारस्थैं; निवर्तद्भि तु (for च); (३) आवृतश्च; व्यदृश्यत (for नादृश्यत); .
(०३) ( शालपुष्पस्य सदृशैः; शालप्रसूनं (२) शिरोभिः कुसुमं (३)सङ्काशैः (४)शिरौ गौरैश्च शणगौरैश्चै; सरागैरिव; शशगौरश्चै; .
(०४) प्रासादं ऽ प्राकारं । ए तु वानरः । समन्तात् कपिली ( अ धिष्ठिता;विस्मिता) द्धण्धलु। अह) चासन् च) संनिवृत्ताः सस्त्रीवृद्धाः .
(०५) कर्णाट; कर्णादि; । क्र कपाटं ।र शृगाणि .
(०६) सगुररःडोडौ )पलाः;बहुलो’; बं । सहुलो सचक्रा सायुधानि च सचक्रमुशलोपलाः श्च द्वे । न्त स्वनाः बलाः .
(०७) तथा; । ततः तदा ,च ते समनुद्रुताः .

निर्ययुर्विकृताकाराः सहस्रशतसङ्घशः ॥ ३२ ॥ [०१]

शस्त्रवर्षाणि वर्षन्तो द्रावयित्वा वनौकसः।
प्राकारं शोभयन्तस्ते परं विक्रममास्थिताः ॥ ३३ ॥ [०२]

स माषराशिसदृशैर्बभूव क्षणदाचरैः।
कृतो निर्वानरो भूयः प्राकारो भीमदर्शनैः ॥ ३४ ॥ [०३]

पेतुः शूलविभिन्नाङ्गा बहवो वानरर्षभाः।
स्तम्भतोरणभग्नाश्च पेतुस्तत्र निशाचराः ॥ ३५ ॥ [०४]

केशाकेश्यभवद्युद्धं रक्षसां वानरैः सह ।
नखैर्दन्तैश्च वीराणां खादतां वै परस्परम् ॥ ३६ ॥ [०५]

निष्टनन्तो ह्युभयतस्तत्र वानरराक्षसाः।
हता निपतितां भूमौ न मुञ्चन्ति परस्परम् ॥ ३७ ॥ [०६]

रामस्तु शरजालानि ववर्ष जलदो यथा।
तानि लङ्कां समासाद्य जघ्नुस्तान्रजनीचरान् ॥ ३८ ॥

सौमित्रिरपि नाराचैर्दृढधन्वा जितक्लमः।
आदिश्यादिश्य दुर्गस्थान्पातयामास राक्षसान् ॥ ३९ ॥ [०७]

ततः प्रत्यवहारोऽभूत्सैन्यानां राघवाज्ञया।

---

(०१) ते तु) 'भवनाद् ''वचनाद् त) क । घ्र विविधा विकृता द्ध्यै) 'संहताः .

(०२)अस्त्र' शस्त्र') ह्य) ष्ठा श्च द्रावयित्वा; द्रावयति ') ष प्ल प्राकाराष्ण; प्राकारे लु ष्ठ-ह्य भ्रं शोभ' योध); दर्श'; गोप' शोध'' श्च प्र विस्मयम् विक्रमम्) तु आगताः प ।' आस्थिताः) .

(०३) मांस-; सु मेध ( माष सदृशो; सहितद् सदृशैद्) .

(०४) शरविभिन्नाङ्गा। शरविभिन्नाश्च; शू( शी)लविनिर्भिन्ना निपेतुः शरभि-श्वागा समन्ताद्रणभग्नाश्च .

(०५) च वै .

(०६) ष निघ्नन्तस्ते;निस्वनन्तो; निसूदन्तो निष्टनन्तो) प्रभयतसू; प्यु निविष्टनन्तो इषु राक्षसवानराः नवामुञ्चन्,.

(०७) (३)दूर (for दुर्ग); .

**कृते विमर्दे लङ्कायां लब्धलक्ष्यो जयोत्तरः ॥ ४० ॥** [०१]

अस्मिन् पर्वणि २३९अध्याये ४०श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि लङ्काप्रवेशे एकोनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २३९ ॥

# २४०. चत्वारिंशदधिकद्विशततमो अध्यायः ॥

**रामलक्ष्मणादीनां रावणेन्द्रजिदाभिस्सह द्वन्द्वयुद्वम् ॥**

**मार्कण्डेयः**

**ततो निविशमानांस्तान्सैनिकान्रावणानुगाः।**
**अभिजग्मुर्गणानेके पिशाचक्षुद्ररक्षसाम् ॥ १ ॥** [०२]

---

(०१) (३); कृतोवमर्दे कृतोपमर्दे; (४)लब्धलश्चयो; लब्ध्वा लक्षं; जयोत्तमः; द्धभः; भवत्ल त्तरं; .

(०२)( निवसं; निर्विश्यं; निविश्यं; निवर्तं (for निविशमानान्); ते’ (for तान्); (२)वानरान् (for सैनिकान्) रावणा- ज्ञया, (३) गणानीकैः; गुणानीके; गणानीकाः; नेकाः; नैकां; नैकां (for गणानेके); अनुजग्मुर्महात्मानं (४)राक्षसान्; राक्षसाः; रक्षसाः पिशाचा यक्षराक्षसाः .

पर्वतः(णः) पतनो जम्भः खरः क्रोधवशो हरिः।
प्ररुजश्चारुजश्चैव प्रघसश्चैवमादयः ।। २ ।।(०१)

ततोऽभिपततां तेषामदृश्यानां दुरात्मनाम्।
अन्तर्धानवधं तज्ज्ञश्चकार स विभीषणः ।। ३ ।।(०२)

ते दृश्यमाना हरिभिर्बलिभिर्दूरपातिभिः।
निहताः सर्वशो राजन्मही जग्मुर्गतासवः ।। ४ ।।(०३)

Moola: Missing No.5 Shloka.(P.No.1388)

अमृष्यमाणः सबलो रावणो निर्ययावथ ।
व्यूह्य चौशनसं व्यूहं हरीनभ्यवहारयत् ।। ६ ।।(०४)

राक्षसानां बलैर्घोरैः पिशाचानां च संवृतः।
युद्धशास्त्रविधानज्ञ उशना इव चापरः।(०५)

राघवस्तु विनिर्यान्तं व्यूढानीकं दशाननम्।
बार्हस्पत्यं विधिं कृत्वा प्रत्यव्यूहन्निशाचरम् ।। ७ ।।(०६)

---

(०१) ( पर्वतः; पवनः, पृतनो; पतनो; पूतना (for पूतनो); भञ्जः; जङ्घः; जृम्भः; (२) खर (for खरः); (३) पुरुजं; पूरुजं; अरुजं; पुरञ्जं (for प्ररुजं); पुरुं (for (अ)रुजं); (४)विघषश्; प्रधशश् ; प्रहस्तश्; प्रहसन् (for प्रधसश्); चैव मानदः (for चैवमादयः); .

(०२) (ऽ)भ्यपतितां; (ऽ)पि पततां (for ऽभि पततां); (२)सदृश्यानां; अधृष्यानां; दृश्यमानां (for अदृश्यानां); महौजसां; दुरात्मवान् (for दुरात्मनाम्) (३)त्वज्ञश्; तेषां; ज्ञात्वा; तत्र (for तज्ज्ञश्); .

(०३) (१/२) दह्यं (for दृश्यं); हरिभिर् बलिभिर् जितकाशिभिः; शूलपाणयः; दूरपातिनः (३)शतशो सर्वतो (for सर्वशो); (४)अभि (for महीं); .

(०४) (२) राक्षसो (for रावणो); .

(०५)(२) घनैर्; गणैर् (for बलैर्); सु (for च); (३) व्यूह्य व्यूहं.; (४) हरीनभ्यवहारयत् ; हरी न्सर्वान (नू न्य); वारयत्; .

(०६) ( त्वभि (for थं) निर्याते; तु विनिर्यां (र्या)तं; त्वभि (पि) निर्यातो; त्वथ निर्याय (२)व्यूढानीके

समेत्य युयुधे तत्र ततो रामेण रावणः।
युयुधे लक्ष्मणश्चापि तथैवेन्द्रजिता सह ।। ८ ।। (०१)

विरूपाक्षेण सुग्रीवस्तारेण च निखर्वटः।
तुण्डेन च नलस्तत्र पटुशः पनसेन च ।। ९ ।। (०२)

विषह्यं यं हि यो मेने स स तेन समेयिवान्।
युयुधे युद्धवेलायां स्वबाहुबलमाश्रितः ।। १० ।। (०३)

स सम्प्रहारो ववृधे भीरूणां भयवर्धनः।
लोमसंहर्षणो घोरः पुरा देवासुरे यथा ।। ११ ।। (०४)

रावणो राममानर्छच्छक्तिशूलासिवृष्टिभिः।
निशितैरायसैस्तीक्ष्णै रावणं चापि राघवः ।। १२ ।। (०५)

तथैवेन्द्रजितं यत्तं लक्ष्मणो मर्मभेदिभिः।
इन्द्रजिच्चापि सौमित्रिं बिभेद बहुभिः शरैः ।। १३ ।। (०६)

विभीषणः प्रहस्तं च प्रहस्तश्च विभीषणम्।

---

(कैर्); दशानने; ददर्श ह (४) प्रत्यव्यूहि (हं); पर्यव्यूह्य; प्रतिव्यूह्य (for प्रत्यव्यूहन्); स्वकं बलं; महाबलः; व्यदृश्यत (for निशाचरम्); .

(०१) (२) रामेण सह रावणः; (३) चापि (for चैव); (४)तस्थौ च (for तथैव); .

(०२) (२); सतारणे; तारेणैव (for तारेण च); निख(ष) र्वदः; विकर्षतः (for निखर्वटः) तारेण निचखर्वटः; तारेणाटनिखर्वटः (णः); तारेयेण निघर्वटः (३) कुण्डेन; पौड्रेण (for तुण्डेन); नखं (for नलं); पट (न); सः; पट (टि र)शः; पुटा(ट)शः प्रघं; पानं (for पुनं); .

(०३) ( यो हि यं (तं); विस्मयं; आत्मनो (for यं हि यो); अविषह्यं ह्ययं (हि यं); मेने; विषजङ्घो हि जङ्घेन; विषह्यमात्मनो यं स्म (२) सह ; स तु (for स स); समीं (for समें); (३)हनूमान् (for युयुधे) युधि युद्धवतो- पेतः; .

(०४) ( ववृते; विपुलो (for ववृधे); (२) भ्रातृणां (for भीरूणां) (३) रोमसङ्घर्षणो; रोमसंह; .

(०५) ( आगच्छच्; आनर्चच् (for आनर्छच्); रावणो वानरानर्छच्, (२) शूलं (शूल) शक्यसिं .

(०६) ( यत्तो (for यत्तं); (४) चिच्छेद (for बिभेद) दशभिः; शरभिः; निशितैः (for बहुभिः); .

**खगपत्रैः शरैस्तीक्ष्णैरभ्यवर्षद्गतव्यथः ॥ १४ ॥** (०१)

**तेषां बलवतामासीन्महास्त्राणां समागमः।**
**विव्यथुः सकला येन त्रयो लोकाश्चराचराः ॥ १५ ॥** (०२)

अस्मिन् पर्वणि २४०अध्याये १५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि रामरावणयुद्धे चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४० ॥

# २४१. एकचत्वारिंशदधिकद्विशततमो अध्यायः ॥

विभीषणहनुमद्भ्यां प्रहस्तधूम्राक्षवधश्रवणनिर्विण्णेन रावणेनयुद्धाय कुम्भकर्णप्रेषणम् ॥

**मार्कण्डेयः**

**ततः प्रहस्तः सहसा समभ्येत्य विभीषणम्।**
**गदया ताडयामास विनद्य रणकर्कशः ॥ १ ॥** (०३)

**स तयाभिहतो धीमान्गदया भीमवेगया।**
**नाकम्पत महाबाहुर्हिमवानिव सुस्थिरः ॥ २ ॥** (०४)

---

(०१) (१/२) तु (च) विभीषणं प्रहस्तश्च प्रहस्तं च विभीषणः; (३) खरं; स्वर्णं; कङ्कं (for खगं); सुतीक्ष्णाग्रैर् (for शरैस्तीक्ष्णैर्); (४)अत्यवर्षद्; अन्ववर्षद्; प्रत्यविध्यद्; .
(०२) ( चासीन् (for आसीन्); (३) विव्यथे सकलो येन; (४) लोकोयं सचराचरः लोका वै सचराचराः .
(०३) ( तरसा; तु तथा (for सहसा); (३)पोथं (for ताडं); (४) विनदन् (for विनद्य); रणमूर्धनि; रणकर्कशं; .
(०४) ( तथा; तदा (for तया); (अ)भिहितो; निहतो (for (अ)भिहतो); (२) गदयातिसुवेगया; (४)

ततः प्रगृह्य विपुलां शतघण्टां विभीषणः।
अभि(नु)मन्त्र्य महाशक्तिं चिक्षेपास्य शिरः प्रति ।। ३ ।। (०१)

पतन्त्या स तया वेगाद्राक्षसोऽशनिवेगया।
हृतोत्तमाङ्गो ददृशे वातरुग्ण इव द्रुमः ।। ४ ।। (०२)

कृत्तोत्तमाङ्गं सह्यं तदनयानुगतासवाम् ।
पपात रक्षः सहसा वातरुग्ण इव द्रुमः ।

तं दृष्ट्वा निहतं सङ्ख्ये प्रहस्तं क्षणदाचरम्।
अभिदुद्राव धूम्राक्षो वेगेन महता कपीन् ।। ५ ।। (०३)

तस्य मेघोपमं सैन्यमापतद्भीमदर्शनम्।
दृष्ट्वैव सहसा दीर्णा रणे वानरपुङ्गवाः ।। ६ ।। (०४)

ततस्तान्सहसा दीर्णान्दृष्ट्वा वानरपुङ्गवान्।
निर्ययौ कपिशार्दूलो हनूमान्मारुतात्मजः ।। ७ ।। (०५)

तं दृष्ट्वावस्थितं सङ्ख्ये हरयः पवनात्मजम्।
महत्या त्वरया राजन्संन्यवर्तन्त सर्वशः ।। ८ ।। (०६)

---

सुस्थितः; .

(०१) (२) शतन्धीं च; न्धीश्व (for घण्टां); (३) अनुं (for अभिं) ततः (for महा); (४) प्रहस्तस्य (for चिक्षेपास्य); .

(०२) ( तथा (for तया); वीरो (वेगाद्); (२)शनिवेगया; शनिना यथा (३)कृत्तोत्तमाङ्गो; हृतोत्तमाङ्गे; (४)वातभग्र; .

(०३) ( सङ्के; सङ्के (for सङ्ख्ये); (२) वाहिनीपतिं (for क्षणं); (३/४) धूम्त्राक्षो वेगेन; नदन्; हरीन् (for कपीन्); .

(०४) (३) उत्पतद् (for आपतद्); .

(०५) ( चीर्णान् (for दीर्णान्); निवार्य; निर्ययौ; (for निर्याय); (४)हनुमान् मारुतात्मजः (for पर्यवं); .

(०६) ( सैन्ये; सङ्के; सङ्के (for सङ्ख्ये); (३)महत्या त्वरया राजन, (४); अभ्यवर्तं (र्त)त (for संन्यं); सर्वतः; सर्वदा; .

ततः शब्दो महानासीत्तुमुलो लोमहर्षणः।
रामरावणसैन्यानामन्योन्यमभिधावताम् ।। ९ ।।[०१]

तस्मिन्प्रवृत्ते सङ्ग्रामे घोरे रुधिरकर्दमे।
धूम्राक्षः कपिसैन्यं तद्द्रावयामास पत्रिभिः ।। १० ।।[०२]

तं स रक्षोमहामात्रमापतन्तं सपत्नजित्।
प्रतिजग्राह हनुमांस्तरसा पवनात्मजः ।। ११ ।।[०३]

तयोर्युद्धमभूद्घोरं हरिराक्षसवीरयोः।
जिगीषतोर्युधान्योन्यमिन्द्रप्रह्लादयोरिव ।। १२ ।।[०४]

गदाभिः परिघैश्चैव राक्षसो जघ्निवान्कपिम्।
कपिश्च जघ्निवान्रक्षः सस्कन्धविटपैर्द्रुमैः ।। १३ ।।[०५]

शिरस्यभ्यहनत्पूर्वं कालया च पुनः पुनः ।
तृणराजेन महता लोहसारथिभेदिना ।[०६]

ततस्तमतिकोपेन साश्वं सरथसारथिम्।
धूम्राक्षमवधीत्क्रुद्धो हनूमान्मारुतात्मजः ।। १४ ।।[०७]

---

(०१) ( तस्य (for ततः) (२) तुमलो; रोमं (for लोमं); .
(०२) (३) तु (for तद्); (४) वीर्यवान् (for पत्रिभिः); .
(०३) ( स रक्षो (for राक्षस); (२); द्रावयन्तं (for आपतन्तं) (३/४) हनुमान् (for हनूं); मारुतां (for पवनां) प्रतिजग्राह हनुमांस्तरसा पवं; .
(०४) (for महद् (for अभूद्); तयोः समभवद्युद्धं, (२) कपिराक्षसं; हरिराक्षसवीर्ययोः; सैन्ययोः (३) जिगीषितोर्; र्षयोर् ; जिहीर्षतोर्; जिगीर्षतोर् ; यथां; अथां (for युधां); (४) इन्द्रप्रह्रादयोरिव; शक्रप्रह्लादं; .
(०५) ( पट्टिशैश्चैव; परिघाभिश्च; परिघै- श्चापि (४)सकर्ष (कन्द)विटपद्रुमैः; सुस्कन्धविटपैर्द्रुमैः; .
(०६) ( शिरसा (for शिरसि); (अ)भिहतः (for (अ)भ्यहनत्); गदया; लीलया; कीलया
(for कालया),
(०७) ( अतिकायोति; अपि (भि); कोपेन (for अतिकायेन); (३) ग्राव्णा; ऋद्धो; राजन्; प्राज्ञो (for

वेगेन महताविष्टो राक्षसानां महद्बलम् ।
योधयामास राजेन्द्र शिलावर्षैः समन्त् ।

ततस्तं निहतं दृष्ट्वा धूम्राक्षं राक्षसोत्तमम्।
हरयो जातविस्रम्भा जग्मुरभ्येत्य(जघ्नुरन्ये च) सैनिकान् ।। १५ ।। (०१)

ते वध्यमाना हरिभिर्बलिभिर्जितकाशिभिः।
राक्षसा भग्नसङ्कल्पा लङ्कामभ्यपतन्भयात् ।। १६ ।। (०२)

तेऽभिपत्य पुरं भग्ना हतशेषा निशाचराः।
सर्वं राज्ञे यथावृत्तं रावणाय न्यवेदयन् ।। १७ ।। (०३)

श्रुत्वा तु रावणस्तेभ्यः प्रहस्तं निहतं युधि।
धूम्राक्षं च महेष्वासं ससैन्यं वानरर्षभैः ।। १८ ।।(०४)

अशीतमिव निःश्वस्य समुत्पत्य वरासनात्।
उवाच कुम्भकर्णस्य कर्मकालोऽयमागतः ।। १९ ।। (०५)

लक्षालङ्कारः - अशीतमिव निःश्वस्य इत्यत्र शीतं न भवति यथा तथा अशीतम् ।

इत्येवमुक्त्वा विविधैर्वादित्रैः सुमहास्वनैः।

---

धीमान्); . धूम्राक्षमाजघानाशु, (४)द्रुमेण (for हनुमान्); पवनां (for मारुतां); ( वेगवान्पवनात्मजः सेनयोः (for वीरयोः); .

(०१) ( विसृतं (for निहतं); (२) राक्षसात्मजं राक्षसं युधि (for राक्षसों); (३) जातविश्रम्भा; संरम्भा; (४) अन्योन्य; अन्येस्य; अन्ये च; तस्य हि; तस्यानु (for अभ्येत्य); निजन्घु स्तस्य सैनिकान्; .

(०२) (१/२); बलिभिर्, हरिभिर्; .

(०३) ( प्राप्य; भीम (for भग्रा); (३) सर्वे; र्वा (for र्व); .

(०४) ( च (for तु); (४) सहसैन्यं वनक्षयैः; स(ह)प्लवगैर्हतं; ससैन्यं सह राक्षसैः; .

(०५) (क-ख-घ-अभीत इव, स दीर्घम्; अशीत; अभीत (for सुदिर्घम्); अथ (for इव); (२) समुत्प्लुत्य; .

शयानमतिनिद्रालुं कुम्भकर्णमबोधयत् ॥ २० ॥ [०१]

प्रबोध्य महता चैनं यत्नेनागतसाध्वसः।

स्वस्थमासीनमव्यग्रं विनिद्रं राक्षसाधिपः।
ततोऽब्रवीद्दशग्रीवः कुम्भकर्णं महाबलम् ॥ २१ ॥ [०२]

धन्योऽसि यस्य ते निद्रा कुम्भकर्णेयमीदृशी।
य इदं दारुणाकारं न जानीषे महाभयम् ॥ २२ ॥ [०३]

एष तीर्त्वार्णवं रामः सेतुना हरिभिः सह ।
अवमन्येह नः सर्वान्करोति कदनं महत् ॥ २३ ॥ [०४]

मया त्वपहृता भार्या सीता नामास्य जानकी।
तां नेतुं स इहायातो बद्ध्वा सेतुं महार्णवे ॥ २४ ॥ [०५]

तेन चैव प्रहस्तादिर्महान्नः स्वजनो हतः।
तस्य नान्यो निहन्तास्ति त्वामृते शत्रुकर्शन ॥ २५ ॥ [०६]

स दंशितोऽभिनिर्याय त्वमद्य बलिनां वर ।
रामादीन्समरे सर्वाञ्जहि शत्रूनरिन्दम ॥ २६ ॥ [०७]

---

(०१) (२) अतिनिद्रान्धं; अपि निद्रालुं (४) महाबलं (for अबोधयत्); .

(०२) (२); नागतो यत्नसाध्वसः; यत्नेन गतं; यत्नेनैव सं; (४) अनिद्रं अरिन्घं (for विनीद्रं); राक्षसेश्वरः; राक्षसाधिपं; (५) महाबलः; .

(०३) ( सेव्यते (for यस्य ते); (४) यद् (for (इ)यम्); (३) इदं मे; य इदं (for य इमं); य इदं दारूणाकारं; (४) क-ख-घ-भयावहं (for महाभयम्); .

(०४) (एषभीर्दुस्तरं रामः; (३) अवमत्येह; अभिपत्यें श्रीमान् (for सर्वान्); .

(०५) ((अ)य्या पहृता; (अ)स्यापि हृताः ह्यपकृता; त्वपहृता; (२) रामस्य (for नामास्य); नाम्ना सीतास्य जानकी; (३) मोचयिष्णुर् (षुर्; तुर्); मोच (क्ष); यितुम्; नेतुं स इह; .

(०६) ( चैष (for चैव); प्रहस्तो यो; प्रहस्ताद्या (for स्तादिर्); (२) महांश्व (for महान्नः); महातः स्वजना हताः; महात्मा सुजनो हतः (३) हि (for नि); (४) त्वामृते; शत्रुजर्षन; कर्षण; .

(०७) ( दंसितो; तटृंशितो; दंशितोपपि; दंसितो हि (for स दंशितो); विनिर्याहि; विनिर्यात्वा; विनिर्याय; (ऽ) भिनिर्याहि; (ऽ)त्र (द्य); निर्याहि (for ऽभिनिर्याय); (२) बलेन; त्वमस्य; जवेन; त्वदन्य (for त्वमद्य);

दूषणावरजौ चैव वज्रवेग प्रमाथिनौ।
**तौ त्वां बलेन महता सहितावनुयास्यतः** ।। २७ ।। (०१)

**मार्गण्डेयः-**

इत्युक्त्वा राक्षसपतिः कुम्भकर्णं तरस्विनम्।
**सन्दिदेशेतिकर्तव्यं वज्रवेगप्रमाथिनौ** ।। २८ ।। (०२)

तथेत्युक्त्वा तु तौ वीरौ रावणं दूषणानुजौ।
**कुम्भकर्णं पुरस्कृत्य तूर्णं निर्ययतुः पुरात्** ।। २९ ।। (०३)

अस्मिन् पर्वणि २४१ अध्याये २९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि कुम्भकर्णनिर्गमने एकचत्वारिंशदधिकद्विशततमोऽध्यायः ।। २४१ ।।

# २४२. द्विचत्वारिंशदधिकद्विशततमो अध्यायः ।।

**लक्ष्मणेन कुम्भकर्णवधः ।। १ ।। हनुमन्नीलाभ्यां वज्रवेगप्रमाथिनोर्वधः ।। २ ।।**

**मार्कण्डेयः**

---

वरः कुम्भकर्ण महाबल; (३/४) सर्वान् शत्रून्; रामादीन्समरे शत्रून्सर्वा ज्जह्यरिमर्दन; .
(०१) ( चापि; एतौ (for चैव); (२)चक्रं; वक्रं, (३) सैन्येन (for बलेन); .
(०२) ( उक्त्वा रक्षःपतिः काले; (२) महाबलं (for तरं); (३) कर्तव्यं ; .
(०३) ( ततो; च तौ (for तु तौ); (२) दूषणात्मजौ; (४) तूर्ष्णीं; तूर्यं (for तूर्णं); .

ततो निर्याय स्वपुरात्कुम्भकर्णः सहानुगः।
अपश्यत्कपिसैन्यं तज्जितकाश्यग्रतः स्थितम् ॥ १ ॥(०४)

स वीक्षमाणस्तत्सैन्यं रामदर्शनकाङ्क्षया।
अपश्यच्चापि सौमित्रिं धनुष्पाणिं व्यवस्थितम्।(०५)

तमभ्येत्याशु हरयः परिवव्रुः समन्ततः।
शैलवृक्षायुधा नादानमुञ्चन्भीषणास्ततः * ॥ २ ॥

अभ्यघ्नंश्च महाकायैर्बहुभिर्जगतीरुहैः।
करजैरतुदंश्चान्ये विहाय भयमुत्तमम् ॥ ३ ॥(०६)

This Stanga is Interchanged in TRK after 1.(07)

बहुधा युध्यमानास्ते युद्धमार्गैः प्लवङ्गमाः।
नानाप्रहरणैर्भीमै राक्षसेन्द्रमताडयन् ॥ ४ ॥(०८)

स ताड्यमानः प्रहसन्भक्षयामास वानरान्।
बलं चण्डबलाख्यं च वज्रबाहुं च वानरम् ॥ ५ ॥(०९)

तद्दृष्ट्वा व्यथनं कर्म कुम्भकर्णस्य रक्षसः।

---

(०४) (ऽ)भिनिर्याय.;ततो निर्याय स्वा (स) पुरात्;.ततो विनिर्य-यौ गत्वा; (२) सहानुजः; (३) स; तु (for तज्),;(४) (अ)भितः (for (अ) ग्रतः) .

(०५) स वीक्ष्य; समीक्ष्य.;दारात्; भ्राजन्;.दपि; दग्रे (for च्चापि),;अव (for व्यव) .

(०६) (अ)थ (for (आ)शु),;कपयः (for हरयः),;(२) वक्रः;.वव्रुः (for वार्य),; .

(०७) (२) (अतिभीषणान् (for भीषणास्ततः),)महाकायं; कार्यं; कार्यैर् (for कायैर्),;धरणीधरैः (for जगती' ),; करजैश्च रदैश्चान्ये;.करजैरहनंश्चापि.;विहसा- युधमुत्तमं.; .

(०८) ( युध्यमानसू; (२) वध्यमानासू.;(३) भीमै (for भीम) .

(०९) (२) ताड (for भक्ष ),;(३)क-घ-पनसं च गवाक्षं च वज्रदंष्ट्र च वानरम् ।, वनषण्डं; वनं चण्डं; वनचण्डं; चलं चण्डं;.बलं चण्डं;,उरुचण्डं (३) (for पनसं च),;वनाक्षं;.चलाख्यं; बला-ख्यं (for गवाक्षं ),;बलं चण्डबलाख्यं च;धनं चण्डत्वनाक्षं च.;(४) वेत्र;.बहु;.मुष्टि (for वज्र),; .

उदक्रोशन्परित्रस्तास्तारप्रभृतयस्तदा ॥ ६ ॥ (०१)

तानुच्चैः क्रोशतः सैन्याञ्छ्रुत्वा स हरियूथपान्।
अभिदुद्राव सुग्रीवः कुम्भकर्णमपेतभीः ॥ ७ ॥ (०२)

ततो निपत्य वेगेन कुम्भकर्णं महामनाः।
शालेन जघ्निवान्मूर्ध्नि बलेन कपिकुञ्जरः ॥ ८ ॥ (०३)

स महात्मा महावेगः कुम्भकर्णस्य मूर्धनि।
बिभेद शालं सुग्रीवो न चैवाव्यथयत्कपिः ॥ ९ ॥ (०४)

ततो विनद्य सहसा शालस्पर्शविबोधिताः।
दोर्भ्यामादाय सुग्रीवं कुम्भकर्णोऽहरद्बलात् ॥ १० ॥ (०५)

ह्रियमाणं तु सुग्रीवं कुम्भकर्णेन रक्षसा।
अवेक्ष्याभ्यद्रवद्वीरः सौमित्रिर्मित्रनन्दनः ॥ ११ ॥ (०६)

*अधिकपाठः

(१२८४)त्रुःगुप्तमुत्स गच्छत्नसम्बोधयामास ग्रहारेणाल्पचेतसम् ।

*अधिकपाठः

ततः संललधसञ्ज्ञस्तु हृत्वा कर्णोष्टनासिकाम् ।

---

(०१) ( तं; ते (for तद्),;व्यथितं; विषमं;,ह्यधिकं;.व्यथिताः (for व्यथनं);(२) धीमतः (for रक्षसः),;(३) भ्रान्तास् (for त्रस्ताश्च),;(४) ताराप्रभृतयस्; ततः; तथा (for तदा) .

(०२) ( तानुच्चैः क्रोशतः (शगः) सैन्यात्; (२) श्रुत्वा स (for अन्याश्च); यूथपः

(३) श्रुत्वा (for (अ)भि-);.

(०३) ( निपत्य (for ऽभिपत्य);(२) कुभकर्णे.;(३) सलेन; , तलेन (for शालेन),;

(आ)जघ्निवान्.;(४) तरुणेन स वानरः;तरुणा स च वानरः; तरुणा वानराधिपः.

(०४) ( महावेगं; (३) सालं;, गात्रं (for शालं),;(४) चिराद्;.चैनं (for चैव),;व्यचलत्;

व्यथयत् (for (अ)व्यथयत्);क्वचित् (for कपिः),

(०५) ( सहसा (for प्रहसम्);(२) सालस्पर्शे.;निबोधितः; विपोथितः (४) महद् ;.(ह)नद् (for ऽहरद्) .

(०६) (२) दृष्ट्वा वायुसुतो बली.; .

*अधिकपाठः

सुग्रीवः कुम्भकर्णस्य जगाम हरिवाहिनीम् ।

अथ च्छः कुम्भकर्णो मिशिाक्यहरिराक्षसान् ।

भक्षयामास बलवान्ममर्द पदयोरपि

भक्ष्यमाणान्हरीन्सर्वान्कुम्भकर्णेन रक्षसा ।। (०१)

सोऽभिपत्य महावेगं रुक्मपुङ्खं महाशरम्।
प्राहिणोत्कुम्भकर्णाय लक्ष्मणः परवीरहा ।। १२ ।। (०२)

लक्षालङ्कारः - सोऽभिपत्य महावेगं इत्यत्र कुम्भवत् कर्णौ यस्येति व्युत्पत्त्या कुम्भकर्णपदेन अतिकायः कथ्यते । अत एव 'बृहत्तनुः कुम्भवदेव कर्णावस्येत्यतो नाम च कुम्भकर्ण' इत्याहुः । रामं विना लक्ष्मणस्य कुम्भकर्णघातकत्वायोगादयमेवार्थः । कुम्भकर्णपदप्रयोगस्तु रामेण कुम्भकर्णवधोऽपि कृत इति सूचयितुम् ।

स तस्य देहावरणं भित्त्वा देहं च सायकः।
जगाम दारयन्भूमिं रुधिरेण समुक्षितः ।। १३ ।। (०३)

तथा स भिन्नहृदयः समुत्सृज्य कपीश्वरम्
वेगेन महताऽऽविष्टस्तिष्ठ तिष्ठेति चाब्रवीत्* ।। १४ ।। (०४)

कुम्भकर्णो महेष्वासः प्रगृहीतशिलायुधः**।
अभिदुद्राव सौमित्रिमुद्यम्य महतीं शिलाम् ।। १५ ।। (०५)

This Stanga is Interchanged in TRK after13

(०१) (२) अभ्यपतद्;(for अभ्यद्रवद्);वीर;(४) नन्दन,मर्दनः,नन्दनं (for नन्दनः); .

(०२) ( गम्य (for पत्य);(२) वज्र (for रुक्म);(३) प्रहिणोत्; .

(०३) ( देहाभरणं; वेगावरणं;(२) स (for च);(३) प्रजवाद् (for जगम); उर्वी (for भूमि); जवाददारय
न्भूमि;जवाझदारयन्भूमि; .

(०४) प्रगृह्य (for उद्यम्य); .

(०५) ( तथा,स; तथा सम्भिन्न;तदा सम्भिन्न;(२) हरी (for कपि); .

तस्याभिपततस्तूर्णं क्षुराभ्यामुच्छ्रितौ करौ।
चिच्छेद निशिताग्राभ्यां स बभूव चतुर्भुजः ॥ १६ ॥ [०१]

तानप्यस्य भुजान्सर्वान्प्रगृहीतशिलायुधान्।
क्षुरैश्चिच्छेद लघ्वस्त्रं सौमित्रिः प्रतिदर्शयन् ॥ १७ ॥ [०२]

स बभूवातिकायश्च बहुपादशिरोभुजः।
तं ब्रह्मास्त्रेण सौमित्रिर्ददाराद्रिचयोपमम् ॥ १८ ॥ [०३]

सौमित्रिरद्भुतं दृष्ट्वा क्रूरः समरकोविदः ।*[०४]

स पपात महावीर्यो दिव्यास्त्राभिहतो रणे।
महाशनिविनिर्दग्धः पादपोऽङ्कुरवानिव ॥ १९ ॥ [०५]

तं दृष्ट्वा वृत्रसङ्कासं कुम्भकर्णं तरस्विनम्।
गतासुं पतितं भूमौ राक्षसाः प्राद्रवन्भयात् ॥ २० ॥ [०६]

तथा तान्द्रवतो योधान्दृष्ट्वा तौ दूषणानुजौ।
अवस्थाप्याथ सौमित्रं सङ्क्रुद्धावभ्यधावताम् ॥ २१ ॥ [०७]

---

(०१) (अभि (पि) पततस् (for द्रवत्स्),;(२)क-ख-मुच्छ्रितौ;,घ-मूर्च्छितौ, शरा (for क्षुरा); भुजौ (for करौ),; (३) निशिताभ्यां स.(भ्या च; भ्यासः) (for ग्राम्यां) .

(०२) ( तानपक्ष्य; ततो हास्थ (for तानप्यस्य),;(२) प्रसृतोच्च-शिला;(३/४) शरै (for क्षुरै) लघ्वस्त्रः लघ्वस्त्रं; सौमित्रिः.प्रत्यदर्शन; प्रियदर्शयन;प्रविदर्शयन्;सम्प्र; .

(०३) ( बभूव च (for सबभूव); .

(०४) (४) जघान परमास्त्रवित्; दुःस (ददा) हाग्नि- चयोपमं ;अविध्यत्पर्वतो;. ददारा (हा) द्रिवरो'; ददाराद्रिचयो; ददाहायश्चयो; ददाह त्रिपुरो.; .

(०५) ( बभूव (for पपात),;(२) दिव्यास्त्रनिहतो.;(३) महान-शनिनिर्द (सन्द)ग्धः;(४) पादपोवाव (प) -तद्धविः; .

(०६) ( मत्वा (for दृष्ट्वा),;वज्र (for वृत्र) .

(०७) ( ततस् (for तथा),;तं (for तान्),; सैन्यान् (for योधान्),;ततस्तद्विद्रुतं(चासितं) सैन्यं.;(२) दूषणात्मजौ.;(३) ( अ)त्र; च (for (अ)थ),;दूषणावरजौ चाथ.;.

तावाद्रवन्तौ सङ्क्रुद्धौ वज्रवेगप्रमाथिनौ।
अभिजग्राह सौमित्रिर्विनद्योभौ पतत्रिभिः ।। २२ ।।(०१)

ततः सुतुमुलं युद्धमभवल्लोमहर्षणम्।
दूषणानुजयोः पार्थ लक्ष्मणस्य च धीमतः ।। २३ ।।(०२)

महता शरवर्षेण राक्षसौ सोऽभ्यवर्षत।
तौ चापि वीरौ सङ्क्रुद्धावुभौ तं समवर्षताम् ।। २४ ।।(०३)

मुहूर्तमेवमभवद्वज्रवेगप्रमाथिनोः।
सौमित्रेश्च महाबाहोः सम्प्रहारः सुदारुणः ।। २५ ।।(०४)

अथाद्रिशृङ्गमादाय हनुमान्मारुतात्मजः।
अभिद्रुत्याददे प्राणान्वज्रवेगस्य रक्षसः ।। २६ ।।(०५)

नीलश्च महता ग्राव्णा दूषणावरजं हरिः।
प्रमाथिनमभिद्रुत्य प्रममाथ महाबलः ।। २७ ।।(०६)

ततः प्रावर्तत पुनः सङ्ग्रामः कटुकोदयः।
रामरावणसैन्यानामन्योन्यमभिधावताम् ।। २८ ।।(०७)

शतशो नैर्ऋता वन्यान् जघ्नुर्वन्यांश्च नैर्ऋतान् ।

---

(०१) ( तावभिवेगः सक्रुद्धौ; तावग्निवेगसं; ततो द्रवन्तौ सं; द्रवं (वि)तौ सहसा कुद्धौ; (३) अभिजग्राह ;(४) कृतो-द्योगः; वितु (त्त) दन्तौ; वितुद्योभौ; वध्यमानः; कृत्वा नादं (for विनद्योभौ),
(०२) ( तु तुम (मु)लं; सुतुमलं;, समभवद् (for सुतुमुलं),;(२) सुमहद्रोम ; तुमुलं रोम; अभवद्रोम .
(०३) (२)राक्षसो; महता (for राक्षसौ),;सोभ्यवर्षयत् ;; वर्षतां;,वर्तत (for वर्षत),;राक्षसेभ्योववर्षत (४) उभौ तौ.; तु ; तं;, तां; स (for तौ); समभिवर्षतां;.सम्पर्यवर्षतां (for तौ सम),;शरवर्ष;समकर्ष;.प्रतिवर्षं;.प्रत्यवर्ष';,अभ्यवर्ष ; सम्प्रवर्ष (for समवर्ष),; .
(०४) ( मुहुर्तमभवद्युद्धं.;महा-बाहो.;प्रतिजग्राह सौमित्रिः .
(०५) (२) हनु (for हनू);(३) (अ)हन ( र)द्वीरो (for आददे प्राणान्),;(४) वज्रवेग महाबलं .
(०६) ( नीलस्तु सुमहाग्रावणा; नीलश्च सहसा गृह्य.;(२) गिरिं (for हरिः),(३) अनु (for अभि),; .
(०७) (२) कण्टको'(for कटुको) .

नर्क्रृतास्तत्र वध्यन्ते प्रायेण न तु वानराः ।। २९ ।।[०१]

लक्षालङ्कारः - शतशो नैर्क्रता वन्यान् इत्यत्र वन्यान् वनवासिनः कपीन्, नैर्क्रताः राक्षसाः ।

अस्मिन् पर्वणि २४२अध्याये २९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि कुम्भकर्णादिवधे द्विचत्वारिंशदधिकद्विशततमोऽध्यायः ।। २४२ ।।

# २४३. त्रिचत्वारिंशदधिकद्विशततमो अध्यायः ।।

लक्ष्मणेन्द्रजितोर्युद्धम् ।। १ ।। अङ्गदेनेन्द्रथभङ्गे मायया तस्यान्तर्धाने च रामेणापि तत्रागमनन् ।। २ ।।

**मार्कण्डेयः**

कुम्भकर्णं हतं श्रुत्वा स्वानुजं राक्षसाधिपः।

ततः श्रुत्वा हतं सङ्ख्ये कुम्भकर्णं सहानुगम्।

प्रहस्तं च महेष्वासं धूम्राक्षं चातितेजसम्।[०२]

(०१) (४) प्रायेण (for यशो),;(ऽ)नन्त-(for न तु) .

(०२) (१/२) महाबलं (for सहा);कुम्भकर्ण हतं श्रुत्वासानुगं (जं);राक्षसाधिपः;(३) प्रमुखं (for प्रहस्तं);(४) च धूम्रमत्तोतिते; धूम्राक्षं चामितौजसं।;.

पुत्रमिन्द्रजितं वीरं रावणः प्रत्यभाषत** ॥ १ ॥

लक्षालङ्कारः - कुम्भकर्णं हतं श्रुत्वा इत्यत्र स्वानुजं कुम्भकर्णं हतं श्रुत्वेत्यर्थः ।

**रावणः-**

जहि राममभित्रघ्न सुग्रीवं च सलक्ष्मणम् ॥ २ ॥ (०१)

त्वया हि मम सत्पुत्र यशो दीप्तमुपार्जितम्।
जित्वा वज्रधरं सङ्ख्ये सहस्राक्षं शचीपतिम् ॥ ३ ॥ (०२)

अन्तर्हितः प्रकाशो वा दिव्यैर्दत्तवरैः शरैः।
जहि शत्रूनमित्रघ्न मम शस्त्रभृतां वर ॥ ४ ॥ (०३)

लक्षालङ्कारः - अन्तर्हितः प्रकाशो वा इत्यत्र अन्तर्हितः अदृश्यः, प्रकाशः दृश्यमानः ।

रामलक्ष्मणसुग्रीवाः शरस्पर्शं न तेऽनघ ।
समर्थाः प्रतिसोढुं च कुतस्तदनुयायिनः ॥ ५ ॥ (०४)

अकृता या प्रहस्तेन कुम्भकर्णेन चानघ ।
खरस्यापचितिः सङ्ख्ये तां गच्छत्वं महाभुज ॥ ६ ॥ (०५)

त्वमद्यनिशितैर्बाणैर्हत्वा शत्रून्ससैनिकान्।
प्रतिनन्दय मां पुत्र पुरा जित्वेव वासवम् ॥ ७ ॥ (०६)

---

(०१) ( वीरं (for शूरं);(३) हरि (for जहि);वज्रधरं (for अमित्रघ्न);(४) सहलक्ष्मणं (for सलक्ष्म) .
(०२) ( पुत्रेण (for सत्पुत्र);(३) सङ्ख्ये; .
(०३) ( र्हित (for र्हितः);प्रकाशं स्वं (for शो वा);(२) अस्त्र (दत्त);(३) शत्रुम् (शत्रून्);
(४) सर्व (for मम);.
(०४) (२) न वा; (ऽ)पि च (for ऽनघ);(३) प्रतिसोढुं च; सम्बाढुं; संवोढुं; .
(०५) ( अगता ı; आगता या; अपयातः;न गता या;(३) वीरस्य; वैदग्ध्य-;वैरस्य;
परस्य (for खरस्य);(४) गच्छ त्वं (for गच्छस्व);.
(०६) ( तम् (for त्वम्);(२) हत्वा शत्रुं ससैनिकं;(३) प्रतिनन्दस्व;(४) येन (for पुरा)
जित्वेव (for बद्ध्वेव);.

**मार्कण्डेयः-**

इत्युक्तः स तथेत्युक्त्वा रथमास्थाय दंशितः।
**प्रययाविन्द्रजिद्राजंस्तूर्णमायोधनं प्रति** ।। ८ ।। [०१]

ततो विश्रव्य विस्पष्टं नाम राक्षसपुङ्गवः।
**आह्वयामास समरे लक्ष्मणं शुभलक्षणम्** ।। ९ ।। [०२]

तं लक्ष्मणोऽभ्यधावच्च प्रगृह्य सशरं धनुः।
**त्रासयंस्तलघोषेण सिंहः क्षुद्रमृगान्यथा** ।। १० ।। [०३]

तयोः समभवद्युद्धं सुमहज्जयगृद्धिनोः।
**दिव्यास्त्रविदुषोस्तीव्रमन्योन्यस्पर्धिनोस्तदा** ।। ११ ।। [०४]

रावणिस्तु यदा नैनं विशेषयति सायकैः।
**ततो गुरुतरं यत्नमातिष्ठद्बलिनां वरः** ।। १२ ।। [०५]

तत एनं महावेगैरर्दयामास तोमरैः।
**तानागतान्स चिच्छेद सौमित्रिर्निशितैः शरैः** ।। १३ ।। [०६]

ते निकृत्ताः शरैस्तीक्ष्णैर्न्यपतन्धरणीतले।[०७]

---

(०१)
(०२) ( ततो (for तत्र); विस्पष्टं;तत्र गत्वा महेश्वसो;(२) रामं (for नाम); .
(०३) (ऽ)प्यधावत्स;(ऽ)भ्यधावच्च (for ऽभ्यधावत्) ;तं लक्ष्मणोभ्यापतत्तूर्ण' ; तं लक्षमणोप्यभ्यधावन्त;(४) क्षुद्रमृगा; मृगान्; कुद्धो मृगं (for क्षुद्रमृगं); .
(०४) (२) उभयोर; तुमुलं (for सुमहज्) ;गृद्धिणौः;गृद्धिणोः;गद्धिनोः;गृन्धुनोः;(३) तूर्णम् (for तीव्रम्),;(४) तथा; यथा (for तदा),; .
(०५) ( रावण '; राघव (for रावणि),;च (तु),;नैवं (for नैनं),;(२) विशोधयति.;
(४) अतिष्ठन् (for आतिष्ठद्);.
(०६) ( तत्र त्वेनं.; तं पतन्तं; तत एवं;.ततश्चैनं (for तत एनं),;(२) दारयामास;सायकैः(for तोमरैः) .
(०७) ( निपे-तुर्; व्यतन्वन् (for न्यपतन्),;धरणीतले ; .

**साधका रावणे राजौ शतशः शकलीकृताः*** ।। १४ ।। [०१]

तमङ्गदो वालिसुतः श्रीमानुद्यम्य पादपम्।
**अभिद्रुत्य महावेगस्ताडयामास मूर्धनि** ।। १५ ।। [०२]

तस्येन्द्रजिदसम्भ्रान्तः प्रासेनोरसि वीर्यवान्।
**प्रहर्तुमैच्छत्तं चास्य प्रासं चिच्छेद लक्ष्मणः** ।। १६ ।। [०३]

तमभ्याशगतं वीरमङ्गदं रावणात्मजः।
**गदयाताडयत्सव्ये पार्श्र्वे वानरपुङ्गवम्** ।। १७ ।। [०४]

तमचिन्त्य प्रहारं स बलवान्वालिनः सुतः।
**ससर्जेन्द्रजितः क्रोधाच्छालस्कन्धं तथाङ्गदः** ।। १८ ।। [०५]

सोऽङ्गदेन रुषोत्सृष्टो वधायेन्द्रजितस्तरुः।
**जघानेन्द्रजितः पार्थ रथं साश्वं समारथिम्** ।। १९ ।। [०६]

ततो हताश्वात्प्रस्कन्द्य रथात्स हतसारथिः।
**तत्रैवान्तर्दधे राजन्मायया रावणात्मजः** ।। २० ।। [०७]

अन्तर्हितं विदित्वा तं बहुमायं च राक्षसम्।
**रामस्तं देशमागम्य तत्सैन्यं पर्यरक्षत** ।। २१ ।। [०८]

---

(०१) (तोमरा (for सायका),;रावणे राजन् (for राजौ) .
(०२) ( ततोङ्गदो.;बालिसुतः.;(३) महावेगं.; .
(०३) ( तम् (for तस्य),; सुसम्भ्रान्तः.;(३) चास्य (for चापि),; .
(०४) ( अभ्याशे (से) गतं'; अभ्यास; अभ्याशाशतं.;(३) ताडयामास;.ताडयन्सव्ये.; .
(०५) ( सोभिचित्य; सोविर्चित्य.; प्रहारे;, प्रभावं.;तं (for स),;(२) वालिनदनः;बालिनः सुत स तथा (for ससर्ज),;ईद्रजितं;.(इं)द्रजिति .कोपात्;.घोरं (for क्रोधात्),;(४) साल-स्कन्दम्; तालस्कन्धम्; तथाङ्गदः (for अमित्र-जित्); .
(०६) ( समुत्सृष्टो; वृषो; रुषा सृष्टो; (२) तदा; ततः (for तरुः),; .
(०७) ( हताश्वः (for श्वात्),;(२) हत- सारथेः.(३) च (for (ए) व),; .
(०८) ( तु (for तं),;(२) स (for च),;(३) आगत्य (for आगम्य),; .

स राममुद्दिश्य शरैस्ततो दत्तवरैस्तदा।
**विव्याध सर्वगात्रेषु लक्ष्मणं च महाबलम्** ।। २२ ।। [०१]

तमदृश्यं शरैः शूरौ माययान्तर्हितं तदा।
**योधयामासतुरुभौ रावणिं रामलक्ष्मणौ** ।। २३ ।। [०२]

स रुषा सर्वगात्रेषु तयोः पुरुषसिंहयोः।
**व्यसृजत्सायकान्भूयः शतशोऽथ सहस्रशः** ।। २४ ।। [०३]

तमदृश्यं विचिन्वन्तः सृजन्तमनिशं शरान्।
**हरयो विविशुर्व्योम प्रगृह्य महतीः शिलाः** ।। २५ ।। [०४]

तांश्च तौ चाप्यदृश्यः स शरैर्विव्याध राक्षसः।
**स भृशं ताडयामास रावणिर्मायया्ऽऽवृतः** ।। २६ ।। [०५]

तौ शरैराचितौ वीरौ भ्रातरौ रामलक्ष्मणौ।
**पेततुर्गगनाद्भूमिं सूर्याचन्द्रमसाविव** ।। २७ ।। [०६]

अस्मिन् पर्वणि २४३अध्याये २७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि इन्द्रजिद्युद्धे त्रिचत्वारिंशदधिकद्विशततमोऽध्यायः ।। २४३ ।।

---

(०१) ( शतैसू; .शितैसू (for शरैस),;(२) तथा; शरैः (for तदा),;(४) बलं;,रथः; बलः (for रथम्) .

(०२) ( उद्दिश्य (for अदृश्यं),;शूलं; तीक्ष्णेद् (for शूरौ),;(३) पोथ'; बोध; रोध (for योध) .

(०३) ( अ-घ-सप्तार्धानि न सन्ति, (३) व्य (वि)सृजन्;.असृजत्.;भीमः (for भूयः) .

(०४) ( अदृश्ये (for अदृश्यं); विचिन्वन्तं.;(३) व्यविशुर् (for विवि-शुद्),;व्योम्नि.;
(४)महतीर्गृह्य वै शिलाः.

(०५) (अ)हश्यन्तः; (अ)दृश्यं स (for अदृश्यः स),;सञ् (for सु);(२) राक्षसैः;(३) सु- (for स);ताडयामास; पीड-यन्वीरो.; .

(०६) ( तैः (for तौ),;आयतौ;.अर्दितौ;. आवृतौ (for आचितौ); शूरौ; भूयो (for वीरौ),;(३) भूमौ .

# २४४. चतुश्चत्वारिंशदधिकद्विशततमो अध्यायः ॥

Consept Paste. P.No. 1400 .

**मार्कण्डेयः**

तावुभौ परितौ दृष्ट्वा भ्रातरौ रामलक्ष्मणौ।
बबन्ध रावणिर्भूयः शरैर्दत्तवरैस्तदा ॥ १ ॥ [०१]

तौ वीरौ शरबन्धेन बद्धाविन्द्रजिता रणे।
रेजतुः पुरुषव्याघ्रौ शकुन्ताविव पञ्जरे ॥ २ ॥ [०२]

तौ दृष्ट्वा परितौ भूमौ शतशः सायकैश्चितौ।
सुग्रीवः कपिभिः सार्धं परिवार्य ततः स्थितः ॥ ३ ॥ [०३]

सुषेणमैन्दद्विविदैः कुमुदेनाङ्गदेन च ।
हनुमन्नीलतारैश्च नलेन च कपीश्वरः ॥ ४ ॥ [०४]

**१२८८ ततः समीरवचनाद्रामाध्यातः खहेश्वरः।**
**आगम्यामोचयद्वीरौ सर्पबन्धात्सुदारुणात्।**

---

(०१) ( सहितौ (for पतितौ);(२) रामलक्ष्मणौ;.(अ)तितेजसौ (for (अ)मितौजसौ) .

(०२) ( शरबन्धेन;.सारबन्धेन.;(४) शकुना (for शकुन्ता); .

(०३) ( हष्ट्वा निपतितौ भूमि (विरौ);(२) शितैः(चितौ);सरागेषु-शराचितौ;(४) व्यतिष्टतः(अ)व-
तिष्टतः;(उ)पतिष्टतः(इतिस्थितः);(अ)वतस्थिवान्;(उ)पतस्थिवान्;
(अ) भितःस्थितः(for ततः स्थितः);.

(०४) ( मैन्द्रविविधैः; मैन्द्रविविधैः;(३) हनुम न्निल;हनूमान्नील;(४) हरी (रे)श्वरः;
महात्मना; .

(अथायातः (क्य रामाध्यात))

*अधिकपाठः -

क्षणेन गरुडस्तात समघ्श्यत।
दर्शनात्पक्षिराजस्य पन्नगाश्च प्रदुद्रुवुः।
स चागत्य महापक्षी तावुभौ रामलक्ष्मणौ।
परामृज्य करेणाथ ययौ येन पयागतः।

ततस्तं देशमागम्य कृतकर्मा विभीषणः।
बोधयामास तौ वीरौ प्रज्ञास्त्रेण प्रबोधितौ ॥ ५ ॥ (०१)

विशल्यौ चापि सुग्रीवः क्षणेनैतौ चकार ह ।
विशल्यया महौषध्या दिव्यमन्त्रप्रयुक्तया ॥ ६ ॥ (०२)

तौ लब्धसञ्ज्ञौ नृवरौ विशल्यावुदतिष्ठताम्।
गततन्द्रीक्लमौ चापि क्षणेनैतौ महारथौ ॥ ७ ॥ (०३)

ततो विभीषणः पार्थ राममिक्ष्वाकुनन्दनम्।
उवाच विज्वरं दृष्ट्वा कृताञ्जलिरिदं वचः ॥ ८ ॥ (०४)

**विभीषणः-**

इदमम्भो गृहीत्वा तु राजराजस्य शासनात्।
गुह्यकोऽभ्यागतः श्वेतात्त्वत्सकाशमरिन्दम ॥ ९ ॥ (०५)

---

(०१) ( आगत्य (for आगम्य);(२) कृत-वर्मा;(४) दिव्यास्त्रेण;ब्रज्ञा;विमोहितौ;प्रमोहितौ; .
(०२) (२) (ए)तौ; (ए)व; च (for (उ)भौ);ह; सः (for तौ);(३) तौ विशम्यौ (for विशाल्यया); .
(०३) (२) वाततन्द्रागतौ; गततन्द्राक्लमौ;, गत-तन्द्रि.;आस्तां; .चापि (for चास्तां),;(४)
(ए)तौ ; (ई)शौ (for (उ)भौ ),;.
(०४) ( तयोर् (for ततो),; वीक्ष्य (for पार्थ),;(३) उवाच विशदं वाग्मी.; .
(०५) ( इदम् (for अयम्),;अस्रो (for अम्भो ),; गृहीत्वाशु (for त्वा तु),;(२) महाराजस्य.;(३) त्वेतत्;. श्वेतु;. चैतान्; श्वेतम्; , चैव (for श्वेतात्),;(४) अरिन्दमः.; .

इदमम्भः कुबेरस्ते महाराजः प्रयच्छति।
अन्तर्हितानां भूतानां दर्शनार्थं परन्तपः ।। १० ।। (०१)

अनेन मृष्टनयनो भूतान्यन्तर्हितान्युत।
भवान्द्रक्ष्यति यस्मै च प्रदास्यति नरः स तु ।। ११ ।।(०२)

**मार्कण्डेयः-**

तथैति रामस्तद्वारि प्रतिगृह्याभिसंस्कृतम्।
चकार नेत्रयोः शौचं लक्ष्मणश्च महामनाः ।। १२ ।। (०३)

सुग्रीवजाम्बवन्तौ च हनुमानङ्गदस्तथा।
मैन्दद्विविदनीलाश्च प्रायः प्लवगसत्तमाः ।। १३ ।।(०४)

तथा समभवच्चापि यदुवाच विभीषणः।
क्षणेनातीन्द्रियाण्येषां चक्षूंष्यासन्युधिष्ठिर ।। १४ ।। (०५)

ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणम् ।
पौलस्त्यमेतदालक्ष्य प्राप मूर्छां स लक्ष्मणः ।
अवहारं ततः कृत्वा राघवः सर्ववानरान् ।
वाक्यमित्यब्रवीद्दीनं तन्मे निगदतः शृणु ।

---

(०१) (२) राजराजः; महाराज;. महाराजं .
(०२) ( मृष्टनयनो;, स्पृष्टवदनो.;(२) च; (अ)पि (for ( उ)त),;भूतान्यं- तर्हितान्हतः.;(३) यदा; सदा (for भवान्),;यस्यैष; यस्यैव (for यस्मै च),;(४) प्रदास्यति नरः स तु .
(०३) ( वाक्यं (for वारि),;(२) परिगृह्य-;(अ)थ सत्वरः; (अ)थ तत्कृतं; (अ)तिसस्कृतं; (अ)भिसंस्कृतं,; (अ)भिसत्कृतं.
(०४) ( सुग्रीवं जाम्ब (बु); वन्तं च.;(२) हनुमान्.; तदा (for तथा);(३) मैन्दद्विविध.;(४) सर्वे (for प्रायः) .
(०५) ( तदा (for तया); .

राज्यभङ्गो वने वासः सीता नीता पिता मृतः ।
लक्ष्मणो मोहमापन्नः किं नो दुःखमतः परम् ।
बिभीषणो हनुमता रामस्तं बोध्य बुद्धिमान् ।
आनावयौषधयो दिव्या लक्ष्मणं समजीवयत् ।

इन्द्रजित्कृतकर्मा च पित्रे कर्म तदाऽऽत्मनः।
निवेद्य पुनरागच्छत्त्वरयाऽजिशिरः प्रति ॥ १५ ॥ (०१)

तमापतन्तं सङ्क्रुद्धं पुनरेव युयुत्सया।
अभिदुद्राव सौमित्रिर्विभीषणमते स्थितः ॥ १६ ॥ (०२)

अकृताह्निकमेवैनं जिघांसुर्जितकाशिनम्।
शरैर्जघान सङ्क्रुद्धः कृतसञ्ज्ञोऽथ लक्ष्मणः ॥ १७ ॥ (०३)

तयोः समभवद्युद्धं तदान्योन्यं जिगीषतोः।
अतीव चित्रमाश्चर्यं शक्रप्रह्लादयोरिव ॥ १८ ॥ (०४)

अविध्यदिन्द्रचिद्तीक्ष्णैः सौमित्रिं मर्मभेदिभिः।
सौमित्रिश्चानलस्पर्शैरविध्यद्रावणिं शरैः ॥ १९ ॥ (०५)

सौमित्रिशरसंस्पर्शाद्रावणिः क्रोधमूर्छितः।

---

(०१) ( च (for तु),;(२) पित्रे तत्कर्म चात्मनः.;(४) त्वरया शिबिरं; स्वयमाजिशिरः .
(०२) ( आगतं तु (for आपतन्तं) .
(०३) ( अकृताग्निकमेवैनं;; कृताह्निकमथैवैनं.;(२) जिघांसुं.; जय (for जित) .
(०४) ( ततः (for तयोः),;(२) ततो (for तदा),; अन्योन्य-(for अन्योन्यं),;जि-घांसतः;
जिघांसतोः; जिगीषया; .जिगी (हि)र्षतोः.;(४) शक्रप्रह्राद'.
(०५) ( अव्यध्यद्; सोवि (for अविध्यद्),;(२) मर्मभेदिनः.;(३) (अ)शनि (for (अ)नल),; (४)
राक्षसेश्वरं (for रावणिं शरैः) .

व्यसृजल्लक्ष्मणायाष्टौ शरानाशीविषोपमान् ।। २० ।। [०१]

लक्षालङ्कारः - व्यसृजल्लक्ष्मणायाष्टौ इत्यत्र व्यसृजत् विशेषेण धनुषि सन्दधे ।

तांश्विच्छेद*सौमित्रिःशरानष्टावनागतान् ।,*

तानप्राप्ताशितैर्बाणैश्विचच्छेद रघुन्नदनः।*

तस्यासून्पावकस्पर्शैः सौमित्रिः पत्रिभिस्त्रिभिः।
वारायामास नाराचैः सौमित्रिर्मित्रनन्दनः ।। २१ ।। [०२]

This Stanga is Interchanged in TRK after 21
.असृजल्लक्ष्मणश्चाष्टौ राक्षसाय शरान्पुनः।
यथा निरहरद्वीरस्तन्मे निगदतः शृणु ।। २२ ।। [०३]

This Stanga is Interchanged in TRK after 20 . एकेनास्य
धनुष्मन्तं बाहुं देहादपातयत्।
द्वितीयेन सनाराचं भुजं भूमौ न्यपातयत् ।। २३ ।। [०४]

तृतीयेन तु बाणेन पृथुधारेण भास्वता।
जहार सुनसं चापि शिरो भ्राजिष्णुकुण्डलम् ।। २४ ।।[०५]

विनिकृत्तभुजस्कन्धं कबन्धं भीमदर्शनम्।

---

(०१) ( सौमित्रिसार;(२) कोध-मूर्छितः; सौमित्रिः (३) व्यसृजलू; विसृज्य (for असृजल्);
(अ)सौ (for (अ)ष्टौ);.

(०२) सौमित्रिः (अ)थ; (आ)सन्; (इ)षून् (for (अ)सून्);तस्यास्तन्पाकसंस्पशौः .

(०३) (३) न्यरहरद्; तं न्यहनद् ; तमहनद् (for निरहरद्); वीर (for वीरस्) .

(०४) (३) तु बाणेन (for सनाराचं);(४)अ-घ-शितधारेण भास्वता, अन्यम् (for भूमौ);अपातयत् (for न्यपात); .

(०५) ( येन च कौन्तेय; (२) तीक्षण;शित (for पृथु);भूयसा (for भास्वता);(३)घ-जघान, जधान (for जहार);रुचिरं (for सुनसं);चापि (for चारु);(४) ज्वालित (for भ्राजिष्णु) .

पपात वसुधायां तु भिन्नमूल इव द्रुमः॥ ॥ २५ ॥

तं हत्वा सुतमप्यस्त्रैर्जघान बलिनां वरः।(०६)

लङ्कां प्रवेशयामासुस्तं रथं वाजिनस्तदा।
ददर्श रावणस्तं च रथं पुत्रविनाकृतम् ॥ २६ ॥(०७)

स पुत्रं निहतं ज्ञात्वा त्रासान्सम्भ्रान्तमानसः।
रावणः शोकमोहार्तो वैदेहीं हन्तुमुद्यतः ॥ २७ ॥(०८)

अशोकवनिकास्थां तां रामदर्शनलालसाम्।
खड्गमादाय दुष्टात्मा जवेनाभिपपात ह ॥ २८ ॥(०९)

तं दृष्ट्वा तस्य दुर्बुद्धेरविन्ध्यः पापनिश्चयम्।
शमयामास सङ्क्रुद्धं श्रूयतां येन हेतुना ॥ २९ ॥(१०)

**अवध्यः-**

महाराज्ये स्थितो दीप्ते न स्त्रियं हन्तुमर्हसि।
हतैवैषा यदा स्त्री च बन्धनस्था च ते वशे ॥ ३० ॥(११)

न चैषा देहभेदेन हता स्यादिति मे मतिः।

---

(०६) ( विनिकृत्तशिरःस्कन्धं (स्कन्धात्) ;विनिकृत्य भुजस्कन्धं;विनिवृत्त-(कृत)शिरःस्कन्धः (२) रावणिं (for कबन्धं);भीमदर्शनदर्शनं; कबन्धाकृतिदर्शनः (३) कृत्वा (for हत्वा); सूतमप्याशु; पुत्रं च;मप्यस्य;.

(०७) (२) तं रथं वाजिनस्तदा; (३/४) सरथं (for ददर्श);पुत्रविनाशनं .

(०८) ( सु (for स); विनितं (for निहतं);श्रुत्वा; ज्ञात्वा (for हष्टवा); (२) रामात् (for त्रासात्); सं (स) भ्रान्तमानसः; .

(०९) ( वनिकां सीतां; वनिकासंसं (४) वेगेन (for जवेन);ससार (for पपात); .

(१०) ( बुद्ध्वा (for हष्ट्वा);चास्या (for तस्य);दुर्बुद्धिर्;अवन्ध्यः;अविन्त्य; अविध्यः;अवध्यः (for अविन्धयः);(४) सूक्ष्म-युक्तेन हेतुना; .

(११) ( महाराज्य;दीपे; दीप्तो;(३) हता चैषा; हतेवैषा ;यदि;(४) च ते (वने); वशो (भविष्यति) (for चते गृहे);.

जहि भर्तारमेवास्या हते तस्मिन्हता भवेत् ।। ३१ ।। (०१)

न हि ते विक्रमे तुल्यः साक्षादपि शतक्रतुः।
असकृद्धि त्वया सेन्द्रास्त्रासितास्त्रिदशा युधि ।। ३२ ।। (०२)

**मार्कण्डेयः-**

एवं बहुविधैर्वाक्यैरविन्ध्यो रावणं तदा।
क्रुद्धं संशमयामास जगृहे च स तद्वचः ।। ३३ ।। (०३)

निर्याणे स मतिं कृत्वा निधायासिं क्षपाचरः।
आज्ञापयामास तदा रथो मे कल्प्यतामिति ।। ३४ ।। (०४)

अस्मिन् पर्वणि २४४अध्याये ३४श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि श्रीरामोपाख्यानपर्वणि इन्द्रजिद्वधे चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ।। २४४ ।।

# २४५. पञ्चचत्वारिंशदधिकद्विशततमो अध्यायः ।।

Consept Paste. P.No.1404 .

**मार्कण्डेयः**

ततः क्रुद्धो दशग्रीवः प्रिये पुत्रे निपातिते।

(०१) (३) एतस्या;एवास्या (for एवास्या); .
(०२) ( मे (for ते);(२) शचीपतिः (for शत),;(३) वै (for हि),;(४) निर्जिता (for त्रासिता),;अपि (for युधि),;.
(०३) (२) अविधा; अव (for वि)ध्यो (for अविन्ध्यो),;अवध्यो राक्षसेश्वरः.;(३) सङ्क्रुद्धं शम- (संश) यामास.;(४) च स.; स च जग्राह तद्वचः .
(०४) (२) निधायास्यं;. पिधायासिं; ,नियन्तारं ;निरस्यासिं.;निशाचरः,;(४) युज्य (for कल्प्य) .

निर्ययौ रथमास्थाय हेमरत्नविभूषितम् ॥ १ ॥ [०१]

स वृतो राक्षसैर्घोरैर्विविधायुधपाणिभिः।
अभिदुद्राव रामं स योधयन्हरियूथपान् ॥ २ ॥ [०२]

तमाद्रवन्तं सङ्क्रुद्धं मैन्दनीलनलाङ्गदाः।
हनूमाञ्जाम्बवांश्चैव ससैन्याः पर्यवारयन् ॥ ३ ॥ [०३]

ते दशग्रीवसैन्यं तदृक्षवानरपुङ्गवाः।
द्रुमैर्विध्वंसयाश्चक्रुर्दशग्रीवस्य पश्यतः ॥ ४ ॥ [०४]

ततः स सैन्यमालोक्य वध्यमानमरातिभिः।
मायावी चासृजन्मायां रावणो राक्षसाधिपः ॥ ५ ॥ [०५]

तस्य देहविनिष्क्रन्ताः शतशोऽथ सहस्रशः।
राक्षसाः प्रत्यदृश्यन्त शरशक्त्यृष्टिपाणयः ॥ ६ ॥ [०६]

तान्रामो जिघ्निवान्सर्वान्दिव्येनास्त्रेण राक्षसान्।
अथ भूयोऽपि मायां स व्यदधाद्राक्षसाधिपः ॥ ७ ॥ [०७]

कृत्वा रामस्य रूपाणि लक्ष्मणस्य च भारत।

---

(०१) ( दशशिराः; (२) निषूदिते (for निपा),;(३) निर्याय .

(०२) ( स वृतो; वृतो वै.;(४) योध; बोध (for पोथ),; वाहिनीं (for यूथपान्),;पोथयामास यूथपान.; .

(०३) ( अ-घ-नवार्धानि न सन्ति, आपतन्तं (for आद्रवन्तं); (२) मैदनीलाङ्गदास्तथा.;(३) हनुमाञ्;.हन्ुवाज.;जाम्ब्रुवान.;(४) सैन्यास्ते; तत्सन्य; .ससैन्यं; .

(०४) (२) ऋक्षवानरपुङ्गवाः; दृष्ट्वा वानरयूथपाः ( पुङ्गवाः),; .

(०५) ( स (for स्व-),;ततः सैन्यं समालोक्य.;(२) महात्मभिः (for अरातिभिः),;लोभ्यमानं स शत्रुभिः(३) व्यद-धन्; चासृजन्;, व्यसृजन्; विदधन्; विदधे (for व्यदधान्),;मायावीर्योप्य-धान्मायां; . मायामादाय युयुधे.;(४) राक्षसाधिपः; .

(०६) ( देहविनि-ष्क्रान्ताः; देहाद्विनिःसृत्य.; .

(०७) (२) दिव्यास्त्रेणैव.; वीर्यवान् (for राक्षसान्),;(४) व्यद-धद्.; राक्षसेश्वरः; .

अभिदुद्राव रामं च लक्ष्मणं च दशाननः ॥ ८ ॥ (०१)

ततस्ते राममार्छन्तो लक्ष्मणं च क्षपाचराः।
अभिपेतुस्तदा रामं प्रगृहीतशरासनाः ॥ ९ ॥ (०२)

तां दृष्ट्वा राक्षसेन्द्रस्य मायामिक्ष्वाकुनन्दनः।
उवाच रामं सौमित्रिरसम्भ्रान्तो बृहद्वचः।(०३)
जहीमान्राक्षसान्पापानात्मनः प्रतिरूपकान्** ॥ १० ॥

जघान रामस्तांश्चान्यानात्मनः प्रतिरूपकान्।(०४)
इत्युक्तो लक्ष्मणं पार्थ तदा गन्तुं समुघतः ॥ *(०५)

**मार्कण्डेयः-**

ततो हर्यश्वयुक्तेन रथेनादित्यवर्चसा।
उपतस्थे रणे रामं मातलिः शक्रसारथिः ॥ ११ ॥ (०६)

**मातलिः**

अयं हर्यश्वयुग जैत्रो मघोनः स्यन्दनोत्तमः।
त्वदर्थमिह सम्प्राप्तः सन्देहाद्वै शतक्रतोः * ॥ १२ ॥ (०७)

अनेन शक्रः काकुत्स्थ समरे दैत्यदानवान्।
शतशः पुरुषव्याघ्र रथोदारेण जघ्निवान् ॥ १३ ॥ (०८)

---

(०१) (२) धीमतः; वीर्यवान् (for भारत),;(३) स (for च); .
(०२) ( आछन्तो;आनर्छन्;आगच्छन्;अत्सन्तो;आनर्चन्;आनर्छन् (for अर्छन्तो);(२) निशाचरा;क्षपाचराः;(३) ततो (for तदा);रामं (for राजन्);(४) प्रगृहीतशरासनाः; तेषुकार्मुकाः;.
(०३) (३) उवाच रामः (वाक्यं);सौमित्रिम् ;(४) महद्; (ऽ)ब्रवीद् (for बृहद्); .
(०४) (२) प्रतिरूपितान्; .
(०५) (३/४) चापि ज्ञात्मनः;चापि नात्मनः(for चान्यानात्मनः)। .
(०६) (३) तदा (for रणे);(४) प्राञ्जलिः(for मातलिः) .
(०७) (३) स युद्धे (for शतशः) .
(०८) ( राम (for जैत्रो);(२) अमोघः (for मगोनः); .

This Stanga is Interchanged in TRK after 11

**तदनेन नरव्याघ्र मया यत्तेन संयुगे।**
**स्यन्दनेन जहि क्षिप्रं रावणं मा चिरं कृथाः ॥ १४ ॥** (०१)

**मार्कण्डेयः-**

इत्युक्तो राघवस्तथ्यं वचोऽशङ्कत मातलेः।
**मायैषा राक्षसस्येति तमुवाच विभीषणः ॥ १५ ॥** (०२)

**विभीषणः-**

नेयं माया नरव्याघ्र रावणस्य दुरात्मनः।
**तदातिष्ठ रथं शीघ्रमिममैन्द्रं महाद्युते ॥ १६ ॥** (०३)

**मार्कण्डेयः-**

ततः प्रहृष्टः काकुत्स्थस्तथेत्युक्त्वा विभीषणम्।
**रथेनाभिपपाताथ दशग्रीवं रुषान्वितः ॥ १७ ॥** (०४)

हाहाकृतानि भूतानि रावणे समभिद्रुते।
**सिंहनादाः सपटहा दिवि दिव्यास्तथानदन् ॥ १८ ॥** (०५)

ततः प्रववृते युद्धं रामारावणयोर्महत्।

---

(०१) ( तस्मात्त्वं पुरुषव्ययाघ्र;(२) दत्तेन; युक्तेन (for यत्तेन); .

(०२)मार्कण्डेय उ; ( राघवः मातलेः;इ (य);त्यूचे मातलिस्तथ्यं;(२) ततो (for वचो); मातलिं (for मातलेः);(३) मायैषा (for मायेयं);राक्षसेन्द्रस्य (for सस्येति);.

(०३) (३) उपातिष्ट (for तदा);दिव्यम्;इमम् (for शीघ्रम्);तदातिष्टभिदिष्टथेनं;तदा (मा;था) तिष्टाभिनङ्कैनं; (४) शीघ्रम्; रथम् (for इमम्); .

(०४) (३) भिपपाताथ .

(०५) (३) सिंहनादः;च पटहा;(४) दवास् (for दिव्याशू); तदा;तथानदन्; त्वथा ततो (for च ना); नादयन् (for नानदन्); यथा (for तथा);.भवेत् (for (अ)भवत्),* ( मायामयं (for स रामाय),;तेजा (for धोरं),;(३) स्पष्टं;. स्पर्शं (for प्रख्यं) .शूलं चाशनिसप्रख्यं; (४) यमदण्डम.;.

दशकन्धरराजसून्वोस्तथा युद्धमभून्महत्।
अलब्धोपममन्यत्र तयोरेव तथाभवत्।*

.स रामाय महाघोरं विससर्ज निशाचरः।
शूलमिन्द्राशनिप्रख्यं ब्रह्मदण्डमिवोद्यतम् ।। १९ ।।

तच्छूलं सत्वरं रामश्चिच्छेद निशितैः शरैः।
तद्दृष्ट्वा दुष्करं कर्म रावणं भयमाविशत् ।। २० ।। [०१]

ततः क्रुद्धः ससर्जाशु दशग्रीवः शिताञ्छरान्।
सहस्रायुतशो रामे शस्त्राणि विविधानि च ।। २१ ।। [०२]

ततो भुशुण्डीः शूलानि मुसलानि परश्वधान्।
शक्तीश्च विविधाकाराः शतघ्नीश्च शितान्क्षुरान् ।। २२ ।। [०३]

तां मायां विकृतां दृष्ट्वा दशग्रीवस्य रक्षसः।
भयात्प्रदुद्रुवुः सर्वे वानराः सर्वतोदिशम् ।। २३ ।।[०४]

ततः सुपत्रं सुसुखं हेमपुङ्खं शरोत्तमम्।
तूणादादाय काकुत्स्थो ब्रह्मास्त्रेण युयोज ह ।। २४ ।। [०५]

तं बाणवर्यं रामेण ब्रह्मास्त्रेणानुमन्त्रितम्।
जहृषुर्देवगन्धर्वा दृष्ट्वा शक्रपुरोगमः ।। २५ ।। [०६]

---

(०१) ( अन्तराद्;. सत्वरं (for अन्तरा),; तच्छूलमथ रामस्तु.; .

(०२) (२) वरान् (for शरान्),;(३) रक्षः (for रामे),; .

(०३) ( गदा (for ततो),;भुसुण्डीः; भुशुण्डाः; मुखण्ठीः; भुषुण्डी';.भूषण्डीः; भृशुण्ढीः; मुसण्ठीः; मुसृण्ठीः.;शूलाद्यान्; शूलानि (for शूलांश्च),; ततो मुसण्ठिकाः;शूलाः.;(२) मुशलानि.; परस्वधान्; ;परश्वथान्.;(४) शतक्षुराः; शि (सि)- तान्क्षुरान्;.शिताः क्षुराः; शतान्शरान्; ,शितान्शरान्; .

(०४) ( विविधां (for विकृतां),; (३) विदुद्रुवुः.;(४) सैनिकाः (for वानराः),;दिशः; .

(०५) ( सपत्रं.;(२) दीप्यमानं (for हेम),;(३) शत्रून् (for तूणाद्),; .

(०६) ( अ-तं प्रेक्ष्य रामं बाणेन, क-तं बाणवर्यं रामेण; ख-तं प्रेक्षमाणा रामेण- भिमन्त्रितम्, बाणवीर्यं; बाणवर्षं;, प्रेक्ष्य बाणं; (२) (अर)नुमन्त्रितं,;.सुमन्त्रितं ;(३) जहर्पुद् (for जहृषुर्),; तेन (for देव-

अल्पावशेषमायुश्च ततोऽमन्यन्त रक्षसः।
**ब्रह्मास्त्रोदीरणाच्छत्रोर्देवदानवकिन्नराः ।। २६ ।।** (०१)

ततः ससर्ज तं रामः शरमप्रतिमौजसम्।
**रावणान्तकरं घोरं ब्रह्मदण्डमिवोद्यतम् ।। २७ ।।** (०२)

**मुक्तमात्रेण रामेण दूराकृष्टेन भारत।**

**अमोघमविषह्यं च स देवासुरपन्नगैः ।**

**भासयन्तं दिशः सर्वाः स्वया दीप्त्या महाप्रभा ।**

स तेन राक्षसश्रेष्ठः सरथः साश्वसारथिः।
**प्रजज्वाल महाज्वालेनाग्निनाभिपरिप्लुतः ।। २८ ।।** (०३)

ततः प्रहृष्टास्त्रिदशाः सहगन्धर्वचारणाः।
**निहतं रावणं दृष्ट्वा रामेणाक्लिष्टकर्मणा ।। २९ ।।** (०४)

तत्यजुस्तं महाभागं पञ्च भूतानि रावणम्।
**भ्रंशितः सर्वलोकेषु(भ्यः) स हि ब्रह्मास्त्रतेजसा ।। ३० ।।** (०५)

शरीरधातवो ह्यस्य मांसं रुधिरमेव च ।
**नेशुर्ब्रह्मास्त्रनिर्दग्धा न च भस्माप्यदृश्यत ।। ३१ ।।** (०६)

अस्मिन् पर्वणि २४५अध्याये ३१श्लोकाः सन्ति

---

),;(४) देव' (for शक्र) .

(०१) (२) राक्षसः; राक्षसं.;(३) ब्रह्मास्त्रे योजिते तस्मिन्.;(४) दानवकिंनराः; गधर्व-दानवाः .

(०२) ( तस्मिन् (for ततः),;(४) (उ)दितं (for (उ)द्यतम्),; .

(०३) (३/४) पुरस्कृतः; परिप्लुतः (for परिष्कृतः),;प्रजज्वाल महाज्वालो तया, चापि परिप्लुतः; जज्वाल स (सु-) महाज्वालो अ (ह्य) ग्निनाभिपरिष्कृतः .

(०४) (२) सहगन्धर्वचारणाः .

(०५) ( महा बाहुं.; (२) भूताश्च (for नि),;(३ सर्वलोकेभ्यः.;(४) ब्रह्मास्त्रेणामितौजसा.; .

(०६) ( तु; (ऽ)पि (for हि),;(३) तेन;, देहं (for नेशुर्),;निर्दग्धं ),;(४) स्म; हि (for च); भस्म प्रदृश्यत भस्मापि दृश्यते;.भस्मान्यदृश्यत; निशा तस्माद्ध्यदृश्यत .

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि
रावणवधे पञ्चचत्वारिंशदधिकद्विशततमोऽध्यायः ।। २४५ ।।

# २४६. षट्चत्वारिंशदधिकद्विशततमो अध्यायः ।

Concept Paste.P.No. 1408 .

**मार्कण्डेयः**

स हत्वा रावणं क्षुद्रं राक्षसेन्द्रं सुरद्विषम्।
**बभूव हृष्टः ससुहृद्रामः सौमित्रिणा सह** ।। १ ।।(०१)

ततो हते दशग्रीवे देवाः सर्षिपुरोगमाः।
**आशीर्भिर्जययुक्ताभिरानर्चुस्तं महाभुजम्** ।। २ ।।(०२)

रामं कमलपत्राक्षं तुष्टुवुः सर्वदेवताः।
**गन्धर्वाः पुष्पवर्षाश्च वाग्भिश्च त्रिदशालयाः** ।। ३ ।।(०३)

पूजयित्वा यथा रामं प्रतिजग्मुर्यथागतम्।
**तन्महोत्सवसङ्काशमासीदाकाशमच्युत** ।। ४ ।।(०४)

---

(०१) ( राक्षसं (for रावणं),; क्रुद्धं ,; सङ्ख्ये (for क्षुद्रं),;(२) दशग्रीवं.; राक्षसेशं (for सेन्द्रं),;युधिष्ठिर (for सुर);(३) सु-महद्;. सुसुहृद्.; .

(०२) ( तस्मिन् (for ततो),; दशग्रीवे हते तस्मिन् ;(२) सर्वे पुरो'; सर्षिगणास्तथा-;

(४) ते'(for तं); सहानुजं (for महाभुजम्);.

(०३) (२) वनदेवताः;(४) त्रिदिवा-लयाः; त्रिदशस्त्रियः. ववर्षुस्ताः सुरालयाः .

(०४) ( तथा';.ततो; तु ते;.रणे (for यथा);(२) र्यथोगतः.;(३) गतोत्सव (for महोत्सव'); (४) अप्युत (for अच्युत) .

ततो हत्वा दशग्रीवं लङ्कां रामो महायशाः।
**विभीषणाय प्रददौ प्रभुः परपुरञ्जयः ॥ ५ ॥** [०१]

ततः सीतां पुरस्कृत्य विभीषणपुरस्कृताम्।
**अविन्ध्यो नाम सुप्रज्ञो वृद्धामात्यो विनिर्ययौ ॥ ६ ॥** [०२]

उवाच च महात्मानं काकुत्स्थं दैन्यमास्थितः।
**प्रतीच्छ देवीं सद्वृत्तां महात्मञ्जानकीमिति ॥ ७ ॥** [०३]

एतच्छ्रुत्वा वचस्तस्मादवतीर्य रथोत्तमात्।
**बाष्पेणापिहितां सीतां ददर्शेक्ष्वाकुनन्दनः ॥ ८ ॥** [०४]

तां दृष्ट्वा चारुसर्वाङ्गीं यानस्थां शोककर्शिताम्।
**मलोपचितसर्वाङ्गीं जटिलां कृष्णवाससम् ॥ ९ ॥** [०५]

उवाच रामो वैदेहीं परामर्शविशङ्कितः।

**श्रीरामः-**

गच्छ वैदेहि मुक्ता त्वं यत्कार्यं तन्मया कृतम्।
**लक्षयित्वेङ्गितं सर्वं प्रियं तस्यै निवेद्य सः ॥ १० ॥** [०६]

---

(०१) (२) राज्यं (for लङ्कां),; महाबलः.;(४) पुनः(for प्रभुः); पुरञ्जय .

(०२) (२) 'पुरःसरां ; पुरः सरः; पुरःसराः; पुरःसरं,; पुरस्कृतः;(३) अवध्यो; .अविन्दो;, अविध्यो सुप्राज्ञो;-प्रीतो (for प्रज्ञो);(४) वृद्धोमात्यो.;(ऽ)भिनिर्ययौः; वृद्धो मान्यो हि निर्ययौ; .

(०३) ( स (for च),;महाघोरं (प्रज्ञं);प्राज्ञं.;(२) दैत्यनाशनं; माशिः; चेत्यमाशिं.;
दैन्यमास्थितः,;(३) प्रतीक्ष-;.

(०४) ( रामोवाच (for एतच्छ्रुत्वा),;(२) महा-रथात् (for रथो),;(३) रूपेण (for बाष्पेण);(अ)भिहतां;(अ)पिहितः, (अ)भि-हिताः; (अ)भिहिता; अपिहृतः, अभिहतः .

(०५) (२) ध्यानस्थां;. वनं;,यून; शोककर्षितां.;(४) म्लिष्टवाससं;क्लिष्टवाससां; कृष्णवाससीं ;कृष्णवाससां ;; ध्यानशोकपरायणां; .

(०६) ( जटिलां.(for वैदेहीं),;(२) परामर्षं.;(३) गच्छ वैदेहि.;(अ)सि (for त्वं),;(४)
मया कृतं.; एतत्कार्यं मया तव.;.

मामासाद्य पतिं भद्रे न त्वं राक्षसवेश्मनि।
**जरां व्रजेथा इति निहतोऽसौ निशाचरः ।। ११ ।।** [०१]

कथं ह्यस्मद्विधो जातु जानन्धर्मविनिश्चयम्।
**परहस्तगतां नारीं मुहूर्तमपि धारयेत् ।। १२ ।।** [०२]

सुवृत्तामसुवृत्तां वाप्यहं त्वामद्य मैथिलि।
**नोत्सहे परिभोगाय श्वावलीढं हविर्यथा ।। १३ ।।** [०३]

**मार्कण्डेयः-**

ततः सा सहसा बाला तच्छ्रुत्वा दारुणं वचः।
**पपात देवी व्यथिता निकृत्ता कदली यथा ।। १४ ।।** [०४]

योऽप्यस्या हर्षसम्भूतो मुखरागस्तदाभवत्।
**क्षणेन स पुनर्नष्टो निःश्वास इव दर्पणे ।। १५ ।।** [०५]

ततस्ते हरयः सर्वे तच्छ्रुत्वा रामभाषितम्।
**गतासुकल्पा निश्चेष्टा बभूवुः सहलक्ष्मणाः ।। १६ ।।** [०६]

ततो देवो विशुद्धात्मा विमानेन चतुर्मुखः।
**पद्मयोनिर्जगत्स्रष्टा दर्शयामास राघवम् ।। १७ ।।** [०७]

---

(०१) ( मे,; च (for (अ)सौ),;निह-(हि)तो राक्षसेश्वरः; .
(०२) ( अस्मद्-; न्वस्मद्-;.त्वस्मद्-(for ह्यस्मद्),; कस्मादः (तस्माद-; कस्माद्ध्य)-स्मद्विधो जातु.;(२) जानन्धर्मार्थनिश्चयान, (यं),;.
(०३) ( सद्वृत्ताम् (for सुवृत्ताम्),;च (for वा),; असद्वृत्तां सुवृत्तांवा.;(३) भोग्याश्च;.भोगाच्च (for भोगाय),
(०४) (३) घ-अर्धचतुष्टयं नास्ति, देवी व्यथिता.; .
(०५) (ऽ)पि (for हि),;मुखसम्भूतो ; हर्षसम्भ्रान्तो;भव-सम्भूतो.;(२) मुखे (for मुख); पुरा (for तदा),;(३) परिभ्रष्टो; पुनर्नष्टो; परिभ्रष्टा;. पुनर्दृष्टो;(४) निःश्वास इव.;दर्पणः .
(०६) (२) रामभाषणं; (४) बभूवुः शुभलक्षणाः; ’व शुभलक्षणा .
(०७) (क-ख-घ-पितामहो, माकडेय उ ;(२) विनयेन;.विमाने च.;(३) पद्मयोनिर् (for पिता) .

शक्रश्चाग्निश्च वायुश्च यमो वरुण एव च ।
यक्षाधिपश्च भगवांस्तथा सप्तर्षयोऽमलाः ॥ १८ ॥ (०१)

राजा दशरथश्चैव दिव्यभास्वरमूर्तिमान्।
विमानेन महार्हेण हंसयुक्तेन भास्वता ॥ १९ ॥ (०२)

ततोऽन्तरिक्षं तत्सर्वं देवगन्धर्वसङ्कुलम्।
शुशुभे तारकाचित्रं शरदीव नभस्तलम् ॥ २० ॥ (०३)

तत उत्थाय वैदही तेषां मध्ये यशस्विनी।
उवाच वाक्यं कल्याणी रामं पृथुलवक्षसम् ॥ २१ ॥ (०४)

**सीता-**

राजपुत्र न ते दोषं करोमि विदिता हि ते।
गतिः स्त्रीणां नराणां च शृणु चेदं वचो मम ॥ २२ ॥ (०५)

अन्तश्चरति भूतानां मातरिश्वा सदागतिः।
स मे विमुञ्चतु प्राणान्यदि पापं चराम्यहम् ॥ २३ ॥ (०६)

अग्निरापस्तथाऽकाशं पृथिवी वायुरेव च ।
विमुञ्चन्तु मम प्राणान्यदि पापं चराम्यहम्।(०७)

यथाहं त्वदृते वीर नान्यं स्वप्नेऽप्यचिन्तयम्।

---

(०१) (४) ब्रह्मर्षयो (for सप्तर्षयो) .
(०२) ( नाम (for चैव);(२) भास्कर; ’भासुर; .
(०३) (अं)तरीक्षं; (अं)तरिक्षे;;(२) दानव (for गन्धर्व),;;(४) नभस्थलं; .
(०४) (२) तेषां मध्ये.; .
(०५) ( ततः (for न ते),; कार्यं; दोषं (for कोपं),;;(२) तव; हि ते (च मे) (for हि मे) .
(०६) ( भूतात्मा (for नां),;(३) मे विमुञ्चतु; .
(०७) (३) विब्रुवन्तु यथातत्वं (थ्यं);;(४) एते वा (चा)घ त्यजन्तु मां; तमेवादि त्यजन्तु मां ; .

**तथा मे देवनिर्दिष्टस्त्वमेव हि पतिर्भव ।**(०१)

ततोऽन्तरिक्षे वागासीत्सुभगा लोकसाक्षिणी।
**पुण्या संहर्षणी तेषां वानरणां महात्मनाम्  ।। २४ ।।** (०२)

**वायुः**

भो भो राघव सत्यं वै वायुरस्मि सदागतिः।
**अपापा मैथिली राजन्सङ्गच्छ सह भार्यया  ।। २५ ।।** (०३)

**अग्निः**

अहमन्तःशरीरस्थो भूतानां रघुनन्दन।
**सुसूक्ष्ममपि काकुत्स्थ मैथिली नापराध्यति  ।। २६ ।।** (०४)

**वरुणः**

रसा वै मत्प्रसूता हि भूतदेहेषु राघव।
**अहं वै त्वां प्रब्रवीमि मैथिली प्रतिगृह्यताम्  ।। २७ ।।** (०५)

**पारं परं त्वमेवासीर्विष्णुब्रह्मात्मरूपवान् ।**
**अपारपारोऽसि हरे पारेभ्योऽपि परः सदा ।**

---

(०१) (हि (for (अ)हं); व्यचिन्तयं; ज्ञाचिन्तयं; यथा (for तथा);(इ)ह (for हि); गतिर् (for पतिर्) .
(०२) (ख-अग्नीरापस्तथाकाशं पृथिवी वायुरेव च ।,विमुञ्चयन्तु मे प्राणान् यदि पापं चराम्यहम् ।। ,यथा..हं त्वामृते वीर नान्यं स्वप्ने..प्यचिन्तयम् । तथा धर्मो विनिर्दिष्टः तेमे साक्षी भवत्विह ।। यमः- धर्मराजो..स्मि काकुत्स्थ साश्री लोकस्य कर्मणः । (२) ३ (छा)वयन्त्यखिला दिशः;सुस्वरा लोकसाक्षिणी; .
(०३) ( ते (for वै);;(३) न पापा (for अपापा);;(४) गच्छस्व (for सङ्गच्छ);
सीतया (for भार्यया);.
(०४) (४) नापराध्यते; प्रतिगृह्णतां; .
(०५) ( रसाः सर्वे मत्प्रसूता; रसा मम प्रसूता हि;रसानि मत्प्रसूतानि;समन्तस्यःप्रसूता हि; रसं मत्तः प्रसूतं हि; सर्वमन्तश्वरो वेत्ति;;(२) देहे देहेषु;देहिदेहेषु हितो देवेषु; सर्वदेवेषु (for भूतदेहेषु);;(३) च त्वां; त्वां वै; ब्रविमीह;ब्रवीभयेतन् (for प्रब्रवीमि);;(४) जानकी (for मैथिलि); .

ब्रह्मापरोऽसि विश्वेश परपारनयस्तथा ।

पराणां च परास्यसि पारः पारः सदैव सः।

सर्वभूतनिवासी च भूमन्स परमस्तथा ।;

यमः

धर्मोऽहमस्मि काकुत्स्थ साक्षीलोकस्य कर्मणाम्।
शुभाशुभानां सीतेयमपापा प्रतिगृह्यताम्।(०१)

**ब्रह्मा**

पुत्र नैतदिहाश्चर्यं त्वयि राजर्षिधर्मणि।
साधो सद्वृत्त काकुत्स्थ शृणु चेदं वचो मम ।। २८ ।। (०२)

शत्रुरेष त्वया वीर देवगन्धर्वभोगिनाम्।
यक्षाणां दानवानां च महर्षीणां च पातितः ।। २९ ।। (०३)

अवध्यः सर्वभूतानां मत्प्रसादात्पुराभवत्।
कस्माच्चित्कारणात्पापः कश्चित्कालमुपेक्षितः ।। ३० ।। (०४)

वधार्थमात्मनस्तेन हृता सीता दुरात्मना।
नलकूबरशापेन रक्षा चास्याः कृता मया ।। ३१ ।। (०५)

यदि ह्यकामां सेवेत स्त्रियमन्यामपि ध्रुवम्।
शतधास्य फलेन्मूर्धा इत्युक्तः सोऽभवत्पुरा ।। ३२ ।। (०६)

---

(०१) (धर्मः (for यमः); धर्मोहमस्मि (for धर्मराजोऽस्मि) .

(०२) ( अत्र (for पुत्र);;(२) सद्वृत्त-धर्मणि; राजर्षिधर्मणि;;(३) साधौ;-मार्गस्ते; काकुत्स्थ;-मार्गस्थः;-मार्गस्थ;.

(०३) ( एषां (for एष); धीर (for वीर);;(४) मानवानां निपातितः; .

(०४) ( सत्वानां;शत्रूनां (for भूतानां);;(४) किञ्चित् (for कश्चित्); .

(०५) (३) नडकूबर;;(४) हि; वा (for च);कृता मया; .

(०६) आसीदेत् ;. सेवेत; आसीदे. ; सीतां वा;. मन्येत; आसीत (for आसेवेत्););२) प्रियाम् (for

नात्र शङ्का त्वया कार्या प्रतीच्छेमां महाद्युते।
कृतं त्वया महत्कार्यं देवानाममरप्रभ ॥ ३३ ॥ [०१]

**दशरथः**

प्रीतोऽस्मि वत्स भद्रं ते पिता दशरथोऽस्मि ते।
अनुजानामि राज्यं च प्रशाधि पुरुषोत्तम ॥ ३४ ॥ [०२]

**रामः**

अभिवादये त्वां राजेन्द्र यदि त्वं जनको मम।
गमिष्यामि पुरीं रम्यामयोध्यां शासनात्तव ॥ ३५ ॥[०३]

**मार्कण्डेयः**

तमुवाच पिता भूयः प्रहृष्टो भरतर्षभ।
गच्छायोध्यां प्रशाधीति रामं रक्तान्तलोचनम् ॥ ३६ ॥ [०४]

सम्पूर्णानीह वर्षाणि चतुर्दश महाद्युते।*[०५]

**मार्कण्डेयः-**

ततो देवान्नमस्कृत्य सुहृद्भिरभिनन्दितः।

---

.स्त्रिय);इति (for अपि); ब्रुवन् (for ध्रुवम्);;(३) पतेद्; भवेद् (for . फलेद्);मूर्धा (for . देह);;(४) इत्युक्तोसौ पुराभवत .

(०१) ( तु (for (अ)त्र);;(२) महामते (for द्युते);सङ्गच्छ सह भार्यया;;(३) कर्म (for कार्य);;(४) अमरप्रभो; प्रभः;अमितप्रभः;.

(०२) ( तव; (for . वत्स);;(२) तव (अ)स्म्यहं (for (अ)स्मि ते);;(३) ते राज्यं; राज्यं स्वं (for राज्यं च);.

(०३) ( क-अर्धचतुष्टयं नास्ति, त्वा-;;(२) पिता मे जनको यदि .

(०४) (मार्कण्डेय उ); भरतर्षभ; मनुजर्षभ. ; प्रहृष्टेनान्तरात्मना. -;;(३) (इ)ति (for . त्वं);;(४) रामं रक्तान्त-लोचनं .

(०५) (च; (इ)ह (for हि)); .

महेन्द्र इव पौलोम्या भार्यया स समेयिवान् ।। ३७ ।। (०१)

ततो वरं ददौ तस्मै ह्यविन्ध्याय परन्तपः।
त्रिजटां चार्थमानाभ्यां योजयामास राक्षसीम् ।। ३८ ।।(०२)

तमुवाच ततो ब्रह्मा देवैः शक्रपुरोगमैः।

**ब्रह्मा-**

कौसल्यामातरिष्टांस्ते वरानद्य ददानि कान् ।। ३९ ।। (०३)

**मार्कण्डेयः**

वव्रे रामः स्थितिं धर्मे शत्रुभिश्चापराजयम्।
राक्षसैर्निहतानां च वानराणां समुद्भवम् ।। ४० ।।

ततस्ते ब्रह्मणा प्रोक्ते तथेति वचने तदा।
समुत्तस्थुर्महाराज वानरा लब्धचेतसः ।। ४१ ।। (०४)

सीता चापि महाभागा वरं हनुमते ददौ**

**सीता-**

रामकीर्त्या समं पुत्र जीवितं ते भविष्यति ।। ४२ ।। (०५)

दिव्यास्त्वामुपभोगाश्च मत्प्रसादकृताः सदा।

---

(०१) (२) अभिसंवृतः;;(४) वैदेह्या; सीता (for भार्यया);भार्याया समुपेयिवान्; सभार्यः पुरमेयिवान्; भार्यया सह सीतया;.

(०२)(१/२) तयोर् (क्य ततो); वरं ददौ.;तस्मा; तस्माद् (क्य तस्मै);अ (य)विध्याय; अवन्ध्याय.;ह्यविध्यायग्र; अवध्याय (क्य अविन्ध्याय); परन्तप;;(३)- चानुमानाभ्यां; दान; चार्थ-कामाभ्यां;

(०३) (३) शक्रपुरोगमः (for मुखैर्वृतः); कौशल्या-,; कौशल्यापुत्र ते राम.; (४) अन्याद् (for अद्य); ददामि;.

(०४) ( तथेति (for ततस्ते);.सर्वे (for प्रोक्ते);;(२) ततस्तद्-; ततस्ते; तथेव (for तथेति); वचनात् (for वचने); तथा (for तदा);;(४) लब्धचेतनाः .

(०५) ( चैव (for चापि); महाभाग;;(२) हनुमतो;;(३) रामकीर्ति-; वत्स (for पुत्र)। .

उपस्थास्यन्ति हनुमन्निति स्म हरिलोचन ॥ ४३ ॥[०१]

ततस्ते प्रेक्षमाणानां तेषामक्लिष्टकर्मणाम्।
अन्तर्धानं ययुर्देवाः सर्वे शक्रपुरोगमाः ॥ ४४ ॥[०२]

दृष्ट्वा रामं तु जानक्या सङ्गतं शक्रसारथिः।
उवाच परमप्रीतः सुहृन्मध्य इदं वचः ॥ ४५ ॥[०३]

**मातलिः-**

देवगन्धर्वयक्षाणां मानुषासुरभोगिनाम्।
अपनीतं त्वया दुःखमिदं सत्यपराक्रम ॥ ४६ ॥[०४]

सदेवासुरगन्धर्वा यक्षराक्षसपन्नगाः।
कथयिष्यन्ति लोकास्त्वां यावद्भूमिर्धरिष्यति ॥ ४७ ॥[०५]

**मार्कण्डेयः-**

इत्येवमुक्त्वानुज्ञाप्यरामं शस्त्रभृतां वरम्।
सम्पूज्यापाक्रमत्तेन रथेनादित्यवर्चसा ॥ ४८ ॥[०६]

ततः सीतां पुरस्कृत्य रामः सौमित्रिणा सह।
सुग्रीवप्रमुखैश्चैव सहितः सर्ववानरैः ॥ ४९ ॥[०७]

---

(०१) ( च सुख (for त्वामुप);;(२) प्रसादात् (for प्रसाद);तथा (for सदा);;(४) नित्यं (for इति); .
(०२) ( तत्; तु (for ते); ततः सम्प्रेक्ष्य (क्ष) माणानां.;;(२) कारिणां (for कर्मणाम्);
(३/४) देवाः सर्वे;.
(०३) (१/२) तु रामं;सङ्गतं (मं) (for समेतं);;(३) परमः;परमं;;(४) सुरमध्य (for सुहृन्मध्य); .
(०४) (२) मनुष्योरगरक्षसां; मानुषासुर-रक्षसां; राक्षसानां च भोगिनाण; मनुष्योरगभोगिनां मनुष्यासुर;;(४) इति (for इदं);.
(०५) ( गन्धर्व;;(२) राक्षसकिंनराः;किंनरपन्नगाः;गन्धर्वपन्नगाः;;(३) लोके (for लोकास्) ;;(४)भविष्यति (for धरि);.
(०६) (३) प्राक्रमत्;(अ)पक्रमत् (for (अ)पाक्रमत्); .
(०७) (३) चापि (for चैव); .

विधाय रक्षां लङ्कायां विभीषणपुरस्कृतः।
सन्ततार पुनस्तेन सेतुना मकरालयम् ॥ ५० ॥ [०१]

पुष्पकेण विमानेन खेचरेण विराजता।
कामगेन यथामुख्यैरमात्यैः संवृतो वशी ॥ ५१ ॥ [०२]

ततस्तीरे समुद्रस्य यत्र शिश्ये स पार्थिवः ।
तत्रैवोवास धर्मात्मा सहितः सर्ववानरैः ॥ ५२ ॥ [०३]

अथैनान्राघवः काले समानीयाभिपूज्य च ।
विसर्जयामास तदा रत्नैः सन्तोष्य सर्वशः ॥ ५३ ॥ [०४]

गतेषु तेषु सर्वेषु(वानरेन्द्रेषु) गोपुच्छर्क्षेषु तेषु च ।
सुग्रीवसहितो रामः किष्किन्धां पुनरागमत् ॥ ५४ ॥ [०५]

विभीषणेनानुगतः सुग्रीवसहितस्तदा।
पुष्पकेण विमानेन वैदेह्या दर्शयन्वनम् ॥ ५५ ॥ [०६]

किष्किन्धां तु समासाद्य रामः प्रहरतां वरः।
अङ्गदं कृतकर्माणं यौवराज्येऽभ्यषेचयत् ॥ ५६ ॥ [०७]

ततस्तैरेव सहितो रामः सौमित्रिणा सह।

---

(०१) ( लङ्काया;;(३) उत्ततार;स ततार; पुरं; रघु (for पुन);तं तु (for तेन); .
(०२) ( पुष्पकेन;;(२) खचरेण; पुरस्कृता;विराजिता;;(४) स (सु)वृतो बली (for वशी); .
(०३) (२) शिष्ये;राघवः (for पार्थिवः);;(३) यत्रै (for तत्रै);;(४) तत्र (for सर्व); .
(०४) (ए)तान् (for (ए)नान्);;(३) हरीन् (for तदा);;(४) सम्पूज्य (for तोष्य); .
(०५) ( गन्धर्व (for गतेषु); तेषु सर्वेषु (for वानरे);;(२) गोपुच्छेषु च (for गोपुच्छ); सर्वशः (for तेषु च);;(४) किष्किन्दां; किष्किन्ध्यां; पुनराव्रजत्; समुपागतम्;.
(०६) ( मतः (for गतः);;(२) ततः (for तदा);;(३) पुष्पकेन; .
(०७) ( किष्किन्दां; किष्किन्धयां; च (for तु);;(२) शस्त्रभृतां (for प्रहरतां);;(४) भिषिश्चयत्; भिषेचयत्;.

**यथागतेन मार्गेण प्रययौ स्वपुरं प्रति ।। ५७ ।।[०१]**

**अयोध्यां स समासाद्य पुरीं राष्ट्रपतिस्ततः।**
**भरताय हनूमन्तं दूतं प्रास्थापयत्तदा ।। ५८ ।।[०२]**

**लक्षयित्वेङ्गितं सर्वं प्रियं तस्मै निवेद्य वै।**
**वायुपुत्रे पुनः प्राप्ते नन्दिग्राममुपागमत् ।। ५९ ।।[०३]**

**स तत्र मलदिग्धाङ्गं भरतं चीरवाससम्।**
**नन्दिग्रामगतं रामः सशत्रुघ्नं स राघवः***
**अग्रतः पादुके कृत्वा ददर्शासीनमासने ।। ६० ।।[०४]**

After Mension in TRK 60.

**सङ्गतो भरतेनाथ शत्रुघ्नेन च वीर्यवान्।**
**राघवः सहसौमित्रिर्मुमुदे भरतर्षभ ।। ६१ ।।[०५]**

**ततो भरतशुत्रुघ्नौ समेतौ गुरुणा तदा।**
**वैदेह्या दर्शनेनोभौ प्रहर्षं समवापतुः ।। ६२ ।।[०६]**

**तस्मै तद्भरतो राज्यमागतायातिसत्कृतम्।**

---

(०१) (४) जगाम वसतिं प्रति .
(०२) ( च;तु (for स);;(२) राष्ट्रे परं ततः;राष्ट्र (राष्ट्रे)परन्तपः;;(३) हनुमन्तं;;(४) इगत् (for दूतं); प्रास्थापयत्; रघुः;द्रुतं (for तदा); .
(०३) (इं)गितैः (for (इं)गितं); सर्वैः;;(२) सर्व (for तस्मै);वै'; तत्; सः (for च);;(३) ततः (for पुनः); वायुपुत्रस्ततः प्राप्तः;;(४) उपागतः (तं) पुरागमत्;, उपाविशत् (for उपागमत्); .
(०४) (२) जटिलं (for भरतं); .
(०५) ( सङ्गतो (for समेत्य);;(४) मुदितो (for मुमुदे); .
(०६) ( ततो; तदा (for तथा);;(२) मुमुदे (for समेतौ);;(३) दर्शने चौ (for दर्शनेनो); .

न्यासं निर्यातयामास युक्तः परमया मुदा ॥ ६३ ॥ [०१]

ततस्तं वैष्णवे शूरं नक्षत्रेऽभिमतेऽहनि।
वसिष्ठो वामदेवश्च सहितावभ्यषिञ्चताम् ॥ ६४ ॥ [०२]

सोऽभिषिक्तः कपिश्रेष्ठं सुग्रीवं ससुहृज्जनम्।
विभीषणं च पौलस्त्यमन्वजानाद्गृहान्प्रति ॥ ६५ ॥ [०३]

अभ्यर्च्य विविधैर्भोगैः प्रीतियुक्तौ मुदा युतौ।
समाधायेतिकर्तव्यं दुःखेन विससर्ज ह ॥ ६६ ॥ [०४]

पुष्पकं च विमानं तत्पूजयित्वा स राघवः।
प्रादाद्वैश्रवणायैव प्रीत्या स रघुनन्दनः ॥ ६७ ॥ [०५]

ततो देवर्षिसहितः सरितं गोमतीमनु।
दशाश्वमेधानाजह्रे जारूथ्यान्स निरर्गलान् ॥ ६८ ॥ [०६]

जारूथ्यान् त्रिगुणदक्षिणानित्यर्जुनमिश्रः ।

दश वर्षसहस्राणि दश वर्षशतानि च ।
राज्यं कारितवान्रामः पश्चात्स त्रिदिवं गतः ।

---

(०१) (२) भिसङ्कृतं; भिसत्कृता; ’तिसत्कृतं; भि (ति) संस्कृतं,;;(४) संयुक्तं परया मुदा (तदा) .
(०२) ( राघवं; वैष्णवं.;ततस्तं वै महाशूरं;;(२) नक्षत्रेभिहते; भिजित्ते; त्रे महि (मह) ते,;;(३) वशिष्ठो.;;(४) (अ) भिषिञ्चतां .
(०३) ( वसिष्ठेन (for कपिश्रेष्ठं);;(२) ससुहृद्गणं; सुसुहृज्जन;;(३) धर्मज्ञम् (for पौलस्त्यम्);;अनुजानाद्;. अभ्यजानाद् (for अन्वजानाद्); पुरीन्; गृहं (for गृहान्); बली (for प्रति); .
(०४) ( भोगैः (for रत्नैः);;(२) मुदान्वितौ (for मुदा युतौ);;(३) समाधीय; ’ध्याय; दाय (for धाय); तौ दुःखेन ससर्ज ह;.
(०५) ( तु; तद् (for च); च (for तत्);;(२) (अ)य (for स);;(४) प्रतिः(for प्रीत्या); वै; च (for स); प्रीत्या परमया युतः.
(०६) (३) शताश्व;;(४) ह्ययोध्यां; जारूथ्यां; हैरण्यान्; जानक्या (for जारूथ्यान्); .

अस्मिन्  पर्वणि २४६अध्याये ६८श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि श्रीरामाभिषेके षट्चत्वारिंशदधिकद्विशततमोऽध्यायः ।। २४६ ।।

# २४७. सप्तचत्वारिंशदधिकद्विशततमो अध्यायः ।।

मार्कण्डेयेन स्वस्यानुपमदुःखानुभवितृत्वबुद्ध्या शोचतो युधिष्ठिरस्य रामोपाख्यानकथनापूर्वकंहेतूपन्यासेन शोकापनीदनम् ।।

**मार्कण्डेयः**

एवमेतन्महाबाहो रामेणामिततेजसा।
प्राप्तं व्यसनमत्युग्रं वनवासकृतं पुरा ।। १ ।। (०१)

तदुक्त भवता सर्वं रामायणमनुत्तमम् ।
आयुष्यमिदमाख्यानं शृण्वतामघनाशनम् ।
पुत्रपौत्रप्रदं पुंसामायुरारोग्यवर्धनम् ।
तस्मात्त्वमपि राजेन्द्र भ्रातृभिः सह धर्मज ।

मा शुचः पुरुषव्याघ्र क्षत्रियोऽसि परन्तप।

(०१) ( महाप्राज्ञ (for महाबाहो);;(२) राघवेणामितौजसा;;(४) वने (for वन); पुनः (for . पुरा); .

बाहुवीर्याश्रि मार्गे वर्तसे पुरुषर्षभ(दीप्तनिर्णये)।[०१]
न हि ते वृजिनं किञ्चिद्वर्तते परमण्वपि** ॥ २ ॥[०२]

अस्मिन्मार्गे निषीदेयुः सेन्द्रा अपि सुरासुराः ॥ ३ ॥[०३]

संहत्य निहतो वृत्रो मरुद्भिर्वज्रपाणिना।
नमुचिश्चैव दुर्धर्षो दीर्घजिह्वा च राक्षसी ॥ ४ ॥[०४]

सहायवति सर्वार्थाः सन्तिष्ठन्तीह सर्वशः।
किं नु तस्याजितं सङ्ख्ये यस्य भ्राता धनञ्जयः ॥ ५ ॥[०५]

अयं च बलिनां श्रेष्ठो भीमो भीमपराक्रमः।

युवानौ च महेष्वासौ वीरौ माद्रवतीसुतौ।
एभिः सहायैः कस्मात्त्वं विषीदसि परन्तप ॥ ६ ॥[०६]

य इमे वज्रिणः सेनां जयेयुः समरुद्गणाम्
त्वमप्येभिर्महेष्वासैः सहायैर्देवरूपिभिः** ॥ ७ ॥[०७]

लक्षालङ्कारः - एभिः सहायैः इत्यत्र एभिः सहायैः सहित इति योग्यपदाध्याहारः ।

---

(०१) ( भरत (for पुरुष);;(२) परन्तपः.;;(३)अ-मे, श्रि (for श्रये);;(४) प्राप्तनिणये; दीप्तिनिर्णये .
(०२) (२) वर्तते (for दृश्यते);.परमाण्वपि;.परमावपि .
(०३) ( तस्मिन् (for अस्मिन्) निषी ( षे)देयुः;;(४) सेन्द्रापि ससुरासुराः .
(०४) ( संहत्याभिहते वृत्रे.;;(२) मन्युभिर् (for मरुद्भिर्);;(३) च (स); महावीर्यो (for चैव दुर्धर्षो);;(४) दीप्तजिह्वा;दीर्धजङ्घा;.
(०५) ( ते सर्वाः(for सर्वार्थाः);;(२) सन्तिष्टन्ते च; हि (for (इ)ह); सर्वतः नित्यशः ;;(३) न; तु (for नु);स्वर्गे; सङ्घे; युद्धे; सङ्घे (for सङ्ख्ये);;(४) भ्राता यस्य;.
(०६) ( तु (for च);;(३) अयुवानो;सुवीर्णौ च; योद्धारौ च (for युवानौ च);;(४) वीरौ;इमौ;विमौ (for यमौ);(६) नराधिप (for परं) .
(०७) ( यदिमे; (for य इमे); पत्रिण (for वज्रिणः); सेन्द्रा (for सेनां);;(२) दहेयुः;समरुद्रणाः;द्रणान् ;द्रणं; .

विजेष्यसे रणे सर्वानमित्रान्भरतर्षभ ॥ ८ ॥ [०१]

इतश्च त्वमिमां पश्य सैन्धवेन दुरात्मना।
बलिना वीर्यमत्तेन हृतामेभिर्महात्मभिः ॥ ९ ॥ [०२]

आनीतां द्रौपदीं कृष्णां कृत्वा कर्म सुदुष्करम्।
जयद्रथं च राजानं विजितं वशमागतम् ॥ १० ॥ [०३]

असहायेन रामेण वैदेही पुनराहृता।
हत्वा सङ्ख्ये दशग्रीवं राक्षसं भीमविक्रमम् ॥ ११ ॥ [०४]

यस्य शाखामृगा मित्राण्यक्षाः कालमुखास्तथा।
जात्यन्तरगता राजन्नेतद्बुद्ध्यानुचिन्तय ॥ १२ ॥ [०५]

तस्मात्स त्वं कुरुश्रेष्ठ मा शुचो भरतर्षभ।
त्वद्विधा हि महात्मानो न शोचन्ति परन्तप ॥ १३ ॥ [०६]

**वैशम्पायनः**

एवमाश्वासितो राजा मार्कण्डेयेन धीमता।
त्यक्त्वा दुःखमदीनात्मा पुनरप्येनमब्रवीत् ॥ १४ ॥ [०७]

---

(०१) (ए)तैर् (for (ए)भिर्);;(२) विजेष्यसे; कुरुन् (for रणे); .
(०२) ( भ्रतृभिश्चापि पश्येतां .
(०३) ( आनीता द्रौपदी कृष्ण;;(२) सुदुष्कृतं ;;(४) च समागतं; च सहानुगं (for वशमा); .
(०४) ( सहसा येन रा;;(३) सङ्ख्ये; सङ्ख्ये;;(४) भीमदर्शनं .
(०५)(१/२) मित्राणयृक्षाः;मित्रमृक्षाः;ऋक्षा मित्राः;कृष्ण (क्य काल);;(३) गतान्; कृता (क्य गता);;(४) एतान्; इति (क्य एतद्);विचारय;विचिन्तय; विचिन्त्यतां; (अ)नुचिन्त्य च (क्य (अ)नुचिन्तय);
(०६) ( एतस्मात् (for तस्मात्त्वं); वै कुरुश्रेष्ठ (for कुरु); तस्मात्स त्वं (सर्वं) कुरु-श्रेष्ठ.;;(३) तद्विधाय (for त्वद्विधा हि); महा- बाहो (for त्मानो); .
(०७) ( राजन् (for राजा); मार्काण्डेयने.;;(३) दैन्यम् (for दुःखम्);;(४) अप्येवम्;
. अप्येनम् (for एवेदम्); ),

श्रुत्वा रामायणं सर्वं त्यक्त्वा दुःखं युधिष्ठिरः ।
मार्कण्डेयं पुनः प्राह भ्रातृभिः सह संमतैः ।

अस्मिन् पर्वणि २४७अध्याये १४श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि रामोपाख्यानपर्वणि युधिष्ठिराश्वासने सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः ।। २४७ ।।

# २४८. अष्टाचत्वारिंशदधिकद्विशततमो अध्यायः ।।

Consept Paste. P.No.1419 .

**युधिष्ठिरः**

नात्मानमनुशोचामि नेमान्भ्रातन्महामुने।
हरणं चापि राज्यस्य यथेमां द्रुपदात्मजाम् ।। १ ।। (०८)

द्यूते दुरात्मभिः क्लिष्टाः कृष्णया तारिता वयम्।
जयद्रथेन च पुनर्वनाच्चापि हृता बलात् ।। २ ।। (०९)

(०८) (२)नेमान् भ्रातून्; तथा मुने; परन्तप (for महामुने); .
(०९) ( क्लिष्टा; क्लिष्टां (२ ) क्लिष्टया (for कृष्णया); कृष्णेयं तापिता वयं; क्लिष्टया तारितं वनं, (३) बलाद

अस्ति सीमन्तिनी काचिद्दृष्टपूर्वापि वा श्रुता।
पतिव्रता महाभागा यथेयं द्रुपदात्मजा ॥ ३ ॥ (०१)

**मार्कण्डेयः**

शृणु राजन्कुलस्त्रीणां महाभाग्यं युधिष्ठिर ।
सर्वमेतद्यथा प्राप्तं सावित्र्या राजकन्यया ॥ ४ ॥ (०२)

आसीन्मद्रेषु धर्मात्मा राजा परमधार्मिकः।
ब्रह्मण्यश्च महात्मा च सत्यसन्धो जितेन्द्रियः ॥ ५ ॥ (०३)

यज्वा दानपतिर्दक्षः पौरजानपदप्रियः।
पार्थिवोऽश्वपतिर्नाम सर्वभूतहिते रतः ॥ ६ ॥ (०४)

क्षमावाननपत्यश्च सत्यवाग्विजितेन्द्रियः।
अतिक्रान्तेन वयसा सन्तापमुपजग्मिवान् ॥ ७ ॥ (०५)

अपत्योत्पादनार्थं च तीव्रं नियममास्थितः।
काले परिमिताहारो ब्रह्मचारी जितेन्द्रियः ॥ ८ ॥ (०६)

हुत्वा शतसहस्रं स सावित्र्या राजसत्तमः।

---

(for पुनद्); (४) बलाद्; वने (for वनद्); अपहृतं; चापि हृता; चापहृता वनात्; पुनः;(अ) बला (for बलात्); .

(०१) (२) यथा; (अ)पि वा (for (अ) थ वा); (४)यथैव; .

(०२) मार्काण्डेयः; श्रीमाकण्डेयः, ( वर-स्त्रीणां; कुरुं; (३) यथाप्राप्ते; यथावृत्तं; .

(०३) ( मन्द्रेषु; माद्रेषु (३) महात्मा च; कृतज्ञश्व (for शरं); (४) सत्यवान्संयतेन्द्रियः .

(०४) ( दानमतिर् दान्तः (for दक्षः); .

(०५) (२) सत्यवान् संय (जि) तेन्द्रियः; यो जितेन्द्रियः(for विजिं); वेदवेदाङ्गपारगः.(३) मनसा (for वयसा) (४) इव (for उप); .

(०६) ( नार्य च; नार्थाय (४) बभूव ह (for जितेन्द्रियः); .

**षष्ठे षष्ठे तदा काले बभूव मितभोजनः ॥ ९ ॥ (०१)**

**लक्षालङ्कारः - सावित्र्या राजसत्तम इत्यत्र सावित्र्या गायत्रीमन्त्रेण ।**

एतेन नियमेनासीद्वर्षाण्याष्टादशैव तु।
**पूर्णे त्वष्टादशे वर्षे सावित्री तुष्टिमभ्यगात्** ॥ १० ॥(०२)**

रूपिणी तु तदा राजन्दर्शयामास तं नृपम्।(०३)

अग्निहोत्रात्समुत्थाय हर्षेण महतान्विता। ॥ ११ ॥

उवाच चैनं वरदा वचनं पार्थिवं तदा।(०४)
सा तमश्वपतिं राजन्सावित्री नियमे स्थितम् ॥ १२ ॥

**सावित्री-**

ब्रह्मचर्येण शुद्धेन दमेन नियमेन च।
**सर्वात्मना च भक्त्या च तुष्टास्मि तव पार्थिवा ॥ १३ ॥ (०५)**

वरं वृणीष्वाश्वपते मद्रराज यदीप्सितम्।
**न प्रमादश्च धर्मेषु कर्तव्यस्ते कथञ्चन ॥ १४ ॥ (०६)**

**अश्वपतिः**

अपत्यार्थः समारम्भः कृतो धर्मेप्सया मया।

---

(०१) ( हुत्वा शतसहसयां स; हुताशनसहस्रं स, (२)सत्तमः सावित्र्यां सत्तमः (३) गते; यथा(for तदा) षष्ठे काले तदा राजन्; .

(०२) ( यतेन (for एतेन); (२) च; ह; हि (for तु); वर्षाणि दश चाष्ट च; वर्षाण्यष्टौ दशैव तु; (४) तोषम् (for तुष्णिम्); सावित्रि तं समभ्यया (गा);तु; त्री तोषमभ्ययात्; .

(०३) (रूपिणी तु (for स्वरूं); हि सावित्री (for तदा राजन्); .

(०४) ( समुत्पन्ना (for स्थाय); (२) सौम्येन वपुषान्विता; (३) वपुषा (for वरदा); .

(०५)सावित्र्युवाच (सावित्री); (२) दमेन नियमेन नियमेन च तेनघ (३) भक्त्या च(for मद्भक्त्या); .

(०६) (२) यदीप्सितं, यदि-च्छसि'; (३)कर्तव्यम्; तु (च) ते धर्मे; स्वधर्मेषु; (४) कदाचन त्वाया धर्मे कदाचन; .

**पुत्रा मे बहवो देवि भवेयुः कुलभाज(व)नाः ॥ १५ ॥ [०१]**

**तुष्टासि यदि मे देवि वरमेतं वृणोम्यहम्।**
**सन्तानं परमो धर्म इत्याहुर्मां द्विजातयः ॥ १६ ॥ [०२]**

**एवमुक्त्वा तु सावित्री प्रत्युवाच च तं नृपम्।**

**सावित्री-**

पूर्वमेव मया राजन्नभिप्रायमिमं तव ।
**ज्ञात्वा पुत्रार्थमुक्तो वै भगवांस्ते पितामहः ॥ १७ ॥ [०३]**

प्रसादाच्चैव तस्मात्ते स्वयम्भुविहिताद्भुवि।
**कन्या तेजस्विनी सौम्य क्षिप्रमेव भविष्यति ॥ १८ ॥ [०४]**

उत्तरं च न ते किञ्चिद्व्याहर्तव्यं कथञ्चन।
**पितामहनिसर्गेण तुष्टा ह्येतद्ब्रवीमि ते ॥ १९ ॥ [०५]**

**मार्कण्डेयः**

**स तथेति प्रतिज्ञाय सावित्र्या वचनं नृपः।**
**प्रसादयामास पुनः क्षिप्रमेतद्भविष्यति ॥ २० ॥ [०६]**

---

(०१) ( अपत्र्यार्थ; (२) ततो (for कृतो); (३)बहुला (for बहवो); (४)कुलपावनाः वर्धनाः .

(०२) ( तुष्टा च; तुष्टा तु; (२) वरम् (for कामम्); एनं; एतद् ; एवं; (३) सन्तानः, हि वृणो परमो; हि परं; हि पुरो; धर्मम्; .

(०३) (२) इदं (for इमं); (४) भगवांस्ते (for तव हेतोः) .

(०४) ( प्रसादं चैव; दत्ता (for तस्मात्); (२)स्वयं तु; स्वयम्भू (for स्वयम्भुं); नृप (for भुवि); स्वयम्भु (भू); विहितानघ; स्वयं विहितवत्यहं; (३) सौम्या ; नाम; .

(०५) ( नेह; न च; (२) व्याहर्तं वै; (३)विसर्गेण; नियोगेन; .

(०६) मार्काण्डेय ( तथैव; (२) नृप; (३) तदा (for पुनः); प्रसादादेव नोवाच (४) एवं; एतद्; चैव; . त्वेतद् (for एव); क्षिप्रमेतद्भविष्यति; पुत्रार्थे किंचिदुत्तरं; .

अन्तर्हितायां सावित्र्यां जगाम स्वपुरं नृपः।
स्वराज्ये चावसद्वीरः प्रजा धर्मेण पालयन् ।। २१ ।।[०१]

कस्मिंश्चित्तु गते काले स राजा नियतव्रतः।
ज्येष्ठायां धर्मचारिण्यां महिष्यां गर्भमादधे ।। २२ ।।[०२]

राजपुत्र्यास्तु गर्भः स मालव्या भरतर्षभ।
व्यवर्धत तदा शुक्ले तारापतिरिवाम्बरे ।। २३ ।।[०३]

प्राप्ते काले तु सुषुवे कन्यां राजीवलोतचनाम्।
क्रियाश्च तस्या मुदितश्चक्रे च नृपसत्तमः ।। २४ ।।[०४]

सावित्र्या प्रीतया दत्ता सावित्र्या हुतया ह्यपि।
सावित्रीत्येव नामास्याश्चक्रुर्विप्रास्तथा पिता ।। २५ ।।[०५]

सा विग्रहवतीव श्रीर्व्यवर्धत नृपात्मजा।
कालेन चापि सा कन्या यौवनस्था बभूव ह ।। २६ ।।[०६]

तां सुमध्यां पृथुश्रेणीं प्रतिमां काञ्चनीमिव।
प्राप्तेयं देवकन्येति दृष्ट्वा सम्मेनिरे जनाः ।। २७ ।।[०७]

तां तु पद्मपलाशाक्षीं ज्वलन्तीमिव तेजसा।

---

(०१) (२) स्वगृहान्; स्वपुरं नृप; पुनः; (३) स्वं राज्यं वीरः (for प्रतिः); स राजोपा वसत्प्रीतः; (४) प्रजां;
.
(०२) (३)श्रेष्ठायां; (४) आदधत्; .
(०३) ( राजपुत्र्यासू ;पत्न्यां; तु स; राजपुत्र्याम-भूद्गर्भो; (२) मानव्या (व्यां); मालम्ब्य; ह्यालम्भ्य; मालव्या ; कालेन; (३) तदा; महाञ् (for यथा); (४) ताराधिप इवाम्बरे; .
(०४) ( प्राप्तकाले (अ)जनयत् (for सुषुवे); (२)कमलं (for राजीवं); (३) नृपतिं (for मुदितं); (४) चक्रे च (स); नृपसत्तमः; चक्रे च च; नृपसत्तमः चके च नृपतिस्तथा; चके स (सु); मुदितस्तदा; .
(०५) (२) गतया (for हुं); त्वपि; त्विति (for ह्यपि); (३) च(for (ए)व); .
(०६) ( श्री सावित्री विग्रहवती; सावित्रीग्रवती च श्री; (३)(ए) व तु ; नाति (for चापि); कन्या सा; .
(०७) (३) प्राप्तेयं देवि कस्येति; (४) तां (for सं); .

न कश्चिद्वरयामास तेजसा प्रतिवारितः ।। २८ ।।[०१]

अथोपोष्य शिरःस्नाता देवतामभिगम्य सा।
हुत्वाग्निं विधिवद्विप्रान्वाचयामास पर्वणि ।। २९ ।।[०२]

ततः सुमनसः शेषाः प्रतिगृह्य महात्मनः।
पितुः समीपमगमद्देवी श्रीरिव रूपिणी ।। ३० ।।[०३]

लक्षालङ्कारः - ततः सुमनसः शेषा इत्यत्र शेषाः देवपूजाशेषभूताः सुमनसः पुष्पाणि ।

साभिवाद्य पितुः पादौ शेषाः पूर्वं निवेद्य च ।
कृताञ्जलिर्वरारोहा नृपतेः पार्श्र्वमास्थिता ।। ३१ ।।[०४]

यौवनस्थां तु तां दृष्ट्वा स्वां सुतां देवरूपिणीम्।
अयाच्यमानां च वरैर्नृपतिर्दुःखितोऽभवत् ।। ३२ ।।[०५]

राजा

पुत्रि प्रदानकालस्ते न च कश्चिद्वृणोति माम्।
स्वयमन्विच्छ भर्तारं गुणैः सदृशमात्मनः ।। ३३ ।।[०६]

प्रार्थितः पुरुषो यश्च स निवेद्यस्त्वया मम।
विमृश्याहं प्रदास्यामि वरय त्वं यथेप्सितम् ।। ३४ ।।[०७]

---

(०१) (२) दीप्यन्तीं (for ज्वलन्तीं); (४) प्रतिबाधितः; बोधितः; भासितां;,

(०२) ( अथोपास्य; स्नात्वा; (२) देवताम (न) भिं; .
(०३) (२) प्रतिपूज्य; (३)समीपं (for सकाशं); (४)देवश्रीवर (रिव) रूं; .
(०४) ( सा; (२) शेषां पूर्वं; शेषा पूर्वं नियम्य (for निवेद्य); (४)पार्श्र्वमास्थिः (ग) ता; अग्रतः स्थिता; .
(०५) ( स तां; सुतां (for तु तां); (२)स्व (for स्वां); (३)तु (for च); परैर्; नरैर् (for वरैर्); .
(०६)अश्वपतिः (for राजों); /*( पुत्र; प्रति (for पुत्रि); (३) अन्वेच्छ ; अन्विष्य; इच्छस्व; .
(०७) ( प्राकृतः; पार्थिवः; (२) संनिवेद्यसू; त्वयानघे; (३) विमृष्याहं; (४) वरयध्वं; स्व; वरं तव; ..

श्रुतं हि धर्मशास्त्रेषु पठ्यमानं द्विजातिभिः।
तथा त्वमपि कल्याणि गदतो मे वचः शृणु ।। ३५ ।। (०१)

अप्रदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः।
मृते भर्तरि पुत्रश्च वाच्यो मातुररक्षिता ।। ३६ ।। (०२)

लक्षालङ्कारः - अप्रदाता पिता वाच्य इत्यत्र वाच्यः निन्द्यः । पितुः अनु अनन्तरं अङ्गीकृतभार्यायामुदासीनः ।

इदं मे वचनं श्रुत्वा भर्तुरन्वेषणे त्वर ।
देवतानां यथा वाच्यो न भवेयं तथा कुरु ।। ३७ ।। (०३)

**मार्कण्डेयः**

एवमुक्त्वा दुहितरं तथा वृद्धांश्च मन्त्रिणः।
व्यादिदेशानुयात्रं च गम्यतां चेत्यचोदयत् ।। ३८ ।। (०४)

साभिवाद्य पितुः पादौ व्रीडितेव मनस्विनी।
पितुर्वचनमाज्ञाय निर्जगामाविचारितम् ।। ३९ ।। (०५)

सा हैमं रथमास्थाय स्थविरैः सचिवैर्वृता।

---

त्वां वराय ; येरूवं; वराय त्वां यथेच्छसि;. .

(०१) ( क-शास्त्रेण पठ्यमानं द्विजातिभिः, ख-श्रुतं हि धर्मशास्त्रं मे पट्यमानं द्विजातिभिः,घ-शास्त्रे मे पठ्यमाने द्विजोत्तमैः,च (for हि); धर्मशास्त्रं ते; शास्त्रेषु; सर्वशास्त्रे मे; (२) पठ्चमाने; मानैर्; द्रिजानिषु; (३) यथा (for तथा); .

(०२) ( याच्यो; वाह्यो; याप्यो; (२) याच्या (त्या); श्वां; याच्योश्वां; वाच्याश्वां; याप्यश्वां; (३) मृते पिवरि पुत्रस्तु; (४) याच्यो; यात्यो; याप्यो; .

(०३) (२); कुरू (for त्वर); (३) याच्यो; याप्यो; .

(०४) ( तु दुहितां (for दुहितरं); (३) यथा धर्मिणः (for मन्त्रिणः); (३) यात्रे च; यातं च; यातांश्व; यात्रं तु; यात्रां च; (४) र्वियताम् (for गम्यताम्); चेति; चापि (for इति); (अ)नोदयत्); .

(०५) ( ततः (for पुतुः); (२) तपं (for मनं); (३)अदाय (for आज्ञाय); (४) (अ)निवारिता; (अ) विचार्य सा (च); विचार्य च; विमृश्य च; (अ)विचारयन्; (for (अ)विचारितम्); .

**तपोवनानि रम्याणि राजर्षीणां जगाम ह ॥ ४० ॥ (०१)**

**मान्यानां तत्र वृद्धानां कृत्वा पादाभिवादनम्।**
**वनानि क्रमशस्तात सर्वाण्येवाभ्यगच्छत ॥ ४१ ॥ (०२)**

**एवं तीर्थेषु सर्वेषु धनोत्सर्गं नृपात्मजा।**
**कुर्वती द्विजमुख्यानां तं तं देशं जगाम ह ॥ ४२ ॥ (०३)**

अस्मिन् पर्वणि २४८अध्याये ४२श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पतिव्रतामाहात्म्यपर्वणि सावित्र्युपाख्याने अष्टाचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४८ ॥

# २४९.एकोनपञ्चाशदधिकद्विशततमो अध्यायः ॥

(०१) ( हैमरथम्; हैमं रथं समास्थाय; (२) स्थविरैः, सचिवैः; (३) वन्यानि (for रम्याणि); (४) सा (ह);
.

(०२) ( वन्यानां (for मां); (२) वान्दनं (for वन्दनम्); (३) तानिल तत्र (for तात); (४) अन्वं; अभिं (for अभ्यं); .

(०३) ( तिर्येषु सर्वेषु; वनेषु सर्वेषु; (२) वनैत्सर्ग; विचरन्ती; (३) कुर्वती; ऋषिं (for द्रीहं); कुर्व (र्व); ती; द्रिजमुख्येषु; (४) तं देशं सा (for तं तं देशं); .

Concept Paste. P.No.1425 .

**मार्कण्डेयः**

अथ मद्राधिपो राजा नारदेन समागतः।
**उपविष्टः सभामध्ये कथायोगेन भारत ।। १ ।।** [०१]

ततोऽभिगम्य तीर्थानि सर्वाण्येवाश्रमांस्तथा।
**आजगाम पितुर्वेश्म सावित्री सह मन्त्रिभिः ।। २ ।।** [०२]

नारदेन सहासीनं सा दृष्ट्वा पितरं तदा(शुभा)।
**उभयोरेव शिरसा चक्रे पादाभिवादनम् ।। ३ ।।** [०३]

**नारदः**

क्व गताभूत्सुतेयं ते कुतश्चैवागता नृप।
**किमर्थं युवतीं भर्त्रे न चैनां सम्प्रयच्छसि ।। ४ ।।** [०४]

**अश्वपतिः**

कार्येण खल्वनेनैव प्रेषिताद्यैव चागता।
**एतस्याः शृणु देवर्षे भर्तारं योऽनया वृतः ।। ५ ।।** [०५]

**मार्कण्डेयः**

---

(०१) मार्काण्डेयः; श्रीमार्कण्डेय; ( राजन्; .

(०२) (ऽ)धिगम्य; सर्वान् (for सर्वाणि); च (for (ए)व); च सा; तदा (for तथा); (३) पुनर्(for पितुर्); (४) त्री च समन्विता; .

(०३) ( समासीनं; (२)दृष्ट्वा सा तं (for सा); शुभम्; तदा; (४) वादनं(for वन्दनम्); .

(०४) ( गता-सीत्; (आ)गताभूत्; (२)पुनः (for नृप); (३) भद्रे; भद्रं; भद्र(for भर्त्रे); (४) चेमां , (for चैनां); त्वं (for सं); .

(०५) राजा उं ( तेन (for (अ)नेन); (२)समागता (for (ए)व चागता); (३)एतस्याः; ततोस्याः विप्रर्षे; (३) एतस्याः; ततोस्याः विप्रर्षे; (४) भर्ता वै च; नराधिपः भर्तारं येन सा वृता; .

सा ब्रूहि विस्तरेणेति पित्रा सञ्चोदिता शुभा।
तदैव तस्य वचनं प्रतिगृह्येदमब्रवीत् ।। ६ ।। (०१)

**सावित्री-**

आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः।
द्युमत्सेन इति ख्यातः पश्चाच्चान्धो बभूव ह ।। ७ ।। (०२)

विनष्टचक्षुषस्तस्य बालपुत्रस्य धीमतः।
सामन्तेन हृतं राज्यं छिद्रेऽस्मिन्पूर्ववैरिणा ।। ८ ।। (०३)

लक्षालङ्कारः - सामन्तेन हृतम् इत्यत्र सामन्तः प्रधानी । छिद्रम् अन्धत्वम् । पूर्ववैरं जन्मान्तरवैरं वा चक्षुषि सति गृहीतदण्डादिवैरं वा ।

स बालवत्सया सार्धं भार्यया प्रस्थितो वनम्।
महारण्यं गतश्चापि तपस्तेपे महाव्रतः ।। ९ ।।(०४)

लक्षालङ्कारः - स बालवत्सया सार्धम् इत्यत्र सः द्युमत्सेनः बालेव सा वत्सला बालवत्सला तया ।

तस्य पुत्रः पुरे जातः संवृद्धश्च तपोवने।
सत्यवाननुरूपो मे भर्तेति मनसा वृतः ।। १० ।। (०५)

---

(०१)मार्काण्डेय; श्रीमार्कं ( पितरेणेति (for विस्तं); (२)संनोदिता; सम्बोधिता सती; तदा(for शुभा); (३) तदैव तस्य (for दैव-तस्येव); (३)तदैव तस्य (for दैवतस्येव); (ए) व; (इ)ति; (for (इ)व); .
(०२) सावित्र्युवाच (सावित्री); (आसीत्साल्वेषु (४)चान्धो ; त्वंशे (for अन्धो); सः(for ह); .
(०३) ( विचक्षुषस्तदा तस्य, (२) साल्वं (for बालं); (३) ख-सामन्तेन, सामन्तेन; सामात्येन (for सामीप्येन); सामीप्येपहृतं राज्यं; (४) वैरिणा किल (for पूर्ववैरिणा); .
(०४) (२) महारण्यं; (४) सुदारूणं (for महां); .
(०५) ( अस्य (for तस्य); पुनर् (for पुरे); (३) वै; (ऽ)सौ (for मे); सत्यवान्मेनुरूपश्व; (४) ऽ मे भर्तेति समावृत; .

**नारदः**

अहो बत महत्पापं सावित्र्या नृपते कृतम्।
**अजानन्त्या यदनया गुणवान्सत्यवान्वृतः ॥ ११ ॥** [०१]

सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते।
**तथास्य ब्राह्मणाश्चक्रुर्नामैतत्सत्यवानिति ॥ १२ ॥** [०२]

बालस्याश्वाः प्रियाश्चास्य करोत्यश्वांश्च मृन्मयान्।
**चित्रेऽपि विलिखत्यश्वांश्चित्राश्व इति चोच्यते ॥ १३ ॥** [०३]

**राजा**

अपीदानीं स तेजस्वी बुद्धिमान्वा नृपात्मजः।
**क्षमावानपि वा शूरः सत्यवान्पितृवत्सलः ॥ १४ ॥** [०४]

**नारदः**

विवस्वानिव तेजस्वी बृहस्पतिसमो मतौ।
**महेन्द्र इव वीरश्च वसुधेव समन्वितः ॥ १५ ॥** [०५]

**अश्वपतिः**

अपि राजात्मजो दाता ब्रह्मण्यश्चापि सत्यवान्।
**रूपवानप्युदारो वाप्यथवा प्रियदर्शनः ॥ १६ ॥** [०६]

---

(०१) ( कष्टं (for पापं); (३)अजानत्या; तनयया (for यदनया); (४) सत्यवान्गुणवान्; .

(०२) (२) माता सत्यं; (अ)व(for प्र); (३)तथा; तेन(for ततो); .

(०३) ( तस्य; चैव; चासन् (for चास्य); (२)स (for च); मृपम (for मृन्मं); (३) चित्रे च; पित्रे च (for चित्रेऽपि); विलिखं ताल्लिँखं; चालिखं (for च लिखं); (४)तेन (for इति); कीर्त्यते (for चोच्यं); .

(०४) अश्वपतिः(for राजों); (२)स ; सु वैं (for वा); बृहस्पतिसमो मतौ; (३)शूरश्व (for वा शूरः); महेन्द्र शूरश्व; (४) पितृवत्सलः; नृपनन्दनः; मित्रनन्दनः; त्वया दोषो न दर्शितः; .

(०५) ( अदित्य इव तें; (३) वीरं (for शूरं); .

(०६) राजा (उं); (अ- सप्तार्धानि न सन्ति, घ-अर्धद्वयं नास्ति, वापि (for दाता); (२) चापि (for वापि); विर्यं (for सत्यं); (३/४); (अ)पि; .

**नारदः**

**साङ्कृते रन्तिदेवस्य स्वशक्त्या दानतः समः।**
**ब्रह्मण्यः सत्यवादी च शिबिरौशीनरो यथा ॥ १७ ॥ (०१)**

लक्षालङ्कारः - साङ्कृते रन्तिदेवस्य इत्यत्र सम्यक्कृतिः सङ्कृतिः सङ्कृतिसम्बन्धी साङ्कृतिः तस्य ।

**ययातिरिव चोदारः सोऽभ(म)वत्प्रियदर्शनः।**
**रूपेणान्यतमोऽश्विभ्यां द्युमत्सेनसुतो बली ॥ १८ ॥ (०२)**

**स वदान्यः स तेजस्वी स धीमान्स क्षमान्वितः ।**
**स दान्तः स मृदुः शूरः स सत्यः संयतेन्द्रियः** ॥ १९ ॥**

**स मैत्रः सोऽनसूयश्च स ह्रीमान्द्युतिमांश्च सः।(०३)**

**नित्यशश्चार्जवं तस्मिन्स्थितिस्तस्यैव च ध्रुवा।**
**सङ्क्षेपतस्तपोवृद्धैः शीलवृद्धैश्च कथ्यते ॥ २० ॥ (०४)**

**अश्वपतिः**

**गुणैरुपेतं सर्वैस्तं भगवन्प्रब्रवीषि मे।**

---

(०१) ( सङ्कृते; संस्कृते; आकृते; (२) स्व (for स); शक्तया दानरतः; समः; (३) सत्यसन्धश् (for वादी); .

(०२) (२) प्रविमो (for न्यतमो); .

(०३) ( सोम्यः (for शूरः); सदा दान्तः समृद्धश्व; (२)सत्यसन्धो; शूरः सत्यो (for स सत्यः स); संय (जि); तेन्द्रियः (for स जितेन्द्रियः); (३) सन्मैत्रः सोमसूर्यश्व; चानसूच (यु) श्व; (४) धीमान्स; स धीमान् (for स ह्रीमान्); द्युतिमांश्व; किर्तिमांश्व; .

(०४) ( चार्जवम् तस्य; तं च (for तस्मिन्); (२) धृतिस् ; रतिस् (for स्थितिस्); तत्रैव धृतिश्चैव त्रपा ध्रुवा (३) दमेन; स शिक्षितम् (for सङ्क्षेपतम्); ततो; तथा; तदा (for तपो); (४) शीलवृत्तैं स (for च); बाल-वृद्धैः स कथ्यते; .

दोषानप्यस्य मे ब्रूहि यदि सन्तीह केचन ।। २१ ।। [०१]

**नारदः**

एको दोषोऽस्ति नान्योऽस्य सोऽद्यप्रभृति सत्यवान्।
संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति ।। २२ ।।

एक एवास्य दोषो हि गुणानाक्रम्य तिष्ठति।
स च दोषः प्रयत्नेन न शक्यमतिवर्तितुम्।[०२]

**राजा**

एहि सावित्रि गच्छस्व अन्यं वरय शोभने।
तस्य दोषो महानेको गुणानाक्रम्य च स्थितः ।। २३ ।। [०३]

यथा मे भगवानाह नारदो देवसत्कृतः।
संवत्सरेण सोऽल्पायुर्देहन्यासं करिष्यति ।। २४ ।।[०४]

**सावित्री-**

सकृदंशो निपतति सकृत्कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ।। २५ ।। [०५]

लक्षालङ्कारः - सकृदम्भो निपतति इत्यत्र अम्भः धारोदकम् ।

दीर्घायुरथवाल्पायुः सगुणो निर्गुणोऽपि वा।
सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ।। २६ ।। [०६]

---

(०१) राजोवाच (राजा) ( सर्वैस्त्वं; भगवन् (२) भगवान् प्रब्रवीति ; मि; हि; तु; सत्यवन्तं ब्रवीषि मे; (३) दोषानप्येष; वै (for मे); .

(०२) (ऽ)स्ति; हि (for ऽस्य); नान्योस्य; (३)सोल्पायुट् (for क्षीणायुर्); (४) देहत्यागं ; न्यायं .

(०३) पतिरुवाच ( गच्छस्व (४)च (हि); स्थितः (for तिष्ठति); .

(०४) ( मां (for मे); (२) देवसत्तमः (४) देहत्याग; .

(०५) ( निप तितः.सकृज्जल्पन्ति भूमीशाः (३) सकृच्चाहं ददामी ति, (४)सतां (सकृत्); .

(०६) ( स्वल्पायुः (for वां); (३) भक्त्या (for भर्ता); .

मनसा निश्चयं कृत्वा ततो वाचाभिधीयते।
क्रियते कर्मणा पश्चात्प्रमाणं मे मनस्ततः ।। २७ ।। (०१)

**नारदः**

स्थिरा बुद्धिर्नरश्रेष्ठ सावित्र्या दुहितुस्तव ।
नैषा वारयितुं शक्या धर्मादस्मात्कथश्चन।(०२)
विलम्बो नात्र कर्तव्यो निश्चिते कर्मणि ध्रुवम् ।(०३)

नान्यस्मिन्पुरुषे सन्ति ये सत्यवति वै गुणाः।
प्रदानमेव तस्मान्मे रोचते दुहितुस्तव ।(०४)

**राजा**

अविचाल्यं तदुक्तं यत्तथ्यं भगवता वचः।
करिष्याम्येतदेवं च गुरुर्हि भगवान्मम।(०५)

**नारदः**

अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव।
साधयिष्याम्यहं तावत्सर्वेषां भद्रमस्तु वः ।। २८ ।। (०६)

---

(०१) ( मनसो निश्चितं; (२) वाचा विधीं; वाग्वा' भिधीं ; वागभिधीं (३) क्रियते कर्मण; .

(०२) ( नृपश्रेष्ठ; .

(०३) पालं; वारं(for चालं); .

(०४) (३); प्रदानमेतत्तस्मात्ते; .

(०५) अश्वपतिः (for राजों); (यत् (for हि); अविचार्यमेतदुक्तं; अवश्यमेतदुक्तं हि; अविचार्यं मे तावदुक्तं अविचार्यं तदुक्तं यत्; (२) भगवतो; तथ्यं च (हि); तथ्यं; यत्तथ्यं); भवता वचः; (३) तदैवैवं; तदैवेतं; तदेवं वै; (ए)तदेवाहं; (ए)त-देवं हि (वै); (ए)तदेवेह (४)त्वं गुरुर (for गुरूर्हि); .

(०६) (नारदः- ख-स्थिरा बुद्धिर्नरश्रेष्ट सावित्र्या दुहितुस्तव ।,नैषा बारयितुं शक्या धर्मादस्मात् कथश्चन ।। ,नान्यस्मिन्पुरुषे सा व्यवस्यति च वै गुणान् ।,प्रदानमेव तस्याद्य रोजते दुहितुस्तव ।। राजा-अविचार्यं ममैतावद्युक्तं तथ्यं भवद्वचः ।, (२); प्रदानं ; (३) ष्याम्यहं तावत्; ष्यामहे तात; ष्यामि हे तातः ष्यामि भोस्तावत्; (४) प्रदाने (for सर्वेषां); .

**मार्कण्डेयः**

**एवमुक्त्वा समुत्पत्य नारदस्त्रिदिवं गतः।**
**राजापि दुहितुः सज्जं वैवाहिकमकारयत् ।। २९ ।।**(०१)

अस्मिन् पर्वणि २४९अध्याये २९श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पतिव्रतामाहात्म्यपर्वणि सावित्र्युपाख्याने एकोनपञ्चाशदधिकद्विशततमोऽध्यायः ।। २४९ ।।**

# २५०. पञ्चाशदधिकद्विशततमो अध्यायः ।।

**अश्वपतिना राज्ञा द्युमत्सेनाश्रममेत्य सत्यवते स्वपुत्र्याः सावित्र्या दानेन वैवाहिकोत्स० ानिर्वर्तनपूर्वकं स्वनगरागमनम् ।।**

**मार्कण्डेयः**

**अथ कन्याप्रदाने स तमेवार्थं विचिन्तयन्।**
**समानिन्ये च तत्सर्वं भाण्डं वैवाहिकं नृपः ।। १ ।।** (०२)

**लक्षालङ्कारः - भाण्डं वैवाहिकम् इत्यत्र भाण्डं द्रव्यम् ।**

**ततो वृद्धान्द्विजान्सर्वानृत्विजः सपुरोहितान्।**
**समाहूय दिने पुण्ये प्रययौ सह कन्यया ।। २ ।।** (०३)

---

(०१) मार्कंडिय; ( समुं (for खमुं); (२) ययौ (for गतः); (३) तु; च (for (अ)पि; सज्नं (for सर्वं); (४) मथाकरोत्; .

(०२) मार्कंडियः श्रीमार्कंडेयः ( प्रदानाय; प्रदानेन (for प्रदाने स); (२) वैवाहिकमर्चितयत्; (४) नृप; ततः (for नृपः); .

(०३) ( वृद्धद्रिजान्; (२) ऋत्विग्भिः; ग्भ्यः; च (for स); ऋत्वुजः सपुरोहितः; ऋत्विक्यभ्यपुरोगमान्

मेध्यारण्यं स गत्वा च द्युमत्सेनाश्रमं नृपः।
पद्भ्यामेव द्विजैः सार्धं राजर्षिं तमुपागमत् ।। ३ ।। (०१)

तत्रापश्यन्महाभागं शालवृक्षमुपाश्रितम्।
कौश्यां बृस्यां समासीनं चक्षुर्हीनं नृपं तदा ।। ४ ।। (०२)

स राजा तस्य राजर्षेः कृत्वा पूजां यथार्हतः।
वाचा सुनियतो भूत्वा चकारात्मनिवेदनम् ।। ५ ।। (०३)

तस्यार्घ्यमासनं चैव गां चावेद्य स धर्मवित्।
किमागमनमित्येवं राजा राजानमब्रवीत् ।। ६ ।। (०४)

तस्य सर्वमभिप्रायमितिकर्तव्यतां च ताम्।
सत्यवन्तं समुद्दिश्य सर्वमेव न्यवेदयत् ।। ७ ।। (०५)

**अश्वपतिः**

सावित्री नाम राजर्षे कन्येयं मम शोभना।
तां स्वधर्मेण धर्मज्ञ स्नुषार्थे त्वं गृहाय मे ।। ८ ।। (०६)

**द्युमत्सेनः**

च्युताः स्म राज्याद्वनवासमाश्रिताश्चराम धर्मं नियतास्तपस्विनः।

---

(हितान्); (३) समानीय; दिने (for तिथौ); (४) कन्यया सह; .

(०१) ( मेधारण्यं; तु; (अ)थ (for च); (२)द्युमत्सेनात्मजं; ततः; प्रति; पुरः; (३) (अ)थ तैः (for द्विजैः); (४) राजर्षिस्; उपागतं; .

(०२) ( न्महात्मानं; (२)सालवृक्षम् अपाश्रिं; अवां; समां; (३)कौस्यां बृष्यां; वृष्यां; ब्रस्यां . उपां (for समां); (४) चक्षुहीनं; .

(०३) (२) चक्रे (for कृत्वा); यथाविधि; .

(०४) ( तस्यार्धम् ; र्धम् र्हभ् ; मानसं (for आसनं); (२) आवेद्य ; निवेद्य (for चां); पाद्यं चा (द्यमा)वेद्य धर्मं (३) इत्येव; .

(०५) ( राजा (for पूर्वं); (for सर्वं); (२) प्रति; च सः (for च ताम्); इतिकर्तव्यसंयुतं; .

(०६) (३); धर्मात्मन्(for धर्मज्ञ); (४)स्नुषार्य सं (for त्वं); .

कथं त्वनर्हा वनवासमाश्रमे निवत्स्यते क्लेशमिमं सुता तव ।। ९ ।। (०१)

**अश्वपतिः**

सुखं च दुःखं च भवाभवात्मकं यदा विजानाति सुताहमेव च ।
न मद्विधे युज्यति वाक्यमीदृशं विनिश्चयेनाभिगतोऽस्मि ते नृप ।। १० ।। (०२)

**लक्षालङ्कारः - यथा विजानाति सुता ममैव इत्यत्र यथा यथावत् । युज्यति युज्यते । ते समीपम् अधिगतोऽस्मि प्राप्तोऽस्मि ।**

**आशां नार्हसि मे हन्तुं सौहृदात्प्रणतस्य च ।**
**अभितश्चागतं प्रेम्णा प्रत्याख्यातुं न मार्हसि ।। ११ ।। (०३)**

**अनुरूपो हि युक्तश्च त्वं ममाहं च वै तव ।**
**स्नुषां प्रतीच्छ मे कन्यां भार्यां सत्ववतस्ततः ।। १२ ।।(०४)**

**लक्षालङ्कारः - त्वं ममाहं च वै तव इत्यत्र त्वं ममानुरूपोऽसि । अहं च तव अनुरूपोऽस्मि । तस्मादयं संयोगोऽप्यनुरूपो हि । मे सुतां कन्यां सत्यवतस्तव पुत्रस्य भार्यां ते स्नुषां प्रतीच्छ ।**

---

(०१) राजा उं; (च (for स्म); (३) ह्यनर्हा (for त्वं); आशि (for आश्रमे); (४)निवत्स्यते; सहिष्यति; विशक्ष्यति.; .

(०२) राजोवाच; ( नु(for च); भवात्मकं यदा (for भवाभवात्मकं); (२)सदा; पुरा; यथा (for यदा); सुता मम; सुखाईम् (for सुताहम्); वा (for च); (३)मद्विधो तिष्ठति (for युज्यति); (४)नाधिगतो (नाभिगता) स्मि ते नृप; नाहमिहा गन्तो नृप; .

(०३) ( छेत्तुं (for हन्तुं); (२) प्रणतस्य (for येन); (३) स्वागतं; चागतः प्रेप्सुः प्रीत्या (for प्रेम्णा); (४)च नार्हसि (for न मार्हसि); .

(०४) ( अभिं (for अनुं); (ऽ)सि; (ऽ)पि (for हि); संयोगम् ; युक्तश्च; संयोक्ता ; संयुक्तः (क्ता); क्षमो मे चैव वै तव; त्वं ममाहं च वै तव; (३)प्रतीक्ष (इ)मां (for मे); (४) अ-स्सुतम्, कृते; सतः; शुभां; ततः; सुतः; स तां; भार्यार्थ भवतः सुतः; यथार्हं च परिच्छदं; .

**द्युमत्सेनः**

पूर्वमेवाभिलषितः सम्बन्धो मे त्वया सह ।
**भ्रष्टराज्यस्त्वहमिति तत एतद्विचारितम्** ॥ १३ ॥ (०१)

अभिप्रायस्त्वयं यो मे पूर्वमेवाभिकाङ्क्षितः।
**स निर्वर्ततु मेऽद्यैव काङ्क्षितो ह्यसि मेऽतिथिः** ॥ १४ ॥ (०२)

**मार्कण्डेयः-**

ततः सर्वान्समानाय्य द्विजानाश्रमवासिनः।
**यथाविधि समुद्वाहं कारयामासतुर्नृपौ** ॥ १५ ॥ (०३)

दत्त्वा सोऽश्वपतिः कन्यां यथार्हं सपरिच्छदम्।
**ययौ स्वमेव भवनं युक्तः परमया मुदा** ॥ १६ ॥ (०४)

सत्यवानपि तां भार्यां लब्ध्वा सर्वगुणान्विताम्।
**मुमुदे सा च तं लब्ध्वा भर्तारं मनसेप्सितम्** ॥ १७ ॥ (०५)

गते पितरि सर्वाणि संन्यस्याभरणानि सा।
**जगृहे वल्कलान्येव वस्त्रं काषायमेव च** ॥ १८ ॥(०६)

परिचारैर्गुणैश्चैव प्रश्रयेण दमेन च ।

---

(०१) (२) हृतं (for भ्रष्टं); भ्रष्टराज्योहमिति च; (४) तत्र यत्र (for तत एतद्); .

(०२) (अ)यं यो; (अ)थ (for (अ)यं); मेयं; वै मे; वै ते; मे यः (for यो मे); (प्रायस्त्वदीया मे); (२)तु (for (अ)भि; (३)निवर्ततु; प्रवर्ततु ; प्रजातस्तु; संनिवर्तितुमद्यैव ; स निर्वर्ततुमद्यैव; स प्रवर्ततु अद्यैव; स निवृत्तस्त्वयाद्यैव; स ते निर्वर्त्यतामद्य तां सद्यः); (४)मतः (ऽतिथिः); .

(०३) मार्कंडेय; ( समानाय्य; (३) समुद्धारं; .

(०४) ( ददौ (for दत्त्वा); सोश्वं; चाश्वं (for त्वश्वं); (२) स (for च); परिच्छदां; (३) ददौ (for ययौ); .

(०५) ( भार्या, तां; (३) सापि (for सा च); लभ्ध्वा तं; .

(०६) (१/२); सर्वाणि, संन्यस्य; च (for सा); (३) जग्राह; .

**सर्वकामक्रियाभिश्च सर्वेषां तुष्टिमादधे।**[०१]

**श्वश्रूं शरीरसत्कारैः सर्वैराच्छादनादिभिः।**
**श्वशुरं देवसत्कारैर्वाचः संयमनेन च ।**[०२]

**तथैव प्रियवादेन नैपुणेन शमेन च ।**
**रहश्चैवोपचारेण भर्तारं पर्यतोषयत् ।। १९ ।।**[०३]

**एवं तत्राश्रमे तेषां तदा निवसतां सताम्।**
**कालस्तपस्यतां कश्चिदपाक्रामत भारत ।। २० ।।**[०४]

**सावित्र्या ग्लायमानायास्तिष्ठन्त्यास्तु दिवानिशम्।**
**नारदेन यदुक्तं तद्वाक्यं मनसि वर्तते ।। २१ ।।**[०५]

**तदा प्रभृति सावित्रि गणयामास वासरान् ।**[०६]

अस्मिन् पर्वणि २५०अध्याये २१श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पतिव्रतामाहात्म्यपर्वणि सावित्र्युपाख्याने पञ्चाशदधिकद्विशततमोऽध्यायः ।। २५० ।।

# २५१. एकपञ्चाशदधिकद्विशततमो अध्यायः

---

(०१) ( देवी; चापिल एव (for चैव); (२) प्रशस्तेन; नयेन (for दमेन); (३) सा च (for सर्व); (४) पुष्टिम्; प्रीतिम्; आदधे; आदधत् (for आवहत्); .
(०२) ( संस्कारैः (for सत्कारैः); (२) सर्वैरूत्सादनानि च (चीभिः); (३) देवसत्कारैर्; .
(०३) (२) नैपुण्येन; निपुणेन; समेन; दं (for शं); (४) समं (for पर्यं); .
(०४) (२); सदा; (२) अभिचकाम; अपाकामत; अतिकामत; व्यतिचकाम; इति चकाम; .
(०५) ( च; स्म (for तु); सावित्र्या ग्लायमानायास्; (२) च (for तु); .
(०६) ;आरण्य सावित्र्यु (त्र्यो); पाख्यान; सावित्रिप्रदानं .

॥

कदाचन नारदनिर्दिष्टे सत्यवतो मृतिदिवसे सावित्र्या परशुहस्तस्य वनं गच्छतो भर्तुरवुगमनम् ॥

**मार्कण्डेयः**

ततः काले बहुतिथे व्यतिक्रान्ते कदाचन।
प्राप्तः स कालो मर्तव्यं यत्र सत्यवता नृप ॥ १ ॥ (०१)

गणयन्त्याश्च सावित्र्या दिवसे दिवसे गते।
यद्वाक्यं नारदेनोक्तं वर्तते हृदि नित्यशः ॥ २ ॥ (०२)

चतुर्थेऽहनि मर्तव्यमिति सञ्चिन्त्य भाविनी।
व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं स्थिताभवत् ॥ ३ ॥ (०३)

त्रयोदश्यां चोपवासं प्रतिपत्सु च पारणम्।
आयुष्यं वर्धते भर्तुर्वृतेनानेन भारत।

तं श्रुत्वा नियमं तस्या भृशं दुःखान्वितो नृपः।
उत्थाय वाक्यं सावित्रीमब्रवीत्परिसान्त्वयन् ॥ ४ ॥ (०४)

**द्युमत्सेनः**

अतितीव्रोऽयमारम्भस्त्वयाऽऽरब्धो नृपात्मजे।

---

(०१) श्रीमार्कंडेय; ( तस्य काले बहुतिथौ; काले बहुतिथे थौ)तस्य; (३) अ-घ-अर्धचतुष्टयं नास्ति, मर्तव्यो; (४) सत्यवतो .

(०२) ( गणयन्त्या ; (३) यद्वाक्यं; .

(०३) (सम्प्राप्त (for मर्तव्यम्); (२)निश्चित्य (for सञ्चिन्त्य); भाविनी .

(०४) ( तत् (for तं); बद्धं ; तस्या ; वध्वा (for दुःखं); तां श्रुत्वा नियतिं वध्वा (२) भृशं; नित्यं; तदा (for वध्वा); (४) सोब्रवीत्; उवाच (for अब्रवीत्); .

तिसृणां वसतीनां हि स्थानं परमदुश्चरम् ।। ५ ।। (०१)

लक्षालङ्कारः - तिसृणां वसतीनाम् इत्यत्र तिसृणां वसतीनां उपवासानां स्थानं अनुष्ठानम् ।

**सावित्री-**

न कार्यस्तात सन्तापः पारयिष्याम्यहं व्रतम्।
व्यवसायकृतं हीदं व्यवसायश्च कारणम् ।। ६ ।।

लक्षालङ्कारः - व्यवसायश्च कारणम् इत्यत्र व्यवसायः इदं करोमीति निश्चयः कारणं स्वकृतकर्मपूर्तिकारणम् ।

**द्युमत्सेनः**

व्रतं भिन्धीति वक्तुं त्वां नास्मि शक्तः कथञ्चन।
पारयस्वेति वचनं युक्तमस्मद्विधो वदेत् ।। ७ ।।(०२)

**मार्कण्डेयः**

एवमुक्त्वा द्युमत्सेनो विरराम महामनाः।
तिष्ठन्ती चैव सावित्री काष्ठभूतेव लक्ष्यते ।। ८ ।। (०३)

श्वोभूते भर्तृमरणे सावित्र्या भरतर्षभ।
दुःखान्वितायास्तिष्ठन्त्याः सा रात्रिर्व्यत्यवर्तत ।। ९ ।। (०४)

लक्षालङ्कारः - तिष्ठन्ती साऽपि सावित्री इत्यत्र तिष्ठन्ती तपसि स्थिता । दुःखा- न्विता या सावित्री, तिष्ठन्त्यास्तस्याः सावित्र्याः व्यत्यवर्तत तद्दिनं गतमासीत् ।

---

(०१) द्युमत्सेन उं; (अति व्रतो समारम्भसू ; यथां ; व्रतां (for (अ)यमारम्भसू); (२)त्वया प्राप्तो; (३), तिस्दृणां; वासतेयीनां वासतेयीनां (for वसतिनांहि); (४) दुश्चरं; .

(०२) ( त्वा (for त्वां); व्रतं सिध्यति व्यक्तं त्वां; व्रतं ते मेति वक्तं त्वां; व्रतं तेनेति वा वक्तुं; व्रतं नेति मभावक्तुं; .

(०३) (३);ख-चापि, चैव (for चापि); गायत्री (for सावित्री); (४) स्म (for (इ)व); दृश्यते; .

(०४) (४); सा रात्रिं; सा निशा; सावित्र्या व्यभिवर्तत; पर्य'; अत्यं; व्यत्यवर्तते ; संन्यवर्तत; .

अद्य तद्दिवसं चेति हुत्वा दीप्तं हुताशनम्।
**युगमात्रोदिते सूर्ये कृत्वा पौर्वाह्णिकीः क्रियाः ॥ १० ॥** [०१]

**व्रतं समाप्य सावित्री स्नात्वा शुद्धा यशस्विनी।**

ततः सर्वान्द्विजान्वृद्धान्श्वश्रूं श्वशुरमेव च ।
**अभिवाद्यानुपूर्व्येण प्राञ्जलिर्नियता स्थिता ॥ ११ ॥** [०२]

अवैधव्याशिषस्ते तु सावित्र्यर्थं हिताः शुभाः।
**ऊचुस्तपस्विनः सर्वे तपोवननिवासिनः ॥ १२ ॥** [०३]

एवमस्त्विति सावित्री ध्यानयोगपरायणा।
**मनसा ता गिरः सर्वा प्रत्यगृह्णात्तपस्विनाम् ॥ १३ ॥** [०४]

तं कालं तं मुहूर्तं च प्रतीक्षन्ती नृपात्मजा।
**यथोक्तं नारदवचश्चिन्तयन्ती सुदुःखिता ॥ १४ ॥** [०५]

ततस्तु श्वश्रूश्वशुरावूचतुस्तां नृपात्मजाम्।
**एकान्तमास्थितां वाक्यं प्रीत्या भरतसत्तम ॥ १५ ॥** [०६]

---

(०१) ( तं (for तद्); दिवसश् प्राप्तं (for चेति); अद्या (प्य)सौ दिवसश्चेति; अद्य वै तद्दिनं चेति; (२) शीघ्रं (for दीप्तं); (४) पूर्वाह्णिकीः; पूर्वाह्णिकीः (की); पौर्वाह्णिकीं क्रियां; .

(०२) ( सर्वद्विजान् श्वश्रूं (for वृद्धाम्); (२)तथा (for श्वश्रूं); (३) पूर्वेण; (४)प्रणता (for नियता); .

(०३) (क-अथ चैवाशिषस्ते तु सदैवचा; ख-आशिषस्त्वब्रुवंस्ते तु संप्रीत्यर्थं, घ-अवैध्व्याशिषस्त्वे तु संप्रीत्यर्थं, शिषं तेस्तु; (२)संवृत्या (ता; त्य; ध्य)र्थ; सावित्र्यार्थे; सम्प्रीत्यर्थं; सममेव हितां शुभां; गिरः शुभाः; .

(०४) (२) एकान्ते (एकान्त-; त्वेकान्त); ध्यानमास्थिता; ध्यानशोक परायणा, (३)सा (for ता); सर्वो (४) तपस्विनी; मनस्विनी; .

(०५) ( तं; (२) तु विस्मिता; शुचिस्मिता (for नृपां); .

(०६) ( च (for तु); तौ श्वश्रूश्वशुरौ बन्धू; (२)तौ (for तां); अनिदितां (for नृपां); (३)एकात-मास्थितां वाक्यं (४) प्रीतौ; .

**श्वशुरावूचतुः**

व्रतं यथोपदिष्टं तु तथा तत्पारितं त्वया।
आहारकालः सम्प्राप्तः क्रियतां यदनन्तरम्।(०१)

**सावित्री-**

अस्तं गते मयाऽऽदित्ये भोक्तव्यं कृतकामया** ।। १६ ।।
एष मे हृदि सङ्कल्पः समयश्च कृतो मया।(०२)

**मार्कण्डेयः**

एवं सम्भाषमाणायाः सावित्र्या भोजनं प्रति।
स्कन्धे परशुमादाय सत्यवान्प्रस्थितो वनम् ।। १७ ।। (०३)

कठिनं च तथा करे ।
खनित्रं सत्यवान्यह्य प्रस्थितश्च वनं प्रति ।
तं प्रणम्याब्रवीत्साध्वी नारदोक्तं वशानुगा ।

सावित्री त्वाह भर्तारं नैकस्त्वं गन्तुमर्हसि।
सह त्वया गमिष्यामि न हि त्वां हातुमुत्सहे ।। १८ ।। (०४)

**सत्यवान्**

वनं न गतपूर्वं ते दुःखः पन्थाश्च भाविनि।

---

(०१)श्वश्रूश्वशुरा- वृचतुः; श्वशुर उवाच;( व्रतं; (ऽ)पि (for ऽयं); व्रतं यथोपदिष्टं तु (वै; यद्; ते; तद्);(२) पारितं; धारितस् ; चरितस्(for पारितस्); तथा तत्पारि(लि)तं त्वया; (३) प्राप्तस्ते (for सम्प्राप्तः); (४) तदनन्तरं; .

(०२) (२) कृतकाम्यया; (३)एवं (for एष); .

(०३)माकाण्डेयः, ( सम्भाष्य (ष)मानायाः; षमाणायां; (२)सावित्र्यां; (३)आधाय; .

(०४) ( सावित्रीत्याह; सावित्र्याह च; (२) नैव त्वं; (३) अ-क-घ-पश्चार्धानि न सन्ति, सार्धं त्वयां; त्वया सहां; (४) नाहं (for न हि); त्वा(for त्वां); त्यक्तुं ; (अ)सितुं (for हातुं); .

**व्रतोपवासक्षामा च कथं पद्भ्यां गमिष्यसि ।। १९ ।।** (०१)

**सावित्री-**

उपवासान्न मे ग्लानिर्नास्ति चापि परिश्रमः।
**गमने च कृतोत्साहां प्रतिषेद्धुं न मार्हसि ।। २० ।।** (०२)

**सत्यवान्**

यदि ते गमनोत्साहः करिष्यामि तव प्रियम्।
**मम त्वामन्त्रय गुरून्न मां दोषः स्पृशेदयम् ।। २१ ।।** (०३)

**मार्कण्डेयः**

साभिवाद्याब्रवीच्छ्वश्रूं श्वशुरं च महाव्रता। ।। २२ ।।

**सावित्री-**

अयं गच्छति मे भर्ता फलाहारो महावनम्।(०४)

इच्छेयमभ्यनुज्ञाता आर्यता श्वशुरेण ह ।
**अनेन सह निर्गन्तुं न मेऽद्य विरहः क्षमः ।। २३ ।।** (०५)

**लक्षालङ्कारः - फलाहारो महद्वनम् इत्यत्र फलस्य आहारः आहरणं यस्य स तथोक्तः । अनुज्ञातुम् अनुज्ञामादातुम् ।**

गुर्वग्निहोत्रार्थकृते प्रस्थितश्च सुतस्तव।

---

(०१) (२) दुःखपन्थाश्च भाविनि; (३)ग्लाना च; सङ्क्षामा; कामा च (for क्षामा च); .

(०२) ( उपवासेन (for सान्न); (२)नापि (for चापि); नास्ति नाथ त्वया सह; (३) अनुग्रहस्त्वया कार्यः (४) न चार्हसि; च नार्हसि; .

(०३) (३); गुरू (for गुरून्); (४)मे; मा (for मां); .

(०४)मार्काण्डेयः; श्रीमार्कंडेयः; (साभिवाद्य ; सा हि गत्वा (for साभिगम्य); (आ)सह तच् (for (अ) ब्रवीच्); (२)पतिव्रता (for महां); (३)स्वयं भर्ता मे; (४)फलान्वेषी महद्वनं; .

(०५) ( इच्छेहम् ज्ञातम् ; ज्ञाता (for ज्ञातुम्); इच्छाम्य हमनुज्ञातुम्; (२)ह (for च); आर्यायाः श्वशुरस्य ह; (३)गच्छेयं; निर्यातुं; (४)मेद्य; हि तं (for हि मे); प्रियः (for क्षमः); .

न निवार्यो निवार्यः स्यादन्यथा प्रस्थितो वनम् ।। २४ ।। (०१)

संवत्सरः किञ्चिदूनो न निष्क्रान्ताहमाश्रमात्।
वनं कुसुमितं द्रष्टुं परं कौतूहलं हि मे ।। २५ ।। (०२)

**द्युमत्सेनः**

यतः प्रभृति सावित्री पित्रा दत्ता स्नुषा मम।
अनयाभ्यर्थनायुक्तमुक्तपूर्वं स्मराम्यहम् ।। २६ ।। (०३)

लक्षालङ्कारः - अनयाभ्यर्थनायुक्तम् इत्यत्र अनयेन अनीत्या अभ्यर्थनया च युक्तम् ।

तदेषा लभतां कामं यथाभिलषितं वधूः।
अप्रमादश्च कर्तव्यः पुत्रि सत्यवतः पथि ।। २७ ।। (०४)

**मार्कण्डेयः**

उभाभ्यामभ्यनुज्ञाता सा जगाम यशस्विनी।
सह भर्त्रा हसन्तीव हृदयेन विदूयता ।। २८ ।। (०५)

सा वनानि विचित्राणि रमणीयानि सर्वशः।
मयूरगणजुष्टानि ददर्श विपुलेक्षणा ।। २९ ।। (०६)

नदीः पुण्यवहाश्चैव पुष्पिताांश्च नगोत्तमान्।

---

(०१) ( होत्रस्य कृते; (२)(अ)यं (for च); प्रस्थितस्य सयतस्य ते; (३) हि वार्यो (for निवार्यो); .

(०२) ( संवत्सरं किञ्चिदूनं; त्सरः किं दूरं नो; (२)महाश्रं ; ममाश्रं (for (अ)हमाश्रं); .

(०३) ( यदा (for यतः); (२)दत्ता पित्रा; (३)ननु याह्यात्मनो युक्तम्; (४) पूर्वमुक्तं; वचः किञ्चित् (for उक्तपूर्वं); .

(०४) (४); पतिसत्यं पुत्रि सत्यवता; .

(०५) मार्काण्डेयः; श्री मार्कडेयः; ( अप्यं (for अभ्यं); (२)तपं; मनं (for यशं); (४) विधूयता; च दूयता; (अ)वदूयता; .

(०६) (३); मयूरगणजुष्टानि ; परिघुष्टानि; वरघुष्टानि; (४)विमलें (for विपुलें); .

सत्यवानाह पश्येति सावित्रीं मधुरं वचः ।। ३० ।। (०१)

निरीक्षमाणा भर्तारं सर्वावस्थमनिन्दिता।
मृतमेव हि तं मेने काले मुनिवचः स्मरन् ।। ३१ ।। (०२)

लक्षालङ्कारः - काले मुनिवचस्स्मरात् इत्यत्र मुनिवचस्स्मरात् नारदवचस्स्मरणात्।

अनव्रजन्ती भर्तारं जगाम मृदुगामिनी।
द्विधेव हृदयं कृत्वा तं च कालमवेक्षती ।। ३२ ।।(०३)

अस्मिन् पर्वणि २५१अध्याये ३२श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पतिव्रतामाहात्म्यपर्वणि सावित्र्युपाख्याने एकपञ्चाशदधिकद्विशततमोऽध्यायः ।। २५१ ।।

# २५२. द्विपञ्चाशदधिकद्विशततमो अध्यायः ।

Concept Paste.P.No. 1438 .

**मार्कण्डेयः**

अथ भार्यासहायः स फलान्यादाय वीर्यवान्।

---

(०१) ( नदी; नदीं पुष्पवहाशू (for हां); पुण्यवहां; (४)मधुरस्वनां; स्वरं; मधुरं वचः ; मधुरस्वरां; . मधुरं स्वरं.; .

(०२) ( निरीक्ष्यं; सा पश्यमाना; सा वीक्षमाणा; (२) सर्वावस्थास्वनिन्दिता; स्थमतन्द्रिता; (३)हतं (for मृतं); हि भर्तारं; पतिं मेने; (for हि तं मेने); (४)(अ)स्मरत् (for स्मरन्); स्मरन्ती वचनं मुनेः .

(०३) ( अनुवर्ती तु भर्तारं ; अनुव्रजन्ती भं ; भर्तारमनुवर्तन्ती; अनुवर्तती भं; अनुवर्तमाना भं; आवर्जयन्तीव पतिं; अनुवर्तती अ तु (तु नृ); पति; (२) मृदुवाहि (दि) नि; सर्वावस्थमनिन्दिता; द्विधैव, द्वधैव मनसा हत्वा; हृदयं च द्विधा कृत्वा; (४) अवेक्षत; अवैक्षत; अवेक्ष्यती; अवेक्षय च; अवेक्ष्य सा; प्रतिक्षती; तं कालं च प्रतीक्षते (ता); .

कठिनं पूरयामास ततः काष्ठान्यपाटयत् ।। १ ।। (०१)

लक्षालङ्कारः - कठिनं पूरयामास इत्यत्र कठिनं परशुं पूरयामास वृक्षान्तः प्रवेशयामास ।

तस्य पाटयतः काष्ठं स्वेदो वै समजायत।
व्यायामेन च तेनास्य जज्ञे शिरसि वेदना।(०२)
सोऽभिगम्य प्रियां भार्यामुवाच श्रमपीडितः ।। २ ।।

लक्षालङ्कारः - व्यायामेन बहुदूरगमनेन तेन वृक्षच्छेदेन च ।।

**सत्यवान्**

व्यायामेन ममानेन जाता शिरसि वेदना ।। ३ ।। (०३)

अङ्गानि चैव सावित्रि हृदयं दूयतीव च ।
अस्वस्थमिव चात्मानं लक्षये मितभाषिणि ।। ४ ।। (०४)

शूलैरिव शिरो विद्धमिदं संलक्षयाम्यहम्।
तत्स्वप्तुमिच्छे कल्याणि न स्थातुं शक्तिरस्ति मे ।। ५ ।। (०५)

भ्रमन्तीव दिशः सर्वाश्चक्रारूढं मनो मम।*

**मार्कण्डेयः-**

सा समासाद्य सावित्री भर्तारमुपगम्य च ।

---

(०१) मार्कंडेयः;श्रीमार्कंडेयः;(३) जठरं (for कठनं);पाठ (for पूर);;(४) (अ)पातयत्;
ततः काष्टं समा (ष्ठमुपा); हरत्.
(०२) ( ततः (for तस्य);;(३) कृतंन (for च तेन); .
(०३) सत्यवानुवाच;;(३) व्यायामेन च (हि); मे भीरु;;(४) जज्ञे; .
(०४) (२) दह्नतीव च; दूयतेहि मे ;च विदूयते; च प्रदूयते; चैव दूयते; चापि दूयते (for दूयतीव च);;(३) अन्तस्थ (for अस्वस्थ);;(४) लक्ष्यसे मृदु (for मित); .
(०५) (३) अस्वस्थमेव कल्याणि;स्वसु-मिच्छामि क .

उत्सङ्गेऽस्य शिरः कृत्वा निषसाद महीतले ॥ ६ ॥ (०१)

ततः सा नारदवचो विमृशन्ती तपस्विनी।
तं मुहूर्तं क्षणं वेलां दिवसं च युयोज ह ॥ ७ ॥ (०२)

हन्त प्राप्तः स कालिऽयमिति चिन्तापरा सती।

मुहूर्तादेव चापश्यत्पुरुषं रक्तवाससम्। ॥ ८ ॥ (०३)

बद्धमौलिं वपुष्मन्तमादित्यसमतेजसम्।(०४)

श्यामावदातं रक्ताक्षं पाशहस्तं भयावहम्। ॥ ९ ॥ (०५)

स्थितं सत्यवतः पार्श्र्वे निरीक्षन्तं तमेव च ।(०६)

तं दृष्ट्वा सहसोत्थाय भर्तुर्न्यस्य शनैः शिरः।
कृताञ्जलिरुवाचार्ता हृदयेन प्रवेपती ॥ १० ॥ (०७)

**सावित्री-**

दैवतं त्वाभिजानामि वपुरेतद्ध्यमानुषम्।
कामया ब्रूहि देवेश कस्त्वं किं च चिकीर्षसि ॥ ११ ॥ (०८)

---

(०१) ( सा समासाद्य सावित्रि; सहसाप्यथ सा; तमासाद्य तु सा;;(२) उपगुहा;उप हा; गृहा; गम्य;;(३) उत्सङ्गे च; गस्य; गेस्याः;गे सा;;(४) शुभानना (for महि) .

(०२) (२) विभृष्यन्ति; विमृषन्ती;मनस्विनी;;(३) मुहूर्तँ च (ल)क्षणं ;वेलां .

(०३) ( मुहूर्तादेव; सा (for चा);;(२) मुहूर्तं (for पुरुषं); रक्त (for पीत); .

(०४) ( उद्ध'; चन्द्र (for बद्ध);;(४), 'त्यसमतेजसा; त्यमि; ( त्य इ) व तेजसा.; .

(०५) ( श्यामावदान्तं; चक्राक्षं; .

(०६) ( निरीक्षन्ती .

(०७) (२) शनैः शिरः.;;(३) उवाचेदं.; अथोवाच; उवाचाथ (for उवा-चार्त);(४) विदूयता; प्रवे-पती; प्रवेपिता.; .

(०८) सावित्र्युवाच (उवाच); देवत्वं;.चाभि; त्वां वि; त्वावि (for त्वाभि);;(२) ह्येतद् (for एतद्);. अमा' ( हि); न मा (for ह्यमा);;(३) काम्यया; कामये;.काम्याया; कामाया.; देवेश';मे कस्त्वं; कस्त्वं हि; मे सत्यं (for मे देव); को हि देवोसि मे ब्रूहि;;(४) देव त्वं किं; किं च कर्म (for कस्त्वं किं च); .

**यमः**

पतिव्रतासि सावित्रि तथैव च तपोऽन्विता।
**अतस्त्वामभिभाषामि विद्धि मां त्वं शुभे यमम् ॥ १२ ॥** (०१)

अयं ते सत्यवान्भर्ता क्षीणायुः पार्थिवात्मजः।
**नेष्यामि तमहं बद्ध्वा विद्ध्येतन्मे चिकीर्षितम् ॥ १३ ॥** (०२)

**सावित्री**

श्रूयते भगवन्दूतास्तवागच्छन्ति मानवान्।
**नेतुं किल भवान्कस्मादागतोऽसि स्वयं प्रभो।**

**मार्कण्डेयः**

इत्युक्तः पितृराजस्तां भगवान्स्वचिकीर्षितम्।
**यथावत्सर्वमाख्यातुं तत्प्रियार्थं प्रचक्रमे ॥ १४ ॥** (०३)

**यमः-**

अयं च धर्मसंयुक्तो रूपवान्गुणसागरः।
**नार्हो मत्पुरुषैर्नेतुमतोऽस्मि स्वयमागतः ॥ १५ ॥** (०४)

ततः सत्यवतः कायात्पाशबद्धं वशंगतम्।

---

(०१) श्रयिमः, ( व्रता च;;(२) तथैव तपसान्विता;;(३) ततस्त्वाम्.;अभिजानामि;
न हि भीषामि.;;(४) मा (for . मां);.च (for त्वं );.

(०२) ( अयं ते तु पतिः शान्तः;;(३) (ए)तम्; तम्;(ए) (for (ए)नम्;;(४) तन् (for (ए)तन्); .

(०३)मार्काण्डेयः; सावित्री- श्रुयते भगवन्दूतास् दवागच्छन्ति मानवान् ।,नेतु. किल भवान् कसकिमाद् आगता..
सि स्वयं प्रभो ॥ इदि अधिकः पाठः मुद्रितपुस्तकेषु अस्ति, परन्तु अ-क-ख-घ-कोशेषु नास्ति, ( इत्युक्तः; त्वां
(for तां);;(२) स्व; सं (for स्वं); स यथावत्समाख्यातुं .

(०४) यमः;( अयं च; सत्यवान्; (for अयं हि); .

अङ्गुष्ठमात्रं पुरुषं निश्चक्राम यमो बलात् ।। १६ ।।(०१)

लक्षालङ्कारः - निश्चक्राम यमो बलात् इत्यत्र अन्तर्णीतो णिच्, निष्क्रामयामासे-त्यर्थः । तत्वाभिमानितया स्वस्यापि बहिर्निर्गमनात् निश्चक्रामेति भावः ।

ततः समुद्धृतप्राणं गतश्वासं हतप्रभम्।
निर्विचेष्टं शरीरं तद्बभूवाप्रियदर्शनम् ।। १७ ।।(०२)

यमस्तु तं ततो बद्ध्वा प्रयातो दक्षिणामुखः।
सावित्री चैव दुःखार्ता यममेवान्वगच्छत** ।। १८ ।।(०३)

नियमव्रतसंसिद्धा महाभागा पतिव्रता।(०४)

भर्तुश्शरीररक्षां च विधाय हि तपस्विनी।
भर्तारमनुगच्छन्ती तथावस्थं सुमध्यमा ।। १९ ।।

नियमव्रतसंसिद्धा महाभागा पतिव्रता ।। २० ।।

**यमः**

निवर्त गच्छ सावित्रि कुरुष्वास्यौर्ध्वदैहिकम्।
कृतं भर्तुस्त्वयाऽऽनृण्यं यावद्गम्यं गतं त्वया ।। २१ ।।(०५)

लक्षालङ्कारः - यावद्गम्यं गतम् इत्यत्र गम्यं गमनयोग्यं स्थानं यावत्, तावत् गतम् आगतम् । अतः परमाकाशमार्गे गन्तुं न शक्यत इति भावः ।

---

(०१) (२) पाशबद्धवशं गतं; पाशबद्ध; च सङ्गतं; पाशबधमँस्तं; पाशहस्तवशं गतं .

(०२) (२) गतसत्व;. गतप्रभं;; (३) विनिश्चेष्टं; शरीरं तं; वशं ( शवं ); तधु .

(०३) ( यमश्च ततो; महा; तदा (for तथा); (२) मुखे; (३) चैव; सापि; (४) ( अ )न्वपद्यत;, स्वयं वा यत्र; .

(०४) ( तथावृत्तं )(५) सम्पन्ना; (६) यतव्रता (for पति); .

(०५) श्रीयमः ( निवर्त्य; (२) कुरुष्वास्यौर्ध्वदैहिकं; ष्वास्यो ध्वदेः ( ’नैक); हिकं; .

एष मार्गो विशालाक्षि न केनाप्यनुगम्यते ।

**सावित्री**

यत्र मे नीयते भर्ता स्वयं वा यत्र गच्छति।
**मया च तत्र गन्तव्यमेष धर्मः सनातनः ।। २२ ।।**[०१]

तपसा गुरुभक्त्या च भर्तुः स्नेहाद्व्रतेन च ।
**तव चैव प्रसादेन न मे प्रतिहता गतिः ।। २३ ।।** [०२]

प्राहुः साप्तपदं मित्रं बुधास्तत्त्वार्थदर्शिनः।
**मित्रतां च पुरस्कृत्य किञ्चिद्वक्ष्यामि तच्छृणु ।। २४ ।।** [०३]

**लक्षालङ्कारः - प्राहुः सप्तपदं मित्रम् इत्यत्र अनुयात्रारूपं सप्तपदं वा, अभ्युत्थान- रूपं सप्तपदं वा ।**

नानात्मवन्तस्तु वने चरन्ति धर्मं च वासं च परिश्रमं च ।
विज्ञानतो धर्ममुदाहरन्ति तस्मात्सन्तो धर्ममाहुः प्रधानम् ।। २५ ।। [०४]

**लक्षालङ्कारः - नानात्मवन्तं च इत्यत्र वने नानात्मवन्तं नानाप्रयत्नवन्तं नियमं च वासं च परिश्रमं च ये चरन्ति, ते सन्तः विजानतः पुरुषस्य धर्ममेव सहायमुदाहरन्ति ।**

एकस्य धर्मेण सतां मतेन सर्वे स्म तं मार्गमनुप्रपन्नाः।
मा वै द्वितीयं मा तृतीयं च वाञ्छे तस्मात्सन्तो धर्ममाहुः प्रधानम् ।। २६ ।।

---

(०१) ( एष (for यत्र); नियमे (for नीयते); (३) मया च (for मयापि); .
(०२) ( गुरुभक्त्या; (२) भर्तृस्नेहाद्; भर्तृस्नेह; (३) तवैव च (for तव चैव); .
(०३) ( साप्तपदं मैत्रं; (२) वृद्धाम् (for बुध्यम्); न्यायार्थ (for तत्त्वार्थ ); (३) तु; तत्; ते (for च); (४) ते (for तत्); .
(०४) सावित्री; ( नानार्थ वन्तसू; हि; च; (२) सत्यं (for वासं); प्रतिश्रयं; परिश्रयं; प्रतिश्रमं; (३) विजानतो; विजा ( ज्ञा); नतो; (४) तस्यां वसन्तो; तद्वै सन्तो (for तस्मात्सन्तो); .

(०१)

लक्षालङ्कारः - एकस्य धर्मस्य सतां मतेन इत्यत्र सतां मतेन अनुमतेन एकस्य मुख्यस्य धर्मस्य मोक्षसाधननिवृत्तिरूपधर्मस्य तं श्रुत्यादौ प्रसिद्धं मार्गं सर्वे अनुप्रपन्नाः स्म वै । द्वितीयं निवृत्तिरूपधर्ममार्गात् द्वितीयं प्रवृत्तिरूपधर्ममार्गं, तृतीयं अर्थमार्गं च प्रपन्ना मा स्म । चतुर्थं काममार्गं च प्रपन्ना मा स्म वै । तस्मात्कारणात् सन्तः धर्मं निवृत्ति- रूपधर्मं प्रधानमाहुः ।

**यमः**

निवर्त तुष्टोऽस्मि तवानया गिरा स्वराक्षरव्यञ्जनहेतुयुक्तया।

वरं वृणीष्वेह विनास्य जीवितं ददानि ते सर्वमनिन्दिते वरम् ।। २७ ।। (०२)

**सावित्री**

च्युतः स्वराज्याद्वनवासमाश्रितो विनष्टचक्षुः श्वशुरो ममाश्रमे।

स लब्धचक्षुर्बलवान्भवेन्नृपस्तव प्रसादाज्ज्वलनार्कसंनिभः ।। २८ ।। (०३)

**यमः**

ददानि तेऽहं तमनिन्दिते वरं यथा त्वयोक्तं भविता च तत्तथा।

तवाध्वना ग्लानिमिवोपलक्षये निवर्त गच्छस्व न ते श्रमो भवेत् ।। २९ ।। (०४)

**सावित्री-**

श्रमः कुतो भर्तृसमीपतो हि मे यतो हि भर्ता मम सा गतिर्ध्रुवा।

---

(०१) (ख-घ-घर्मस्य, एतस्; धर्मस्य; (२) स्म तन्; सतां; स्वतन्; मतं; स्म सन् (for स्म तं);(३) वै; च वाञ्छेत्; चतुर्थं; .

(०२) श्रीयम ( गच्छस्व (for तुष्टोस्मि); (२) सुधाक्षर; दूध्याक्षरं; (३) वृणीष्वेव; विनाद्य; (४) ददामि; सम्यग्; धर्मम्; धर्म्यम् (for सर्वम्); .

(०३) ( स राज्याद्; स्वराष्ट्राद्; च राज्याद्; (४) नार्कसप्रभ; .

(०४) श्रीयम; ( ददामि; हं तम् (for सर्वम्); (२) यथा; त्वया; (३) तवा ( था); ध्वनि; क्लेश; क्लान्ति (for ग्लानि); .

यतः पतिं नेष्यसि तत्र मे गतिः सुरेश भूयश्च वचो निबोध मे ।। ३० ।। (०१)

लक्षालङ्कारः - सा गतिः परलोकगतिः ।

सतां सकृत्सङ्गतमीप्सितं परं ततः परं मित्रमिति प्रचक्षते।

न चाफलं सत्पुरुषेण सङ्गतं ततः सतां सन्निवसेत्समागमे ।। ३१ ।। (०२)

**यमः**

मनोऽनुकूलं बुधबुद्धिवर्धनं त्वया यदुक्तं वचनं हिताश्रयम्।

विना पुनः सत्यवतोऽस्य जीवितं वरं द्वितीयं वरयस्व भामिनि ।। ३२ ।। (०३)

**सावित्री**

हृतं पुरा मे श्वशुरस्य धीमतः स्वमेव राज्यं लभतां स पार्थिव।

जह्यात्स्वधर्मं न च मे गुरुर्यथा द्वितीयमेतद्वरयामि ते वरम् ।। ३३ ।। (०४)

**यमः**

स्वमेव राज्यं प्रतिपत्स्यतेऽचिरान्न च स्वधर्मात्परिहास्यते नृपः।

कृतेन कामेन मया नृपात्मजे निवर्त गच्छस्व न ते श्रमो भवेत् ।। ३४ ।। (०५)

**सावित्री-**

प्रजास्त्वयैता नियमेन संयता नियम्य चैता नयसे निकामया।

---

(०१) ( कुतः श्रमः ( अ )द्य; च (for हि); (२) गतिर्ध्रुवं; (४) सुरेश भूयोपि; स्वरेण भूयश्च; सुरोत्तमान्यच्च; .

(०२) ( त्सङ्गमम् (for त्सङ्गतम्); वरं; मतं (for परं); सकृत्सतां सङ्गतमीप्सितंवरं; (३) सत्पुरुषेषु; (४) ततः सतां सङ्गतमेव मन्ये .

(०३) श्रीयम; ( बत; बहु; बल (for बुध); (२) त्वयेदमुक्त; त्वया यदुक्तं; (४) भाविनि (for भामिनि); .

(०४) ( परैर् (for पुरा); हृतं हि राज्यं श्वशुरस्य मे परैः; (२) प्रतिपत्स्यते चिरात्; लभतां स पार्थिवः; (३) स्वधर्मान्; न; च; यम (for यथा ); न च स्वधर्म प्र ( वि); जहीत मे गुरुर; (४) ए; (for एतं); .

(०५) ( स ह लप्स्यत; प्रात लप्स्यते; प्रतिपद्यते; (२) प्रतिहास्यते; परिहार्यते; परिहीयते; .

ततो यम त्वं तव देव विश्रुतं निबोध चेमां गिरमीरितां मया ।। ३५ ।।(०१)

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा।
अनुग्रहश्च दानं च सतां धर्मः सनातनः ।। ३६ ।। (०२)

एवं प्रायश्च लोकोऽयं मनुष्याः भ(श)क्तिपेशलाः।
सन्तस्त्वेवाप्यमित्रेषु दयां प्राप्तेषु कुर्वते ।। ३७ ।। (०३)

**यमः**

पिपासितस्येव भवेद्यथा पयस्तथा त्वया वाक्यमिदं समीरितम्।
विना पुनः सत्यवतोऽस्य जीवितं वरं वृणीष्वेह शुभे यदिच्छसि ।। ३८ ।। (०४)

**सावित्री**

ममानपत्यः पृथिवीपतिः पिता भवेत्पितुः पुत्रशतं तथौरसम्।
कुलस्य सन्तानकरं च यद्भवेत्तृतीयमेतद्वरयामि ते वरम् ।। ३९ ।। (०५)

**यमः**

कुलस्य सन्तानकरं सुवर्चसं शतं सुतानां पितुरस्तु ते शुभे।

---

(०१) ( प्रजा त्वयेयं; प्रजास्त्वयैता; प्रजास्त्वमेतां च नियम्य चैव; (२) नियम्य चैतां; म्य चैतान्; म्य चैना; त्वमेव सर्वा; नियम्यते ता; चेतो; म्य चैव; न काम्यया; निकामया; न कामतः; न कामया; निकामया कामितेनार्थेन (३) ततो (for अतो); .

(०२) ( सर्वभूतानां .

(०३) (२) भक्ति; शान्ति (for शक्ति); अशक्तिपेशलाः शक्तिकौशलहीनाः पाठान्तरे भक्ति; श्रद्धा कौशलं च ताभ्यां हीनाः; सन्धिरार्षः (३) सन्तस्त्वपि ह्यमित्रेषु; स्ते चाप्य; सन्तः स्वेष्वपय ( पि); मित्रेषु..

(०४)श्रीयम उ; ( स्यैव (for व); यथा; भवेत्; जलं (for पयस्); (२) मया चाहम् (for त्वया वाक्यम्); (३) तो हि (for तोस्य); जीविताद्; (४) सुते (for शुभे); यमिच्छसि; यमीप्ससिः यदीच्छसि; वरं तृतीयं वरयस्व भाविनि .

(०५) (२) तथौ' (for ममौ); (३) न (for नु); च; तद् (for यद्); (४) एतद्; एनं (for एतं); .

कृतेन कामेन नाराधिपात्मजे निवर्त दूरं हि पथस्त्वमागता ।। ४० ।। (०१)

**सावित्री-**

न दूरमेतन्मम भर्तृसंनिधौ मनो हि मे दूरतरं प्रधावति।

अथ व्रजन्नेव गिरं समुद्यतां मयोच्यमानां शृणु भूय एव च ।। ४१ ।। (०२)

विवस्वतस्त्वं तनयः प्रतापवांस्ततो हि वैवस्वत उच्यसे बुधैः।

समेन धर्मेण चरन्ति ताः प्रजास्ततस्तवेहेश्वर धर्मराजता ।। ४२ ।। (०३)

आत्मन्यपि न विश्वासस्तथा भवति सत्सु यः।
तस्मात्सत्सु विशेषेण सर्वः प्रणयमिच्छति ।। ४३ ।। (०४)

सौहृदात्सर्वभूतानां विश्वासो नाम जायते।
तस्मात्सत्सु विशेषेण विश्वासं कुरुते जनः ।। ४४ ।। (०५)

**यमः**

उदाहृतं ते वचनं यदङ्गने शुभे न तादृक्त्वदृते श्रुतं मया।

अनेन तुष्टोऽस्मि विनास्य जीवितं वरं चतुर्थं वरयस्व गच्छ च ।। ४५ ।। (०६)

ममात्मजं सत्यवतस्तथौरसं भवेदुभाभ्यामिह यत्कुलोद्वहम्।
शतं सुतानां बलवीर्यशालिनामिदं चतुर्थं वरयामि ते वरम्।(०७)

---

(०१) श्रीयम; ( सुवर्चसा; च तद्भवेत् ; समुच्चयं (४) पथं; पतिं; पथि; त्वयागता; .

(०२) (३) यथा; अथ; पथा; परि (for तथा); व्रजत्यैव; (४) हि; ह; तत् (for च); .

(०३) (२) अतोसि; ततोसि (for ततो हि); उच्यते (३) समेन; श्रमेण (for शमेन); चरन्ति ताः; चिरं जिताः (for च रञ्जिताः); (४) ततः स वेदेत्र च धर्मराजः .

(०४) (२) तावद्; तथा; . वै (for तावान्), संमतः (for सत्सु यः), (३) यस्मात् (४) सर्वः प्रणयते नरः ( यते जनः; मते नरः) .

(०५) (२) विश्वास उपजायते ( ३) सत्सु तस्माद् .

(०६) श्रीयम ( तव (for ते), उदाहृतं यद्धचनं (२) शुभं तावत् (for तादृक्), श्रुतंमया (४) च वक्तुं (for चतुर्थं) .

(०७) ( मदात्मजं सत्यवतस्तदौरसं (२) इति; अपि (for इह), (३) बलिनां महात्मनाम् (for बलवीर्यं),

**सावित्री-**

वरं वृणे सत्यवतो मयि प्रभो भवेत्सुतानां शतमेतदीप्सितम् ।

**यमः-**

शतं सुतानां बलवीर्यशालिनां भविष्यति प्रीतिकरं तवाबले।
परिश्रमस्ते न भवेन्नृपात्मजे निवर्त दूरं हि पथस्त्वमागता ।[०१]

तथास्तु ते पुत्रशतं शुभानने द्रुतं निवर्तस्व परिश्रमो न ते ।। ४६ ।।

**सावित्री**

सतां सदा शाश्वतधर्मवृत्तिः सन्तो न सीदन्ति न च व्यथन्ति।

सतां सद्भिर्नाफलं सङ्गमोऽस्ति सद्भ्यो भयं नानुवर्तन्ति सन्तः ।। ४७ ।। [०२]

सन्तो हि सत्येन नयन्ति सूर्यं सन्तो भूमिं तपसा धारयन्ति।

सन्तो गतिर्भूतभव्यस्य राजन्सतां मध्ये नावसीदन्ति सन्तः ।। ४८ ।। [०३]

आर्यजुष्टमिदं वृत्तमिति विज्ञाय शाश्वतम्।
सन्तः परार्थं कुर्वाणा नावेक्षन्ति परस्परम् ।। ४९ ।। [०४]

न च प्रसादः सत्पुरुषेषु मोघो न चाप्यर्थो नश्यति नापि मानः।

---

(४) इमं (for इदं), चतुर्थमेकं (मेतद्; मेन) वरयामि ते वरं .

(०१) ( एवं (for शतं), कुल (for बलं), (२) तथा; तदा (for तव), (३) भविता (for न भवेन्) .

(०२) ( हिता (for सदा), शाश्वत (for शाश्वती), (२) व्यथन्ते (३) सङ्गमो (तो) नाफलो (for नाफलः सङ्गमो), (४) नानुभवन्ति; .

(०३) ( सत्यो हि. भवन्ति शूराः (for नयन्ति सूर्यं), (२) सन्तो हि भूमिं; सतां भूमिं सन्तो हि भूमिं तपसा चरन्ति, (३) भवस्य (for भव्यस्य), (४) न विषीदन्ति (for नावसी) .

(०४) ( आर्यवृत्तम्; दृष्टम् (४) नावेक्षन्ति; नापेक्षते परस्परं (for प्रति) .

यस्मादेतन्नियतं सत्सु नित्यं तस्मात्सन्तो रक्षितारो भवन्ति ।। ५० ।। (०१)

**यमः**

यथा यथा भाषसि धर्मसंहितं मनोऽनुकूलं सुपदं महार्थवत्।
तथा तथा मे त्वयि भक्तिरुत्तमा वरं वृणीष्वाप्रतिमं पतिव्रते ।। ५१ ।। (०२)

**सावित्री-**

न तेऽपवर्गः सुकृताद्विना कृतस्तथा यथान्येषु वरेषु मानद।
वरं वृणे जीवतु सत्यवानयं यथा मृता ह्येवमहं पतिं विना ।। ५२ ।।
(०३)

लक्षालङ्कारः - न तेऽपवर्गः सुकृतात् इत्यत्र सुकृतात् पुण्याद्विना यथा अन्येषु वरेषु त्वया कृतः वरः मम न, तथा त्वया कृतः अपवर्गोऽपि मम न । यथामृता ह्येवम् इत्यत्र अहं पतिं विना, अव्ययानामनेकार्थत्वात् यथा यस्मात् मृता हि, एवं तस्मात् भर्तृविनाकृ(ता)तां श्रियमपि न कामये ।

न कामये भर्तृविनाकृता सुखं न कामये भर्तृविनाकृता दिवम्।
न कामये भर्तृविनाकृता श्रियं न भर्तृहीना व्यवसामि जीवितुम् ।। ५३ ।। (०४)

---

(०१) ( न सत्-; नराः (for न च), सत्पुरुषेण; सत्यभाषेषु; पुरुषेषु सत्सु.(for मोघो), न प्रमादः सत्यभाषिषु मोघो न च प्रमादः सत्पुरुषेष्वमोघो (२) न चाप्यनर्थो. नश्यते. नाभिमानः; . नाप- मानः वापि मानः (३) तस्मादेतन्; .,यस्मादेनं; यस्मादेव; .यस्मादेतं. .

(०२) श्रीयमः ( भाषिणि (for भाषसि), (२) स्व (for सु), (३) च (for मे) (४) पति (for यत) .

(०३) ( ते स्ति किंचित् (for तेपवर्गः), न तेपवर्गः सुकृतां तथा कृतो; न मे स्वर्गः सत्यवताकृतो यथा; . न मेपवर्गः सुकृताद्विनाकृतासू (२) यथा (for तथा), (अ)हम; (अ)यम (for यथा), (३) ख-घ-ह्येवमहं, (४) ह्येनमहे; (अ)स्म्येवमह विना पतिम .

(०४) (२) श्रियं (for दिवम्), (३) भर्तृविनाकृतं. दिव; प्रियं (for श्रियं), (४) (अ)ध्यवसामि (for व्यव) .

वरातिसर्गः शतपुत्रता मम त्वयैव दत्तो ह्रियते च मे पतिः।
वरं वृणे जीवतु सत्यवानयं तवैव सत्यं वचनं भविष्यति ।। ५४ ।। [०१]

**मार्कण्डेयः**

तथेत्युक्त्वा तु तं पाशं मुक्त्वा वैवस्वतो यमोः।
**धर्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत्** ।। ५५ ।। [०२]

एष भद्रे मया मुक्तो भर्ता ते कुलनन्दिनि।[०३]
**तोषितोऽहं त्वया साध्वि वाक्यैर्धर्मार्थसंहितैः**** ।। ५६ ।।

अरोगस्तव नेयश्च सिद्धार्थः स भविष्यति।[०४]

चतुर्वर्षशतायुश्च त्वया सार्धमवाप्स्यति। ।। ५७ ।। [०५]

इष्ट्वा यज्ञैश्च धर्मेण ख्यातिं लोके गमिष्यति।[०६]
**त्वयि पुत्रशतं चैव सत्यवाञ्जनयिष्यति** ।। ५८ ।।

ते चापि सर्वे राजानः क्षत्रियाः पुत्रपौत्रिणः।
**ख्यातास्त्वन्नामधेयाश्च भविष्यन्तीह शाश्वताः** ।। ५९ ।। [०७]

पितुश्च ते पुत्रशतं भविता तव मातरि

मालव्यां मालवा नाम शाश्वताः पुत्रपौत्रिणः।
**भ्रातरस्ते भविष्यन्ति क्षत्रियास्त्रिदशोपमाः** ।। ६० ।। [०८]

---

(०१) ( वरातिसर्गे दत्ता; यत्ता (for दत्तो), म्रियते (for हि), (४) तथैव; .त्वयैव .
(०२) श्रीमार्कण्डेयः ( च (for तु), तं पाशं; . वै पाशान् (२)क-ख-सत्यवतो, सत्यवतो (for वैवस्वतो) .
(०३) यम उ; धर्मः, ( एहि; एव (for एष), भर्ता (for भद्रे), (२) कुलवर्णिनि वरवर्णिनि-
तोषितो, साध्वि.
(०४) (३) आरोग्यस्तव नीयश्च; नोजाश्च; देहश्च (४) स (for च) .
(०५) ( चतुर्वर्षशतायुश्च (२) तव तया (for त्वया), अवाप्स्यसि; उपेष्यति .
(०६) ( यज्ञांश्च, (२) ख्यातिं लोके गमिष्यसि .
(०७) ( चापि (for चैव), (३) ’न्नामपुत्राख्या; ’न्नामका पुत्रा; न्नामधेयाख्या (६) (इ)ति (for (इ)ह) .
(०८) (२) भविष्यत् (for भविता), (३) व्यो मालवानां च .

**मार्कण्डेयः-**

एवं तस्यै वरं दत्त्वा धर्मराजः प्रतापवान्।
निवर्तयित्वा सावित्रीं स्वमेव भवनं ययौ ।। ६१ ।। (०१)

सावित्र्यपि यमे याते भर्तारं प्रतिलभ्य च ।
जगाम तत्र यत्रास्या भर्तुः शावं कलेवरम् ।। ६२ ।। (०२)

सा भूमौ प्रेक्ष्य भर्तारमुपसृत्योपगृह्य च ।
उत्सङ्गे शिर आरोप्य भूमावुपविवेश ह ।। ६३ ।। (०३)

सञ्ज्ञां च स पुनर्लब्ध्वा सावित्रीमभ्यभाषत।
प्रोष्यागत इव प्रेम्णा पुनः पुनरुदीक्ष्य वै ।। ६४ ।। (०४)

**सत्यवान्**

सुचिरं बत सुप्तोऽस्मि किमर्थं नावबोधितः।
क्व चासौ पुरुषः श्यामो योऽसौ मां सञ्चकर्ष ह ।। ६५ ।। (०५)

**सावित्र्युवच**

सुचिरं त्वं प्रसुप्तोऽसि ममाङ्के पुरुषर्षभ।
गतः स भगवान्देवः प्रजासंयमनो यमः ।। ६६ ।। (०६)

विश्रन्तोऽसि महाभाग विनिद्रश्च नृपात्मज ।

---

(०१) मार्कण्डेयः ( वरान् (for वरं), (३) निवर्त्य चैव सावित्री .
(०२) (२) ह (for च), (३/४) यत्रासा; यत्रास्य जगाम यत्र तच्छापं (चापं; च्छावं), भर्तुस्तस्य विचेतनं .
(०३) ( भूमौ सम्प्रेक्ष्य भर्तारं (२) (अ)भि (for (उ)प), (उ)पगृह्य (for गृह्य),(३) उत्सङ्गेस्य शिरः स्थाप्य .
(०४) ( स सञ्ज्ञां (for सञ्ज्ञां च), स पुनद् (for सत्यवान्), (२) प्रत्य (for अभ्य'), (४) उदैक्षत .
(०५) ( तव (for बत), सुप्तोहं (२) वानि (for नाव),(३) वा स; व वासौ (for चासौ), (४) यो मां; यो मा; योद्य (for योसौ), सम्प्रचकर्ष ह; मां सम्प्रकर्षितः; मां सम्प्रकर्षति; . मां विच- कर्ष ह .
(०६) ( तव; त्वं प्र (for बत), (२) ममाङ्के .

यदि सह्यं समुत्तिष्ठ विगाढां पश्य शर्वरीम् ॥ ६७ ॥ (०१)

लक्षालङ्कारः - वरातिसर्गः शतपुत्रता इत्यत्र शतपुत्रता शतपुत्रताख्यः । यदि सह्यं समुत्तिष्ठ इत्यत्र सह्यं सहनयोग्यम् ।

**मार्कण्डेयः**

उपलभ्य ततः सञ्ज्ञां सुखसुप्त इवोत्थितः।
दिशः सर्वा वनान्तांश्च निरीक्ष्योवाच सत्यवान् ॥ ६८ ॥ (०२)

**सत्यवान्-**

फलाहारोऽस्मि निष्क्रान्तस्त्वया सह सुमध्यमे।
ततः पाटयतः काष्ठं शिरसो मे रुजाभवत् ॥ ६९ ॥ (०३)

शिरोऽभितापसन्तप्तः स्थातुं चिरमशक्नुवन्।
तवोत्सङ्गे प्रसुप्तोऽस्मि इति सर्वं स्मरे शुभे ॥ ७० ॥ (०४)

त्वयोपगूढस्य च मे निद्रयापहृतं मनः।
ततोऽपश्यं तमो घोरं पुरुषं च महौजसम् ॥ ७१ ॥ (०५)

तद्यदि त्वं विजानासि किं तद्ब्रूहि सुमध्यमे।
स्वप्नो मे यदि वा दृष्टो यदि वा सत्यमेव तत् ॥ ७२ ॥ (०६)

---

(०१) ( विश्न्तश्च; विरुजश्च (३) सत्वं; सह्यं; शक्यः (४) विशालां; , विगाढं .

(०२) ( पुनः (for ततः), (२) सोथ (for सुख), (३) दिगन्तांश्च; वनान्ताश्च .

(०३) सत्यवान् ( स्मि विश्तसू; सि निष्क्रान्तसू; भिनि हि नि'; विनि', (४) रुजो न .

(०४) ( 'तापसयुक्तः (२) स्थातुं चाशक्नुवन्पुनः (३/४) ततोत्सङ्गे प्रसुप्तोस्मि इति .

(०५) (३) तदा; अहं (for तमो), (४) सु (for च) .

(०६) ( तं (for तद्), किञ्चिद् (for किं तद्), (३) स्वप्नो न; स्वप्नेन; स्वप्ने तु; स्वप्नोत्र; स्वप्नोयं; स्वप्नो हि; स्वप्नोद्य; स्वप्नोस्य; स मया (for यदि वा),(४) मयि (for यदि), तथ्यम्; स्वप्रम् (for सत्यम्), तु (for तत्) .

**मार्गण्डेयः-**

तमुवाचाथ सावित्री रजनी व्यवगाहते।
**श्वस्ते सर्वं यथावृत्थमाख्यास्यामि नृपात्मज ।। ७३ ।।** (०१)

उत्तिष्ठोत्तिष्ठ भद्रं ते पितरौ पश्य सुव्रत।
**विगाढा रजनी चेयं निवृत्तश्च दिवाकरः ।। ७४ ।।** (०२)

नक्तश्चराश्चरन्त्येते हृष्टाः क्रूराभिभाषिणः।
**श्रूयन्ते पर्णशब्दाश्च मृगाणां चरतां वने ।। ७५ ।।** (०३)

एता घोरं शिवा नादान्दिशं दक्षिणपश्चिमाम्।
**आस्थाय विरुवन्त्युग्राः कम्पयन्त्यो मनो मम ।। ७६ ।।** (०४)

**सत्यवान्**

वनं प्रतिभयाकारं घनेन तमसाऽऽवृतम्।
**न विज्ञास्यसि पन्थानं गन्तुं चैव न शक्ष्यसि ।। ७७ ।।** (०५)

**सावित्री-**

अस्मिन्नद्य वने दग्धे शुष्कवृक्षः स्थितोज्वलम्।
वायुना धूय(धम्य)मानोऽत्र दृश्यतेऽग्निः क्वचित्क्वचित् ।। ७८ ।। (०६)

---

(०१) मार्कण्डेयः, (२) व्यवगाहत; ह्यवगाहते, (३) सुप्ते; स्वप्ने (for श्वस्ते), (४) व्याख्यास्यामि .
(०२) (२) पितरं पश्य सुव्रतं. चैव .
(०३) ( श्व दृश्यन्ते, (२) दुष्टाः; धृष्टा (for हृष्टाः), सन्तु; पूर्ण; वर्ण (for पर्ण) .
(०४) ( घोररूपा. एतान्धोरान् (ता घोरं; ता घोरान्) शिवा नादान्, (३) अह्नाय (for आस्थाय), विचरन्त्युग्राः; विबुव', (४) कम्पर्यतो .
(०५) ( ख-कोशो श्लोको..यं अक्ष नास्ति;,परन्तु ७३१/२ श्लोकानन्तरं अधिक पाठया वर्तते.'घोरं (for कारं), घोरेण (for घनेन), (३)विज्ञा- स्यामि; 'स्यति, (४) सक्ष्यति; शक्ष्यसे; शक्यसे; शक्यते; शक्ष्यते .
(०६) (२)शुष्कः(ष्के), वृक्षे; शुष्को वृक्षः, (३) धूय; धाम्यं, (ऽ)त्र (for ऽग्निर्), तु; च; ऽग्निः; . हि(for ऽत्र), पृथकू पृथकू (for क्वचित्क्वचित्) .

ततोऽग्निमानयित्वेह ज्वालयिष्यामि सर्वतः।
काष्ठानीमानि सन्तीह जहि सन्तापमात्मनः ॥ ७९ ॥ (०१)

यदि नोत्सहसे गन्तुं सरुजं त्वां हि लक्षये।
न च ज्ञास्यासि पन्थानं तमसा संवृते वने ॥ ८० ॥ (०२)

श्वः प्रभाते वने दृश्ये यास्यावोऽनुमते तव ।
वसावेह क्षपामेकां रुचितं यदि तेऽनघ ॥ ८१ ॥ (०३)

**सत्यवान्**

शिरोरुजा निवृत्ता मे स्वस्थान्यङ्गानि लक्षये।
मातापितृभ्यामिच्छामि सङ्गमं त्वत्प्रसादजम् ॥ ८२ ॥ (०४)

न कदाचिद्विकालं हि गतपूर्वो मयाऽऽश्रमः।
अनागतायां सन्ध्यायां माता मे प्ररुणद्धि माम् ॥ ८३ ॥ (०५)

दिवापि मयि निष्क्रान्ते सन्तप्येते गुरू मम।
विचिनोति हि मां तातः सहैवाश्रमवासिभिः ॥ ८४ ॥ (०६)

मात्रा पित्रा च सुभृशं दुःखिताभ्यामहं पुरा।

---

(०१) ( अतो (for ततो), यत्वेह; 'यित्वेदं; 'यित्वाहं; 'यस्वेह, (२) ज्वल. पावकं; सर्वशः .

(०२) सावित्री, (२)त्वां हि; चोप-; चापि; चाभि-, (३) विज्ञास्यसि; च जानासि, (४) संवृते पथि; ते तु वै; तेन वै (for ते वने) .

(०३) ( प्रभाते तु (for श्वः प्रभाते), (२) यास्यामो, (३) वसामे-('मी)हः. एकां; एतद् (for एतां), (४) उचितं; रुचिरं. विभो (for ऽनघ) .

(०४) ( विवर्ता (for निवृत्ता), (४) संयोगं (for सङ्गमं) .

(०५) ( च काले; विकालं; हि काले; विकालो; हि कालं. च; पि (for हि),(२) गतपूर्वोयमाश्रमः; वोंहमाश्रमात्; ' वो मयाश्रमात्, (४) वै (for मे), माता वै संरुण(संरुजा-; प्ररुणा)द्धि मां; रुणद्धन्थबा हि मां सदा .

(०६) (३) हि (for च), मे (for मां), माता (for तातः), सहेत्याश्रम .

उपालब्धश्च बहुशश्चिरेणागच्छसीति ह ।। ८५ ।।(०१)

लक्षालङ्कारः - मात्रा पित्रा च सुभृशम् इत्यत्र मात्रा पित्रा चेति द्वाभ्यां दुःखिताभ्यामिति योजना ।

का त्ववस्था तयोरद्य मदर्थमिति चिन्तये।
तयोरदृश्ये मयि च महद्दुःखं भविष्यति ।। ८६ ।। (०२)

पुरा मामूचतुश्चैव रात्रावस्त्रायमाणकौ।
भृशं सुदुःखितौ वृद्धौ बहुशः प्रीतिसंयुतौ ।। ८७ ।। (०३)

त्वया हीनौ न जीवाव मुहूर्तमपि पुत्रक ।
यावद्धरिष्यसे पुत्र तावन्नौ जीवितं ध्रुवम् ।। ८८ ।। (०४)

लक्षालङ्कारः -यावद्धरिष्यसे पुत्र इत्यत्र धरिष्यसे प्राणान् धारयिष्यसि ।

वृद्धयोरन्धयोर्दृष्टिस्त्वयि वंशः प्रतिष्ठितः।
त्वयि पिण्डश्च कीर्तिश्च सन्तानं चावयोरिति ।। ८९ ।। (०५)
तौ रात्रौ मामपश्यन्तौ कामवस्थां गमिष्यतः ।। ९० ।। (०६)

निद्रायाश्चाभ्यसूयामि यस्या हेतोः पिता मम।

---

(०१) (माता- (for मात्रा), तु (for य), मातापितृभ्यां सुभृशं, (३) उपा-लभ्य. च (for सु-), (४) हि; च (for ह) .

(०२) ( न्ववस्था, (३) मयि च. अदृश्ये मयि ताभ्यां हि .

(०३) (२)क-ख-घ-वाग्रय, रात्रावश्चायमानकौ (राभ्याव- स्थानमागतं); वाश्य; ’वाघ्रा(वाह्वा-; व्याघ्रा)य मां तदा; वास्त्रायमाणकौ, (३) सुभृशं (for भृशं सु), (४) बहुशः प्रतिसंयतौ .

(०४) ( दीनौ (for हीनौ), जीवेव’; जीवावो; जीवेद्य (for जीवाव), (२) इव (for अपि), त्वरिष्यते; धरि- ष्यते, (४) तावन्नो .

(०५) ( आवयोट्; अन्तयोद् (for अन्धयोर्), दृष्टिम् (for यष्टिम्), (२) प्राणः; वत्स (for वंशः), (४) सन्तानम्. अपि; . त्वयि (for इति) , ( शक्त्या; शक्यं (for शक्या); (२) कुडलेच्छा (३) विहर्तुं(for विहन्तुं); .माता वृद्धा पिता वृद्धस्तयोर्यष्टिरहं किल।

(०६) ( त्वधसू; (अ)धम् (for वृद्धम्), वृद्धौ च मातापितरौ; माता पिता च वृद्धौ च, (३) पुत्रं (for रात्रौ) .

माता च संशयं प्राप्ता मत्कृतेऽनपकारिणी ।। ९१ ।।[०१]

अहं च संशयं प्राप्तः कृच्छ्रामापदमास्थितः।
मातापितृभ्यां हि विना नाहं जीवितुमुत्सहे ।। ९२ ।।[०२]

व्यक्तमाकुलया बुद्ध्या प्रज्ञाचक्षुः पिता मम।
एकैकमस्यां वेलायां पृच्छत्याश्रमवासिनम् ।। ९३ ।।[०३]

नात्मानमनुशोचामि यथाहं पितरं शुभे।
भर्तारं चाप्यनुगतां मातरं परिदुर्बलाम् ।। ९४ ।।[०४]

मत्कृतेन हि तावद्य सन्तापं परमेष्यतः।
जीवन्तावनुजीवामि भर्तव्यौ तौ मयेति ह ** ।। ९५ ।।

तयोः प्रियं मे कर्तव्यमिति जानामि चाप्यहम्।[०५]
परमं दैवतं तौ मे पूजनीयौ सदा मया ।। ९६ ।।[०६]

तयोस्तु मे सदास्त्येवं व्रतमेतत्पुरातनम् ।। ९५ ।।[०७]

**मार्कण्डेयः**

एवमुक्त्वा स धर्मात्मा गुरुभक्तो गुरुप्रियः।

---

(०१) ( निद्रामेवाभ्य('भि)सूयामि; निद्रां चैवा(' व)भ्य, (२) यस्यां; यस्य, (३)प्राप, (४) त्वत्कृते च सुमध्यमे; मत्कृतेनोपका; मत्कृते- नापि का .

(०२) (२) कृच्छ्रादा, (३) रहितो (for हि विना) .

(०३) ( व्यक्ताम् (for व्यक्तम्), (४) 'वासिनां; वासिनः; वासिभिः .

(०४) (४) चैव दुर्बलां; भृशदु'; भृशदुःखितां; प्रति दुर्बलां .

(०५) ( मत्कृते पितरावद्य; 'ते चापि ता; तेपि च ता, (२) भृशम् (for परम्), (३) यावत्तौ; एवं तौ (for जीवन्तौ), (अ)नुपश्यामि, (४) ममेति च; मया त्विति (for मयेति ह), मृतावनुम्रिये च तौ, (५) तथा (for तयोः), च (for मे), इति जानामि; अतिजी-वामि. नापरं; वाप्यहं .

(०६) मम (for मया) .

(०७) (तयोर्हितमवास्थेयं; तयोर्हि मे ममास्थेयं; तयोर्हीमे तथास्येवं; ततो हि मे यथा सेव्यं; तयोः सकाशं गच्छामि.) .

उच्छ्रित्य बाहू दुःखार्तः सुस्वरं प्ररुरोद ह ।। ९८ ।।(०१)
ततोऽब्रवीत्तथा दृष्ट्वा भर्तारं शोककर्शितम् ।। ९९ ।।

प्रमृज्याश्रूणि नेत्राभ्यां सावित्री धर्मचारिणी।(०२)

यदि मेऽस्ति तपस्तप्तं यदि दत्तं हुतं यदि।
श्वश्रूश्वशुरभर्तॄणां मम पुण्यास्तु शर्वरी ।। १०० ।।(०३)

न स्मराम्युक्तपूर्वं वै स्वैरेष्वप्यनृतां गिरम्।
तेन सत्येन ताव्दद्य ध्रियेतां श्वशुरौ मम ।। १०१ ।।(०४)

**सत्यवान्**

कामये दर्शनं पित्रोर्याहि सावित्रि मा चिरम्।
अपि नाम गुरू तौ हि पश्येयं प्रीयमाणकौ ।। १०२ ।।(०५)

पुरा मातु पितुर्वापि यदि पश्यामि विप्रियम्।
न जीविष्ये वरारोहे सत्येनात्मानमालभे ।। १०३ ।।(०६)

This Stange is Interchanged in TRK after 101 .

यदि धर्मे च ते बुद्धिर्मां चेज्जीवन्तमिच्छसि।
मम प्रियं वा कर्तव्यं गच्छावाश्रममन्तिकात् ।। १०४ ।।(०७)

---

(०१) ( तु; . च (for स), (२) गुरुभक्तो; वृत्ति; धर्मं (for वर्ती), गुरुप्रियहिते रतः, (३) उत्सृज्य; उद्धृत्य. चाह (for बाहू), (४) सुस्वरं; सस्वनं .
(०२)मार्क, ( तदा (for तथा), (२) शोकपीडितं; कर्षितं, (३) वि- (for प्र-), पाणिभ्यां; बाहुभ्यां .
(०३) सावित्री, ( मेद्य (for मेऽस्ति), (२) भवेत् (यदि), (४) क्षेमास्तु; रम्या (for पुण्या), अस्तु क्षेमाशु शर्वरी; स्वस्था('स्थो)भावो भवत्युत .
(०४) (उ)क्तपूर्वं, (२) (अ)हितां (for (अ)नृतां), (४) प्रियेतां; भवेतां. प्रियतां श्वशुरो मम .
(०५) (४)क-ख-ध्रिय, प्रपश्येद् (for पश्येयं) .
(०६) ( माचिरं (for दर्शनं), (२) यावत् (for याहि) .
(०७) ( चेद्धाकर्मे; च(क)तु धर्मं (for यदि धर्मे), मे (for ते), (२) मा (for मां), च जी (सञ्जी-; चेज्जी) वितुम् (for चेज्जीवन्तम्), (३) चेत्; . च (for वा), (४) गच्छाव; गच्छ च; गच्छ वा (आ)श्रममण्डलं; 'मुत्तमं .

**मार्कण्डेयः**

सावित्री तत उत्थाय केशान्संयम्य भाविनी।
**पतिमुत्थापयामास बाहुभ्यां परिगृह्य वै ॥ १०५ ॥** (०१)

उत्थाय सत्यवांश्चापि प्रमृज्याङ्गानि पाणिना।
**सर्वा दिशः समालोक्य कठिने दृष्टिमादधे ॥ १०६ ॥** (०२)

तमुवाचाथ सावित्री श्वः फलानि हरिष्यसि।
**योगक्षेमार्थमेतं ते नेष्यामि परशुं त्वहम् ॥ १०७ ॥** (०३)

कृत्वा कठिनभारं सा वृक्षशाखावलम्बिनम्।
**गृहीत्वा परशुं भर्तुः सकाशे पुनरागमत् ॥ १०८ ॥** (०४)

वामे स्कन्धे तु वामोरूर्भर्तुर्बाहुं निवेश्य च ।
**दक्षिणेन परिष्वज्य जगाम गजगामिनी ॥ १०९ ॥** (०५)

**सत्यवान्**

अभ्यासगमनाद्भीरु पन्थानो विदिता मम।
**वृक्षान्तरालोकितया ज्योत्स्नया चापि लक्षये ॥ ११० ॥** (०६)

आगतौ स्वः पथा येन फलान्यवचितानि च ।

---

(०१) माकाडेयः; श्रीमाकण्डेयः, (सावित्री तं सः (च त)मादाय; तत उत्थाय सावित्री, (२) भाविनी, (४) तं (for वै) .

(०२) (२) क-ख-विमृज्या, वि-(प्र-), (३) दिशः सर्वाः .

(०३) (२) ह नेष्यसि ((अ)हरिष्यसि); हरिष्यसि; (इ)ह चेष्यसि, (३) एतं (for एतत्), (४) दास्यामि (for नेष्यामि), शुभम् (for त्वहम्) .

(०४) (२) वृक्षमूला, (४)सकाशे; समीपं .

(०५) ( वामस्कन्धे. स्कन्धेन (for स्कन्धे तु), तु वामूरू(रूर्); सुवामोरुद्; तु वामोस्य; थ वामोरु (रू)र्, (२) निवेद्य. च (for सा), (३) परिगृह्य, (४) मृदुभाषिणी; गजगामिनी .

(०६) ( नित्याभ्या'('भि)गमनाद्, (२) (ऽ)धिगता (for विदिता), (३)वृक्षारामालोकितया; वृक्षान्तरालोक-नया (वृक्षान्तरालानि तथा), (४) च अपि. चोपलक्षये चापि लक्ष्यसे; चाभिलक्षये .

यथागतं शुभे गच्छ पन्थानं मा विचारय ।। १११ ।। (०१)

पलाशखण्डे चैतस्मिन्पन्था व्यावर्तते द्विधा।

तस्योत्तरेण यः पन्थास्तेन गच्छ त्वरस्व च ** ।। ११२ ।। (०२)

स्वस्थोऽस्मि बलवानस्मि दिदृक्षुः पितरावुभौ।(०३)

**मार्कण्डेयः**

ब्रुवन्नेवं त्वरायुक्तः सम्प्रायादाश्रमं प्रति ।। ११३ ।। (०४)

सावित्रीसहितः श्रीमान्सत्यवान्सशितव्रतः ।

अस्मिन् पर्वणि २५२अध्याये ११३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पतिव्रतामाहात्म्यपर्वणि सावित्र्युपाख्याने द्विपञ्चाशदधिकद्विशततमोऽध्यायः

।। २५२ ।।

# २५३. त्रिपञ्चाशदधिकद्विशततमो अध्यायः ।।

Concept Paste. P.No. 1455 .

---

(०१) (स्व (for स्वः), (अ)नेन (for येन), (२) क-ख-पन्थायंमा विचारय; घ-पन्थानमविचारय, फलान्यप(पि)-चितानि च; फलान्युपचितान्यतः, (४) अ- (for मा) .

(०२) ( खेटे (for षण्डे), वा; हि (for च), (३) अस्य; अत्र (for तस्य) .

(०३) ( तेन गच्छस्व च त्वरा, (२) चास्मि (for अस्मि) .

(०४) (ब्रुवन्नेव. त्वया युक्तः; तया युक्तः; तथा युक्तः (for त्वरा'), (२) सम्प्रायाद्; . सम्प्रयाता; सम्प्रदाद् (for स प्रायाद्), यतः (for प्रति) .

**मार्कण्डेयः**

एतस्मिन्नेव काले तु द्युमत्सेनो महाबलः।
लब्धचक्षुः प्रसन्नायां दृष्ट्यां सर्वं ददर्श ह ॥ १ ॥ (०१)

स सर्वानाश्रमान्गत्वा शैब्यया सह भार्यया।
पुत्रहेतोः परामार्तिं जगाम भरतर्षभ ॥ २ ॥ (०२)

तावाश्रमान्नदीश्चैव वनानि च सरांसि च ।
तस्यां निशि विचिन्वन्तौ दम्पती परिजग्मतुः ॥ ३ ॥ (०३)

श्रुत्वा शब्दं तु यं कञ्चिदुन्मुखौ सुतशङ्कया।
सावित्रीसहितोऽभ्येति सत्यवानित्यभाषताम् ॥ ४ ॥ (०४)

भिन्नैश्च पुरुषैः पादैः सव्रणैः शोणितोक्षितैः।
कुशकण्टकविद्धाङ्गावुन्मत्ताविव धावतः ॥ ५ ॥ (०५)

ततोऽभिसृत्य तैर्विप्रैः सर्वैराश्रमवासिभिः।
परिवार्य समाश्वास्य तावानीतौ स्वमाश्रमम् ॥ ६ ॥ (०६)

तत्र भार्यासहायः स वृतो वृद्धैस्तपोधनैः।

---

(०१) मार्काण्डेयः; श्रीमार्कण्डेयः;(. तस्मिन्नेव तु काले वै;;(२) महाबलः (बले) (for वने); ;;(३)ख-दृष्ट्या सर्वान् ,घ-,ृष्ट्वा, प्रसन्नायां (for त्मा); प्रस-न्नया लब्धचक्षुः.;;(४) सर्व दृष्ट्या; सर्वं दृष्ट्यां दृष्ट्यां सर्वा;, दृष्ट्यां सर्वं'; सर्वं दृष्ट्वा; सर्वदृष्ट्यां; दृष्ट्वा सर्वं; भूत्वा सर्वं; दृष्ट्या सर्वान.; सः (for ह); .

(०२) (२) सैब्यया (for शौ);;(४) भरतर्षभ; पुरुष; मनुजर्षभः .

(०३) ( तानाश्रमान.;;(३) तस्यां निशि (for तांस्तान्देशान्);;(४) परिमार्गतुः .

(०४) ( च (for तु); यं (for यत्); कश्चिद् (for किश्चिद्);;(३) 'भ्येत्य (for भ्येति);;

(४) इति धावतां; इत्य-भाषतां; अभ्यधावतां;.

(०५) ( पुरुषैः; प्रासैः (for पादैः);;(२) सव्रणैः शोणितैः क्षणैः; सव्रणौ ;शौणितोक्षितौ.;;(३) 'दिग्धाङ्गाव्,;;(४) धावतां; .

(०६) (ऽ)भिगम्य ( त्य);;सर्वैः (for विप्रैः);;(२) द्विजैर् (for सर्वैर्);;(४) तावानीतौ (for समा);
.

आश्वासितोऽपि चित्रार्थैः पूर्वराज्ञां कथाश्रयैः ॥ ७ ॥ (०१)

ततस्तौ पुनराश्वस्तौ वृद्धौ पुत्रदिदृक्षया।
बाल्यवृत्तानि पुत्रस्य स्मरन्तौ भृशदुःखितौ ॥ ८ ॥ (०२)

सावित्र्या दर्शनानि च । शोकं जग्मतुरन्योन्यं .पुनरुक्त्वा च करुणां वाचं तौ शोककर्शितौ।

हा पुत्र हा साध्वि वधूः क्वासि क्वासीत्यरोदताम् ॥ ९ ॥ (०३)

ब्राह्मणः सत्यवाक्तेषामुवाचेदं तोयर्वचः।

**ब्रह्मणाः-**

यथास्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान् ॥ १० ॥ (०४)

**गौतमः**

वेदाः साङ्गा मयाधीतास्तपो मे सञ्चितं महत्।
कौमारब्रह्मचर्यं च गुरवोऽग्निश्च तोषिताः ॥ ११ ॥ (०५)

समाहितेन चीर्णानि सर्वाण्येव व्रतानि मे।
वायुभक्षोपवासश्च कृतो मे विधिवत्सदा(पुरा) ॥ १२ ॥ (०६)

---

(०१) ( ततो (for तत्र);;(२) वृद्धो (for वृतो);;(३) आश्वासितोपि चित्रार्थैः;
तौ पवित्रार्थैः;;(४) पूर्वराज्ञां कथानकैः; पूर्वराजकथाश्रये.

(०२) (१/२) स्वस्थौ (for ’श्वस्तौ); दम्पती तौ ततःसन्तौ दृष्टौ पुत्र;;(३) बाल्य(for बाल्ये); वृत्तानि पुत्रस्य .

(०३) ( स (for च); पुनश्च करुणां वाचं;;(२) वदन्तौ; स्मरन्तौ (for वाचं तौ);कर्षितौ.-
(३) पुत्रि (for . पुत्र);वधूः साध्वि (साध्वी); वधु; वधू (for वधूः);;(४) (अ)द्य रोदतां; (इ)ति रोदतां; (इ)तिवोचतां (for (इ)त्यरोदताम्);क्वापि क्वासित्यवाद, (सीत्यवादि) -तां.

(०४) सुवर्चः; सुवर्णः;, ब्राह्मण उ; सुवर्चोवाच; ब्राह्मणाः. यथासि भार्या; अथास्य भार्या; .

(०५) ( वेदाः साङ्गाश्च या गीताम्; वेदः साङ्गो मयाधीतस् ;;(३) कौमार-; कौमार्य
च (for मे);.

(०६) (२) च; वै (for मे);;(४) कृतो मे विधिवत्सदा .

अनेन तपसा वेद्मि सर्वं परचिकीर्षीतम्।
सत्यमेतन्निबोधध्वं ध्रियते सत्यवानिति ।। १३ ।।(०१)

**शिष्यः**

उपाध्यायस्य मे वक्त्राद्यथा वाक्यं विनिःसृतम्।
नैव जातु भवेन्मिथ्या तथा जीवति सत्यवान् ।। १४ ।। (०२)

**ऋषयः**

यथास्य भार्या सावित्री सर्वैरेव सुलक्षणैः।
अवैधव्यकरैर्युक्ता तथा जीवति सत्यवान् ।। १५ ।। (०३)

**दाल्भ्यः-**

यथास्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान् ।। १६ ।। (०४)

**दाल्भ्यः**

यथा दृष्टिः प्रवृत्ता ते सावित्र्याश्च यथा व्रतम्।
गताऽऽहारमकृत्वा च तथा जीवति सत्यवान् ।। १७ ।। (०५)

**आपस्तम्बः**

यथा वदन्ति शान्तायां दिशि वै मृगपक्षिणः।

---

(०१) (२) सर्वं पर; सत्यं प्रिय.;;(३) मम (for एतन्); निबोधस्व; निबोधध्वं.; .
(०२) ( यद् (for मे'),; वाक्याद् (for वक्त्राद्);;(२) विनिर्गतं,;;(३) नैव (for नैतज्); .
(०३) ( यथा च (for यथास्य); भार्यासि; भार्यास्य;;(२) स्व-(for सु);तपसा च दमेन च;;(३) आचारेण च संयुक्ता; .
(०४) भरद्वाज (उ');(अ-क-अर्धचतुष्टयं नास्ति, यथा भार्या च सावित्री.; .
(०५) (३) (ए)व (for च); .

पार्थिवी च प्रवृत्तिस्ते तथा जीवति सत्यवान्   ।। १८ ।। (०१)

लक्षालङ्कारः - पार्थिवी चैव वृद्धिस्त इत्यत्र  पार्थिवी पृथिवीसम्बन्धिनी अभि- वृद्धिः राज्यप्राप्तिरित्यर्थः । यथा भवतीति पूर्वेणान्वयः ।

**धौम्यः**

सर्वैर्गुणैरुपेतस्ते यथा पुत्रो जनप्रियः।
दीर्घायुर्लक्षणोपेतस्तथा जीवति सत्यवान्   ।। १९ ।। (०२)

**मार्कण्डेयः**

एवमाश्वासितस्तैस्तु सत्यवाग्भिस्तपस्विभिः।
तांस्तान्विगणयन्सर्वांस्ततः स्थिर इवाभवत्   ।। २० ।। (०३)

ततो मुहूर्तात्सावित्री भर्त्रा सत्यवता सह ।
आजगामाश्रमं रात्रौ प्रहृष्टा प्रविवेश ह   ।। २१ ।। (०४)

दृष्ट्वा चोत्पतिताः सर्वे हर्षं जग्मुश्च ते द्विजाः।
कण्ठं माता पिता चास्य समालिङ्ग्याभ्यरोदताम् ।। २२ ।।

**ब्राह्मणाः**

पुत्रेण सङ्गतं त्वां तु चक्षुष्मन्तं निरीक्ष्य च।
सर्वे वयं वै पृच्छामो वृद्धि वै पृथिवीपते   ।। २३ ।।(०५)

---

(०१) आपस्तम्ब उ; वामदेवः; पाङ्क्यः(अ-अर्धद्वयं नास्ति, वदति; वै दिशि (for वदन्ति);;(२) वदन्ति (for दिशि वै);;(३) पार्थिवी च -वत्तिस्तेन; पार्थिवीं चैव वृद्धि ते; तु पार्थिवी चैव वृद्धिस्ते .

(०२) (२) द्विजप्रियः; द्विजोत्तमः (for जन); .

(०३) मार्कँडेयः; श्रीमार्कँडेयः( च; तैः (for तु); एवमाश्वासितौ तौ तु.;;(३)सर्वान् (for अर्थान्);;(४) ततः (त्र) स्थिर; अवस्थिर; ततः शिष्य (for अवस्थित); इह (for इव); .

(०४) (२) सह सत्यवता तदा.;;(४) प्रविष्टः; प्रविष्टा .

(०५) ब्राह्मण उ;( त्वां तु; त्वं च; .त्वद्य (for त्वाद्य);;(३) वै यच्छामो); हि पश्या

समागमेन पुत्रस्य सावित्र्या दर्शनेन च ।
चक्षुषश्चात्मनो लाभात्त्रिभिर्दिष्ट्या विवर्धसे ।। २४ ।। (०१)

सर्वैरस्माभिरुक्तं यत्तथा तन्नात्र संशयः।
भूयोभूयः समृद्धिस्ते क्षिप्रमेव भविष्यति ।। २५ ।। (०२)

ततोऽग्निं तत्र सञ्ज्वाल्य द्विजास्ते सर्व एव हि।
उपासाञ्चक्रिरे पार्थ द्युमत्सेनं महीपतिम् ।। २६ ।। (०३)

शैब्या च सत्यवांश्चैव सावित्री चैकतः स्थिताः।
सर्वैस्तैरभ्यनुज्ञाता विशोकाः समुपाविशन् ।। २७ ।। (०४)

ततो राज्ञा सहासीनाः सर्वे ते वनवासिनः।
जातकौतूहलाः पार्थ पप्रच्छुर्नृपतेः सुतम् ।। २८ ।। (०५)

**ऋषयः-(जना)**

प्रागेव नागतं कस्मात्सभार्येण त्वया विभो।
विरात्रे चागतं कस्मात्कोऽनुबन्धस्तवाभवत् ।। २९ ।। (०६)

सन्तापितः पिता माता वयं चैव नृपात्मज ।

---

(for वै पृच्छा);;(४) वै (for ते);.

(०१) (२) ’त्र्यागमनेन च.;;(४) (अ)भि (for वि-); .

(०२) ( ख-इदमर्धंनास्ति, च (for यत्); यथा सर्वैर्मुदाप्युक्तं; यथा सर्वे मुदा युक्ताम्.;;(२) तत्तथा नात्र;. यत्तथा तत्र (for तथा तन्नात्र);;(३) समृद्धि; संवृद्धि (for च वृद्धि);;(४) गमि’ (for भवि); .

(०३)श्रीमार्कण्डेयः; तथा (for ततो); प्रज्वाल्य; ततोग्निं ते समुज्वाल्य; ततोग्निहोत्रं सं .;;(२) ब्राह्मणाः (for द्विजास्ते); ह (for हि);;(४) नराधिपं (for मही);.

(०४) (२) चैकता; च ततस .; स्थिता; तथा;;(४) विशोका विशत् .

(०५) ( समासीनाः;;(३) सर्वे (for पार्थ); .

(०६) ऋषय ऊं.;;( प्रागेवानागतं.;;(२) त्वयानघ (for त्वया विभो);;(३) विरात्रौ चागतं; चिराच्चैवागतं; चागतः; वागतं; वागमः;;(४) को विरस्वं च; को विलम्बश्च; को नु विघ्न; क्व च बाधा; को वा बन्धा.;तव (for च ते);सभार्योण त्वया विभो (कोनुबधस्तवाभवत्); .

नाकस्मादेव जानीमस्तत्सर्वं वक्तुमर्हसि ।। ३० ।। (०१)

**लक्षालङ्कारः - नाकस्मादेव जानीम इत्यत्र अकस्मात् अकारणान्न ।**

**सत्यवान्**

पित्राहमभ्यनुज्ञातः सावित्रीसहितो गतः।
अथ मेऽभूच्छिरोदुःखं वने काष्ठानि भिन्दतः ।। ३१ ।। (०२)

सुप्तश्चाहं वेदनया चिरमित्युपलक्षये।
तावत्कालं न च मया सुप्तपूर्वं कदाचन ।। ३२ ।। (०३)

सर्वेषामेव भवतां सन्तापो मा भवेदिति।
अतो विरात्रागमनं नान्यदस्तीह कारणम् ।। ३३ ।। (०४)

**गौतमः**

अकस्माच्चक्षुषः प्राप्तिर्द्युमत्सेनस्य ते पितुः।
नास्य त्वं कारणं वेत्सि सावित्री वक्तुमर्हति ।। ३४ ।। (०५)

श्रेतुमिच्छामि सावित्रि त्वं हि वेत्थ परावरम्।
त्वां हि जानामि सावित्रि सावित्रीमिव तेजसा ।। ३५ ।। (०६)

त्वमत्र हेतुं जानीषे तस्मात्सत्यं निरुच्यताम्।

---

(०१) ( सन्तापिता; पिताः;;(२) तथा; नृप; (अ)नुतापिताः,;;(३) न- कस्माद् (for नाकस्माद्);(ए)व (for इति);कस्मादिति न जा';;(४) सर्वं वक्त-मिहार्हसि .

(०२) (३) अद्य (for अथ);;(४) कुर्वतः; भिद्यतः; छिन्दतः .

(०३) (३) काले (for कालं);च न;;(४) कथञ्चन; .

(०४) (२) न (for मा);;(३) ख-इदमर्धं; घ-..पिरात्रीगम नं, अतश्चिराभ्यागमने; अतो विरात्रगमनं; अतो विरात्र्या; अतो विरात्राव-गमं.;;(४) (इ)ति (for इह); .

(०५) ( नाक (for अक);;(३) नान्यत्; न स (for नास्य); वेत्सि (for वेत्थ);;(४) वेत्तुम .

(०६) ( इच्छाम;;(२) क-अयं पादो..नन्तरश्च नस्तः, परापरं;;(३) त्वा (for त्वां); त्वां हि जानीम; त्वा-भिजानाम; त्वां विजानामः;;(४) 'त्रीमेव; .

रहस्यं यदि ते नास्ति किञ्चिदत्र वदस्व नः ।। ३६ ।। [०१]

**सावित्री-**

एवमेतद्यथा वेत्थ सङ्कल्पो नान्यथा हि वः।
न हि किञ्चिद्रहस्यं मे श्रूयतां तथ्यमेव यत् ।। ३७ ।। [०२]

मृत्युर्मे पत्युराख्यातो नारदेन महात्मना।
स चाद्य दिवसः प्राप्तस्ततो नैनं जहाम्यहम् ।। ३८ ।। [०३]

सुप्तं चैनं यमः साक्षादुपागच्छत्सकिङ्करः।
स एनमनयद्बद्ध्वा दिशं पितृनिषेविताम् ।। ३९ ।।[०४]

अस्तौषं तमहं देवं सत्येन वचसा विभुम्।
पञ्च वै तेन मे दत्ता वराः शृणत तान्मम ।। ४० ।। [०५]

चक्षुषी च स्वराज्यं च द्वौ वरौ श्वशुरस्य मे।
लब्धं पितुः पुत्रशतं पुत्राणां चात्मनः शतम् ।। ४१ ।। [०६]

चतुर्वर्षशतायुर्मे भर्ता लब्धश्च सत्यवान्।

---

(०१) ( त्वामत्र; जानीमसू; जानामि (for जानीषे);;(२) सर्वं (for सत्यं);निरुद्यतां.;;(३) रहस्यं यदि;;(४) किञ्चिदेव.;ब्रवीहि नः;;
(०२) ( एवमेव.;चेत्थं; वित्त (for वेत्थ);;(२) (अ)पि (for हि);;(३) हि (for च);
च (for मे);;(४) कृतम् (for तथ्यम्); एव; अस्य (for अत्र);.
(०३) ( पत्युर् (for भर्तुर्);;(२) ’न महर्षिणा;;(३) स चास्य; दिव्यं सम्प्राप्तस्;;(४)
मैनं; नैतं (for नैनं);.
(०४) ( चैतं.;;(२) उपगच्छत,;;(३) चैनम् (for एनम्); आनयद्,; स वै चैनं
यमो बध्वा;.
(०५) ( व्यतोषयम्; अतोषयम् (for अस्तौषं तम्);;(२) विभुः; भुवम्;;(३) वै मे’.;पञ्च चैतेन;.पचैव तेन; पञ्चायतेन; पञ्च तेनैव (for पञ्च वै तेन); मे दत्ता’;;(४) वरा ता मम; चात्मना; तानिह (for तान्मम); .
(०६) ( चक्षुष्मत्ता (तां; ’त्तां); चक्षुष्मन्तं (for चक्षुषी च);;(३) पित्रोः (for पितुः);;(४) चात्मनः .

**भर्तुर्हि जीवितार्थं तु मया चीर्णं त्विदं व्रतम्  ।। ४२ ।।** (०१)

**लक्षालङ्कारः - चतुर्वर्षशतायुर्म इत्यत्र यः सत्यवान् तस्य मे भर्तुरिति सम्बन्धः ।**

**एतत्सर्वं मयाऽऽख्यातं कारणं विस्तरेण वः।**
**यथावृत्तं सुखोदर्कमिदं दुःखं महन्मम  ।। ४३ ।।** (०२)

**ऋषयः**

**निमज्जमानं व्यसनैरभिद्रुतं कुलं नरेन्द्रस्य तमोमये ह्रदे।**
**त्वया सुशीलव्रतपुण्यया कुलं समुद्धृतं साध्वि पुनः कुलीनया ।। ४४ ।।** (०३)

**मार्कण्डेयः**

**तथा प्रशस्य ह्यभिपूज्य चैव वरस्त्रियं तामृषयः समागताः।**
**नरेन्द्रमामन्त्र्य सपुत्रमञ्जसा शिवेन जग्मुर्मुदिताः स्वमालयम् ।। ४५ ।।** (०४)

अस्मिन्  पर्वणि २५३अध्याये ४५श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पतिव्रतामाहात्म्यपर्वणि सावित्र्युपाख्याने त्रिपञ्चाशदधिकद्विशततमोऽध्यायः ।। २५३ ।।**

# २५४. चतुःपञ्चाशदधिकद्वितततमो अध्यायः ।।

---

(०१) (२) लब्धं ('ब्धां) भर्ता; लब्धो भर्ता;;(३) जीवितार्थाय; जीवनार्थाय (for थ तु); हि; तन् (for तु);;(४) व्रतं स्थिरं; त्विदं व्रतं .

(०२) ( सर्वं (for सत्यं); समां (for मया'),;;(२) च (for वः);;(४) मह (म) र्षयः; महन्मया .

(०३) ऋषिः.;;( निमज्यमानं; उपद्रुतं; अभिप्लुतं.;;(३) सुशीलव्रतधर्मयुक्त (नित्य)या; सुशीलव्रतषुण्यया कुलं (चर्यया); सुशीले धृतपुण्यधर्मया;, सुशीलधृतधर्म .

(०४) ( ततः.;प्रशंस्य; प्रशस्याम्;.प्रशस्ताम्.;हृदि पूज्य; ह्यतिपूज्य; अभिपूज्य(for ह्यभि);;(२) मुनयः; ता ऋषयः;;(३) नरेन्द्रम् सपुत्रम्;;(४)ख-घ-शुभेन, शुभेन जग्मुर्मु- दिता यथालयं .

Concept Paste. P.No. 1462 .

**मार्कण्डेयः**

तस्यां रात्र्यां व्यतीतायामुदिते सूर्यमण्डले।
कृतपौर्वाह्णिकाः सर्वे समेयुस्ते तपोधनाः ॥ १ ॥ (०१)

तदेव सर्वं सावित्र्या महाभाग्यं महर्षयः।
द्युमत्सेनाय नातृप्यन्कथयन्तः पुनः पुनः ॥ २ ॥ (०२)

ततः प्रकृतयः सर्वाः शाल्वःअभ्योऽभ्यागता नृप।
आचख्युर्निहतं चैव स्वेनामात्येन तं द्विषम् ॥ ३ ॥ (०३)

तं मन्त्रिणा हतं श्रुत्वा ससहायं सबान्धवम्।
न्यवेदयन्यथावृत्तं विद्रुतं च द्विषद्बलम् ॥ ४ ॥ (०४)

ऐकमत्यं च सर्वस्य जनस्याथ नृपं प्रति।

**प्रकृततयः-**

सचक्षुर्वाप्यचक्षुर्वा स नो राजा भवत्विति ॥ ५ ॥ (०५)

अनेन निश्चयेनेह वयं प्रस्थापिता नृप।
प्राप्तानीमानि यानानि चतुरङ्गं च ते बलम् ॥ ६ ॥ (०६)

---

(०१) मार्का; श्रीमार्कं;;( ततो (for तस्यां);;(३) पूर्वाह्णिकाः;’पौर्वाह्णिकाः;;(४) समीयुस .
(०२) ( तदेवं;;(२) महो भाग्यं; माहा; माहात्म्यं च; .
(०३) (२) साल्वेभ्यो.;(ऽ)भ्यागमन्; (ऽ)भ्यगमन्; (ऽ)भ्यागतान्; नृपं;;(३) आचरेन् (for आचख्युर्);;(४) द्विषं (for नृपम्);.
(०४) ( ते (for तं); प्रोच्य (for श्रुत्वा);;(२) सहायं सहबान्धवं.;;(३) यथावृत्तं (for तत्त्वं);;(४) विहतं; तद् (for च); .
(०५) ( ऐकमत्येन (for मत्यं च);;(२) जनस्यामुं; स्यास्य; ’स्य त्वां ( त्वा);स्यासीन.;सान्त्वयन्नपतिं प्रति.;;(३) वापि चक्षुर् (for वाप्यचक्षुर्);अचक्षुर्वा सचक्षुर्वा- ;;(४) भवेदिति; भविष्यति-; .
(०६) ( अनेन व्यवसायेन.;;(२) सर्वे (for वयं); .

प्रयाहि राजन्भद्रं ते घुष्टस्ते नगरे जयः।
अध्यास्स्व चिररात्राय पितृपैतामहं पदम् ॥ ७ ॥ (०१)

**मार्कण्डेयः-**

चक्षुष्मन्तं च तं दृष्ट्वा राजानं वपुषान्वितम्।
मूर्ध्ना निपतिताः सर्वे विस्मयोत्फुल्ललोचनाः ॥ ८ ॥ (०२)

ततोऽभिवाद्य तान्वृद्धान्द्विजानाश्रमवासिनः।
तैश्चाभिपूजितः सर्वैः प्रययौ नगरं प्रति ॥ ९ ॥ (०३)

शैब्या च सह सावित्र्या स्वास्तीर्णेन सुवर्चसा।
नरयुक्तेन यानेन प्रययौ सेनया वृता ॥ १० ॥ (०४)

ततोऽभिषिषिचुः प्रीत्या द्युमत्सेनं पुरोहिताः।
पुत्रं चास्य महात्मानं यौवराज्येऽभ्यषेचयन् ॥ ११ ॥ (०५)

ततः कालेन महता सावित्र्याः कीर्तिवर्धनम्।
तद्वै पुत्रशतं जज्ञे शूराणामनिवर्तिनाम् ॥ १२ ॥

भ्रातणां सोदराणां च तथैवास्याभवच्छतम्।
मद्राधिपस्याश्वपतेर्मालव्यां सुमहद्बलम् ॥ १३ ॥(०६)

---

(०१) (२) नगरं.';;(३) अध्यास्व.; चिरराज्याय .

(०२) मार्कण्डेयः श्रीमार्कं;;( तु (for च); ते (for तं);;(२) राजानं च स्रष्ठवान्वितं.;;(३) मूर्धा-भिपतिताः; मूर्धा निप'. .

(०३) ( विप्रान् (for वृद्धान्);;(२) वृद्धान् (for द्विजान्); चाश्रमनिवासिनः;;(३/४) चापि (for चाभि); ते चाभि (चापि) -पूजिताः सर्वैः; प्रययौ स्वपुरं हृष्टस्तैः सर्वैरभिपूजितः .

(०४) ( देव्या (for शैब्या); (अ)पि (for च);;(२) स्वास्तीर्णैः सुरवर्चसा.;;(३) नाग (for नर' ),;;(४) सेनया वृतः;सह सेनया; सेनाया सह;.

(०५) ( अतो; 'सिषिचुः;प्रीता; सर्वे.;;(२) नराधिपं (for पुरो);;(३) महाभाग (for त्मानं);;(४) (ऽ) भिषेचयन्; .

(०६) (२) वाप्या (for वास्या);;(३) यत्राधिगम्याश्च (श्व); पतिर्;;(४) सुमहद्बलं .

एवमात्मा पिता माता श्वश्रूः श्वशुर एव च ।
**भर्तुः कुलं च सावित्र्या सर्वं कृच्छ्रात्समुद्धृतम्   ।। १४ ।।** (०१)

तथैवैषा हि कल्याणी द्रौपदी शीलसम्मता।
**तारयिष्यति वः सर्वान्सावित्रीव कुलाङ्गना   ।। १५ ।।** (०२)

**वैशम्पायनः**

एवं स पाण्डवस्तेन अनुनीतो महात्मना।
**विशोको विज्वरो राजन्काम्यके न्यवसत्तदा   ।। १६ ।।** (०३)

यश्चेदं शृणुयाद्भक्त्या सावित्र्याख्यानमुत्तमम्।
**स सुखी सर्वसिद्धार्थो न दुःखं प्राप्नुयान्नरः   ।। १७ ।।**

अस्मिन् पर्वणि २५४अध्याये १७श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्त्र्यां वैयासिक्यां संहितायां वनपर्वणि पतिव्रतामाहात्म्यपर्वणि सावित्र्युपाख्याने चतुःपञ्चाशदधिकद्विशततमोऽध्यायः ।। २५४ ।।

---

(०१) ( चैव (for माता); .
(०२) ( हि; च (for (अ)पि);;(२) सम्पदा (for संमता); .
(०३) (१/२) त्वनु-(for अनु); एवं ते पाण्डवास्तेन अनुनीता महा;;(३) राजा (for राजन्); विशोका विज्वरा राजन्.;(४) न्यवसत्काम्यके तदा; ; काम्यके न्यवसंस्तदा .

# कुण्डलाहरणपर्व

## २५५. पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः

महाभारततततात्पर्यनिर्णये २२ अध्याये

सकुण्डलं सकवचमवध्यं सूर्यनन्दनम् ।
ज्ञात्वेन्द्र उभयं तस्मादैच्छदादातुमुत्तमम् ।। ४१४ ।।
तद् विज्ञाय रविः कर्णं स्वप्न उक्त्वा न्यवारयत् ।
सर्वथा दास्य इत्युक्ते प्राहाऽदेयं वरायुधम् ।। ४१५ ।।
ददौ चोत्कृत्य कवचं कुण्डले च शचीपतेः ।
अमोघां शक्तिमादाय ज्ञात्वेन्द्रं द्विजरूपिणम् ।। ४१६ ।।
ऋतेऽर्जुनादेकमेव वधिष्यस्यनयेति सः ।
दत्वा शक्तिं ययौ शक्रः सार्द्धं कवचकुण्डलैः ।। ४१७ ।।

सुर्येण स्वप्ने कर्णं प्रति इन्द्रेण पाण्डवप्रियचिकीर्षया भाविकवचकुण्डलयाचनानिवेदनापूर्वकं तद्दानप्रतिषेधवचनम् ।। १ ।। कर्णेन सूर्यं प्रति हेतूप्तिपूर्वकमिन्द्राय तद्दानप्रतिज्ञानम् ।। २ ।। स्वप्ने कर्णाय स्वात्मानं दर्शयित्वा सूर्यस्य तं प्रति याचकायेन्द्राय कवचकुण्डलयोर्दानस्य निषेधः कर्णस्य तु तयोर्दानायैव दृढनिश्चयः

**जनमेजयः**

यत्तदा महद्ब्रह्मल्लोमशो वाक्यमब्रवीत्।
इन्द्रस्य वचनादेव पाण्डुपुत्रं युधिष्ठिरम् ।। १ ।।[०१]

लक्षालङ्कारः - यत्तदा इत्यत्र हेति पदच्छेदः ।

---

(०१) ( १); यत्तदाह; यत्तदा स महद्ब्रह्मन्; महाभागो ( ३ );एव; एतत् (for एत्य ); .

च्चापि ते भयं तीव्रं न च कीर्तयसे क्वचित्।
तच्चाप्यपहरिष्यामि धनञ्जय इतो गते ।। २ ।।(०१)

किं नु तज्जपतां श्रेष्ठ कर्णं प्रति महद्भयम्।
आसीन्न च स धर्मात्मा कथयामास कस्यचित् ।। ३ ।।(०२)

**वैशम्पायनः**

अहं ते राजशार्दूल कथयामि कथामिमाम्।
पृच्छतो भरतश्रेष्ठ शुश्रूषस्व गिरं मम ।। ४ ।।(०३)

द्वादशे समतिक्रान्ते वर्षे प्राप्ते त्रयोदशे।
पाण्डूनां हितकृच्छक्रः कर्णं भिक्षितुमुद्यतः ।। ५ ।।(०४)

अभिप्रायमथो ज्ञात्वा महेन्द्रस्य विभावसुः ।
कुण्डलार्थे महाराज सूर्यः कर्णमुपागतः ।। ६ ।।(०५)

महार्हे शयने वीरं स्पर्द्ध्यास्तरणसंवृते।
शयानमतिविश्वस्तं ब्रह्मण्यं सत्यवादिनम् ।। ७ ।।(०६)

स्वप्नान्ते निशि राजेन्द्र दर्शयामास रश्मिवान्।

---

(०१) ( १ ); किञ्चिन् (for तीव्रं ); ( २ ); नघ (for क्वचित् ); ( ३ ); तत्तवाप; तदप्यप (for तच्चाप्यप); ( ४ ); सव्यसाचिन्यतो गते; धनञ्जय इतोगते .

(०२) ( १ ); तत् (for नु ); यज् (for तद् ); जपतां; , जयतां (for विदुषां) ( २ ); शुश्रूषस्व गिरं मम ( ३ ) स च न; न स नैव स .

(०३) ( १ ); अयं; अथ; हन्त (for अहं ); ( ३ ); पृच्छतो ( ४ ); गिरा;
परं (for गिरं ); शुश्रूषुस्त्वं हि मे मतः.

(०४) ( २ ); प्राप्ते वर्षे (for वर्षे प्राप्ते ); .

(०५) ( अहो; ततो (for अथो);(३) कुण्डलार्थं महाभाग (४) सूर्यः कर्णम् ततः (for सूर्यः); उपासत; उपागतः .

(०६) ( महार्ह (for र्है) वीर; चैनं (for वीरं); (२) स्पर्धास्तरण-; साध्वा; स्वस्त्या (for स्पर्ध्या); संयते; संसृते; संस्तृते; संयुते (for संवृते) (४) अति-; इति (for अभि-); .

कृपया परयाऽऽविष्टः पुत्रस्नेहाच्च भारत ॥ ८ ॥ [०१]

ब्राह्मणो वेदविद्भूत्वा सूर्यो योगर्द्धिरूपवान्।
हितार्थमब्रवीत्कर्णं सान्त्वपूर्वमिदं वचः ॥ ९ ॥ [०२]

**ब्राह्मणः-**

कर्ण मद्वचनं तात शृणु सत्यभृतां वर ।
ब्रुवतोऽद्य महाबाहो सौहृदात्परमं हितम् ॥ १० ॥ [०३]

उपायास्यति शक्रस्त्वां पाण्डवानां हितेप्सया।
ब्राह्मणच्छद्मना कर्ण कुण्डलापजिहीर्षया ॥ ११ ॥ [०४]

विदितं तेन शीलं ते सर्वस्य जगतस्तथा।
यथा त्वं भिक्षितः सद्भिर्ददास्येव न याचसे ॥ १२ ॥ [०५]

त्वं हि तात ददास्येव ब्राह्मणेभ्यः प्रयाचितम्।
वित्तं यच्चान्यदप्याहुर्न प्रत्याख्यासि कस्यचित् ॥ १३ ॥ [०६]

त्वां तु चैवं विधं ज्ञात्वा स्वयं वै पाकशासनः ।
आगन्ता कुण्डलार्थाय कवचं चैव भिक्षितुम् ॥ १४ ॥ [०७]

---

(०१) ( स्वप्रान्ते तं महाबाहुं (२) रश्मिमान् (४) 'स्नेहात्त; स्नेहेन; .

(०२) (२) योगाद् द्धिर् ('गाद्धि)रूपधृत्; योगाद्धि (गाद् द्धि) रूपवान्; योगर्धि(योगादि) रूपवान्; योगविरूपधृक् (धृत्) (३) काले (for कर्णं); .

(०३) ब्राह्मणः, सूर्यः ( मद्वचनात् तावत् (for तात);(२) धर्म; शस्त्र (for सत्य); शृणु सत्यपराक्रम (३) थ (for द्य); .

(०४) ( उप (for उपा); त्वा (for त्वां ); (३) छद्मना चैव; छद्मरूपेण
कुण्डलोप- (for लाप-); -जिगीषया (for जिहीर्षया); न प्रत्याख्यासि कर्हिचित्.

(०५) ( होव चैव; तु तस्य (for तेन); मे; तु (for ते ); त्वच्छीलं विदितं तस्य (२) तव (for तथा);(३) यदा (for यथा);(४) दास्येव न याचसे; दास्यत्येव न याचते .

(०६) ( दाता (for तात); (ए)वं (for (ए)व);(२) प्रयाचितं (३) विप्रं (for वित्तं); (अ) प्यन्यद् (४) प्रत्याख्यातु; ख्याहि कस्य (for कर्हि' ); प्रत्याख्यातं न (ख्यासीह) कर्हिचित् .

(०७) ( स त्वामे त्वां तु चै; सर्वमे; तत्त्वामे (for तं त्वामे);जानन्; राजन् (for ज्ञात्वा); .

तस्मै प्रयाचमानाय न देये कुण्डले त्वया।
अनुनेयः परं शक्त्या श्रेय एतद्धि ते परम् ॥ १५ ॥ (०१)

कुण्डलार्थे ब्रुवंस्तात कारणैर्बहुभिस्त्वया।
अन्यैर्बहुविधैर्वित्तैः सन्निवार्यः पुनः पुनः ॥ १६ ॥ (०२)

रत्नैः स्त्रिभिस्तथा गोभिर्धनैर्बहुविधैरपि।
निदर्शनैश्च बहुभिः कुण्डलेप्सुः पुरन्दरः ॥ १७ ॥ (०३)

यदि दास्यसि कर्ण त्वं सहजे कुण्डले शुभे।
आयुषः प्रक्षयं गत्वा मृत्योर्वशमुपैष्यसि ॥ १८ ॥ (०४)

कवचेन समायुक्तः कुण्डलाभ्यां च मानद्।
अवध्यस्त्वं रणेऽरीणामिति विद्धि वचो मम ॥ १९ ॥ (०५)

अमृतादुत्थितं ह्येतदुभयं रत्नसम्भवम्।
तस्माद्रक्षं त्वया कर्ण जीवितं चेत्प्रियं तव ॥ २० ॥ (०६)

**कर्णः**

को मामेवं भवान्प्राह दर्शयन्सौहृदं परम्।
कामं मे(मया) भगवन्ब्रूहि को भवान्द्विजवेषधृक् ॥ २१ ॥ (०७)

---

(०१) (३) अनेन यः; अनुनीय (for अनु-नेयः) (४) हितं; हि वै (for हि ते); वरं (for परम्); .
(०२) ( कुडलार्थं ध्रुवं (for ब्रुवन्);(२) करणे; कारणे; कुण्डलैद् (for कारणै);तथा; सदा (for त्वया); (३) वरैर् (for विधैर्); चित्रैः; वीर (for वित्तैः);(४) सं- (for स); निवार्यात्; निवार्य (for ये); .
(०३) ( यथा (for तथा); गोभिःयोगैर् (for भोगैर्); (२) तथा(for अपि); .
(०४) ( दास्यति (२) कुण्डले सहजे त्वया (for शुभे);(३) कृत्वा (for गत्वा); उपैष्यसि (for उपे); .
(०५) ( हि संयुक्तः; समायुक्तः (for च सं); (४) सत्यं (for विद्धि); .
(०६) ( उद्धृतं (for उत्थितं); एतद्; इदम् (for ह्येतद्); (२) संमितं (for सम्भवम्); रक्ष्ये (for रक्ष्यं); .
(०७) ( विधिं; विधं (for भवान्); (२) सौहृदं दर्शयन् मम (for परम्); वचनं शुभदं परं (३) काम्यया (for कामया);(४) द्विजवेशभृत्; इह वेशधृक् .

**ब्राह्मणः**

अहं तात सहस्रांशुः सौहृदात्त्वां निदर्शये।
**कुरुष्वैतद्वचो मे त्वमेतच्छ्रेयः परं हि ते ।। २२ ।।**(०१)

**कर्णः**

श्रेय एव ममात्यन्तं यस्य मे गोपतिः प्रभुः ।
**प्रवक्ताद्य हितान्वेषी शृणु चेदं वचो मम ।। २३ ।।** (०२)

प्रसादये त्वां वरदं प्रणयाच्च ब्रवीम्यहम्।
**न निवार्यो व्रतादस्मादहं यद्यस्मि ते प्रियः ।। २४ ।।** (०३)

व्रतं वै मम लोकोऽयं वेत्ति कृत्स्नं विभावसो।
**यथाहं द्विजमुख्येभ्यो दद्यां प्राणानपि ध्रुवम् ।। २५ ।।** (०४)

यद्यागच्छति मां शक्रो ब्राह्मणच्छद्मना वृतः ।
**हितार्थं पाण्डुपुत्राणां खेचरोत्तम भिक्षितुम् ।। २६ ।।** (०५)

दास्यामि विबुधश्रेष्ठ कुण्डले वर्म चोत्तमम्।
**न मे कीर्तिः प्रणश्येत त्रिषु लोकेषु विश्रुता ।। २७ ।।**

**मद्विधस्य यशस्यं हि न युक्तं प्राणरक्षणम्।**

---

(०१) ( कर्ण (for तात); (२) तु; त्वा (for त्वां); हि दर्शये; निवेदये (for निदर्शये); (३) मह्यम् (for मे त्वम्); (४) प्रियं परं; प्रियं हि ते; .

(०२) ( एवं (for एव); (आ)यातं (for (अ)त्यन्तं); (३) प्रसन्नो हि ('न्नोद्य); प्रवक्ता हि भवान्हितार्थमुद्युक्तः; भो हितार्थं समुद्युक्तः (४) श्रूयतां तु (for शृणु चेदं); .

(०३) ( प्रसाद्य वै त्वा (for दये त्वां); वरद (२) प्र यद् (for च); (४) अयं (for अहं); .

(०४) (२) कृत्स्नं (for कृत्स्ने); (३) यदहं (for यथा);(४) प्राणम् (for प्राणान्); .

(०५) ( यद्वो; अभ्या (for यधा); मां शक्रो (३) सुतार्थं; हितार्थे (४) खेचरो वर्म; खचरोत्तम;
(२) कवचो (for वर्म चो);.

युक्तं हि यशसा युक्तं मरणं लोकसम्मतम् ॥ २८ ॥[०१]

सोऽहमिन्द्राय दास्यामि कुण्डले सह वर्मणा।
यदि मां बलवृत्रघ्नो भिक्षार्थमुपयास्यति ॥ २९ ॥[०२]

हितार्थं पाण्डुपुत्राणां कुण्डले मे प्रयाचितम्।
तन्मे कीर्तिकरं लोके तस्याकीर्तिर्भविष्यति ॥ ३० ॥[०३]

वृणोमि कीर्तिं लोके हि जीवितेनापि भानुमन्।
कीर्तिमानश्नुते स्वर्गं हीनकीर्तिस्तु नश्यति ॥ ३१ ॥[०४]

कीर्तिर्हि पुरुषं लोके सञ्जीवयति मातृवत्।
अकीर्तिर्जीवितं हन्ति जीवतोऽपि शरीरिणः ॥ ३२ ॥[०५]

अयं पुराणः श्लोको हि स्वयं गीतो विभावसो।
धात्रा लोकेश्वर यथा कीर्तिरायुर्नरस्य ह ॥ ३३ ॥[०६]

पुरुषस्य परे लोके कीर्तिरेव परायणम्।
इह लोके विशुद्धा च कीर्तिरायुर्विवर्धनी ॥ ३४ ॥[०७]

सोऽहं शरीरजे दत्त्वा कीर्तिं प्राप्स्यामि शाश्वतीम्।

---

(०१) ( यशस्यं (for (अ)यशस्यं); च (for हि);(२) धारणं (for रक्षणम्); (३) एकं हि (for युक्तं हि);; सहसा(for यशसा); (४) विश्रुतं (for संमतम्); .

(०२) (२) कुण्डलं (for कुण्डले); मम (for सह); (३) वा(for मां) .

(०३) ( हिताय (for ये); यदि पार्थानां (for पाण्डु- पुत्राणां);(२) च (for मे); चते (for चितुम्); (४) तस्य कीर्तिर्; तच्च कीर्तिर् (for तस्याकीर्तिद्); .

(०४) ( स्मिञ् (for हि);(२) जीवितादपि (for तेनापि); (अ)नुत्तमां (for भानुमन्); (४) नष्ट-; न हि (for हीन-) च; हिं (for तु); .

(०५) ( तु (for हि); (३) वृणामि कीर्तिं लोकेस्मिन् (४) जीवितो (ते)पि शरीरिणं; .

(०६) ( पुराणश्लोको वै (for हि);(३) क-यत्र-रायु र्ननस्य वै, ख-धात्रा लोकेश्वरेणेह यथा निगदितो बुधैः। श्वरेणाथ (for ’श्वर यथा); (४) ह (for वै); .

(०७) (३) परत्रे च; चरित्वा च; विशुद्धैव; विशुद्धायाः; चैव तथा (for विशुद्धा च); (४) विवर्धिनी, ’र्विधीयते कीर्तिवर्धनमायुषः .

**दत्त्वा च विधिवद्दानं ब्राह्मणेभ्यो यथाविधि ।। ३५ ।।** (०१)

**हुत्वा शरीरं सङ्ग्रामे कृत्वा कर्म सुदुष्करम्।**
**विजित्य च परानाजौ यशः प्राप्स्यामि केवलम् ।। ३६ ।।** (०२)

**भीतानामभयं दत्त्वा सङ्ग्रामे जीवितार्थिनाम्।**
**वृद्धान्बालान्द्विजातींश्च मोक्षयित्वा महाभयात् ।। ३७ ।।** (०३)

**प्राप्स्यामि परमं लोके यशः स्वर्ग्यमनुत्तमम्।**
**जीवितेनापि मे रक्ष्या कीर्तिस्तद्विद्धि मे व्रतम् ।। ३८ ।।** (०४)

**सोऽहं दत्त्वा मघवते भिक्षामेतामनुत्तमाम्।**
**ब्राह्मणच्छद्मिने देव लोके गन्ता परां गतिम् ।। ३९ ।।** (०५)

अस्मिन् पर्वणि २५५अध्याये ३९श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कुण्डलाहरणपर्वणि सूर्यकर्णसंवादे पकश्चपश्चाशदधिकद्विशततमोऽध्यायः ।। २५५ ।।**

---

(०१) (क-सो..हं शरीरजे दत्त्वा सङ्ग्रामे जीवितार्थिनाम् ।,वृद्धान्बलन्द्विजातीश्च सोक्षयित्वा महाभयात् । प्राप्स्यामि परमं लोके कीर्तिं लप्स्यामि शाश्वतीम् ।,(२) आप्स्यामि; लप्स्यामि (for प्रा); .
(०२) ( दत्वा; मुत्त्वा (for हुत्वा); (२) कीर्तिमेवाद्य कामये (३) निहत्य (for विजित्य); वा (for च); (४) जयं (for यशः); .
(०३) ( चाभयं (for अभयं);(२) त्मनां (for र्थिनाम्); .
(०४) ( यास्यामि (for प्राप्स्यामि);(२) यशः स्वर्ग्य (र्ग)मनुत्तमं, (३) 'ते वापि (for तेनापि); रक्ष्या वै (for मे रक्ष्या); (४) त्वं; मे' (for तद्); .
(०५) ( भग (for मघ); (२) एनाम् (for एताम्); सुरोत्तम (for अनुत्तमाम्); (३) च्छद्मने; च्छद्मना (for 'च्छद्मिने' ); ब्रह्मरूपधरो देव (धरे देवे) (४) गत्वा (for गन्ता); कथां (for गतिम्); .

# २५६. षठ्पश्चाशदधिकद्विशततमोऽध्यायः

**सूर्येण हेतुकथनपूर्वकं पुनरिम्द्राय कवचकुण्डलदानप्रतिषेधोक्तिः ।। कर्णं प्रबोधयतः सूर्यस्य कुण्डलदाननिषेधः**

**सूर्यः**

माहितं कर्ण कार्षीस्त्वमात्मनः सुहृदां तथा।
**पुत्राणामथ भार्याणामथो मातुरथो पितुः ।। १ ।।** (०१)

शरीरस्याविरोधेन प्राणिनां प्राणभृत् परं।
**इष्यते यशसः प्राप्तिः कीर्तिश्च त्रिदिवे स्थिरा ।। २ ।।** (०२)

**लक्षालङ्कारः - प्राणिनां प्राणभृत्परम् इत्यत्र यः प्राणभृत् तेन इष्यन्त इति सम्बन्धः ।**

यस्त्वं प्राणविरोधेन कीर्तिमिच्छसि शाश्वतीम्।
**सा ते प्राणान् समादाय गमिष्यति न शमक्षयम् ।। ३ ।।** (०३)

**लक्षालङ्कारः - गमिष्यति शमक्षयम् इत्यत्र सा कीर्तिः ते प्राणान् अक्षयं शं च आदाय गमिष्यति ।**

जीवतां क्रियते कार्यं पिता माता सुतास्तथा।
**ये चान्ये बान्धवाः केचिल्लोकेऽस्मिन् पुरुषर्षभ ।। ४ ।।**

राजानश्च नरव्याघ्र पुरुषेण निबोध तत्।(०४)

---

(०१) श्रीसूर्यः भास्वान्; विवस्वान् (for सूर्यः);(२) 'दास्तथा; दां तदा'; दस्त- था (for दां तथा);(४) अथ (for अथो); .

(०२) (२) 'द्वर (for 'द्वर); प्राणिभिः प्राणिनां वर (३) इष्यसे (४) स्थिता (for स्थिरा); .

(०३) ( यत्त्वं; स त्वं प्राणावि (for प्राणबि); (४) यमक्षयं (for न संशयः); .

(०४) ( जीवत; जीवता क्रियते; कुर्वते (for कुरुते); (२) सुतस्तथा; तथा सुताः (६) पुरुषेण (हृदयेन); पुरुषाणां (for पौरुषेण); .

कीर्तिश्च जीवतः साध्वी पुरुषस्य महाद्युते ।। ५ ।। [०१]

लक्षालङ्कारः - पुरुषेण निबोध तत् इत्यत्र पुरुषेणेत्यस्य जीवतेति पूर्वपदेन सम्बन्धः ।

मृतस्य कीर्त्या किं कार्यं भस्मीभूतस्य देहिनः ।
मृतः कीर्तिं न जानीते जीवन्कीर्तिं समश्नुते ।। ६ ।। [०२]

मृतस्य कीर्तिर्मर्त्यस्य यथा माला गतायुषः ।
अहं तु त्वां ब्रवीम्येतद्भक्तोऽसीति हितेप्सया ।। ७ ।। [०३]

भक्तिमन्तो हि मे रक्ष्या इत्येतेनापि हेतुना।

भक्तोऽयं परया भक्त्या मामित्येव महाभुज ।
ममापि भक्तिरुत्पन्ना स त्वं कुरु वचो मम ।। ८ ।। [०४]

लक्षालङ्कारः - मामित्येव महाभुज इत्यत्र मामुद्दिश्येति योग्यपदाध्याहारः ।

अस्ति चात्र परं किञ्चिदध्यात्मं देवनिर्मितम्।
अतश्च त्वां ब्रवीम्येतत्क्रियतामविशङ्कया ।। ९ ।। [०५]

देवगुह्यं त्वया ज्ञातुं न शक्यं पुरुषर्षभ।

---

(०१) (४) क-पुरुषस्येह च वृद्धिकृत् ।,

(०२) (क-अष्टादशार्धानि न सन्ति, जीवित (for जीवत);(३) जानीते (for जानाति); .

(०३) (३) हि (for तु); त्वा (for त्वां); ततो; त्वां प्र-(for तु त्वां) (ए)वं (for तद्); (४) भोक्ता (for भक्तो'); हि ते मया (for प्सया); .

(०४) ( रक्ष्याश्च; ते रक्ष्या (for मे र); (२) (अ)नेन (for (ए)तेन); (३) य;सि (for यं); (४) (ए)वं (for (ए)व); (६) सत्यं; सर्वं (for स त्वं); .

(०५) ( नात्र; चापि (for चात्र); (२) दैव; वेद (for देव); (३) तत (for अत); त्वा; (अ)हं (for त्वां); (४) चाविशङ्कया; मा विचारय .

तस्मान्नाख्यामि ते गुह्यं काले वेत्स्यति तद्भवान् ।। १० ।। (०१)

पुनरुक्तं च वक्ष्यामि त्वं राधेय निबोध तत्।
मास्मै ते कुण्डलेऽदास्त्वं(ले दद्या) भिक्षिते वज्रपाणिना ।। ११ ।। (०२)

शोभते कुण्डलाभ्यां च रुचिराभ्यां महाद्युते।
विशाखयोर्मध्यगतः शशीव विमले दिवि ।। १२ ।। (०३)

लक्षालङ्कारः - विशाखयोर्मध्यगत इत्यत्र विशाखयोः विशाखानक्षत्रस्य द्वयो- स्तारयोः ।

कीर्तिश्च जीवतः साध्वी पुरुषस्येति विद्धि तत् ।। १३ ।। (०४)

प्रत्याख्येयस्त्वया तात कुण्डलार्थे सुरेश्वरः ।(०५)
पाण्डवानां हिते युक्तो भिक्षन्ब्राह्मणवेषधृक् ।। १४ ।।

शक्या बहुविधैर्वाक्यैः कुण्डलेप्सा त्वयानघ ।
विहन्तुं देवराजस्य हेतुयुक्तैः पुनः पुनः ।(०६)
हेतुमदुपपन्नार्थैर्माधुर्यकृतभूषणैः ।। १५ ।।

पुरन्दरस्य कर्ण त्वं बुद्धिमेतामपानुद ।। १६ ।। (०७)

त्वं हि नित्यं नरव्याघ्र स्पर्धसे सव्यसाचिना।

---

(०१) ( च यज् (for त्वया); ख्यातुं (for ज्ञातुं); .

(०२) (२) त्वां (for त्वं); मे (for तत्);(३) मा स्म ते; मा चास्मै; मामास्मै (for मास्मै ते); दास्त्वं; दद्याद्; देये (for दद्या) (४) भिक्षते; भिक्षिते (for भिक्षवे); वज्रपाणिने; पाणिना .

(०३) ( त्वं; च (for हि); (२) मुखं तु ते (for महा); (३) मूर्ध्नि (for मध्य-); (४) विमले दिवि; विमलोदितः .

(०४) ( जीविता; सास्वतः; जीवितः (for जीवतः); .

(०५) (२) स्येव; स्येह (for स्येति);(३) तदा (पुरा) (for त्वया); (४) कुडलाभ्यां; 'लार्थी सुरेश्वरः (for पुरं); .

(०६)

(०७) ( हेतुमदुपपन्नार्थैर् (२) 'भूषिपै'; लक्षणैः (३) सुरेश्वरस्य(for पुरं); कार्ये (for कर्ण); (४) एतां बुद्धिमू उपानुद (for अपा); .

सव्यसाची त्वया चेह युधि शूरः समेष्यति ॥ १७ ॥

न तु त्वामर्जुनः शक्तः कुण्डलाभ्यां समन्वितम्।
विजेतुं युधि यद्यस्य स्वयमिन्द्रः सखा भवेत् ॥ १८ ॥

तस्मान्न देये शक्राय त्वयैते कुण्डले शुभे।
सङ्ग्रामे यदि निर्जेतुं कर्ण कामयसेऽर्जुनम् ॥ १९ ॥

अस्मिन् पर्वणि २५६अध्याये १९श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कुण्डलाहरणपर्वणि सूर्यकर्णसंवादे षट्पञ्चाशखदधिकद्विशततमोऽध्यायः ॥ २५६ ॥

# २५७. सप्तपञ्चाशदधिकद्विशततमोऽध्यायः

कर्णेन सुर्य प्रति सानुनयं शक्राय कवचकुण्डलदाने..भ्यनुज्ञाप्रार्थना ॥ १ ॥ सुर्येण कर्णं प्रति शक्राच्छक्तिग्रहणटोदनापूर्वकं कुण्डलादिदानाभ्यनुज्ञानम् ॥ २ ॥ सूर्यकर्णसंवादः सूर्यस्याज्ञया कर्णस्येन्द्राच्छक्तिं गृहीत्वैव तस्मै कवचकुण्डले दातुं निश्चयः

**कर्णः**

भगवन्तमहं भक्तो यथा मां वेत्थ गोपते।
तथा परमतिग्मांशो नान्यं देवं कथञ्चन ॥ १ ॥

लक्षालङ्कारः - भगवन्तमहम् इत्यत्र नान्यं देवं कथञ्चन इत्यत्र च उद्दिश्य इति योग्यपदाध्याहारः ।

न मे दारा न मे पुत्रा न चात्मा सुहृदो न च ।
तथेष्टा वै सदा भक्त्या यथा त्वं गोपते मम ॥ २ ॥

इष्टानां च महात्मानो भक्तानां च न संशयः ।

**कुर्वन्ति भक्तिमिष्टां च जानीषे त्वं च भास्कर ।। ३ ।।**

इष्टो भक्तश्च मे कर्णो न चान्यद्दैवतं दिवि।
**जानीत इति वै कृत्वा भगवानाह मद्धितम् ।। ४ ।।**

भूयश्च शिरसा याचे प्रसाद्य च पुनः पुनः ।
**इति ब्रवीमि तिग्मांशो त्वं तु मे क्षन्तुमर्हसि ।। ५ ।।**

बिभेमि न तथा मृत्योर्यथा बिभ्येऽनृतादहम्।
**विशेषेण द्विजातीनां सर्वेषां सर्वदा सताम् ।। ६ ।।**

प्रदाने जीवितस्यापि न मेऽत्रास्ति विचारणा।
**यच्च मामात्थ देव त्वं पाण्डवं फाल्गुनं प्रति ।। ७ ।।**

व्येतु सन्तापजं दुःखं तव भास्कर मानसम्।
**अर्जुनप्रतिमं चैव विजेष्यामि रणेऽर्जुनम् ।। ८ ।।**

लक्षालङ्कारः - अर्जुनप्रतिमं च इत्यत्र कार्तवीर्यार्जुनप्रतिममित्यर्थः ।

तवापि विदितं देव ममाप्यस्त्रबलं महत्।
**जामदग्न्यादुपात्तं यत्तथा द्रोणान्महात्मनः ।। ९ ।।**

इदं त्वमनुजानीहि सुरश्रेष्ठ व्रतं मम।
**भिक्षते वज्रिणे दद्यामपि जीवितमात्मनः ।। १० ।। (०१)**

## सूर्यः

यदि तात ददास्येते वज्रिणे कुण्डले शुभे।
**त्वमप्येनमथो ब्रूया विजयार्थं महाबलम् ।। ११ ।। (०२)**

---

(०१) (२) वचो (for व्रतं); (३) भक्षिते; भिक्षवे; भिक्षते; भिक्षिणे, (४) पथि; अहं (for अपि);
.

(०२) ( दाता; तावद् (for तात); (ए)व (for (ए)ते); दद्यास्त्वं यदि वा(चा) पीमे; दद्यास्त्वं याचितेनेव; दद्यास्त्वं यदि तातेमे; दृष्ट् त्वं यदि तातेमे; यदि तद्दास्यसे कर्ण (२) वज्रिणे कुण्डले (३) (ए)वम्;

नियमेन प्रदद्यां ते कुण्डले वै शतक्रतो।
अवध्यो ह्यसि भूतानां कुण्डलाभ्यां समन्वितः ॥ १२ ॥ (०१)

अर्जुनेन विनाशं हि तव दानवसूदनः ।
प्रार्थयानो रणे वत्स कुण्डले ते जिहीर्षति ॥ १३ ॥ (०२)

स त्वमप्येनमाराध्य सूनृताभिः पुनः पुनः ।
अभ्यर्थयेथा देवेशममोघार्थं पुरन्दरम् ॥ १४ ॥ (०३)

अमोघां देहि मे शक्तिममित्रविनिबर्हिणीम्।
दास्यामि ते सहस्राक्ष कुण्डले वर्म चोत्तमम् ॥ १५ ॥ (०४)

इत्येव नियमेन त्वं दद्याः शक्राय कुण्डले।
तया त्वं कर्ण सङ्ग्रामे हनिष्यसि रणे रिपून् ॥ १६ ॥ (०५)

नाहत्वा हि महाबाहो शत्रूनेति करं पुनः ।
सा शक्तिर्देवराजस्य शतशोऽथ सहस्रशः ॥ १७ ॥ (०६)

**वैशम्पायनः**

एवमुक्त्वा सहस्रांशुः सहसान्तरधीयत।

This Stangas is Mensioned by TRK after 17[(07)]

---

(ए)तम् (for (ए)नम्); अथ (for अथो); (४) विजयार्थे; थै महाबलं .

(०१) ( समयेन (for नियमेन); प्रदद्यां ते; प्रदद्यांस्ते; प्रदेये ये (२) कुण्डलेन दण्डने वै शतक्रतो ( प्रभो ); .

(०२) (२) सूदन इत्येवं नियमेन च (४) विजिहीर्षति; ते हरिष्यति .

(०३) ( स त्वमेनं समाराध्य, (३) अभ्यर्थयस्व (४) अमोघास्त्रं; आत्मार्थं च; धार्थे अमोघां शक्ति- मुत्तमा .

(०४) ( मां (मे) (२) ममामित्रनिबर्हि (ई) णीं; अमित्रवरब' 'निबर्हणीं; सर्व- शत्रुनिबर्हणीं; निबर्हणा (४) मम; तव (for वर्म); चोत्तरं; चोत्तमे .

(०५) (ए)व (for (ए)वं); निश्चयेन (for नियमेन); च (for त्व); (३) तथा (for तया); (४) बहून् (for रणे); रिपून्वै निः(स) हनिष्यसि .

(०६) (इ)यं (अ)पि (for हि); (२) शत्रुं नैति (for शत्रूनेति); प्रति(for पुनः); .

(०७) ( तु तिग्मांशुः (for सह); .

कर्णस्तु बुबुधे राजन्स्वप्नान्ते प्रवदन्निव ॥ १८ ॥ [(०१)]

प्रतिबुद्धस्तु राधेयः स्वप्नं सञ्चिन्त्य भारत ॥
चकार निश्चयं राजन्शक्त्यर्थं वदतां वरः ॥ १९ ॥

यदि मामिन्द्र आयाति कुण्डलार्थं परन्तपः ।
शक्त्या तस्मै प्रदास्यामि कुण्डले वर्म चैव ह ॥ २० ॥

स कृत्वा प्रातरुत्थाय कार्याणि भरतर्षभ ॥
ब्राह्मणान्वाचयित्वाथ यथाकार्यमुपाक्रमम् ॥ २१ ॥

विधिना राजशार्दूल मुहूर्तमजपत्ततः ।[(०२)]
ततः सूर्याय जप्यान्ते कर्णः स्वप्नं न्यवेदयत् ॥ २२ ॥

यथा दृष्टं यथातत्त्वं यथोक्तमुभयोर्निशि।
तत्सर्वमानुपूर्व्येण शशंसास्मै वृषस्तदा ॥ २३ ॥ [(०३)]

लक्षालङ्कारः - शशंसास्मै वृषस्तदा इत्यत्र सूर्यं प्रति कर्णेन प्रेषितः कर्णपुत्रः ।

तच्छ्रुत्वा भगवान्देवो भानुः स्वर्भानुसूदनः ।
उवाच तं तथेत्येव कर्णं सूर्यः स्मयन्निव ॥ २४ ॥ [(०४)]

ततस्तत्त्वमिति ज्ञात्वा राधेयः परवीरहा।
शक्तिमेवाभिकाङ्क्षन्वै वासवं प्रत्यपालयत् ॥ २५ ॥[(०५)]

अस्मिन् पर्वणि २५७अध्याये २५श्लोकाः सन्ति

---

(०१) ( क-ख-प्रव्यथान्निव घ-प्रबुधन्निव .

(०२) (३) स्वन्पान्ते (for जप्यान्ते); (४) निवेदयत्; .

(०३) ( तथातत्वं (for यथां); (३) आ(अ)नुपूर्वेण (४) वृषा तथा (तदा); वृषस्तथा; .

(०४) (३) तत् (for तं);(ए)वं (for (ए)व);(४) कर्ण कर्णः सूर्यं; .

(०५) ( तथा (for ततम्); सत्यम् (for तत्त्वम्); .

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कुण्डलाहरणपर्वणि सूर्यकर्णसंवादे सप्तपञ्चाशदधिकद्विततमोऽध्यायः ।। २५७ ।।

# २५८. अष्टपञ्चसदधिकद्विशततमोऽध्यायः

स्वावासे दुर्वाससमावासयता कुन्तिभोजेन तत्परिचर्यायै कुन्त्या नियोरनम् ।। कुन्तिभोजगृहे महर्षेर्दुर्वासस आगमनं तत्सेवार्थं राज्ञा पृथाया नियुक्तिः

**जनमेजयः**

किं तद्गुह्यं न चाख्यातं कर्णायेहोष्णरश्मिना।
कीदृशे कुण्डले ते च कवचं चैव कीदृशम् ।। १ ।।(०१)

कुतश्च कवचं तस्य कुण्डले चैव सत्तम।
एतदिच्छाम्यहं श्रोतुं तन्मे ब्रूहि तपोधन ।। २ ।।(०२)

यत्तद्विवस्वतो गुह्यं यादृशे कुण्डले च ते ।
उभयं तद्यथा ब्रह्मंस्तन्ममाचक्ष्व सत्तम ।

**वैशम्पायनः**

अथ(यं) राजन्ब्रवीम्येतत्तस्य गुह्यं विभावसोः ।
यादृशे कुण्डले ते च कवचं चैव यादृशम् ।। ३ ।।(०३)

कुन्तिभोजं पुरा राजन्ब्राह्मणः पर्युपस्थितः ।

---

(०१) ( नु (for तद्); (२) (अ)तीक्ष्ण'; (ए)वोष्ण; (इ)वोष्ण (for (इ)हो- ष्ण); (३) चैव (for ते च); .
(०२) (३) विज्ञातुं (for अहं श्रोतुं); .
(०३) ( अहं (for अयं); (२) गुह्यं तेहं'; तस्य गुह्यं (for यत्तद्गुह्म); (३) ते च (for चैव); (४) चैव तादृशं; च तथाविधं .

तिग्मतेजा महाप्रांशुः श्मश्रुदण्डजटाधरः ।। ४ ।। [०१]

दर्शनीयोऽनवद्याङ्गस्तेजसा प्रज्वलन्निव ।
मधुपिङ्गो मधुरवाक्तपःस्वाध्यायभूषणः ।। ५ ।। [०२]

स राजानं कुन्तिभोजमब्रवीत्सुमहातपाः ।

**ब्रह्मणः-**

भिक्षामिच्चामि वै भोक्तुं तव गेहे विमत्सरः ।। ६ ।। [०३]

न मे व्यलीकं कर्तव्यं त्वया वा तव चानुगैः ।
एवं वत्स्यामि ते गेहे यदि ते रोचतेऽनघ ।। ७ ।। [०४]

यथाकामं च गच्छेयमागच्छेयं तथैव च ।
शय्यासने च मे राजन्नापराध्येत कश्चन ।। ८ ।। [०५]

**वैशम्पायनः-**

तमब्रवीत्कुन्तिभोजः प्रीतियुक्तमिदं वचः ।
एवमस्तु परं चेति पुनश्चैनमथाब्रवीत् ।। ९ ।। [०६]

**कुन्तिभोजः-**

मम कन्या महाप्राज्ञ पृथा नाम यशस्विनी।
शीलवृत्तान्विता साध्वी नियता चैव भाविनी ।। १० ।।[०७]

---

(०१) ( महाराजं (ज); तदा राजन्; यथा रा (२) पर्यु पस्थितः; शंसितव्रतः (३) महान्प्रांशुः (४) चीरं; .
(०२) (३) पिङ्गलो (for पिङ्गो); (४) शुचि (for तपः); .
(०३) (२) स; च (for सु-); ब्राह्मण उ (३) वै (for (अ)हं); स्थातुं (for भोक्तुं); (४) भवद् (for तव); विमत्सरः; नुवत्सरं; च वत्सरं; विमत्सरं .
(०४) (२) त्वया वै; तवापि (for त्वया वा) वा (for चा'); त्वया चैव (वै च) तवानुगैः (४) रोचते यदि तेनघ .
(०५) ( तु (for च) तिष्ठेयं च यथेच्छया (४) नापराध्यति; नावरुध्येत .
(०६) (२) प्रीतियुक्तः प्रियं वचः(३) वरं (for परं); (४) चैवम् (for चैनम्); .
(०७) ( प्राज्ञ (for ब्रह्मन्); (४) नाति( भि ) मानिनी; चैव भाविनी; न मनस्विनी (for न च मा); .

उपस्थास्यति सा त्वां वै पूजयाना महाद्युते(नवमन्य च)।
तस्याश्च शीलवृत्तेन तुष्टि समुपयास्यसि ॥ ११ ॥ (०१)

**वैशम्पायनः-**

एवमुक्त्वा तु तं विप्रमभिपूज्य यथाविधि।
उवाच कन्यामभ्येत्य पृथां पृथुललोचनाम् ॥ १२ ॥ (०२)

**कुन्तिभोजः-**

अयं वत्से महाभागो ब्राह्मणो वस्तुमिच्छति।
मम गेहे मया चास्य तथेत्येवं प्रतिश्रुतम् ॥ १३ ॥(०३)

त्वयि वत्से परायत्तं(श्वस्य) ब्राह्मणस्याभिराधनम्।
तन्मे वाक्यममिथ्या त्वां कर्तुमर्हसि कर्हिचित् ॥ १४ ॥ (०४)

अयं तपस्वी भगवान्स्वाध्यायनियतो द्विजः ।
यद्यद्ब्रूयान्महातेजास्तत्तद्देयममत्सरात् ॥ १५ ॥ (०५)

ब्राह्मणो हि परं तेजो ब्राह्मणो हि परं तपः ।
ब्राह्मणानां नमस्कारैः सूर्यो दिवि विराजते ॥ १६ ॥ (०६)

अमानयन्हि मानार्हान्वातापिश्च महासुरः ।

---

(०१) ( त्वा (for त्वां); (२) नाव ((अ)नव'); वै (for च); पूजया नावमन्यत; यामास मन्यत; या मनसापि भो; याना महा- विभो; या न मया विभो; 'यानवमत्य ह (३) तु (for च); (४) प्रीतिं (for तुष्टिं);यास्यति .

(०२) ( च (for तु); (२) प्रति (for अभि'); .

(०३) ( वै सुमहा' (for वत्से महा); (४) (ए)व; (अ)ति- (for (ए)वं); .

(०४) ( तव (for त्वयि); यत्तं; 'श्वास्य (for श्वस्य) (३) अमिथ्या (for न मिथ्या); (४) वै कचित्; कस्यचित् (for कर्हिं); .

(०५) (२) निरतः (for नियतः); शुचिः (for द्विजः); सदा (मुनिः) सुनियतें द्रियः (तो द्विजः) (४) अमत्सरं (for त्सरात्); .

(०६) ( ब्राह्मणो हि महातेजो; परं तेजो (२) ब्राह्मणो परमं (for हि परं); (३) नमस्कारात् .

निहतो ब्रह्मदण्डेन तालजङ्घस्तथैव च ।। १७ ।।(०१)

सोऽयं वत्से महाभार आहितस्त्वयि साम्प्रतम्।
त्वं सदा नियता कुर्या ब्राह्मणस्याभिराधनम् ।। १८ ।।(०२)

जानामि प्रणिधानं ते बाल्यात्प्रभृति नन्दिनि ।। १९ ।।(०३)

ब्राह्मणेष्विह सर्वेषु गुरुबन्धुषु चैव ह ।(०४)

तथा प्रेष्येषु सर्वेषु मित्रसम्बन्धिमातृषु।
मयि चैव यथावत्त्वं सर्वमावृत्य वर्तसे ।। २० ।।(०५)

न ह्यतुष्टो जनोऽस्तीह पुरे चान्तःपुरे च ते।
सम्यग्वृत्त्यानवद्याङ्गि तव भृत्यजनेष्वपि ।। २१ ।।(०६)

सन्देष्टव्यां तु मन्ये त्वां द्विजातिं कोपनं प्रति।
पृथे बालेति कृत्वा वै सुता चासि ममेति च ।(०७)

वृष्णीनां च कुले जाता शुरस्य दयिता सुता।

(०१) ( हि मां (मं)डव्यो; हि दाण्डि(ड)क्यो; वि- दर्भायां; तान् दाण्ड (वार्त-; बास्त-; दण्डि) क्यो; (for हि मानार्हान्); (२) बलः (for सुरः); (४) ज्वलज्जङ्घा’ (for तालजङ्घ’); .

(०२) ( मया (for महा-); -भाग; -भारम्; -भागे (for भार); (२) आहृत (for आहित); (३) नियतः; निभृ (र)ता (for नियता); कुर्याद् (for कुर्या); .

(०३) (२) भा- मिनि (for नन्दिनि); .

(०४) (अ)पि (for (इ)ह); (२) हि (for ह); .

(०५) ( तव (for तथा); ख-मयि च सर्वमादृत्य वर्तसे, (२) वीर- (for मित्र-);-भ्रातृषु; -बन्धुषु (for -मातृषु);(३) तत्त्वं; वत्तं; वृत्तं (for वत्त्वं); (४) आवृत्य (for आदृत्य); .

(०६) ( दुष्टो (for (अ)तुष्टो); जलो; नरो (for जनो); (२) वा (for च); पुरेषु च (for पुरे च ते); (३) ग्वृत्ता; -ग्हष्द्वा; , -धृत्या (for ’ग्वृत्त्या) (४) न च (for तव); .

(०७) ( सन्देष्टव्या; ’ष्टस्या च (for तु); सन्दिष्टव्यां तु मन्तव्यां; सजेष्वप्यानुमन्ये त्वां (२) द्विजाति- (for ’ति); भोजनं (for कोपनं); (३) पृथु- (for पृथे); (४) सुते चासि; श्रुता चासि; सुते(तै-; ता) वासि, ममापि च; ममैव हि (ह; च,) (for ममेति च); .

दत्ता प्रीतिमता मह्यं पित्रा बाला पुरा स्वयम् ।। २१ ।। (०१)

वसुदेवस्य भगिनी सुतानां प्रबरा मम।
अग्र्यमग्रे प्रतिज्ञाय तेनासि दुहिता मम ।। २२ ।।(०२)

तादृशे हि कुले जाता कुले चैव विवर्धिता।
सुखात्सुखमनुप्राप्ता ह्रदाद्ध्रदमिवागता ।। २३ ।। (०३)

दौष्कुलेया विशेषेण कथञ्चित्प्रग्रहं गताः ।
बालभावाद्विकुर्वन्ति प्रायशः प्रमदाः शुभे ।। २४ ।। (०४)

पृथे राजकुले जन्म रूपं चापि तवाद्भुतम्।
तेन तेनासि सम्पन्ना समुपेता च भाविनी ।। २५ ।।(०५)

सा त्वं दर्पं परित्यज्य दम्भं मानं च भाविनि।
आराध्य वरदं विप्रं श्रेयसा योक्ष्यसे पृथे ।। २६ ।। (०६)

एवं प्राप्स्यसि कल्याणि कल्याणमनघे ध्रुवम्।
कोपिते च द्विजश्रेष्ठे कृत्स्नं दह्येत मे कुलम् ।। २७ ।। (०७)

---

(०१) ( त्वं (for च); कुलपतेः (for कुले जाता); (२) स्थ दुहिता शुभा (४) (अ)पि सा (for पुरा); .
(०२) (२) सुता त्वं (for सुतानां); (३) अग्रम्; अग्रम्; अग्र्याम् (for अग्र्यम्);
(४) तेनास्य (for सि);.
(०३) ( यादृशे च; सि (for हि); (२) चेह; मम (for चैव); महति (for चैव वि-); (४) (आ)पगा (for (आ)गता); .
(०४) (२) कदा (for कथं); परिगृह्य तां (for प्रग्रहं गताः); (३) हि; प्र (for वि-);(४) तु वै (for शुभे); .
(०५) (२) रूपं चापि तवाद्भतं (३) (अ)पि; (अ)भि- (for (अ)सि); (४) ससमेता (for समुपेता); (अ)सि; हि; (अ)पि (for च); भाविनी; (अ)नि- दिते (ता); नंदिनी .
(०६) ( मानं (for दर्पं); (२) डभं; सङ्गं (for दम्भं); मोहं; दर्पं (for मीनं); भाविनि (नी) (३) देवं (for विप्रं); (४) शुभे (for पृथे); .
(०७) ( कल्याणं; णी(for णि); (२) पृथे त्वम् (for कल्याणम्); मनसि स्थितं (for अनघे ध्रुवम्) शुभे (for ध्रुवम्); (३) च (for तु); द्विजश्रेष्ट; (४) सर्वं; क्षिप्रं (for कृत्स्नं); .

अस्मिन् पर्वणि २५८ अध्याये २७ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कुण्डलाहरणपर्वणि अष्टपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५८ ॥

# २५९. एकोनषष्ट्यधिकद्विशततमोऽध्यायः

**कुन्त्या सावधानं परिचर्यया दुर्वाससः परितोषणम् ॥ कुन्त्याः पित्रा सहसंलापो ब्राह्मणपरिचर्या च**

**कुन्ती**

ब्राह्मणं यन्त्रिता राजन्नुपस्थास्यामि पूजया।
**यथाप्रतिज्ञं राजेन्द्र न च मिथ्या ब्रवीम्यहम् ॥ १ ॥** (०१)

एष चैव स्वभावो मे पूजयेयं द्विजानिति।
**तव चैव प्रियं कार्यं श्रेयश्च परमं मम ॥ २ ॥** (०२)

यद्येवैष्यति सायाह्ने यदि प्रातरथो निशि।
**यद्यर्धरात्रे भगवान्न मे कोपं करिष्यति ॥ ३ ॥** (०३)

लाभो ममैष राजेन्द्र यद्वै पूजयती द्विजान्।
**आदेशे तव तिष्ठन्ती हितं कुर्यां नरोत्तम ॥ ४ ॥** (०४)

---

(०१) ( यन्त्रितं (for ता); प्रतिज्ञां; प्रतिज्ञा; प्रतिज्ञ (४) ते (for च); न मिथ्या प्रब्रवीम्यहं .
(०२) (३) चैतत् (for चैव); कीर्तिं (for कार्यं); (४) परमं (for (ए)तत्परं) प्रियं (for परं); .
(०३) ( यदा; अद्य (for यदि); राजेन्द्र (for सायाह्ने); यद्यद्रक्ष्यति सायाह्ने (३) 'रात्रौ (for रात्रे); (४) हि (for मे); .
(०४) ( यं मम (for ममैष); (२) सम्पूजयेद्; पूजयति; यसिः यितुं (for यती); द्विजं (for द्विजान्) (४) पूजां( तोष ) यिष्ये द्विजोत्तम .

विस्रब्धो भव राजेन्द्र न व्यलीकं द्विजोत्तमः ।
वसन्प्राप्स्यति ते गेहे सत्यमेतद्ब्रवीमि ते ॥ ५ ॥ (०१)

यत्प्रियं च द्विजस्यास्य हितं चैव तवानघ ।
यतिष्यामि तथा राजन्व्येतु ते मानसो ज्वरः ॥ ६ ॥ (०२)

ब्राह्मणा हि महाभागाः पूजिताः पृथिवीपते।
तारणाय समर्थाः स्युर्विपरीते वधाय च ॥ ७ ॥

साहमेतद्विजानन्ती तोषयिष्ये द्विजोत्तमम्।
न मत्कृते व्यथां राजन्प्राप्स्यसि द्विजसत्तमात् ॥ ८ ॥ (०३)

अपराधेऽपि राजेन्द्र राज्ञामश्रेयसे द्विजाः ।
भवन्ति च्यवनो यद्वत्सुकन्यायाः कृते पुरा ॥ ९ ॥ (०४)

नियमेन परेणाहमुपस्थास्ये द्विजोत्तमम्।
यथा त्वया नरेन्द्रेदं भाषितं ब्राह्मणं प्रति ॥ १० ॥ (०५)

एवं ब्रुवन्तीं बहुशः परिष्वज्य समर्थ्य च ।
इति चेति च कर्तव्यं राजा सर्वमथादिशत् ।(०६)

**राजा**

एवमेतत्त्वया भद्रे कर्तव्यमविशङ्कया।

---

(०१) ( विश्रब्धो' (२) द्विजोतम, माः, मे वसन्प्राच्छति; स सम्प्राप्स्य (प्य) ति; न सम्प्राप्य ('प्स्य) ति, गेहे हे मे गेहेस (३) क-ख-घ-स सं .

(०२) (२) तथा (for तवा); (३) यतिष्ये तदहं कर्तुं .

(०३) ( विजानाना; विजानामि, द्विजन्मानं (for विजानन्ती); (३) मत्कृते न काश्चित् (for राजन्); (४) प्राप्स्यसे; .

(०४) ( अपराधो पि (for हि); परं (for द्विजाः); (३) भवति च्यवनाद्(for नो); .

(०५) (२) समुत्थास्ये (for उपस्थास्ये); .

(०६) (प्रशंस्य (for समर्थ्य); वक्तव्यं (for कर्तव्यं); चेदम् (for सर्वम्); यथातथ्यमिदं वच;) .

**मद्धितार्थं तथाऽऽत्मार्थं कुलार्थं चाप्यनिन्दिते ।। ११ ।।** (०१)

एवमुक्त्वा तु तां कन्यां कुन्तिभोजो महायशाः ।
**पृथां परिददौ तस्मै द्विजाय द्विजवत्सलः ।। १२ ।।** (०२)

## कुन्तिभाजः-

इयं ब्रह्मन्मम सुता बाला सुखविवर्धिता।
**अपराध्येत यत्किञ्चिन्न कार्यं हृदि तत्त्वया ।। १३ ।।** (०३)

द्विजातयो महाभागा वृद्धबालतपस्विषु।
**भवन्त्यक्रोधनाः प्रायो ह्यपराद्धेषु नित्यदा ।। १४ ।।** (०४)

सुमहत्यपराधेऽपि क्षान्तिः कार्या द्विजातिभिः ।
**यथाशक्ति यथोत्साहं पूजा ग्राह्या द्विजोत्तम ।। १५ ।।**(०५)

## वैशम्पायनः-

तथेति ब्राह्मणेनोक्तं स राजा प्रीतमानसः ।
**हंसचन्द्रांशुसङ्काशं गृहमस्मै न्यवेदयत ।। १६ ।।** (०६)

**तत्राग्निशरणे क्लृप्तमासनं तस्य भानुमत्।**

---

(०१) ( श्रिया (for त्वया); मद्धितार्थं कुलार्थं अ (त्व)निन्दते; च भाविनि (for च नन्दिनि); मद्धितार्थं तथात्मार्थं कुलार्थं चाप्यौनदिते; मद्धितार्थे कुलार्थे च त्वमा (तथा) त्मार्थे च नदिनि (त्वदर्थे यदुनन्दिनि) .
(०२) (२) कुतीभोजो ’मनाः (for यशाः); (४) द्विज (for सुत); .
(०३) ( मम सुता ब्रह्मन् (३) राध्यति (for राध्येत); (४) तन्न (for न तत्); हृदि कार्यं न तत्त्वया; न कार्यं हृ दि तत्त्वया .
(०४) (२) बालवृद्ध वृद्धा बालासू ’तपस्विनः (४) ह्यप (अप) राद्धेषु (for विरुद्धेष्वपि); च (for (अ) पि); .
(०५) (२) क्षमा कार्या विजानता; द्विजोत्तम (४) विजानता; द्विजातिना (for द्विजो); .
(०६) (उ)क्तः (क्तः)) (for (उ)क्ते); (२) प्रीति (for प्रति); (३) हंसचन्द्रप्रतीकाशं (४) अस्मै; अन्यन् (for अस्य) गृहे तस्मै न्यवेशयत् .

आहारादि च सर्वं तत्तथैव प्रत्यवेदयत् ।। १७ ।। [०१]

निक्षिप्य राजपुत्री तु तन्द्रीं मानं तथैव च ।
आतस्थे परमं यत्नं ब्राह्मणस्याभिराधने ।। १८ ।। [०२]

तत्र सा ब्राह्मणं गत्वा पृथा शौचपरा सती।
विधिवत्परिचारार्हं देववत्पर्यतोषयत् ।। १९ ।।[०३]

अस्मिन् पर्वणि २५९अध्याये १९ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कुण्डलाहरणपर्वणि पृथाद्विजपरिचर्यायां एकोनषष्ट्यधिकद्विशततमोऽध्यायः ।। २५९ ।।

# २६०. षष्ट्यंधिकद्विशततमोऽध्यायः

**कुन्तीपरिचर्यासंतुष्टेन दुर्वाससा तां प्रति अभीपक्सितार्थवरणचोदना ।। १ ।। तथा किंचितप्यवृण्वन्त्यै तस्यै स्वयमेव सकलदेववशीकरणदक्षस्य मन्त्रस्योपदेशः ।। २ ।। ततस्तेन कुन्तिभीजामन्त्रणपूर्वकमन्तर्धानम् ।। ३ ।। कुन्त्याः सेवया सन्तुष्टस्य ब्रह्मर्षेस्तस्यै मन्त्रोपदेशः**

**वैशम्पायनः**

सा तु कन्या महाराज ब्राह्मणं संशितव्रतम्।

---

(०१) ( तस्य; ततो (for तत्र); शरणं, कामम् (for क्षमम्); (३) तु (for च); तत्सर्वं तु; तं; , वै; च (for तत्);.

(०२) ( च सा (for तु); (२) तद्री-; तन्द्रां; तद्धि; , कुती (for तन्द्रीं); (३) आतस्थौ परया प्रीत्या (for परमं यत्नं) (४) राधनं; .

(०३) ( तं तु (for तत्र); ब्राह्मणं राजन्; णं ज्ञात्वा; णश्रेष्ठं -(२) ब्राह्मणे संशितव्रते उप- चारेण कन्यका, परिचर्यापरा राजन् नक्तन्दिनमतन्द्रिता औ, (४) परि (for पर्य); .

तोषयामास शुद्धेन मनसा संशितव्रता ॥ १ ॥ (०१)

प्रातरेष्याम्यथेत्युक्त्वा कदाचिद्द्विजसत्तमः ।
तत आयाति राजेन्द्र सायं रात्रावथो पुनः ॥ २ ॥ (०२)

तं च सर्वासु वेलासु भक्ष्यभोज्यप्रतिश्रयैः ।
पूजयामास सा कन्या वर्धमानैस्तु सर्वदा ॥ ३ ॥ (०३)

अन्नादिसमुदाचारः शय्यासनकृतस्तथा।
दिवसे दिवसे तस्य वर्धते न तु हीयते ॥ ४ ॥ (०४)

निर्भर्त्सनापवादैश्च तथैवाप्रियया गिरा।
ब्राह्मणस्य पृथा राजन्न चकाराप्रियं तदा ॥ ५ ॥ (०५)

व्यस्ते काले पुनश्चैति न चैति बहुशो द्विजः ।
सुदुर्लभमपि ह्यन्नं दीयतामिति सोऽब्रवीत्।(०६)
कृतमेव च तत्सर्वं यथा तस्मै न्यवेदयत् ॥ ६ ॥

---

(०१) ( भागं; ’ भागा (for राज); )२) शंसितं (for संशित’) युक्तेन (for शुद्धेन); शसितब्रतं (ता) संशितव्रत .

(०२) ( प्रातरेष्य इति ह्यु (इतीत्यु) त्त्वा; प्रातरेष्याम्यथेत्युक्त्वा’ (२) द्विज- सत्तम तत्र (for तत); (४) सायं; सोर्ध (for साये); पुरः; मुनिः (for पुनः); .

(०३) ( वेलासु सर्वासु (२) भक्ष्यभोज्यैः; भोज्यचोष्य (for भक्ष्यभोज्य); प्रति (परि) ग्रहैः (३) वै (for सा); (४) वर्धमानेन (’ने च); वर्तमानेन; वर्धमानेव; वर्धमाने हि; वर्धमानैर्हि; वर्तमानैर्हि वर्चसा’; नित्यदा; , सा तदा (for सर्वदा); .

(०४) ( अन्नानि (for अन्नादि); समुदाचार- (२) विधि; विधे (for कृत); तदा(for तथा); (३) चैव(for तस्य); (४) च; (ए)व; प्र (for तु); वर्धत्येव न हीयते .

(०५) निर्भर्त्सेन (for निर्भर्त्सन); (अ)पदेशैः(for (अ)पवादैः); अपदेशः (व्याजः) (२) च (for (ए)व); .

(०६) ( प्रह्ये स्वप्न-; सप्त-; व्यस्त- (for व्यस्ते); चेति; चैव (for चैति); (२) चेति (for चैति); नृप (for द्विजः); (३) दुष्प्राप( प्य) म् (for दुर्लभ्यम्); इति (for अपि); सुदुर्लभमपि (मिदं) ह्यन्नं ह्यर्थं (४) अपि (for इति); .

शिष्यवत्पुत्रवच्चैव स्वसृवच्च सुसंयता।(०१)
**यथोपजोषं राजन्द्र द्विजातिप्रवरस्य सा ।। ७ ।।**

प्रीतिमुत्पादयामास कन्यारत्नमनिन्दिता ।। ८ ।। (०२)

तस्यास्तु शीलवृत्तेन तुतोष द्विजसत्तमः ।
**अवधानेन भूयोऽस्याः परं यत्नमथाकरोत् ।। ९ ।। (०३)**

तां प्रभाते च सायं च पिता पप्रच्छ भारत।

**पिता-**

अति तुष्यति ते पुत्रि ब्राह्मणः परिचर्यया।(०४)

**वैशम्पायनः-**

**तं सा परममित्येव प्रत्युवाच यशस्विनी ।। १० ।। (०५)**

ततः प्रीतिमवापाग्र्यां कुन्तिभोजो महामनाः ।। ११ ।। (०६)

ततः संवत्सरे पूर्णे यदासौ जपतां वरः ।
**नापश्यद्दुष्कृतं किञ्चित्पृथायाः सौहृदे रतः ।(०७)**
**ततः प्रीतमना भूत्वा स एनां ब्राह्मणोऽब्रवीत् ।। १२ ।।**

प्रीतोऽस्मि परमं भद्रे परिचारेण ते शुभे।(०८)

---

(०१) ( इत्येव; एवेति (for एव च); (२) यथा; तथा (for पृथा); (२) सुहृच्चैव (for स्वसृवच्च); चैव संमता (च वशं गता); चैव संमतं; , च स्मृतं यथा (for च सुसंयता); .
(०२) (४) अतन्द्रिता (for अनिन्दिता; कन्या यत्नेन निर्मितां; कन्यारत्नमनिंदिता .
(०३) ( स; स्व-; च(for तु); (३) अवधाने च; आरा- धने च स्याः (for स्य); यत्नेन शुद्धेन .
(०४) ( प्रभातेपि (for ते च); सायं च; सायेपि; सायाह्ने (for साये च) .
(०५) (ए)वं (for (ए)व); तं च सा परमि- त्येवं .
(०६) (२) तप(for यश); (४) यशाः (for मनाः); .
(०७) (२) यत्र; यदि; यथा(for यदा); जयतां(for जपतां); (४) देन सः;
देन च(for दे रतः);.
(०८) (२) स च मां; कन्यां स; स च तां (for स एनां); ब्राह्मणः (४) मे (for ते); .

वरान्वृणीष्व कल्याणि दुरापान्मानुषैरिह ।। १३ ।। (०१)

यैस्त्वं सीमन्तिनीः सर्वा यशसाभिभविष्यसि ।। १४ ।। (०२)

**कुन्ती**

कृतानि मम सर्वाणि यस्या मे वेदवित्तम।
त्वं प्रसन्न पिता चैव कृतं विप्र वरैर्मम ।। १५ ।। (०३)

**ब्राह्मणः**

यदि नेच्छसि मत्तस्त्वं वरं भद्रे शुचिस्मिते।
इमं मन्त्रं गृहाण त्वमाह्वानाय दिवौकसाम् ।। १६ ।। (०४)

यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि।
तेन तेन वशे भद्रे स्थातव्यं ते भविष्यति ।। १७ ।। (०५)

अकामो वा सकामो वा स समेष्यति ते वशे।
विबुधो मन्त्रसंशान्तो भवेद्भृत्य इवानतः ।। १८ ।। (०६)

**वैशम्पायनः**

न शशाक द्वितीयं सा प्रत्याख्यातुमनिन्दिता।
तं वै द्विजातिप्रवरं तदा शापभयान्नृप ।। १९ ।। (०७)

---

(०१) ( वरं(for वरान्); (२) दुरापं मानुषैरपि .

(०२) (३) अन्या (for सर्वा); (४) च (for (अ)भि); ष्यति(for ष्यसि); .

(०३) (२) यस्मान् (for यस्या); वेदवित्तमः (द्विज- सत्तम) (४) कृतार्थं प्रवरैर्मम; ह्येष एव वरो मम; .

(०४) ऋषिः; दुर्वासाः; मुनिः (for ब्राह्मणः); ( मत्तस्त्वं; भद्रं ते (for भद्रे त्वं); (२) भद्रे (for मत्तः); इदं (for इमं); .

(०५) (३/४) स्वातन्त्र्यं (for स्थातव्यं); तस्य तस्य प्रसादात्ते ('देन) पुत्रो भविष्यति (भवेदिति); .

(०६) ( अकामश्च (२) न स नेष्यति (समेष्यति हि); स समेष्यति; वशमेष्यति वरं शुभे; वशे (for वशम्); (३) संयत्तो; 'सम्भ्रान्तो (for संशान्तो); (४) भवेद्; वाक्यैर् (for वाक्ये); हृद्य (for भृत्य); (अ)नुगः (for (अ)नतः); .

(०७) ( द्वितीया सा; द्वितीयस्य; द्विजातिं च (for द्वितीयं सा); (३) तद्वै; न वै (for तं वै); .

**ततस्तामनवद्याङ्गीं ग्राहयामास स द्विजः ।**
**मन्त्रग्रामं तदा राजन्नथर्वशिरसि श्रुतम्।**(०१)
**तं प्रदाय तु राजेन्द्र कुन्तिभोजमुवाच ह ।। २० ।।**

**उषितोऽस्मि सुखं राजन्कन्यया परितोषितः ।**(०२)
**तव गेहेषु विहितः सदा सुप्रतिपूजितः ।। २१ ।।** (०३)

**साधयिष्यामहे तावदित्युक्त्वान्तरधीयत ।। २२ ।।** (०४)

**स तु राजा द्विजं दृष्ट्वा तत्रैवान्तर्हितं तदा।**
**बभूव विस्मयाविष्टः पृथां च समपूजयत् ।। २३ ।।** (०५)

आरण्यः कुडला (लाभि) हरण कुन्तीमन्त्रप्राप्तिः; पृथामन्त्रग्रहणं;

अस्मिन् पर्वणि २६०अध्याये २३श्लोकाः सन्ति

**इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कुण्डलाहरणपर्वणि पृथाया मन्त्रप्राप्तौ षष्ट्यधिकद्विशततमोऽध्यायः ।। २६० ।।**

# २६१. एकषष्ट्यधिकद्विशततमोऽध्यायः

**कदाचन ऋतुस्नतया सूर्यनवलोकयन्त्या कुन्त्या दुर्वाससा दत्तमन्त्रपरीक्षणाय दताह्वानम् ।। १ ।। मन्त्रबलादुपागतेन रविणा स्वेन सङ्गमनङ्गीकुर्वन्त्याः कुन्त्या विभीषिकापूर्वकं**

---

(०१) (२) स (for वै); (३) तथा; ततो (for तदा); (४) अथवाङ्गिरसि स्थितं (for श्रुतम्);.
(०२) ( सं (for तं); (२) सः (for ह); .
(०३) ( गेहेषु (for गेहे सु); विहिते (for विहितः); (२) तथा; तदा (for सदा); सुप्रीति'; सम्प्रीति (for सुप्रति); .
(०४) (३) ' म्यहं (for 'महे); राजन् (for तावद्); .
(०५) ( च (for तु); (२) तथै (for तत्रै); (४) प्राति; (इ)माम (for साम); .

सङ्गायानुनयनम् ॥ २ ॥ कुन्त्याः सूर्यस्यावाहनं कुन्तीसूर्यसंवादश्च

**वैशम्पायनः**

गते तस्मिन्द्विजश्रेष्ठे कस्मिंश्चित्कारणान्तरे।
चिन्तयामास सा कन्या मन्त्रग्रामबलाबलम् ॥ १ ॥ (०१)

**कुन्ती-**

अयं वै कीदृशस्तेन मम दत्तो महात्मना।
मन्त्रग्रामो बलं तस्य ज्ञास्ये नातिचिरादिति ॥ २ ॥ (०२)

**वैशम्पायनः-**

एवं सञ्चिन्तयन्ती सा ददर्शर्तुं यदृच्छया।
व्रीडिता साभवद्बाला कन्याभावे रजस्वला ॥ ३ ॥ (०३)

ततो हर्म्यतलस्था सा महार्हशयनोचिता।

अथोद्यन्तं सहस्रांशुं पृथादीप्तं ददर्श ह ।
न ततर्प च रूपेण भानोः सन्ध्यागतस्य सा ॥ ४ ॥

तस्या दृष्टिरभूद्दिव्या सापश्यद्दिव्यदर्शनम् ।(०४)

तत्र बद्धमनोदृष्टिरभवत्सा सुमध्यमा ।(०५)

तस्या दृष्टिरभूद्दिव्या सापश्यद्दिव्यदर्शनम्।

---

(०१) ( ख-सा तु कन्या महाभागा ब्रह्मणं संशितव्रतम् । तोषयामास शुद्धेन मनसा संशितर्व्वा ॥ (२) कारणान्तरे (for काल); .
(०२) (३) ग्राम (for ग्रामो); त्वा (ह्य) - स्थ (for तस्य);(४) इति (for इव); ज्ञास्यामि नचिरादिव.
(०३) ( सा (for सं); तु; (ए)व; (इ)व (for सा); (२) (अं)कं; तु (for (ऋ)तुं); यथेच्छया (३) चा (for सा'); कन्या (for बाला); (४) बाल (for कन्या); .
(०४) (१/२) प्राच्यां दिशि समुद्यन्तं ददर्शादित्यमडलं .
(०५) (३) चातप्यत ततर्प हि (चाप्येतर्हि); च तर्प्य च; तताप च (for ततर्प च); (४) च (for सा); .

आमुक्तकवचं देवं कुण्डलाभ्यां विभूषितम् ।। ५ ।। (०१)

तस्याः कौतूहलं त्वासीन्मन्त्रं प्रति नराधिप।
आह्वानमकरोत्साथ तस्य देवस्य भाविनी ।। ६ ।। (०२)

प्राणानुपस्पृश्य तदा ह्याजुहाव दिवाकरम्।
आजगाम ततो राजंस्त्वरमाणो दिवाकरः ।। ७ ।। (०३)

लक्षालङ्कारः - प्राणानुपस्पृश्य तदा इत्यत्र प्राणानुपस्पृश्य प्राणायामं कृत्वा ।

मधुपिङ्गो महाबाहुः कम्बुग्रीवो हसन्निव ।
अङ्गदी बद्धमुकुटो दिशः प्रज्वालयन्निव ।। ८ ।। (०४)

योगात्कृत्वा द्विधाऽऽत्मानमाजगाम तताप च ।
आबभाषे ततः कुन्तीं साम्ना परमवल्गुना ।। ९ ।। (०५)

## सूर्यः-

आगतोऽस्मि वशं भद्रे तव मन्त्रबलात्कृतः ।
किं करोमि वशो राज्ञि ब्रूहि कर्ता तदस्मि ते ।। १० ।। (०६)

## कुन्ती-

गम्यतां भगवंस्तत्र यत एवागतो ह्यसि।

---

(०१) ( अस्या ( अन्या) (for तस्या); (२) सूर्यमण्डलं (for दिव्यदर्शनम्);(४) सुशोभितं; च भूषितं (for विभू); .

(०२) ( कुतूहलं चा (for त्वा); (२) मन्त्रान् (for मन्त्रं);(३) च (for (अ)थ); (४) तत्र तस्यैव (for तस्य देवस्य); भाविनी; .

(०३) ( अ (आ) पो ह्रुपस्पृश्य तदा; उपस्पृश्य तदा कुन्ती (२) ह्याजु; साजु' (for आजुं); (३) दिवो (for ततो); .

(०४) (३) मकुटो (for मुकुटो); (४) प्रज्वल (for प्रज्वाल); .

(०५) (१/२) स्वमा (for द्विधा); ततो वचः (for तताप च); .

(०६) दिवाकरः ( वशे (for वशं); (२) मन्त्रग्राम (for तव मन्त्र); (३) (अ)वशं; वशो; वशे (for (अ)वशो); (४) ब्रूहि किं ते चिकीर्षितं .

कौतूहलात्समाहूतः प्रसीद भगवन्निति ।। ११ ।।(०१)

## सूर्यः-

गमिष्येऽहं यथा मां त्वं ब्रवीषि तनुमध्यमे।
न तु देवं समाहूय न्याय्यं प्रेषयितुं वृथा ।। १२ ।। (०२)

तवाभिसन्धिः सुभगे सूर्यात्पुत्रो भवेदिति।
वीर्येणाप्रतिमो लोके कवची कुण्डलीति च ।। १३ ।। (०३)

सा त्वमात्मप्रदानं वै कुरुष्व गजगामिनि।
उत्पत्स्यति हि पुत्रस्ते यथासङ्कल्पमङ्गने ।। १४ ।। (०४)

अथ गच्छाम्यहं भद्रे त्वया सङ्गम्य सुस्मिते।
शपिष्ये त्वामहं क्रुद्धो ब्राह्मणं पितरं च ते ।। १५ ।। (०५)

यदि त्वं वचनं नाद्य करिष्यसि मम प्रियम् ।। (०६)

त्वत्कृते तान्प्रधक्ष्यामि सर्वानपि न संशयः ।
पितरं चैव ते मूढं यो न वेत्ति तवानयम् ।। १६ ।। (०७)

---

(०१) कन्या (for कुन्ती); ( यत्र (for तत्र); (२) त्वं (for (अ)सि); पुनरा (for समुपा); यत एवा- गतो ह्यसि (३) बालभावात् (for कौतूहलात्); नीतः (for हूतः); .

(०२) ( मा (for मां); तु (for त्वं); (२) राजनन्दिनि (for तनु); (३) च (for तु);(४) यथा; पृथे (for वृथा); .

(०३) ( तथा (for तव); (अ)भिः( 'पि) सन्धिं (२) कुर्यां (for सूर्यात्); (४) कुडली कवची .

(०४) ( मे; हि (for वै); (३) उत्पत्स्यते ते पुत्रो .

(०५) ( अव (for अथ);(२) भाविनि; भामिनि (for सुस्मिते); .

(०६) (३) शपिष्ये (for शप्स्यामि); त्वां (त्वा) न्यथा (for त्वामहं); शप्स्ये कन्येन्यथा ऋद्धो.

(०७) ( सम्प्रध'; तान्प्रव (for तान्प्रध); (२) एव (for अपि); (३) मूढो यो; ते मूढे (for ते मूढं);.

तस्य च ब्राह्मणस्याद्य योऽसौ मन्त्रमदात्तव ।
शीलवृत्तमविज्ञाय धास्यामि विनयं परम् ।। १७ ।। (०१)

एते हि विबुधाः सर्वे पुरन्दरमुखा दिवि।
त्वया प्रलब्धं पश्यन्ति स्मयन्त इव भाविनि ।। १८ ।। (०२)

लक्षालङ्कारः - त्वया प्रलब्धम् इत्यत्र प्रलब्धं वञ्चितम् ।

पश्य चैनान्सुरगणान्दिव्यं चक्षुरिदं हि ते।
पूर्वमेव मया दत्तं दृष्टवत्यसि येन माम् ।। १९ ।। (०३)

**वैशम्पयानः**

ततोऽपश्यत्त्रिदशान्राजपुत्री सर्वानेव स्वेषु धिष्ण्येषु स्वस्थान्।
प्रभावन्तं भानुमन्तं महान्तं यथाऽऽदित्यं रोचमानांस्तथैव ।(०४)

सा तान्दृष्ट्वा व्रीडमानेव बाला सूर्यं देवी वचनं प्राह भीता ।। २० ।।

**कुन्ती-**

गच्छ त्वं वै गोपते स्वं विमानं
कन्याभावाद्दुःख एवापचारः ।। २१ ।। (०५)

पिता माता गुरवश्चैव येऽन्ये देहस्यास्य प्रभवन्ति प्रदाने।

---

(०१) ( तथास्य (for तस्य च); (४) (अ)वि- नयं (for विनयं); वरं (for परम्); धक्ष्याम्यविनयं परं; .

(०२) ( कन्ये (for सर्वे); (४) भाविनि; मां शुभे (for भामिनि); .

(०३) ( वै' तान्; चैतान् (for चैनान्); वरारोहे (for सुरगणान्); (२) दिव्यचक्षुर्; च (for हि); मे (for ते); .

(०४) ( प्रभावन्तं पुरस्ताद् (for महान्तं);(२) ख-घ-पुरस्ताद्, (४) रोचमानान् (for मानं); .

(०५) ( सा तं; तान्सा वेपमाना त्रिदशान् (for व्रीडमाना); एव (for (इ)व); (२) सूर्यं देवं; देवश्रेष्ठं (for सूर्यं देवी); (३) स्वे विमाने; स्वं विशालं (४) भावे (for भावाद्); दुष्ट; दुःखम् (for दुःख); एवो एवां (for एषो); .

नाहं धर्मं लोपयिष्यासि लोके स्त्रीणां वृत्तं पूज्यते देहरक्षा ।। २२ ।। (०१)

मया मन्त्रबलं ज्ञातुमाहूतस्त्वं विभावसो।
बाल्याद्बालेति तत्कृत्वा क्षन्तुमर्हसि मे विभो ।। २३ ।। (०२)

**सूर्यः**

बालेति कृत्वानुनयं तवाहं ददानि नान्यानुनयं लभेत।
आत्मप्रदानं कुरु कुन्तिकन्ये शान्तिस्तवैवं हि भवेच्च भीरु ।। २४ ।। (०३)

न चापि गन्तुं युक्तं हि मया मिथ्याकृतेन वै।
गमिष्याम्यनवद्याङ्गि लोके समवहास्यताम् ।। २५ ।। (०४)

असमेत्य त्वया भीरु मन्त्राहूतेन भाविनि ।। (०५)

गच्छेयमेवं सुश्रोणि जतोहं वै निराकृत ।
सर्वेषां विबुधानां च वक्तव्यः स्यां तथा शुभे ।। २६ ।। (०६)

सा त्वं मया समागच्छ पुत्रं लप्स्यसि मादृशम्।
विशिष्टा सर्वलोकेषु भविष्यसि न संशयः ।। २७ ।।(०७)

---

(०१) ( चापि (for चैव); ये ते मन्ये (for येन्ये) (२) प्रवदन्ति (for प्रभवन्ति); स्म दाने (for प्र); (३) साहं (for नाहं); पाल (for लोप); चाल (for लोप); (४) धर्मः; धर्मं (for वृत्तं); .
(०२) (३) बाल्येति (for बालेति); मत्वा तु; कृत्वा तु; तत्कृत्वा कृत्वा त्वं (४) वै (for मे); प्रभो (for विभो); .
(०३) ( बाल्येति; बाले तु (for बालेति); तनयं (for (अ)नुनयं); (२) ददामि; दद्यानि (for ददानि); नु (तु) लभेत काचित् (for कामा); त (त्व) नयं लभेत; त्वभयं लभेत (for (अ)नुनयं लभेत); (३) तव (न तु) (for कुरु); तु कुरुष्व (for कुरु कुन्ति); मध्ये; मन्ये; मह्यं (for कन्ये); (४) तथैवं च (हि); तवानेन (for तवैवं हि); हि भवेत; भवितेति; हि भवेन्सु (for हि भवेच्च); .
(०४) ( गन्तुं युक्तं च (for हि); (२) गतेन (for कृतेन); .
(०५) (३/४) इतस्त्वया (स्तवा) नवद्याङ्गि लोके सम (मु) पहास्यतां; .
(०६) (६) तथा शुभे अर्निदिते (for अहं शुभे); .
(०७) ( सहागच्छ; स्म सङ्गच्छ (for समा); (२) लप्स्यसे मादृशं सुतं (३/४) विशिष्टः, भविष्यति न

अस्मिन्  पर्वणि २६१अध्याये २७ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कुण्डलाहरणपर्वणि सूर्याह्वाने एकषष्ट्यधिकद्विशततमोऽध्यायः ।। २६१ ।।

# २६२. द्विषष्ट्यधिकद्विशततमोऽध्यायः

**कुन्त्या सङ्गमन्तरा दुश्शाकानुनये भास्करे कृच्छ्रत्तदङ्गीकरणम् ।। १ ।। सूर्येण पुनः कन्यात्वलाभरूपवरदानपूर्वकं तस्यां गर्भादानम् ।। २ ।। सूर्यस्य कुन्त्यां गर्भस्थापनम्**

**वैशम्पायनः**

**सा तु कन्या बहुविधं ब्रुवन्ती मधुरं वचः ।**
**अनुनेतुं सहस्रांशुं न शशाक मनस्विनी ।। १ ।।** (०१)

**न शशाक यदा बाला प्रत्याख्यातुं तमोनुदम्।**

संशयः; च भाविनि .
(०१) (२) ब्रुवती (for ब्रुवन्ती); .

भीता शापात्ततो राजन्दध्यौ दीर्घमथान्तरम् ।। २ ।। (०१)

अनागसः पितुः शापो ब्राह्मणस्य तथैव च ।
मन्निमित्तः कथं न स्यात्क्रुद्धादस्माद्विभावसोः ।। ३ ।। (०२)

बालेनापि सता मोहाद्भृशं पापकृतान्यपि।
नाभ्यासादयितव्यानि तेजांसि च तपांसि च ।। ४ ।। (०३)

साहमद्य भृशं भीता गृहीता च करे भृशम्।
कथं त्वकार्यं कुर्यां वै प्रदानं ह्यात्मनः स्वयम् ।। ५ ।। (०४)

**वैशमाप्यनः**

सा वै शापपरित्रस्ता बहु चिन्तयती हृदा।
मोहेनाभिपरीताङ्गी स्मयमाना पुनः पुनः ।। ६ ।। (०५)

तं देवमब्रवीत्भीता बन्धूनां राजसत्तम।
व्रीडाविह्वलया वाचा शापत्रस्ता विशाम्पते ।। ७ ।। (०६)

**कुन्ती-**

पिता मे ध्रियते देव माता चान्ये च बान्धवाः ।

(०१) ( च सा (for यदा); (३) भीताशया; भीता शापं तदा (for ततो); (४) इव (for अथ); (अं)तरे; (उ)त्तरं (for (अ)न्तरम्); .
(०२) (३) मन्निमित्तं नु (for न); .
(०३) ( बाल्ये- नापि भृशं; सतां; यदा; सदा (for सता); (२) सतां (for भृशं); नापह्नवा न्यपि; सोपद्रवा; पापकृतां; सापकृता; शापभयादपि (३) नाभ्यां; नान्या; तान्यासाध'; न ह्यहं छादयिष्यामि; .
(०४) ( भृता (for भीता); (२) गृहीत्वा (for ता); कवचं; (अ)पि करे; च करौ (for च करे); स्वयं (for भृशम्); (३) च कार्यं; नु कार्यं; तवेह (for त्वकायं); कन्या; कुर्याद् (for कुर्यां); (४) प्रदाने (for नं); त्वहं (for स्वयम्); स्वयमात्मनि- वेदनं; .
(०५) वेशं उ (वेशं) ( सा वै (for सैवं); भयात् त्रस्ता (भीता) (for परित्रस्ता); (२) हृदा (for तदा); चितयती हृदा बहु (३) (अ)पि; च (for (अ)भि); -परीता च; समायुक्ता(for -परीताङ्गी); (४) स्मयमानः, मानं; .
(०६) ( तदे (दै)वम्; देवं तम् तस्यैवम् प्रीता (for भीता); (४) शापाच्चैव (for शापत्रस्ता); .

न तेषु ध्रियमाणेषु विधिलोपो भवेदयम् ।। ८ ।। (०१)
मन्निमित्तं कुलस्यास्य लोके कीर्तिर्नशेत्ततः ।। ९ ।। (०२)

अथवा धर्ममेतं त्वं मन्यसे तपतां वर।
ऋते प्रदानाद्बन्धुभ्यस्तव कामं करोम्यहम् ।। १० ।। (०३)

आत्मप्रदानं दुधर्षं तव कृत्वा सती त्वहम्।
त्वयि धर्मो यशश्चैव कीर्तिरायुश्च देहिनाम् ।। ११ ।। (०४)

## सूर्यः

न ते पिता न ते माता गुरवो वा शुचिस्मिते।
प्रभवन्ति वरारोहे भद्रं ते शृणु मे वचः ।। १२ ।। (०५)

सर्वान्कामयते यस्मात्कमेर्धातोश्च भाविनि।
तस्मात्कन्येह सुश्रोणि स्वतन्त्रा वरवर्णिनि ।। १३ ।। (०६)

नाधर्मश्चरितः कश्चित्त्वया भवति भाविनि।
अधर्मं कुत एवाहं वरेयं लोककाम्यया ।। १४ ।। (०७)

---

(०१) ( च (for मे); (३) विद्य- मानेषु; विप्रियं कायं (४) धर्मलोपो; विधिलोभो , (तु (for प्र ) (२) अदृ (for नादृष्टं) तदा; वने (for महा ) (३)शान्ता(for श्रान्ता) .त्वया तु सङ्गमो देव यदि स्याद्विधिवर्जितः ।

(०२) ( तु (च) (for मे); (३) सन्नि; स्वन्नि (for मन्नि); (४) कीर्तिक्षयस्ततः (स्तव) कीर्तिर्न (र); संशयः .

(०३) ( एव; एवं; एतत् (for एतं); (२) सत्यं ते (२ मन्यसे); (३) मते (for ऋते); प्रसादाद् (for प्रदानाद्); (४) तत्र; त्वया (for तव); कार्यं (for कामं); .

(०४) ( दानं च (for प्रदानं); दुर्धर्षं (२) महि- तले; सती ह्यहं (३) ते च (for चैव); (४) त्वयि कीर्तिश्च .

(०५) (२) ते (for वा); व्रते (for स्मिते); (३) प्रदा (धा) ने ते (वै) (for वरारोहे); (४) सर्वं तत् (for भद्रं ते); मद् (for मे); .

(०६) ( सर्वं (for सर्वान्); कामयसे तस्मात् (२) कामं वरय; क (क्ष) मेर्धातोश्च; कालधा; कामधा; कामहीनांश्च भाविनि; भामिनी (३) स्वतन्त्रा (for सुश्रोणि); (४) वरं वरय भामिनी; .

(०७) (२) भाविनि; भामिनी (४) चरेहं; वरेयं; भवेयं (for चरेयं); .

अनावृताः स्त्रियः सर्वा नराश्च वरवर्णिनि।
स्वभाव एष लोकानां विकारोऽन्य इति स्मृतः ॥ १५ ॥[०१]

सा मया सह सङ्गम्य पुनः कन्या भविष्यसि।
पुत्रश्च ते महाबाहुर्भविष्यति महायशाः ॥ १६ ॥[०२]

## कुन्ती

यदि पुत्रो मम भवेत्त्वत्तः सर्वतमोनुद्।
कुण्डली कवची शूरो महाबाहुर्महाबलः ।[०३]
अस्तु मे सङ्गमो देव यथोक्तं भगवंस्त्वया ॥ १७ ॥

तिग्मरश्मे महाबाहो सङ्गमिश्ष्ये दुहा सद्।
अस्ति मे सङ्गमो देव अनेन समयेन ते ॥

## सूर्यः

भविष्यति महाबाहुः कुण्डली दिव्यवर्मभृत्।
उभयं चामृतमयं तस्य भद्रे भविष्यति ।[०४]

## कुन्ती

यद्येतदमृतादस्ति कुण्डले वर्म चोत्तमम्।
मम पुत्रस्य यं वै त्वं मत्त उत्पादयिष्यसि ।[०५]

---

(०१) ( अनाशिाः; अन्यावृता; (२) श्रुतिः; स्मृतिः; स्थितिः (for स्मृतः); .
(०२) ( त्वं (for सा); (४) न संशयः (for महा); .
(०३) ( अपि (for यदि); ममाप्येवं; मम ह्येष (for मम भवेत्); (२) -नुद; ’नुद; पहन्; पहं (for ’पह); (४) भवि- व्यति (for महा); .
(०४) ( शूरः (for बाहुः); बाहुः कुण्डले (२) ’धृक् (for ’भृत्); अभेद्यं (for उभयं वा; तु (for च); .
(०५) पृथा (for कुन्ती); ( यदन्यद् (for यद्येतद्); यद्यप्यन्ये- मृतादस्ति (मृतोदात्ते); , यद्येवं ह्यमृतोद्भूते (३) यो वै; वीर (for यं वै); (४) मत्त उत्पाद-यिष्यति; तस्य भद्रे भविष्यति; .

त्वद्वीर्यरूपसत्त्वौजा धर्मयुक्तो भवेत्स च ।[०१]

### सूर्यः

अदित्या कुण्डले राज्ञि दत्ते मे मत्तकाशिनि।
तेऽस्य दास्यामि वै भीरु वर्म चैवेदमुत्तमम् ॥ १८ ॥[०२]

लक्षालङ्कारः - आदित्ये कुण्डले राज्ञि इत्यत्र आदित्ये सूर्यसम्बन्धिनी मत्समे मम कुण्डलसदृशे कुण्डले, मूलरूपस्थितकुण्डले इति यावत् ।

### कुन्ती-

परमं भगवन्नेवं सङ्गमिष्ये त्वया सह ।
यदि पुत्रो भवेदेवं यथा वदसि गोपते ॥ १९ ॥[०३]

### वैशम्पायनः

तथेत्युक्त्वा तु तां कुन्तीमाविवेश विहङ्गमः ।
स्वर्भानुशत्रुर्योगात्मा नाभ्यां पस्पर्श चैव ताम् ॥ २० ॥[०४]

ततः सा विह्वलेवासीत्कन्या सूर्यस्य तेजसा।
पपात चाथ सा देवी शयने मूढचेतना ॥ २१ ॥[०५]

### सूर्यः

---

(०१) ( नो (मे) (३) त्वद्रकपवीर्य -सम्पन्नो (for सत्त्वौजा); (४) सदा; तदा'; मम (for स च); .
(०२) अदित्या कुण्डले ( अदित्याः; आदित्य (त्ये (for अदित्या); (२) मत्समे; , मत्समो , मत्समीपे तु कामिनि (३) अद्य; अस्य'; तस्य; तस्मै (for तेस्य); ते (for वै); वामोरु (for वै भीरु); (४) आत्मनः (for उत्तमम्); वर्म चैवेह चोत्तमं; वर्म चैवमनुत्तमं; कवचं चेदमुत्तमं; - कुडले वर्म चोत्तमं; .
(०३) कुन्त्युवाच (for पृथो'); ( एवं (for देव); भगवन्देवदेवेश (२) सङ्गच्छेयं; 'गम्येह; गमोयं; गस्येह (अ)नघ (for सह); (३) भवति (for भवेद्); एव (for एवं); .
(०४) (उ)क्तवा च; (उ)वाच (for (उ)त्त्वा तु); .
(०५) ( ला साध्वी (for लेवासीत्); (३) चाथ सा; साथ वै; विह्वला (for (अ)थ च सा); विवस्वत याचमाना (४) मृदु' (for मूढ'); .

**साधयिष्यामि सुश्रोणि पुत्रं वै जनयिष्यसि।**
**सर्वशस्त्रभृतां श्रेष्ठं कन्या चैव भविष्यसि ।। २२ ।।** (०१)

**वैशम्पायनः**

ततः सा व्रीडिता बाला तदा सूर्यमथाब्रवीत्।
**एवमस्त्विति राजेन्द्र प्रस्थितं भूरिवर्चसम् ।। २६ ।।**(०२)

इति स्मोक्त्वा कुन्तिराजात्मजा सा विवस्वन्तं याचमाना सलज्जा
तस्मिन्पुण्ये शयनीये पपात मोहाविष्टा भज्यमाना लतेव ।। २४ ।। (०३)

तिग्मांशुस्तां तेजसा मोहयित्वा योगेनाविश्यात्मसंस्थां चकार।
न चैवैनां दूषयामास भानुः सञ्ज्ञां लेभे भूय एवाथ बाला ।। २५ ।। (०४)

अस्मिन् पर्वणि २६२अध्याये २५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कुण्डलाहरणपर्वणि सूर्यकुन्तीसमागमे द्विषष्ट्यधिद्विशततमोऽध्यायः ।। २६२ ।।

# २६३. त्रिषष्ट्यधिकद्विशततमोऽध्यायः

**कतिपयकालतिपाते कर्णस्य सहजकवचकुण्डलधारणेन कुन्त्यां जननम् ।। १ ।। कुन्त्या धात्र्या सह मन्त्रपूर्वकं चातमात्रस्य गर्भस्य मञ्जूषायां निक्षेपपूर्वकमश्वनद्यां विसर्जनम् ।। २ ।। सगर्भाया मञ्जूषायाः क्रमेण चर्मण्वतीयमुनाद्वारा गङ्गायां**

---

(०१) (१/२) साधयि- ष्यामि पुत्रं वै (वै पुत्रं) जनयिष्यसि ष्यामि भामिनि (४) पुनः कन्या (for कन्या चैव); .
(०२) ( सा तु तं व्रीलिता बाला (साध्वी) (२) कुन्ती; कन्या (for तदा); (४) रविवर्चसं; भूरितेजसं .
(०३) ( भोजा (for राजा); (२) ध्याय' (for याच); वेप; लज्ज(for भज्य); .
(०४) ( तिग्मांशुस्तां तां तीक्ष्णांशुम् (२) सत्वं (for संस्थां); (३) (ए)तां मोह (for (ए)तं दूषं); (४) (अ)पि (for (अ)थ); .

**प्लवनेन चम्पापुरीप्रवेणः ॥ ३ ॥ नवजातं कर्णं मञ्जूषायां निधाय कुन्त्याः तस्य जले प्रवाहणं विलापश्च**

## वैशम्पायनः

ततो गर्भः समभवत्पृथायाः पृथिवीपते।
**शुक्ले दशोत्तरे पक्षे तारापतिरिवाम्बरे ॥ १ ॥**[०१]

लक्षालङ्कारः - शुक्ले दशोत्तरे पक्ष इत्यत्र दशोत्तरे दशदिनोत्तरे शुक्ले पक्षे ।

सा बान्धवभयाद्बाला गर्भं तं विनिगूहती।
**धारयामास सुश्रोणी न चैनां बुबुधे जनः ॥ २ ॥**[०२]

न हि तां वेद नार्यन्या काचिद्धात्रेयिकामृते।
**कन्यापुरगतां बालां निपुणां परिरक्षणे ॥ ३ ॥**[०३]

ततः कालेन सा गर्भं सुषुवे वरवर्णिनी।
**कन्यैव तस्य देवस्य प्रसादादमरप्रभम् ॥ ४ ॥**[०४]

तथैवाबद्धकवचं कनकोज्ज्वलकुण्डलम्।
**हर्यक्षं वृषभस्कन्धं यथास्य पितरं तथा ॥ ५ ॥**[०५]

जातमात्रं च तं गर्भं धात्र्या सम्मन्त्र्य भाविनी।[०६]
**उत्स्रष्टुकामा तं गर्भं कारयामास भारत ॥ ६ ॥**

---

(०१) (२) पृथायां (for याः); दशेतरे देशोत्तरे; दर्शेतरे (for दशोत्तरे); .

(०२) ( भीता (for बाला); (२) गर्भं तं सभीतं ह गूह्य वै; गृह्यतां (for गृह्णती); (४) चैनं; च तां (for चैनां); .

(०३) ( चैवान्या (for नार्यन्या); (२) एवं; काश्चिद् (for काचिद्); विना (for ऋते); .

(०४) ( तं (for सा); (३) देवदेवस्य (for तस्य दे); (४) प्रमादाद्; प्रभावाद् (for प्रसादाद्); अभवत्तदा ('त्सदा; त्तथा); .

(०५) ( अथ वा (for तथैव); (आ)बद्ध (for बद्ध); (३) हर्यक्ष ऋषभ (for वृषभ); .

(०६) ( तु (for च); गर्भं तं (२) भाविनी ' .

मञ्जूषां शिल्पिभिस्तूर्णं सुनद्धां सुप्रतिष्ठाम् ।।
फलवैर्बहुविधैर्बद्धां फलवनार्थं जले नृप ।। ७ ।।

अजिनैर्मृदुभिश्चैवं संस्तीर्णशयनां तथा ।
मञ्जूषायां समाधाय स्वास्तीर्णायां समन्ततः ।। ८ ।। (०१)

मधूच्छिष्टस्थितायां सा सुखायां रुदती तथा।
श्लक्ष्णायां सुपिधानायामश्वनद्यामवासृजत् ।। ९ ।। (०२)

जानती चाप्यकर्तव्यं कन्याया गर्भधारणम्।
पुत्रस्नेहेन सा राजन्करुणं पर्यदेवयत् ।। १० ।। (०३)

समुत्सृजन्ती मञ्जूषामश्वनद्यां तदा जले।
उवाच रुदती कुन्ती यानि वाक्यानि तच्छृणु ।। ११ ।।(०४)

**कुन्ती-**

स्वस्ति ते चान्तरिक्षेभ्यः पार्थिवेभ्यश्च पुत्रक।
दिव्येभ्यश्चैव भूतेभ्यस्तथा तोयचराश्च ये ।। १२ ।। (०५)

शिवास्ते सन्तु पन्थानो मा च ते परिपन्थिनः ।
आगताश्च तथा पुत्र भवन्त्वद्रोहचेतसः ।। १३ ।। (०६)

---

(०१) (३) समा-धाय; समदधात् (for अवदधे); .

(०२) ( मञ्जूषायां स्थि'; मधूच्छिष्टास्थि स-; तु; तं (for सा); (२) दुःखात्सं (for सुखायां); तदा; सती (for तथा); (३) स्वपिधा; सुविधा (for सुपिधा); (४) न्यस्य (for अश्व); नद्यां सा स्वयमुत्सृजत्; निक्षिप्य शिशुमञ्जसा .

(०३) ( जानाति (for जानती); (२) कन्यया (३) सा राजन् (for राजेन्द्र); .

(०४) (२) नद्यां (for नद्याम्); तथा (for तदा); (३) अश्रुपूर्णमुखी कुती; उवाच कुन्ती रुदती .

(०५) ( च (for स्तु); (अं)त (for (आ) न्त); (३) दैवेभ्य (for दिव्येभ्य); (४) व्योमचरा; , जलचरा; तोयं गता .

(०६) (३) आ (अ) गता( 'तां)श्र; आगम्याश्च; आश्वास्य च; आगा- मिनसू (for आगमाश्च); सन्तु (for पुत्र); (४) दिव्येन विधिना तव .

पातु त्वां वरुणो राजा सलिले सलिलेश्वरः ।
अन्तरिक्षेऽन्तरिक्षस्थः पवनः सर्वगस्तथा ।। १४ ।। (०१)

पिता त्वां पातु सर्वत्र तपनस्तपतां वरः ।
येन दत्तोऽसि मे पुत्र दिव्येन विधिना किल ।। १५ ।। (०२)

आदित्या वसवो रुद्राः साध्या विश्वे च देवताः ।
मरुतश्च सहेन्द्रेण दिशश्च सदिगीश्वराः ।। १६ ।। (०३)

रक्षन्तु त्वां सुराः सर्वे समेषु विषमेषु च ।
वेत्स्यामि त्वां विदेशेऽपि कवचेनाभिसूचितम् ।। १७ ।।(०४)

धन्यस्ते पुत्र जनको देवो भानुर्विभावसुः ।
यस्त्वां द्रक्ष्यति दिव्येन चक्षुषा वाहिनीगतम् ।। १८ ।। (०५)

लक्षालङ्कारः - चक्षुषा वाहिनीगतम् इत्यत्र वाहिनी प्रवाहिनी नदी ।

धन्या सा प्रमदा या त्वां पुत्रत्वं(त्वे) कल्पयिष्यति।
यस्यास्त्वं तृषितः पुत्र स्तनं पास्यसि देवज ।। १९ ।। (०६)

को नु स्वप्नस्तया दृष्टो या त्वामादित्यवर्चसम्।
दिव्यवर्मसमायुक्तं दिव्यकुण्डलभूषितम् ।। २० ।।(०७)

पद्मायतविशालाक्षं पद्मताम्रदलोज्ज्वलम्।

(०१) ( त्वा (for त्वां); (४) सर्वश .

(०२) ( ते; त्वा (for त्वां); (४) त्विह (for किल); .

(०३) (३) महेद्रेण (४) सर्वा (for च स); .

(०४) ( चासुराः; त्वा सुराः (३) त्वा (for त्वां); (४) (अ)भि-(पि); (अ)ति (for (उ)प); .

(०५) ( धन्यस्ते जनको देवः- (२) सूर्योः पुत्र (for देवो); (३) त्वा (for त्वां); .

(०६) (त्व त्वं) (२) पुत्रके (for त्वे); (३) स्म (for त्वं); (४) स्तन्यं (for स्तनं); .

(०७) ( त्वया; तदा (for तया); (२) 'तेजसं (for वर्चसम्); (३) धर्म (for वर्म); (४) भूषणं .

सुललाटं सुकेशान्तं पुत्रत्वे कल्पयिष्यति ॥ २१ ॥ [०१]

धन्या द्रक्ष्यन्ति पुत्र त्वां भूमौ संसर्पमाणकम्।
अव्यक्तकलवाक्यानि वदन्तं रेणुगुण्ठितम् ॥ २२ ॥ [०२]

धन्या द्रक्ष्यन्ति पुत्र त्वां पुनर्यौवनगोचरम्।
हिमवद्वनसम्भूतं सिंहं केसरिणं यथा ॥ २३ ॥ [०३]

**वैशम्पायनः-**

एवं बहुविधं राजन्विलप्य करुणं पृथा।
अवासृजत मञ्जूषामश्वनद्यास्तदा जले ॥ २४ ॥ [०४]

रुदती पुत्रशोकार्ता निशीथे कमलेक्षणा।
धात्र्या सह पृथा राजन्पुत्रदर्शनलालसा ॥ २५ ॥ [०५]

विसर्जयित्वा मञ्जूषां सम्बोधनभयात्पितुः।
विवेश राजभवनं पुनः शोकातुरा ततः ॥ २६ ॥ [०६]

मञ्जूषा त्वश्वनद्याः सा ययौ चर्मण्वतीं नदीम्।
चर्मण्वत्याश्च यमुनां ततो गङ्गां जगाम ह ॥ २७ ॥ [०७]

---

(०१) ( पद्मपत्र-; पद्मानन (for पद्मायत); (२) रक्तताम्रनखोज्वलं; पद्मताम्रदलो ('नखो) ज्वल; पश्चताम्रतलोज्वल; .

(०२) ( पुत्र त्वा'; नार्यस्त्वां (सवा); तत्रस्था (३) 'क्रम' (for - कल); (४) भाषत; वदनं पांशु (सु) गुण्ठितं; रेणुकुठितं । .

(०३) (२) गो मुखे; ग मुखे; गोचरे; 'गोचरं; गोचरो; 'संमुखं; 'गो मुख (for गो मुखे); (४) केशरिण तथा (for यथा); .

(०४) वैशं उ ( वाचा (for राजन्); (२) यथा; तथा (for पृथा); (३) अपासृजत; अवासृजत्ता; ससर्ज तां तु (४) 'नद्यां (for नद्याम्); तथा जले; जले तदा .

(०५) ( रुदन्ती (३) तया (for धात्र्या); .

(०६) (२) सा सं (for सु); बोध (for सम्बोधन); (३) पुनर्विवेश भवनं (४) शोकोत्तरा (for शोकातुरा); (अ)रुदत्, पृथा (for ततः); .

(०७) ( मञ् षामश्व (२) कर्मावतीं (for चर्मण्वती); (४) तया (तथा);(for ततो); .

गङ्गायां सूतविषयं चम्पामनुययौ पुरीम्।
स मञ्जूषागतो गर्भस्तरङ्गैरुह्यमानकः ।। २८ ।। (०१)

अमृतादुत्थितं दिव्यं तनुवर्म सकुण्डलम्।
धारयामास तं गर्भं दैवं च विधिनिर्मितम् ।। २९ ।। (०२)

एतदामुह्यं महाराज सूर्यस्यासीन्महात्मनः ।
स सूर्य सम्भवो गर्भः कुन्त्या गर्भेण धारितः ।। ३० ।।

अस्मिन् पर्वणि २६३अध्याये ३० श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि त्रिषष्ट्यधिकत्रिशततमोऽध्यायः
।। २६३ ।।

# २६४. चतुष्षष्ट्यधिकत्रिशततमोऽध्यायः

**स्नानाय भार्यया सह गङ्गां गतेनाधिरथनाम्ना सूतेन तत्रोत्प्लवमानायाः सगर्भमञ्जूषाया ग्रहणम् ।। १ ।। तथा तमञ्जूषेद्घाटने दृष्टसक्यक गर्भस्य स्वपुत्रतया परिकल्पनेन नामकीणादिपूर्वकं प्रीत्या पोषणम् ।। २ ।। कर्णेन परशुरामादिभ्यो..स्त्रग्रहणपूर्वकं दुर्योधनेन सस्यकरणम् ।। ३ ।। अधिरथराधयोः शिशोः कर्णस्य प्राप्तिः राधाकर्तृकं तस्य पालनं हस्तिनापुरे तस्य शिक्षणं कर्णसन्निधौ देवेन्द्रस्यागमनश्च**

**वैशम्पायनः**

एतस्मिन्नेव काले तु धृतराष्ट्रस्य वै सखा।

---

(०१) ( गङ्गायां; गङ्गा सा; गङ्गया सूतविषये; 'जुष्टायां (२) अनु (for अभ्या); (४) त्तत्प्रयाणकः(for उझ); .

(०२) ( पूर्व (for दिव्यं) (२) तनु; तस्थे; तत्स-; तच्च; तं तु (for तत्तु); तं सर्वत्र (for तत्तु वर्म) सु- कुडलं (३) गर्भं तं (४) चैलेन; देवं च; दैवतं (for दैवं च); विधिनिश्चित्। आरण्यः - - कुण्डला (लाभि) हरण पुत्रविसर्जनः .

सूतः अधिरथ इत्येव सदारो जाह्नवीं ययौ ।। १ ।। (०१)

तस्य भार्याभवद्राजन्रूपेणासदृशी भुवि।

राधा नाम महाभागा न सा पुत्रमविन्दत।
अपत्यार्थे परं यत्नमकरोच्च विशेषतः ।। २ ।। (०२)

सा ददर्शाथ मञ्जूषामुह्यमानां यदृच्छया।
दत्तरक्षाप्रतिसरामन्वालम्भनशोभनाम् ।। ३ ।। (०३)

लक्षालङ्कारः - दत्तरक्षप्रतिसराम् इत्यत्र प्रति प्रवाहाधोभागं प्रति सरतीति प्रति- सरा, रज्ज्वादिना दत्तरक्षा च सा प्रतिसरा च दत्तरक्षप्रतिसरा ।

ऊर्मितरङ्गैर्चाह्नव्यास् समासीनामुपान्तिकम् ।
विवर्तमानां बहुशः पुनः पुनरितस्ततः ।। ४ ।।

ततस्सा वायुना राजन्स्रोतसा च बलीयसा ।।
ऊर्मीतरङ्गैर्जाह्नव्याः समानीतामुपह्वरम् ।। ५ ।।

सा तु कौतूहलात्प्राप्तां ग्राहयामास भाविनी।
ततो निवेदयामास सूतस्याधिरथस्य वै ।। ६ ।। (०४)

स तामुद्धृत्य मञ्जूषामुत्सार्य जलमन्तिकात्।
यन्त्रैरुद्धाटयामास सोऽपश्यत्तत्र बालकम् ।। ७ ।। (०५)

---

(०१) (३) (अ)धिरथिर्; (अ)तिरथ (for धिरथ); (ए)वं (for (ए)व); .
(०२) ( समभवद् (for भवद्राजन्); (२) (अ)प्रतिमा (for (अ)सदृशी०; (३) प्राज्ञा; प्रज्ञं; , प्रज्ञा; प्राज्ञ (for भागा); (४) गर्भम् (for पुत्रम्); तस्याः पुत्रार्थमातुरः (६) तु सा; ऽ हि (for च); .
(०३) (आ)ससाद (ददर्श) (२) ऊह्यमानां (३) दत्तरक्षा (४) अब्दालभनशोभिनां; अन्वालभनशोभना; ’लभनशोभिता; अर्थालभन; यन्त्रालेपन; शोभनां; ’लभनशोभना; , लभत शोभनां; अन्वलहनशोभितां; लभत (५) ऊर्मि (for ऊर्मी’); (६) उपह्वरे; उपान्तिकं (for उपह्वरम्); .
(०४) ( तु (for तां); (२) भाविनी (४) (अ)ति (for (अ)धि); .
(०५) (२) जनम् (for जलम्); उत्सार्य च जनान्तिकात् (३) मत्रैद्; यत्नैट् उद्धार (for उद्धाट); पादयामास बधानां .

तरुणादित्यसङ्काशं हेमवर्मधरं तथा।
मृष्टकुण्डलयुक्तेन वदनेन विराजता ।। ८ ।।(०१)

परिम्लानमुखः बालं रुदन्तं क्षुधितं भृशम्।
स तु तं परया लक्ष्म्या दृष्ट्वा युक्तं वरात्मजम् ।। ९ ।।

स सूतो भार्यया सार्धं विस्मयोत्फुल्ललोचनः।
अङ्कमारोप्य तं बालं भार्यां वचनमब्रवीत् ।। १० ।।(०२)

**सूतः-**

इदमप्यद्भुतं भीरु जातो जातोऽस्मि भामिनि।
दिष्टवान् देवगर्भोऽयं मन्येऽस्मान्समुपागतः ।। ११ ।।(०३)

लक्षालङ्कारः - जातो जातोऽस्मि भामिनि इत्यत्र एतावत्कालमारभ्य जातोऽप्यहं इदानीं दिष्टवान् भाग्यवान् जातोऽस्मि । 'दैवं दिष्टं भागधेयम्' इत्य- मरः ।

अनपत्यस्य पुत्रोऽयं देवैर्दत्तो ध्रुवं मम ।। १२ ।।

**वैशम्पायनः-**

इत्युक्त्वा तं ददौ पुत्रं राधायै स महीपते।(०४)
प्रतिजग्राह तं राधा विधिवद्दिव्यरूपिणम् ।
पुत्रं कमलगर्भाभं देवगर्भं श्रिया वृतम् ।। १३ ।।(०५)

---

(०१) (२) हैम' (for हेम); तदा (for तथा); (३) संयुक्तं (for युक्तेन); (४) विराजितुं। .
(०२) (३) पुत्रं (for बालं); .
(०३) सूत उ ( नेदम्; नैतद् (इदम्) (२) यातो (for जातो); सि; हि य (for स्मि'); नत्वहं; भाविनि (for भामिनि); (४) यतो (for मन्ये); समुपस्थितं (तं) (for समुपागतः); मन्येस्माकमुपा .
(०४) ( अपुत्रस्य च (for अनपत्यस्य); मे पुत्रो (for पुत्रोयं); (२) त्वयं (for मम); वैशं' उ (३) प्र (for तं); (४) राधायाः (for यै); .
(०५) (२/३) सा चापि (for तं राधा); देव (for दिव्य); (३) पत्राक्षं (for गर्भाभं);

स्तन्यं समास्रवच्चास्या दैवादित्यथ निश्चयः ।।
पुपोष चैनं विधिवद्ववृधे स च वीर्यवान् ।। १४ ।। (०१)

ततःप्रभृति चाप्यन्ये प्राभवन्नौरसाः सुताः ।। १५ ।।

नामकर्म च चक्रुसक्ते कुण्डलके तस्यच दृश्यते ।
कर्ण इत्तयेव दं बालं दृष्वा कर्णं सकुण्डनम् ।। १६ ।।

वसुवर्मधरं दृष्ट्वा तं बालं हेमकुण्डलम्।
नामास्य वसुषेणेति ततश्चक्रुर्द्विजातयः ।। १७ ।।(०२)

एवं स सूतपुत्रत्वं जगामामितविक्रमः ।
वसुषेण इति ख्यातो वृष इत्येव च प्रभुः ।। १८ ।। (०३)

सूतस्य ववृधेऽङ्गेषु श्रेष्ठः पुत्रः स वीर्यवान्।
चारेण विदितश्चासीत्पृथया दिव्यवर्मभृत् ।। १९ ।। (०४)

सूतस्त्वधिरथः पुत्रं विवृद्धं समयेन तम्।
दृष्ट्वा प्रस्थापयामास पुरं वारणसाह्वयम् ।। २० ।। (०५)

तत्रोपसदनं चक्रे द्रोणस्येष्वस्त्रकर्मणि।
सख्यं दुर्योधनेनैवमगमत्स च वीर्यवान् ।। २१ ।। (०६)

---

(४) युतं (for वृतम्);.
(०१) ( चैव; चैवं (for चैनं); (२) च स (४) प्य (for प्रा); प्रजाः (for सुताः); .
(०२) ( वपुट् (for वसु); -धर्ममयं (for वर्मधरं); (२) बालं हैमसकुण्डल्। .
(०३) ( ततः(for एवं); (३/४) वसुषेणेति विख्यातो वृषा .
(०४) (१/२) एष (for ज्येष्ठ); सूर्यस्य (for सूत); ववृधे ह्यष्ट- वर्षवान् सूतस्य ववृधेंगेषु श्र (ज्ये)ष्ठः पुत्रः स वीर्य; पुत्रः सूतस्य ववृधे स ज्येष्ठोङ्गेषु वीर्य (४) पृथया धृक् (for भृत्); .
(०५) ( ततम् (for सूतम्); त्वति (for त्वधि); (२) स तदा तदा; समये तदा; समयेन तं (३) विसर्जयामास .
(०६) (ए)व (for (उ)प); सादनं (for सदनं); (३) (अ)पि (for वम्); (४) समः('मा) गच्ल्कस; अगमत्स च; अगक्ष्छत्सह .

द्रोणात्कृपाच्च रामाच्च सोऽस्त्रग्रामं चतुर्विधम्।
लब्ध्वा लोकेऽभवत्ख्यातः परमेष्वासतां गतः ।। २२ ।।(०१)

सन्धाय धार्तराष्ट्रेण पार्थानां विप्रिये रतः ।
योद्धुमाशंसते नित्यं फाल्गुनेन महात्मना ।। २३ ।। (०२)

सदा हि तस्य स्पर्धाऽऽसीदर्जुनेन विशाम्पते।

अर्जुनस्य च कर्णेन यतो दृष्टो बभूव सः ।(०३)

एतद्दृष्ट्वा महाराज सूर्यस्यासीन्न संशयः ।

यः सूर्यसम्भवः कर्णः कुन्त्यां सूतकुले तथा ।। (०४)

तं तु कुण्डलिनं दृष्ट्वा वर्मणा च समन्वितम्।
अवध्यं समरे मत्वा पर्यतप्यद्युधिष्ठिरः ।। २४ ।। (०५)

यदा च कर्णो राजेन्द्र भानुमन्तं दिवाकरम्।
स्तौति मध्यन्दिने प्राप्ते प्राञ्जलिः सलिले स्थितः ।। २५ ।। (०६)

तत्रैनमुपतिष्ठन्ति ब्राह्मणा धनहेतुना।
नादेयं तस्य तत्काले किञ्चिदस्ति द्विजातिषु ।। २६ ।। (०७)

एतस्मिन्नेव काल तु पाण्डवानां हिते रत;।

तमिन्द्रो ब्राह्मणो भूत्वा भिक्षां देहीत्युपस्थितः ।

---

(०१) ( जामदग्न्यात् (for च रामाच्च); .
(०२) (२) रतः (for स्थितः); (४) फाल्गुनेन; अर्जुनेन महारथः; विशां पते (for महात्मना); .
(०३) ( युद्धार्थी (for स्पर्धासीद्); (२) महात्मना (for विशां पते); (३) तु (for च); .
(०४) महात्मनः (for न सशयः (यत् (for यः); तथा (for तदा); कुत्या गर्भेण धारितः .
(०५) ( हितं; तं च (for तं तु); मत्वा (for दृष्ट्वा); (३) दृष्ट्वा (for मत्वा); .
(०६) ( च (for तु); (३) उपतिष्ठति मध्याह्ने (४) सततं स्थितः; सलिलोत्थितः .
(०७) तदैनम् (for तत्रैनम्); (२) हेतुना (for हेतवः); (३) ह्यस्य (for तस्य); (४) आसीद् (for अस्ति); .

स्वागतं चेति राधेयस्तमथ प्रत्यभाषत ।। २७ ।। (०१)

अस्मिन् पर्वणि २६४ अध्याये २७ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि कुण्डलाहरणपर्वणि राधाकर्णप्राप्तौ चतुषष्ट्यधिकत्रिशततमोऽध्यायः ।। २६४ ।।

# २६५. पञ्चषष्ट्यधिकत्रिशततमोऽध्यायः

**इन्द्रेण ब्रह्मणवेषधारणेन कर्णं प्रति कवचकुण्डलयाचनम् ।। १ ।। तस्येन्द्रत्वं जानता कर्णेन तस्माच्छक्तिग्रहणपूर्वकं तसक्मै कनचकुण्डलदानम् ।। २ ।। इन्द्रस्य कर्णाय शक्तिं दत्त्वा तस्य कवचकुण्डलयोरादानम्**

**वैशम्पायनः**

**देवराजमनुप्राप्तं ब्राह्मणच्छद्मना वृतम्।**
**दृष्ट्वा स्वागतमित्याह न बुबोधास्य मानसम् ।। १ ।। (०२)**

**हिरण्यकण्ठीः प्रमदा ग्रामान्वा बहुगोकुलान्।**
**किं ददानीति तं विप्रमुवाचाधिरथिस्ततः ।। २ ।। (०३)**

---

(०१) (३) तव; त्विति; त्वद्य (for चेति); राजेन्द्र (for राधेयम्); (४) इद्रं; विप्रं (for अथ); आरण्य, कुडला( ’लाभि) हरण- शक्रागमनं .

(०२) (२) वृषा वृतम् (for वृषः); (४) घ-( स बुबोधास्येत्ये कः पादः, हिरण्यकण्ठीरि त्यादि अर्धत्रयं च घ कोशे न ) .

(०३) कर्णः ( कण्ठी; कठाः; ’कुण्ठी; वर्णाः; -कज्या (for कण्ठीः); दासीर्वा (for प्रमदा); (२) बहुशः पशून् (for गोकुलान्); यद्वान्यत्प्रीतिवर्धनं (३) ददामीति (for ददानीति); (४) (अ)धिरथ; (अ)तिरथि (for (अ)धिरथि); स्थितं; तदा (for ततः); .

**ब्राह्मणः-**

हिरण्यकण्ठ्यः प्रमदा यच्चान्यत्प्रीतिवर्धनम्।
**नाहं दत्तमिहेच्छामि तदर्थिभ्यः प्रदीयताम्** ।। ३ ।।(०१)

यदेतत्सहजं वर्म कुण्डले च तवानघ ।
**एतदुत्कृत्य मे देहि यदि सत्यव्रतो भवान्** ।। ४ ।।(०२)

एतदिच्छाम्यहं क्षिप्रं त्वया दत्तं परन्तप।
**एष मे सर्वलाभानां लाभः परमको मतः** ।। ५ ।।(०३)

**कर्णः**

अवनिं प्रमदा गाश्च निर्वापं बहुवार्षिकीम्।
**तत्ते विप्र प्रादास्यामि न तु वर्म सकुण्डलम्** ।। ६ ।।(०४)

लक्षालङ्कारः - निर्वापां बहुवार्षिकीम् इत्यत्र निर्वापां बीजावापरहितां बहुवार्षिकीं बहुवर्षमारभ्य फलन्तीं अवनिम् ।

**वैशम्पायनः**

एवं बहुविधैर्वाक्यैर्याच्यमानः स तु द्विजः ।
**कर्णेन भरतश्रेष्ठ नान्यं वरमयाचत** ।। ७ ।।(०५)

सान्त्वितश्च यथाशक्ति पूजितश्च यथाविधि।

---

(०१) ( हिरण्यकण्ठी; मुख्याः; 'मग्र्य; कण्ठीः; वर्णाः; 'कठाः; मुरत्र (२) यद्वान्यत्; यद्यन्यत्; यदन्यत् (for यच्चान्यत्); प्रति-वर्धनं; वापि तद्धनं; पादवर्धनं; सारवर्धनं; पार्थिवं धनं (४) च (for प्र); .

(०२) ( तद्; त्वम् (for यद्); (३) उद्धृत्य (for उत्कृत्य); वै (for मे); .

(०३) ( एताम् (for एतद्); भिक्षां (for क्षिप्रं); (२) त्वया दत्तां नरोत्तम (३) स एष (एव) (for एष मे); .

(०४) ( अवनीं गावो (for गाश्च); (२) निवापं; मृष्टान्नं; निर्वाहं (for निर्वापं); (४) सकुण्डलं (for न कुण्डले); .

(०५) ( वाच्यमानः; वार्यमाणः (for याच्य- मानः); .

**न चान्यं स द्विजश्रेष्ठः कामयामास वै वरम् ॥ ८ ॥ (०१)**

**यदा नान्यं प्रवृणुते वरं वै द्विजसत्तमः ।**
**तदैनमब्रवीत्भूयो राधेयः प्रहसन्निव ॥ ९ ॥ (०२)**

**तदैनमब्रवीत् कर्णस् सहजं कवधं हि मे ।**
**सहजं वर्म मे विप्र कुण्डले चामृतोद्भवे।**
**तेनावध्योऽस्मि लोकेषु ततो नैतज्जहाम्यहम् ॥ १० ॥ (०३)**

**विशालं पृथिवीराज्यं क्षेमं निहतकण्टकम्।**
**प्रतिगृह्णीष्व मत्तस्त्वं साधु ब्राह्मणपुङ्गव ॥ ११ ॥(०४)**

**कुण्डलाभ्यां विमुक्तोऽहं वर्मणा सहजेन च ।**
**गमनीयो भविष्यामि शत्रूणां द्विजसत्तम ॥ १२ ॥ (०५)**

**वैशम्पयानः**

**यदान्यं न वरं वव्रे भगवान्पाकशासनः ।**
**ततः प्रहस्य कर्णस्तं पुनरित्यब्रवीद्वचः ॥ १३ ॥ (०६)**

**कर्णः-**

---

(०१) ( सोर्चित (for सान्त्वित); (२) विधैः (for विधि); (३) न चा लक्षालङ्कारः - न्य (४) तदा (for वरम्);.

(०२) ( यथा नान्यत् (for नान्यं); अन्य न प्रतिजग्राह (२) स (for वै); (विनास्य सहजं वर्म कुण्डले च विशाम्पते।) वृतवान् (for विनास्य); (३) तदेनम् कर्णः (for भूयो ); .

(०३) कर्ण उ (२) सहजं कवचं हि मे (३) लोकानां (for लोकेषु); (४) नैनं; नैव (for नैतद्); जहामि (for ददामि); .

(०४) ( विशालं मम राज्यं हि (३) मत्कृत्स्नं (for मत्तस्त्वं); मत्तः प्रतिगृहाण त्वं (४) साधो (for साधु);.

(०५) ( वियुक्तोहं (२) सहजाभ्यां यदि न्विह (३) माननीयो; दम (for गम); .

(०६) ( यदा(द) न्यं न (for यदा नान्यं); (३) तदा (for ततः); (४) द्विज (for वचः); पुनराह वचस्तदा .

विदितो देवदेवेश प्रागेवासि मम प्रभो।
न तु न्याय्यं मया दातुं तव शक्र वृथा वरम् ।। १४ ।।(०१)

त्वं हि देवेश्वरः साक्षात्त्वया देयो वरो मम।
अन्येषां चैवभूतानामीश्वरो ह्यसि भूतकृत् ।। १५ ।। (०२)

यदि दास्यामि ते देव कुण्डले कवचं तथा।
वध्यतामुपयास्यामि त्वं च शक्रावहास्यताम् ।। १६ ।। (०३)

तस्माद्विनिमयं कृत्वा कुण्डले वर्म चोत्तमम्।
हरस्व शक्र कामं मे न दद्यामहमन्यथा ।। १७ ।। (०४)

**शक्रः**

विदितोऽहं रवेः पूर्वमायान् देवस्तवान्तिकम्।
तेन ते सर्वमाख्यातमेवमेतन्न संशयः ।। १८ ।। (०५)

लक्षालङ्कारः - विदितोऽहं रवेः पूर्वमायान् देवस्तवान्तिकम् इत्यत्र तव अन्तिक-मायान् आगच्छन् देवः अहं रवेः सकाशात्पूर्वमेव विदित इति योजना ।

काममस्तु तथा तात तव कर्ण यथेच्छसि।

---

(०१) कर्ण उ (कर्णः) (२) ममाभिभो; मया प्रभो (विभो) (३) न्याय्यं दातुं वृथा (for मया); दत्तं (for दातुं); (४) शक्यं (for शक्र); विना (for वृथा); .

(०२) (२) देवो वरो; देया वरा (for देयो वरो); (३) अपि; चापि (for चैव); देवा-नाम् (for भूतानाम्); देवानामपि चान्येषाम्; स्वमेव सर्वभूतानाम् (४) भूतभृत्; भूतिकृत्; भूतधृक्.

(०३) ( वीर (for देव); (२) कवचसू तदा (for तथा); (३) वाच्य (for वध्य); (४) त्वया; किञ्चित् (for त्व च); (अ)प (for (अ)व); .

(०४) (२) कवचो(for वर्म चो); (३) गृहाण शक्ति मे यच्छ (४) त्वहम् (for अहम्); .

(०५) ( ख-रविः पूर्वमायन्नेव,यं (for हं); रविः (for रवेः); (२) आयन्नैव; आयान्न्येव; आयान्नैव; आयातश्च; , आयानेव (मेव); आयातैव; आयान्नेव; आयां चैव (for आयन्नेव); तवान्तिके (३) ततस् (for तेन); तत् (for ते); (४) एव (for एतन्); ममै (एवै) तन्नात्र संशयः .

**वर्जयित्वा तु मे वज्रं प्रवृणीष्व यथेच्छसि ।। १९ ।।** (०१)

**वैशम्पायनः**

ततः कर्णः प्रहृष्टस्तु उपसङ्गम्य वासवम्।
**अमोघां शक्तिमभ्येत्य वव्रे सम्पूर्णमानसः ।। २० ।।** (०२)

**कर्णः**

वर्मणा कुण्डलाभ्यां च शक्ति मे देहि वासव ।
**अमोघां शत्रुसङ्घानां घातिनीं पृतनामुखे ।। २१ ।।** (०३)

**वैशम्पायनः-**

ततः सञ्चिन्त्य मनसा मुहूर्तमिव वासवः ।
**शक्त्यर्थं पृथिवीपाल कर्णं वाक्यमथाब्रवीत् ।। २२ ।।** (०४)

**इन्द्रः-**

कुण्डले मे प्रयच्छस्व वर्म चैव शरीरजम्।
**गृहाण कर्ण शक्ति त्वमनेन समयेन च ।। २३ ।।** (०५)

अमोघा हन्ति शतशः शत्रून्मम करच्युता।
**पुनश्च पाणिमभ्येति मम दैत्यान्विनिघ्नतः ।। २४ ।।** (०६)

---

(०१) ( कामम्(कामं) (for तात); एवमस्तु यथाकामं (२) त्वं तु; तच्च (for तव); वरयस्व (for तव कर्ण); यदीच्छसि (४) वृणीष्वान्यद्; त्वं वृणुष्व (for प्रवृणीष्व); यथेच्छसि; यदीच्छसि .

(०२) ( प्रहृष्टस्तम्; 'ष्टात्मा (for ष्टस्तु); ततस्तु कर्णः संहृष्टः (२) गम्य स; सङ्गृह्य (for सङ्गम्य); चाब्रवीत् (for वासवम्); (३) अमोघ .

(०३) ( कर्मणा (for व'); (३) योधसङ्ख्यानां; शत्रु- सम्पन्नां; शमनीं; दमनीं (४) पातनीं; घातिन पोथन; सङ्क्रुद्धां; तर्जनी .

(०४) ( बहुधा (for मनसा); (२) अपि (for इव); शक्तिदाने तु वासवः(३) शक्त्यर्थे .वैशं,

(०५) शक्रः ( प्रयच्छ त्वं; च्छध (for च्छस्व); (३) शक्ति कर्ण (४) च; वै (for मे); .

(०६) ( अमोघो; ध'; घं (for धा); शतशः (शक्तयः) शक्तिः (२) हत्वा (for मम); कराच् (for कर); (४) दैत्यान्मम .

सेयं तव करप्राप्ता हत्वैकं रिपुमूर्जितम्।
गर्जन्तं प्रतपन्तं च मामेवैष्यति सूतज ।। २५ ।। (०१)

कर्णः

एकमेवाहमिच्छामि रिपुं हन्तुं महाहवे।
गर्जन्तं प्रतपन्तं च यतो मम भयं भवेत् ।। २६ ।। (०२)

इन्द्रः

एकं हनिष्यसि रिपुं गर्जन्तं बलिनं रणे।
त्वं तु यं प्रार्थयस्येकं रक्ष्यते स महात्मना ।। २७ ।। (०३)

यमाहुर्वेदविद्वांसो वराहमपराजितम्।
नारायणमचिन्त्यं च तेन कृष्णेन रक्ष्यते ।। २८ ।।(०४)

कर्णः

एवमप्यस्तु भगवन्नेकवीरवधे मम।
अमोघां देहि मे शक्तिं यथा हन्यां प्रतापिनम् ।। २९ ।।

एवमेतद्यथा त्वं दानवानां निपूदन ।
वधिष्यामि रणे शत्रुं यो मे स्थाता पुरःसरः ।। ३० ।। (०५)

---

(०१) ( करप्राप्ता (for करं प्राप्य); (३) गर्जितं प्रपतन्तं च (४) मामेवेष्यति .

(०२) (२) मृधे (for हवे); (३) गर्जितं प्रपर्ततं; च हसन्त (for प्रतपन्तं); (४) यस्मान् (for यतो); ततोहमभयं लभे; भयं मम यतो भवेत् .

(०३) शत्र (for इन्द्र); (१/२) हनिष्यति रिपुं रणे गर्जन्तं तं (त्वं) महामृधे (३) न (for त्वं); यं तु च यं; तु तं ह्येकं; यस्यैकं; यन्नेक (४) तु सु- (for स); .

(०४) ( वेदविदुषो; देवविद्वांसो (२) वाराहम्; महान्तम्; गोविदम् अपरा- जितं (for अजितं हरिम्); (३) हि (for च); .

(०५) ( एव (for अपि); (२) वधो (for वधे०; (३) अमोघां देहि मे (मां) शक्तिं; अमोघयानया शत्रुं (शक्त्या) (४) यथा; एकं; एनं (for येन); .

उत्कृत्य तु प्रदास्यामि कुण्डले कवचं च ते।
**निकृत्तेषु तु गात्रेषु न मे बीभत्सता भवेत्** ॥ ३१ ॥ (०१)

**इन्द्रः**

न ते बीभत्सता कर्ण भविष्यति कथञ्चन।
**व्रणश्चैव न गात्रेषु यस्त्वं नानृतमिच्छसि** ॥ ३२ ॥ (०२)

यादृशस्ते पितुर्वर्णस्तेजश्च वदतां वर ।
**तादृशेनैव वर्णेन त्वं कर्ण भविता पुनः** ॥ ३३ ॥ (०३)

विद्यमानेषु शस्त्रेषु यद्यमोघामसंशये।
**प्रमत्तो मोक्ष्यसे चापि त्वय्येवैषा पतिष्यति** ॥ ३४ ॥ (०४)

**लक्षालङ्कारः - यद्यमोघामसंशय इत्यत्र असंशये प्राणसंशयरहितकाले ।**

**कर्णः**

संशयं परमं प्राप्य विमोक्ष्ये वासवीमिमाम्।
**यथा मामात्थ शक्र त्वं सत्यमेतद्ब्रवीमि ते** ॥ ३५ ॥ (०५)

**वैशम्पायनः**

ततः शक्तिं प्रज्वलितां प्रतिगृह्य विशाम्पते।
**शस्त्रं गृहीत्वा निशितं सर्वगात्राण्यकृन्तत** ॥ ३६ ॥ (०६)

---

(०१) (३)तु (for च); .
(०२) शक्रः (for इन्द्र उ); ( काये; गात्रे (for कर्ण); (३) व्रणाश्; प्राणाश् (for व्रणश्); चैव (for चापि); (४) यत्त्वं; यत्तं; यं त्वं (for यस्त्वं); ऋच्छसि (for इच्छसि); .
(०३) ( तु (for ते); (२) ददतां (for व); (३) देहेन (for वर्णेन); .
(०४) ( चास्त्रेषु (for श); (२) असंशयं (३) प्रमत्ते; , प्रपन्नो; प्रपन्नो (for प्रमत्तो); वापि; चेत्त्वं; चैव (for चापि); (४) त्वब्धेषाभिपति .
(०५) (२) प्रमो (वे) क्ष्ये (for विमोक्ष्ये); .
(०६) (३) घ-शस्त्रमादाय विपुलमि, त्यर्धं सर्वेदेवा,इति श्लोकश्च घकोशे न, आदाय (for गृहीत्वा); .

ततो देवा मानवा दानवाश्च निकृन्तन्तं कर्णमात्मानमेवम्।

दृष्ट्वा सर्वे सिंहनादान्प्रणेदुर्न ह्यस्यासीन्मुखजो वै विकारः ।। ३७ ।। (०१)

ततो दिव्या दुन्दुभयः प्रणेदुः पपातोच्चैः पुष्पवर्षं च दिव्यम्।

दृष्ट्वा कर्णं शस्त्रसङ्कृत्तगात्रं मुहुश्चापि स्मयमानं नृवीरम् ।। ३८ ।। (०२)

ततश्छित्त्वा कवचं दिव्यमङ्गात्तथैवार्द्रं प्रददौ वासवाय।

तथोत्कृत्य प्रददौ कुण्डले च कर्णात्तस्मात्कर्मणा तेन कर्णः ।। ३९ ।। (०३)

ततो देवो मुदितो वज्रपाणि र्दृष्ट्वा कर्णं शस्त्रनिकृत्तगात्रम्।

ततः शक्रः प्रहसन्वञ्चयित्वा कर्णं लोके यशसा योजयित्वा ।। ४० ।।

कृतं कार्यं पाण्डवानां हि मेने ततः पश्चाद्दिवमेवोत्पपात ।। ४९ ।।(०४)

श्रुत्वा कर्णं मुषितं धार्तराष्ट्रा दीनाः सर्वे भग्नदर्पा इवासन्।

तां चावस्थां गमितं सूतपुत्रं श्रुत्वा पार्था जहृषुः काननस्थाः ।। ४२ ।। (०५)

**जनमेजयः**

क्वस्था वीराः पाण्डवास्ते बभूवुः कुतश्चैव श्रुतवन्तः प्रियं तत्।

---

(०१) ( सर्वे (for ततो); दानवा (व) मानुषाश्च; दानवा मानवाश्च मनुष्याः(मानुषा) श्चापि सर्वे; मानुषाश्चापि राजन् (२) एव (for एवम्);(३) सिंहनादान्; देवसङ्घाः (for सिद्धसङ्घाः); विनेदुर् प्रणेदुर् (for च नेदुर्); (४) मुखजो ('तो)) (for दुःखजो); .

(०२) (२) स्वाच्च (for दिव्यम्); (३) 'निकृत्ते (for सङ्कृत्त); (४) अर्धत्रयं पादएकश्च न क कोशे, मुहुर्मुहुः (हुश्च) (for मुहुश्चापि); साधु साध्वि- त्यथोचुः; विस्मयन्तं नृवीरं (for स्मयमानं नृ); .

(०३) ( तच्छित्वा वै; छित्वा चैकं; ततश्चित्रं (for ततश्छित्वा); काञ्चनं (for कवचं); अस्त्रं (for अङ्गात्); (२) हृष्टः (for (आ)द्रं); (३) अथ; ततो (for तथा); निकृत्य (for (उ)कृत्य); द्वे; तु; च (for ते); (४) कर्णस्तस्मात् (कर्णौ तस्मात्) कर्णात्तस्मात्; कर्णात्तस्मै (for वैकर्तनः); .

(०४) ( कर्मणा; प्राहसद् (for प्रहसन्); .

(०५) ( दृष्ट्वा (for श्रुत्वा); वञ्चितं; मुदितं (for मुषितं); (३) तामावस्थां; तथा; तं चा (for तां चा'); गमिते सूतपुत्रे (४) काननस्था जहर्षुः (for जहृषुः का); .

किं वाकार्षुर्द्वादशेऽब्दे व्यतीते तन्मे सर्वं भगवान्व्याकरोतु ।। ४३ ।। (०१)

**वैशम्पायनः**

लब्ध्वा कृष्णां सैन्धवं द्रावयित्वा
विप्रैः सार्धं काम्यकादाश्रमात्ते।
मार्कण्डेयाच्छ्रुतवन्तः पुराणं
देवर्षीणां चरितं विस्तरेण ।। ४४ ।। (०२)
प्रत्याजग्मुः सरथाः सानुयात्राः
सर्वैः सार्धं सूतपौरोगवैस्ते।
ततो पुष्यं द्वै(ययुर्द्वै)तवने नृवीरा
निस्तीर्योग्रं(यैवं) वनवासं समग्रम् ।। ४४ ।। (०३)

अस्मिन् पर्वणि २६५अध्याये ४४ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि पकश्चषष्ट्यधिकत्रिशततमो ऽध्यायः ।। २६५ ।।

(०१) (२) (ए)ते (for (ए)तत्); तत् (for ते); (३) किं चा; किम (for किं वा); द्वादशाब्दे (for शेब्दे); (४) सर्वं कर्म; एतत्सर्वं (for तन्मे सर्वं); .
(०२) ( त्रास' (for द्राव); (२) काम्यकमा ('काना); कं त्वा श्रयन्ते (for काम्यका); .
(०३) ( प्रति' (for प्रत्या); सानुजाः (for सरथाः); (२) सूत (for सूद); (३) पुनद्; पार्था (for पुण्यं);(४) (ए)वं वै; (for (अ)ग्रे); .

# आरणेयपर्व

## 03- 04 - 266Adhyaya

महाभारततततात्पर्यनिर्णये २२ अध्याये

पार्था विमुच्यैव सुयोधनं तं वने वसन्तो मुदिताः सदैव ।
सहारणीभाण्डमथो मृगेण हृतं द्विजस्याऽशु निशम्य चान्वयुः ।। ४१८ ।।
तस्मिन्नदृश्ये तृषिता एकैकमुदकार्थिनः ।
ययुर्युधिष्ठिरमृते सुप्तास्ते धर्ममायया ।
अदृश्येनैव धर्मेण वारिता वारिपायिनः ।। ४१९ ।।
क्षत्रधर्मस्य रक्षार्थं न तत्प्रश्नान् विदां वराः ।
व्याचक्रुः शक्तिमन्तोऽपि पानीयार्थमरिन्दमाः ।। ४२० ।।
न विप्राणां च धर्मोऽयं विद्याया उपजीवनम् ।
क्षत्रियाणां तु किमुत प्रसभं तेन ते पपुः ।। ४२१ ।।
देवा अपि मनुष्येषु जाताः सुबलिनोऽपि हि ।
मानुषेणैव भावेन युक्ताः स्युः केशवादृते ।
कार्येष्वेषां क्रमेणैव व्यक्तिमायान्ति सद्गुणाः ।। ४२२ ।।
अतो भीमार्जुनौ धर्मादत्युत्तमबलावपि ।
देवमायां समाश्रित्य धर्मेण स्वापितौ क्षणात् ।। ४२३ ।।
मुहूर्तमेव सा माया तयोराच्छादने क्षमा ।
ततः प्रबुद्धयोर्धर्मो नैव शक्तिशतांशभाक् ।। ४२४ ।।
उक्तं पद्मपुराणे च तदेतत् सर्वमञ्जसा ।

तस्मान्नाशक्तिरनयोः सम्भाव्याः भीमपार्थयोः ।। ४२५ ।।

धर्मात्मजोऽथाऽजगामोदकान्तं दृष्ट्वा भ्रातृंस्तत्र दुःखाभितप्तः ।

इच्छन् पातुं वारि संवारितश्च पित्रा बकाकारमितेन नापात् ।। ४२६ ।।

अर्थे भ्रातॄणामैच्छदसौ तदीयप्रश्नप्रतिव्याहरणं दयालुः ।

ततो धर्मो यक्षतनुः स भूत्वा प्रश्नांश्चक्रे व्याकरोत् तान् स पार्थः ।। ४२७ ।।

ततस्तुष्टो वरमस्मै ददौ स एकोत्थानं भ्रातृमध्ये स वव्रे ।

यद्येकः स्यान्नकुलोऽस्त्वित्यथाऽह तुष्टो धर्मः कथमेतत् कृतं ते ।

अतिप्रीतिर्भीमसेने तवास्ति बली चासौ राज्यहेतुस्तव स्यात् ।। ४२८ ।।

इत्युक्त ऊचे माद्रिपुत्रं विहाय कुन्तीपुत्रो न मयोत्थापनीयः ।

स एवमुक्तो नितरां प्रीयमाण उत्थापयामास च तान् समस्तान् ।। ४२९ ।।

यथेष्टरूपप्राप्तिमेषां पुनश्च स्वकामतो निजरूपाप्तिमादात् ।

अज्ञातवासेऽज्ञातता सर्वदैव ददौ तेषां प्रीत एवाऽनृशंस्यात् ।

एवं क्रीडन् पुत्र इत्यात्मनैव यशोधर्मावात्मनो वर्द्धयन् सः ।। ४३० ।।

युधिष्ठिरात्मनस्तस्य यशोधर्मविवृद्धये ।

कृत्वाऽरण्यपहारादि पुनर्दत्वा च तत् स्वयम् ।

दातुं विप्राय तद्धस्ते ययौ धर्मो दिवं पुनः ।। ४३१ ।।

ततो राजा भीमसेनार्जुनौ च सार्द्धं यमाभ्यामरणीं प्रदाय ।

मुदा युताः कृष्णया सार्द्धमेव सन्तुष्टुवुः कृष्णमनन्तमच्युतम् ।। ४३२

# २६६. षट्षष्ट्यधिकत्रिशततमोऽध्यायः

युधिष्ठिरादिभिः काम्यकवनात्पुनर्द्वैतवलं प्रत्यगमनम् ।। १ ।। तत्र केनचिन्मृगेण तरुसङ्घर्षवशात्स्वविषाणलग्नेन ब्रह्मणस्यारणिना सह पलायनम् ।। २ ।। ब्राह्मणप्रार्थनया दतानयनाय पाण्डवैस्तदनुधावनम् ।। ३ ।। ततसक्तैः सुदूरं स्वापकर्षणपूर्वकमन्तर्हिते

तस्मिन् श्रान्त्या वटमूले समुपवैशनम् ।। ४ ।। ब्राह्मणस्यारणिमन्थनकाष्ठमनुसन्धात
ुं पाण्डवानां मृगमनुधावनं दुःखं च

**जनमेजयः**

एवं हृतायां भार्यायां प्राप्य क्लेशमनुत्तमम्।
प्रतिपद्य ततः कृष्णां किमकुर्वत पाण्डवाः ।। १ ।।(०१)

**वैशम्पायनः**

एवं हृतायां कृष्णायां प्राप्य क्लेशमनुत्तमम् ।
विहाय काम्यकं राजा सह भ्रातृभिरच्युतः ।। २ ।।
सर्वे पुष्पफलाहाराः सर्व एव मिताशनाः ।।(०२)

पुनर्द्वैतवनं रम्यमाजगाम युधिष्ठिरः ।
स्वादुमूलफलं रम्यं विचित्रबहुपादपम् ।। ३ ।।(०३)

अनुभुक्तफलाहाराः सर्व एव मिताशनाः ।
न्यवसन्पाण्डवास्तत्र कृष्णया सह भार्यया ।। ४ ।।(०४)

वसन्द्वैतवने राजा कुन्तीपुत्रो युधिष्ठिरः ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रौ च पाण्डवौ ।। ५ ।।(०५)

ब्राह्मणार्थे पराक्रान्ता धर्मात्मानो यतव्रताः ।
क्लेशमार्च्छन्त विपुलं सुखोदर्कं परन्तपाः ।। ६ ।।(०६)

---

(०१) जन्मेजय उ ( भार्यायां (for कृष्णायां) (३)प्रीतपद्य पुनः (for ततः) तां च (for क्य कृष्णां) (४)किमकुर्वन्त .

(०२) सर्वे गुप्त भार्यायां (for कृष्णायां); प्रतिलभ्य ततः कृष्णां यदकुर्वन्त तच्छ्रुणु (३)निश्चयं (for विहाय) काम्यकां (for का) राजन् (for राजा) ) (४) अच्युत .

(०३) (पुण्ये; पुण्यम् (for रम्यम्) (३) बहु स्वादु पुण्यं (for रम्यं ) (४)विचित्रबहुपादपं .

(०४) (अनुभुक्त; अन्वभुङ्क्; अनुगुप्ताः (३) व्यवसान् निवसन् (४) भार्यया (for भारत ) .

(०५) (३)भीमसेनार्जुनश्चैश्चैव र्जुनौ चैव (४) भ्रातरौ (for पाण्डवौ) .

(०६) (२)महात्मानो (for धर्मा) जित (for यत) (३) अर्छन्ति; अर्छन्त; इच्छन्ति परमं (for विपुलं

तस्मिन्प्रतिवसन्तस्ते यत्प्रापुः कुरुसत्तमाः ।[०१]
वने क्लेशं सुखोदर्कं तत्प्रवक्ष्यामि ते शृणु।[०२]
अरणीसहितं मन्थं ब्राह्मणस्य तपस्विनः ।
मृगस्य घर्षमाणस्य विषाणे समसज्जत।[०३]
तदादाय गतो राजंस्त्वरमाणो महामृगः ।
आश्रमान्तरितः शीघ्रं प्लवमानो महाजवः ।
ह्रियमाणं तु तं दृष्ट्वा स विप्रः कुरुसत्तम।
त्वरितोऽभ्यागमत्तत्र अग्निहोत्रपरीप्सया।

तेजस्तु वसतां तत्र पाण्डवानां महारथम्।[०४]
अजातशत्रुमासीनं भ्रातृभिः सहितं वने।
आगम्य ब्राह्मणस्तूर्णं सन्तप्तश्चेदमब्रवीत् ।। ७ ।।[०५]

**ब्राह्मणः-**

अरणीसहितं मन्थं समासक्तं वनस्पतौ।
मृगस्य घर्षमाणस्य विषाणे समसज्जत ।। ८ ।।[०६]

तमादाय गतो राजंस्त्वरमाणो महामृगः ।
आश्रमात्त्वरितः शीघ्रं प्लवमानो महाजवः ।। ९ ।।[०७]

---

) (४) अ (for परं ) .
(०१) यत्प्राप्तः .
(०२) तत्तेवक्ष्यामि तच्छ (for त्त्वद्रद्वं ) .
(०३) कर्ष (for घर्षं) .
(०४) महात्मनां ऽ रथम् ) .
(०५) (आयान्तं (for आसीनं) (३)अगच्छद् (for आगम्य) (४) चेदम्(for इदम्) .
(०६) ब्राह्मणोवाच ( मन्थं भाण्डं (for मझं) (३)मृगस्य कषमाणस्य; स्य कर्ष; स्थ कृष्य; स्याकर्ष (४) विषाणैः; विमाने समसज्यत .
(०७) (एतदाशा (for सा); तमादाय; समा महाराज (for गतो राजन् ) (३)त्वरितं परितः तूर्णं (for

तस्य गत्वा पदं राजन्नासाद्य च महामृगम्।
अग्निहोत्रं न लुप्येत तदानयत पाण्डवाः ।। १० ।।(०१)

**वैशम्पायनः-**

ब्राह्मणस्य वचः श्रुत्वा सन्तप्तोऽथ युधिष्ठिरः ।
धनुरादाय कौन्तेयः प्राद्रवद्भ्रातृभिः सह ।। ११ ।।

सन्नद्धा धन्विनः सर्वे प्राद्रवन्नरपुङ्गवाः ।
ब्राह्मणार्थे यतन्तस्ते शीघ्रमन्वगमन्मृगम् ।। १२ ।।(०२)

कर्णिनालीकनाराचानुत्सृजन्तो महारथाः ।
नाविध्यन्पाण्डवास्तत्र पश्यन्तो मृगमन्तिकात् ।। १३ ।।(०३)

लक्षालङ्कारः - कर्णिनालीकनाराचान् इत्यत्र आकर्णान्तमाकृष्टाः कर्णिनः, 'नालीकं पद्मबाणयोः' इत्यभिधानात् नालीकाः नाराचाश्च शरविशेषाः ।

तेषां प्रयतमानानां नादृश्यत महामृगः ।
अपश्यन्तो मृगं शान्ता दुःखं प्राप्ता मनस्विनः ।। १४ ।।

शीतलच्छायमागम्य न्यग्रोधं गहने वने।
क्षुत्पिपासापरीताङ्गाः पाण्डवाः समुपाविशन् ।। १५ ।।(०४)

तेषां समुपविष्टानां नकुलो दुःखितस्तदा।
अब्रवीद्भ्रातरं श्रेष्ठममर्षात्कुरुनन्दनम् ।। १६ ।।(०५)

---

शीघ्रं ) अश्रमात्पुरुषव्याघ्र (४)द्रवमाणो मनोजवः; प्लवमानो महामृगः .
(०१) (राजन् (for शीघ्रम् ) (३)अग्निहोत्रार्थमेतन्मे (४)सत्यं (for स त्वं) मे देहि पाण्डव .
(०२) (सहसा (for सन्नद्धा ) त्वरिताः(for धन्विनः ) (२) प्रयान्ति (for प्राद्रवन् ) (३) ब्राह्मणार्थं; ब्राह्मणास्ते ब्राह्मणार्थाय यत्ता वै .
(०३) (३)अविध्यन्; न(४) हश्यन्तं दृश्यते; दृश्यन्ते (for पश्यन्तो) .
(०४) (आगम्य (for आसाद्य) (३)ते क्षुत्पिपासापरिताः .
(०५) (२)नकुलः दुःखितः (अ)ब्रवीत्; ततः (for तदा) (३)श्रेष्ठम् (for ज्येष्ठम्) भ्रातरं धर्मजं ज्येष्ठं (४)

**नकुलः-**

नास्मिन्कुले जातु ममज्ज धर्मो न चालस्यादर्थलोपो बभूव ।
अनुत्तराः सर्वभूतेषु भूयः सम्प्राप्ताः स्मः संशयं किंनु राजन् ।। १७ ।।(०१)

लक्षालङ्कारः - अनुत्तराः सर्ववर्णेषु इत्यत्र न विद्यते उत्तरमुत्तमं येभ्यस्ते तथोक्ताः ।

अस्मिन् पर्वणि २६६ अध्याये १७ श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि आरणेयपर्वणि मृगान्वेषणे षट्षष्ट्यधिकत्रिशततमोऽध्यायः ।। २६६ ।।

(आरणेयपर्वणि अध्यायः)

# 03- 04 - 267Adhyaya

# २६७. सप्तषष्ट्यधिकत्रिशततमोऽध्यायः

पाण्डवेषु युधिष्ठिरनियोगाद्वृक्षाग्रमधिरूढेन नकुलेन नातिदूरे किञ्चित्सरोविलोकनम् ।। १ ।। पानीयानयनाय सरोगतेषु नकुलादिषु यक्षवचनावमत्या पानीयपानेन दीर्घनिद्राश्रवणादनागतेषु युधिष्ठिरेणापि तत्सरोगमनम् ।। २ ।। जलमानेतुं तडागतटं गतानां चतुर्णां पाण्डवानां मूर्च्छा ।।

**युधिष्ठिरः**

नापदामस्ति मर्यादा न निमित्तं न कारणम्।

---

कुरुसत्तमं (मः) कुरुनन्दनं (for नः; नः) .

(०१) नकुलं उ (उ) (नास्मत्कुले (२) अर्थलोभो (for लोपो) न चालस्यं नार्थलोपो बभूव;
न चालस्यादर्थलुप्ता बभूवुः (३) अनुत्तरः; अनुरक्तः; अनुरक्ताः; । न चान्तकाः; अनन्तराः सर्ववर्णेषु; धर्मेषु भूपते (for ते); ।। भूप; (अ)भूवन्;

३) अ-अनुत्तराः; क-अनाथस्सर्वभूतेषु सकम्प्राप्तस्संशयं केन राजन्;, (अ)भूमः; (अ)भूम; (अ)भूवं (for भूयः ) (४)ते स्म प्राप्ताः; ते सम्प्राप्ताः; ससं ;(समं) प्राप्ताः; तु तस्मात्प्राप्ताः; अनुप्राप्ताः; समाप्राप्ताः; समत्प्राप्ताः (for सम्प्राप्ताः स्मः) किं नु (for केन )

धर्मस्तु विभजत्यर्थमुभयोः पुण्यपापयोः ।। १ ।। (०१)

लक्षालङ्कारः - न निमित्तं न कारणम् इत्यत्र दृष्टं निमित्तकारणं उपादानकारणं च । किन्त्वदृष्टमेव कारणमित्याह धर्म इति । अधर्मस्याप्युपलक्षणमेतत् ।

**भीमः**

प्रातिकाम्यनयत्कृष्णां सभायां प्रेष्यवत्तदा।
न मया निहतस्तत्र तेन प्राप्ताः स्म संशयम् ।। २ ।। (०२)

लक्षालङ्कारः - प्रातिकाम्येन यत् इत्यत्र यत् यदा प्रेष्यवत् कृता ।

**अर्जुनः**

वाचस्तीक्ष्णास्थिभेदिन्यः सूतपुत्रेण भाषिताः ।
अतितीव्रा मया क्षान्तास्तेन प्राप्ताः स्म संशयम् ।। ३ ।।(०३)

नकुल उवाच
धार्तराष्ट्राः कुत्सयन्तो यन्मे न निहतास्तदा ।
चूतकाले महाराज तेनेमामापदं गताः ।

**सहदेवः**

शकुनिस्त्वां यदाजैषीदक्षद्यूतेन भारत।
स मया न हतस्तत्र तेन प्राप्ताः स्म संशयम्।(०४)

**वैशम्पायनः-**

---

(०१) (२)अनिमित्तं; निमित्तं न च कारणं; अकारणं (३)विभजत्यर्थम्; जन्यस्मिन्; जेद्यत्र; जेदत्र धर्मस्त्वयि भजेदस्मिन् (४) ह्युभयोः उभयोः ) उभयोः पापपुण्ययोः.

(०२) भीमसेन उ (for उ ) ( । प्रातिकाम्येन यत्कृ(for यं कृ )ष्णां; म्यानयरकृष्णां ) (२)प्रेक्ष्यतां (for प्रेष्यवत् ) .

(०३) (२)भाषितः (३)अतितीव्रा; । अतीक्ष्णाया; अतीक्ष्णया .

(०४) (तु; च त्वा (for त्वां) यदा पापो; महापापो (for यदाजैषीद्) ) (२) द्यूताह्वानं तदाकरोत्; द्यूतेन भरतर्षभ) (२)सोस्माभिर्न (for र्नि) हतस्तत्र; न मया निह (४) विपदं तेन वै गताः .

ततो युधिष्ठिरो राजा नकुलं वाक्यमब्रवीत् ।। ४ ।।

**युधिष्ठिरः-**

आरुह्य वृक्षं माद्रेय निरीक्षस्व दिशो दश ।। ५ ।।

पानीयमन्तिके पश्य वृक्षांश्चाप्युदकाशिान्।
एते हि भ्रातरः श्रान्तास्तव तात पिपासिताः ।। ६ ।।(०१)

**वैशम्पायनः-**

नकुलस्तु तथेत्युक्त्वा भ्रातुर्ज्येष्ठस्य पादपम्।
तत उत्थाय मतिमाञ् शीघ्रमारुग्य पादपम् ।
अब्रवीद्भ्रातरं ज्येष्ठमभिवीक्ष्य समन्ततः ।। ७ ।।(०२)

**नकुलः-**

पश्यामि बहुलान्राजन्वृक्षानुदकसंश्रयान्।
सारसानां च निर्ह्रादमत्रोदकमसंशयम् ।। ८ ।।(०३)

**वैशम्पायनः-**

ततोऽब्रवीत्सत्यधृतिः कुन्तीपुत्रो युधिष्ठिरः ।

**युधिष्ठिरः-**

गच्छ सौम्य ततः शीघ्रं तूर्णैः पानीयमानय ।। ९ ।।(०४)

**वैशम्पायनः-**

---

(०१) (तस्य (for पश्य) ) (२) चापि; यान् (for वापि ) शिान् (for श्रयान् ) वृक्षं वाप्युदकाश्रयं (३) त इमे; एते नृ (इमे हि) (४) सर्वे; पार्थ; चापि (for तात) पिपासया .

(०२) वैशं ( तं च (for तु ) शीघ्रमारुह्य शासनात् ।तत उत्थाय मतिमान् (२)पाण्डवः (for पादपम्) .

(०३) नकुलः ( बहुलान्वृक्षान्; बहुलछायान् राजन् (for वृक्षान् ) उदकसंशिान् (३) निनदं; निर्ह्रादसू पत्रोदक; तत्रोदक .

(०४) वैशं (३) गच्छसौम्यावतीर्याति: (४) तूणौः ; शीतं (तूर्णं) पानीयं शीघ्रमानय .

नकुलस्तु तथेत्युक्त्वा भ्रातुर्ज्येष्ठस्य शासनात्।
प्राद्रवद्यत्र पानीयं शीघ्रं चैवान्वपद्यत ।। १० ।।[०१]

स दृष्ट्वा विमलं तोयं सारसैः परिवारितम्।
पातुकामस्ततो वाचमन्तरिक्षात्स शुश्रुवे ।। ११ ।।[०२]

**यक्षः**

मा तात साहसं कार्षिर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु माद्रेय ततः पिब हरस्व च ।। १२ ।।[०३]

लक्षालङ्कारः - मम पूर्वपरिग्रह इत्यत्र पूर्वं पूर्वमारभ्य इदं जलं परिगृह्यत इति व्युत्पत्त्या मम परिग्रहः मदधीनम् । प्रश्नानु माद्रेय इत्यत्र प्रश्नानु प्रश्ननामुत्तरदानानन्तरम् ।

**वैशम्पायनः-**

अनादृत्य तु तद्वाक्यं नकुलः सुपिपासितः ।
अपिबच्छीतलं तोयं पीत्वा च निपपात ह ।। १३ ।।[०४]

चिरायमाणे नकुले कुन्तीपुत्रो युधिष्ठिरः ।
अब्रवीद्भ्रातरं वीरं सहदेवमरिन्दमम् ।। १४ ।।[०५]

**युधिष्ठिरः-**

भ्राता हि चिरयातो नः सहदेव तवाग्रजः ।

---

(०१) वैशं; ( च तं (for तु) (३) येन (for यत्र) (४) चैवाभ्यपद्यत .

(०२) (तद् (for स) तद् दृष्ट्वा विपुलंवारि (२) खगमैः; शकुनैः (for सारसैः ) (३)हर्तुं (for पातु) (४) अन्तरीक्षात् सु (for स ) .

(०३) यक्ष उ(for उ ) कौंतेय (for माद्रेय) पिबस्व च (for ततः पिब .

(०४) (२)तु; क्षुत्; स (for सु (४)स (for च ) स (for नि ) च (for ह ) पीत्वा भूम्यां पपात च; पीत्वा वारि पपात ह .

(०५) (चिरमाणे तु नकुले (३)शूरं (for वीरं) (४) अनन्तरं (for अरिन्दमम्) .

तथैवानय सोदर्यं पानीयं च त्वमानय ।। १५ ।।(०१)

**वैशम्पायनः-**

सहदेवस्तथेत्युक्त्वा तां दिशं प्रत्यपद्यत ।
दद‍र्श च हतं भूमौ भ्रातरं नकुलं तदा ।। १६ ।।(०२)

भ्रातृशोकाभिसन्तप्तस्तृषया च प्रपीडितः ।
अभिदुद्राव पानीयं ततो वागभ्यभाषत ।। १७ ।।(०३)

**यक्षः-**

मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा यथाकामं पिबस्व च हरस्व च ।। १८ ।।(०४)

**वैशम्पायनः-**

अनादृत्य तु तद्वाक्यं सहदेवः पिपासितः ।
अपिबच्छीतलं तोयं पीत्वा च निपपात ह ।। १९ ।।(०५)

अथाब्रवीत्स विजयं कुन्तीपुत्रो युधिष्ठिरः ।। २० ।। (०६)

**युधिष्ठिरः-**

भ्रातरौ ते चिरगतौ बीभत्सो शत्रुकर्शन ।

---

(०१) (१)युधिष्ठिरः (चरयातस् रायतस्; रायते; रजा तसू) तव भ्राता; भ्राता हि चिरया (for जा) तो नः (२) महाभुज; तवाग्रतः (३)तथो (for तं च) विद्धि (for आनय भद्रं ते (for सोदर्यं ) (४) तथानध (for त्वमानय ) .

(०२) (२) तं देशं तां दिशं) प्रतिपद्यत (३)ददृशे च; स्व ददर्श स हतं; पतितं; च स तं; अचेतनं; निहतं (for च हतं) वीरं (for भूमौ) (४) भ्रातरं निहतं; नकुलं भ्रातरं तथा .

(०३) (२) तृष्णया परिप्लुतः (for प्रपी) (३) पुनर्दुद्राव (for अभि ) .

(०४) (१)यथाकालं )पिबस्व च(for ततः पिब) .

(०५) (१) सोपि; स नि (for च नि) .

(०६) (१) क-चिरायमाणे माद्रेये कुन्तीपुत्रो युधिष्ठिरः । .

**तौ चैवानय भद्रं ते पानीयं च त्वमानय ।। २१ ।।**[०१]

**त्वं हि नस्तात सर्वेषां दुःखितानामपाश्रयः ।**[०२]

**वैशम्पायनः-**

एवमुक्तो गुडाकेशः प्रगृह्य सशरं धनुः ।
**आमुक्तखड्गो मेधावी तत्सरः प्रत्यपद्यत ।। २२ ।।**[०३]

ततः पुरुषशार्दूलौ पानीयहरणे गतौ।
**तौ ददर्श हतौ तत्र भ्रातरौ श्वेतवाहनः ।। २३ ।।**[०४]

विगतासू नरव्याघ्रौ शयानौ वसुधातले।

प्रसुप्ताविव तौ दृष्ट्वा नरसिंहः सुदुःखितः ।
**धनुरुद्यम्य कौन्तेयो व्यलोकयत तद्वनम् ।। २४ ।।**[०५]

नापश्यत्तत्र किञ्चित्स भूतमस्मिन्महावने।
**सव्यसाची ततः श्रान्तः पानीयं सोऽभ्यधावत ।। २५ ।।**[०६]

अभिधावंस्ततो वाक्यमन्तरिक्षात्स शुश्रुवे ।

**यक्षः-**

**यत् त्वमिच्छसि पानीयं नैतच्छक्यं नरर्षभ ।। २६ ।।**

**किमासीदसि पानीयं नैतच्छक्यं बलात्त्वया।**[०७]

---

(०१) युधिष्ठिरः )( तथा(for अथ') हि विजयं; विजयिनं सव्यसाचिं (for ची) (३) परि (for चिर) कर्षाण त्वं (for च) त्वमाहर; समानय; समाहर.

(०२)व्यपाश्रयः उपाश्रयः .

(०३) (तथेत्युक्त्वा (for एवमुक्तो) (३)खङ्गमेधावी; कवचः श्रीमान् (४) तत्सरः सम्प्रपद्यत .

(०४) (ततः (for यतः) शार्दूलः (३)पानीयाहरणे (३) स ददर्श; ददर्श च (for तौददर्श) .

(०५) (सु (for क्य प्र ) (२)नरसिंहौ (४) व्यालो (for व्यलो ) तत्वतः; तद्वने व्यलोकत दिशो दश .

(०६) (च; स्म (for स) स तत्र किञ्चिन्नापश्यद् (२)तत्र; अस्मिन् (३) ततः शान्तः; पिपासार्तः .

(०७) (वाक्यम् (for वाचम् ) (२) सु; प्र (for स ) (३) यत्त्वमिच्छसि; किमाधावसि; किमादित्ससि (४)त्वया बलात् .

कौन्तेय यदि प्रश्नांस्तान्मयोक्तान्प्रतिपत्स्यसे।
ततः पास्यसि पानीयं हरिष्यसि च भारत ।। २७ ।।(०१)

**वैशम्पायनः-**

वारितस्त्वब्रवीत्पार्थो दृश्यमानो निवारय।
यावद्बाणैर्विनिर्भिन्नः पुनर्नैवं वदिष्यसि ।। २८ ।।(०२)

एवमुक्त्वा ततः पार्थः शरैरस्त्रानुमन्त्रितैः ।
प्रववर्ष दिशः कृत्स्नाः शब्दवेधं च दर्शयन् ।। २९ ।।(०३)

कर्णिनालीकनाराचानुत्सृजन्भरतर्षभ।
अनेकैरिषुसङ्घातैरन्तरिक्षे ववर्ष ह ।। ३० ।।(०४)

सोऽप्यदृश्याय भूताय नभस्यामिततेजसे ।
उत्ससर्ज महाबाहुर्बाणजालं धनञ्जयः ।
ततस्तानिषुसङ्घातान्गाण्डीवधनुषश्च्युतान् ।
मेघान्कृत्वा जहासोच्चैस्तदद्ध्यमिवाभवत् ।

**यक्षः**

किं विद्या वै न ते पार्थ प्रश्नानुक्त्वा ततः पिब।
अनुक्त्वा तु ततः प्रश्नान्पीत्वैव न भविष्यसि ।। ३१ ।।(०५)

लक्षालङ्कारः - किं विद्या वै न त इत्यत्र हे पार्थ तव विद्या न किम् ।

---

(०१) (तु; ते' (for वै ) प्रश्नांस्तान् (for वै प्रश्नान् ) (२)पत्स्यसि; पश्यसि; वक्ष्यसि (४)आहरिष्यसि; भविष्यसि च .

(०२) वैशं ( चरित (for वारित) (२) निरामयः; निवारयन्; निसूदयन् (३) च; तु(for वि) .

(०३) (उक्तम् (२) अस्त्राभि (for अस्मात्तु ) (३) प्रववर्ष दिशः कृत्स्नाः) न ववर्ष दिशैः कृत्स्नैः (४) शब्दविद्धं (for वेधे) वेध्यं विमर्षयत्; निदर्शयन्; च दर्शयत् शब्दवेध्यं वि (for नि) दर्शयन् .

(०४) (४) अन्तीक्षे सः (for ह ) .

(०५) (वाघातेन; वाधानेन; विधानेन व्यायामेन च किं पार्थ (२)तथा; पयः (for ततः) (३)च (for तु

एवमुक्तस्ततः पार्थः सव्यसाची धनञ्जयः ।

**वैशम्पायनः-**

सच मोघानिषून् दृष्वा तृष्णायाच प्रपीडितः ।[०१]
अवज्ञायैव तां वाचं पीत्वैव निपपात ह ।। ३२ ।।[०२]

अथाब्रवीद्भीमसेनं कुन्तीपुत्रो युधिष्ठिरः ।। ३३ ।।

**युधिष्ठिरः**

नकुलः सहदेवश्च बीभत्सुश्च परन्तप।[०३]

चिरं गतास्तोयहेतोर्न चागच्छन्ति भारत।
तांश्चैवानय भद्रं ते पानीयं च त्वमानय ।। ३४ ।।[०४]

**वैशम्पायनः-**

भीमसेनस्तथेत्युक्त्वा तं देशं प्रत्यपद्यत।
यत्र ते पुरुषव्याघ्रा भ्रातरोऽस्य निपातिताः ।। ३५ ।।[०५]

तान्दृष्ट्वा दुःखितो भीमस्तृषया च प्रपीडिताः ।
अमन्यत महाबाहुः कर्म तद्यक्षरक्षसाम् ।। ३६ ।।[०६]

स चिन्तयामास तदा योद्धव्यं ध्रुवमद्य वै।[०७]

---

वा; (ए) व) पिबन्; वापि तान्; वै पुनः; च ततः (for तु ततः) पश्चात्(for प्रश्नान् ) (४) पीत्वैव (for 'त्वा तु) निपतिष्यसि .

(०१) (२)असृजन् भरतर्षभः; पुरुषर्षभः भ ) इषुसम्पातैर् .

(०२) (स तु मोघानिपून्दष्ट्वा (२)तृषया च (for अ भि) (३)अविज्ञाय च; अविज्ञात्वैव; अवज्ञायैव अवज्ञायैव तां वाचं (४)पीत्वा च; पीत्वा स .

(०३) (ततो (for अथा) च परन्तप; परन्तपः; पराजितः(for (अ)पराजितः) .

(०४) (चिरं गते वै तोयार्थं (for तोयहेतोर्) (२) चादर्शत (for चागच्छन्ति ) (४) तथानघ (for त्वमा) .

(०५) वैशं (२)तं देशं (for तान्दिशं) तस्मिन्देशे प्रपद्यत (३)पुरुषव्याघ्र (४)च; वि (for नि) .

(०६) (२)तृष्णया (२)अवमन्य (for अमन्यत) (४)किमेतद्; कर्मैतद् .

(०७) (३)सं (for स) चिन्तयामास स (च) तदा कथम् (for ध्रुवम्) अस्ति (for अद्य) वै (for मे) .

पास्यामि तावत्पानीयमिति पार्थो वृकोदरः ।। ३७ ।।

ततोऽभ्यधावत्पानीयं पिपासुः पुरुषर्षभः ।। ३८ ।।(०१)

वागुवाचाथ सुस्पष्टमदृश्या पाण्डुनन्दनम्

**यक्षः**

मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ।। ३९ ।।(०२)

**वैशम्पायनः-**

एवमुक्तस्तदा भीमो यक्षेणामिततेजसा।
अनुक्त्वैव तु तान्प्रश्नान्पीत्वैव निपपात ह ।(०३)

ततः कुन्तीसुतो राजा धर्मपुत्रो युधिष्ठिरः

ततश्चिरगनान्भ्रात्मनथ ज्ञातुं युधिष्ठिरः

चिरायमानान्बहुशः पुनः पुनरुवाचह ।

माद्रेयौ किं चिरायेते गाण्डीवी किं चिरायते।

महाबलधरस्तत्र किं नु भीमश्चिरायते।

गच्छाम्येषां पदं द्रष्टुमिति कृत्वा युधिष्ठिरः

ततः कुन्तीसुतो राजा प्रचिन्त्य पुरुषर्षभः ।
गच्छामेषां पदं द्रष्टुमति कृत्वा युधिष्ठिरः ।
समुत्थाय महाबाहुर्दह्यमानेन चेतसा ।। ४० ।।(०४)

आत्मानमानमेतच्च चिन्तयन्निदमब्रवीत्

---

(०१) (२)इत्युक्त्वा जलमाययौ (३)ततोभि (४)पुरुषर्षभ; पाण्डवर्षभः .

(०२) (तात मा कार्षीन्; कार्यन्थ (३) (अ) थ (for तु ) (४) पिबस्व च (for ततःपिब ) .

(०३) (उक्त्वा (for उक्तस्) तदा (तथा) (for ततो) (२)यक्षेणाद्भुतं अनुक्त्वैवतु (च); अवज्ञायैव (य च) तद्वाक्यं (for तान्प्रश्नान् ) (४)पीत्वा स .

(०४) (धर्म (for कुन्ती) ) (२) (for वि) .

**वैशम्पायनः**

ततश्चिरगतान्भ्रातृन थ राजा युधिष्ठिरः ।। ४१ ।।

चिरायमाणान्बहुशः पुनः पुनरुवाच ह ।

किं स्विद्धनमिदं द्रष्टं किं स्विद् दृष्टो मृगो भवेत्।

प्राहसन्वा महा भूतं शप्तास्तेनाथ ते पतन्

न पस्यन्त्यथ वा वीशः पानीयं यत्र ते गताः
अन्विषद्भिर्वने तोयं कालोऽयमति पातितः ।। ४२ ।।

किं नु तत्कारणं येन नायान्ति पुरुषर्षभः ।

गच्छाम्येषां पदं द्रष्टुमिति कृत्वा युधिष्ठिरः ।

**वैशम्पायनः**

एवमादीनि वाक्यानि विमृषन्नपसत्तमः ।(०१)

व्यपेतजननिर्घोषं प्रविवेश महावनम् ।। ४० ।।

रुरुभिश्च वराहैश्च पक्षिभिश्च निषेवितम्।(०२)
नीलभास्वरवर्णैश्च पादपैरुपशोभितम् ।। ४१ ।।

भ्रमरैरुपगीतं च पक्षिभिश्व समन्ततः ।
भ्रमरैरुपगीतं च पक्षिभिश्च महायशाः ।। ४२ ।।(०३)

स गच्छन्कानने तस्मिन्हेमजालपरिष्कृतम्।
ददर्श तत्सरः श्रीमान्विश्वकर्मकृतं यथा ।। ४३ ।।(०४)

---

(०१) (३)समुत्तस्थौ; स तत्रायान् (for समुत्थाय) महाबुद्धिर् (for बाहुर्) .

(०२) (व्यपेतं (for अपेत ) (२) तद् (for प्र) महद्धनं (३)रुरुऋक्ष (for भिश्च ) (४)महिषै (for पक्षिभि ) .

(०३) (२)श्वापदैर् (for पादपैर्) (४) समन्ततः (for महायशाः)मृदुशाद्धल संङ्कीर्ण भूमिभागं मनोहरम्। सम्पन्नं (for सङ्कीर्ण) .

(०४) (गत्वा (for गच्छन्) (२) लताजालपरिष्कृते;सेतुजालपरिष्कृतं (३)च ततः (for तत्सरः) (४)

उपेतं नलिनीजालैः सिन्धुवारैः सवेतसैः ।
**केतकैः करवीरैश्च पिप्पलैश्चैव संवृतम् ॥ ४४ ॥**

**श्रमार्तस्तदुपागम्य सरो दृष्ट्वाथ विस्मितः ।**(०१)

ततो धर्मसुतः श्रीमान्भ्रातृदर्शनलालसः ।
**श्रमार्दस्तदुपाक्रामत् सरो दृष्बा सुविस्मितः ॥ ४५ ॥**(०२)

अस्मिन् पर्वणि २६७ अध्याये ४५श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि आरणेयपर्वणि नकुलादिपतने सप्तषष्ट्यधिकत्रिशततमोऽध्यायः ॥ २६७ ॥

(आरणेयपर्वणि १ अध्यायः)

## 03- 04 - 268Adhyaya

# २६८. अष्टषष्ट्यधिकत्रिशततमोऽध्यायः

**युधिष्ठिरेण सरस्तीरशयिनां भ्रदाृणामवलोकनेन सकरुणं नपरिदेवनयूर्वकं पनीयपानाय प्रयतनम् ॥ १ ॥ तथा यक्षेण स्वीयप्रश्नानामुत्तरदानमन्तरा जलपानस्य दुश्शकत्वकथनेन तत्प्रतिषेदने तेषां मसुचितोत्तरदानम् ॥ २ ॥ ततस्तुष्टेन यक्षेण भीमादीनां चतुर्णामुज्जीवनम् ॥ ३ ॥ यक्षयुधिष्ठिरप्रश्नोत्तराणि ततस्तुष्टस्य यक्षस्य भ्रातृचतुष्टयस्योज्जीवनाय वरदानम्**

**वैशम्पायनः**

स ददर्श हतान्भ्रातँल्लोकपालानिव च्युतान्।

---

मनसः प्रीतिवर्धनं .

(०१) (२)सिन्दुवारैःस(for च) चेतसै; शोभितं (३)केसरैः; केतकी (४)प्रियालैश्; वञ्जलैश्; वञ्जुलैश् (for पिप्पलैश्) चापि; च सु(for चैव) प्रियवालैश्च संवृतं .

(०२) उपाक्रामत् (for उपागम्य) स प्रशान्तमुपागम्य; प्रशान्तःसमुपा दृष्ट्वाति; दृष्ट्वा तु; दृष्ट्वा सु(for दृष्ट्वाथ) .

युगान्ते समनुप्राप्ते शक्रवै श्रवणोपमान् ।। १ ।। (०१)

लक्षालङ्कारः - स ददर्श हतान् भ्रातृन् इत्यत्र हतान् मृतप्रायान् ।

विनिकीर्णधनुर्बाणं दृष्ट्वा निहतमर्जुनम्।
भीमसेनं यमौ चैव निर्विचेष्टान्गतायुषः ।। २ ।। (०२)

धर्मपुत्रो महाबाहुर्विललाप सुविस्तरम्।
ननु त्वया महाबाहो प्रतिज्ञातं वृकोद।
सुयोधनस्य भेत्स्यामि गदया सक्थिनी रणे।
व्यर्थं तदद्य मे सर्वं त्वयि वीर निपातिते।
महात्मनि महाबाहो कुरूणां कीर्तिवर्धने।
मनुष्यसम्भवा वाचो विधर्मिण्यः प्रतिश्रुताः ।
भवतां दिव्यवाचस्तु ता भवन्तु कथं मृषा।
देवाश्चापि यदावोचन्सूतके त्वां धनञ्जय।
सहस्राक्षादनवरः कुन्ति पुत्रस्तवेति वै।
उत्तरे पारियात्रे च जगुर्भूतानि सर्वशः ।
विप्रणष्टां श्रियं चैषामाहर्ता पुनरञ्जसा।
नास्य जेता रणे कश्चिदजेता नैष कस्यचित्।
सोऽयं मृत्युवशं यातः कथं जिष्णुर्महाबलः ।
अयं ममाशां संहत्य शेते भूमौ धनञ्जयः ।
आश्रिय यं वयं नाथं दुःखान्येतानि सेहिम।

(०१) (स वै ददर्श (२) नभश् (for इव ) (४) शक्रवैश्रवणोपमान् .
(०२) (विप्रकीर्णधनुर्बाणान्; विनिकीर्णधनुर्बाणं; विप्रा (नि)कीर्णधनुष्पाणिं (३)चैव(for चोभौ) (४) निर्विचेष्टौ; निर्विशेषौ कृतायुषः; गतायुषौ; गतायुषान्; व्यसूं (सू) स्तदा
तान्दृष्ट्वा पतितान्भ्रातन्सर्वांश्चिन्तासमन्वितः .

रणे प्रमत्तौ वीरौ च सदा शत्रुनिबर्हणौ।
कथं रिपुवशं यातौ कुन्तीपुत्रौ महाबलौ।
यौ सर्वस्त्राप्रतिहतौ भीमसेनधनञ्जयौ।
अश्मसारमयं नूनं हृदयं मम दुर्हृदः ।
यमौ यदेतौ दृष्ट्वाद्य पतितौ नावदीर्यते।
शास्त्रज्ञा देशकालज्ञास्तपोयुक्ताः क्रियान्विताः ।
अकृत्वा सदृशं कर्म किं शेध्वं पुरुषर्षभाः ।
अविक्षतशरीराश्चाप्यप्रमृष्टशरासनाः ।
असञ्ज्ञा भुवि सङ्गम्य किं शेध्वमपराजिताः ।
सानूनिवाद्रेः संसुप्तान्दृष्ट्वा भ्रातन्महामतिः ।
सुखं प्रसुप्तान्प्रस्विन्नः खिन्नः कष्टां दशां गतः ।
एवमेवेदमित्युक्त्वा धर्मात्मा स नरेश्वरः ।
शोकसागरमध्यस्थो दध्यौ कारणमाकुलः ।
इतिकर्तव्यतां चेति देशकालविभागवित्।
नाभिपेदे महाबाहुश्चिन्तयानो महामतिः ।
अथ संस्तभ्य धर्मात्मा तदाऽऽत्मानं तपः सुतः(तपोयुतः)।
एवं विलप्य बुहुधा धर्मपुत्रो युधिष्ठिरः ।।

स दीर्घमुष्णं निःश्वस्य शोकवाष्पपरिप्लुतः ।
बुद्ध्या विचिन्तयामास वीराः केन निपातिताः ।। ३ ।। (०१)

नैषां शस्त्रप्रहारोऽस्ति पदं नेहास्ति कस्यचित्।

---

(०१) (सु (for स ) निश्वस्य दीर्घमुष्णं च निःश्वस्य; दीर्घमुष्णं विनिश्वस्य (२)शोचन्वाष्पं बुद्ध्या (२) विचार; स्वा (स) बुद्धाया चित .

भूतं महदिदं मन्ये भ्रातरो येन मे हताः ॥ ४ ॥ [०१]

एकाग्रं चिन्तयिष्यामि पीत्वा वेत्स्यामि वा जलम्।[०२]
भ्रातणां व्यसनं घोरं सममेव महात्मनाम् ॥ ५ ॥

स्यात्तु दुर्योधनेनेदमुपांशु विहितं कृतम्।
गान्धारराजरचितं सततं जिह्मबुद्धिना ॥ ६ ॥ [०३]

लक्षालङ्कारः - उपांशु विहितं कृतम् इत्यत्र विरुद्धं हितं विहितम् अहितमित्यर्थः ।

यस्य कार्यमकार्यं वा सममेव भवत्युत।
कस्तस्य विश्वसेद्वीरो दुष्कृतेरकृतात्मनः ॥ ७ ॥ [०४]

अथवा पुरुषैर्गूढैः प्रयोगोऽयं दुरात्मनः ।
भवेदिति महाबुद्धिर्बहुधा तदचिन्तयत् ॥ ८ ॥ [०५]

लक्षालङ्कारः - प्रयोगोऽयं दुरात्मन इत्यत्र प्रयोगः जले विषादिप्रयोगः ।

आचार्यं किं नु वक्ष्यामि कृपं भीष्ममहं नु किम्।
विदुरं किं नु वक्ष्यामि वृहस्पतिसमं नये ॥ ९ ॥

अम्बां च किं नु वक्ष्यामि सर्वदा दुःखभागिनीम्।
दृष्ट्वा मां भ्रातृभिर्हीनं पृच्छन्तीं पुत्रगृद्धिनीम् ॥ १० ॥

यदा त्वां भ्रातृभिः सर्वैः शक्रतुल्यपराक्रमैः ।

---

(०१)(१)शरैः; शर (for शस्त्र) (२)नैवास्ति (for नेहास्ति ) (३) इदं भूतं महन्मन्ये; विदितं तन्महद्भूतं .

(०२) ((४)पातिताः (for मे हताः) भ्रातरो ये निपातिताः एकाग्रशू; एकान्ते एकाग्रश्चितयामास; एकाग्रचित्तः पानीयं योत्स्यामि (for वेत्स्यामि) चाप्यपः; कारणं (for वा जलं) महद्दुः सुखमिदंमम) .

(०३) (अत्र; जातु (for स्यात्तु ) (२)उपांशु परिकल्पितं (३)राजेन कृतं; राजरुचितं; राजचरितं; राजविहितं (४) असताधर्मबुद्धिना .

(०४) (३)धीमान्; धीरो (for वीरो) (४)दुष्कृतेर् (for दुर्मतेर्) .

(०५) (२)दुरात्मभिः (३)महाबुद्धिर् (४) तद (for सम) .

सार्धं वनं गतो वीरैः कथमेकस्तमागतः ।। ११ ।।(०१)

तस्यासीन्न विषेणेदमुदकं दूषितं यथा।

मृतानामपि चैतेषां विकृतं नैव जायते ।
मुखवर्णाः प्रसन्ना मे भ्रातणामित्यचिन्तयत् ।। १२ ।।(०२)

लक्षालङ्कारः - तस्यासीन्न विषेण इत्यत्र तस्य दुर्योधनस्य विषेण दूषितं नेति चिन्तये । यतः मे भ्रातृणां मुखवर्णाः यथा पूर्वं यथा तथा प्रसन्नाः ।

एकैकशश्चौघबलानिमान् पुरुषसत्तमान्।
कोऽन्यः प्रतिसमासेनकालान्तकयमादृते ।। १३ ।।(०३)

लक्षालङ्कारः - कोऽन्यः प्रति समासेन इत्यत्र समासेन सङ्कोचेन प्रति प्रतिगच्छेत् ।

एतेन व्यवसायेन तत्तोयं व्यवगाढवान्।
गाहमानश्च तत्तोयमन्तरिक्षात्स शुश्रुवे ।। १४ ।।(०४)

**यक्षः**

अहं बकः शैवलमत्स्यभक्षो नीता मया प्रेतवशं तवानुजाः ।
त्वं पञ्चमो भविता राजपुत्र
न चेत्प्रश्नान्पृच्छतो व्याकरोषि ।। १५ ।।(०५)

---

(०१) आर्या (for अम्बां) सर्वथा दुःखभागिनीं गच्छन्तं (for पृच्छन्तीं) पुत्रगर्धिनीं यथा (for यदा) गाहमानश्च तत्तोयं विनिर्गतो (for वनं गतो) .

(०२) (कस्य किं नु; किं चासीन्न (for तस्यासीन्न) विशेषेण (for विषेणेदम्) मृतानामपि चैतेषां विकृतं नैव जायते। विकृतिर् .

(०३) (चातिबलान्; चाप्यचलान् (for चौघबलान्) एकैकशो बलवत (३)नान्यः (for कोऽन्यः) प्रति समासीत; सेन (४)यमान्विना .

(०४) एतेन व्यवसायेन (२)अवगाहत; व्यवगाढवान् (३)गच्छमानश्च; पातुकाम .

(०५) (केवलमत्स्यभक्षो; शैवलमत्स्यभोजी; भोजो; भोजनो अहं बलज्ञो बलमत्स्यभोजनो (२)नीता मया; मयार्दिताः प्रेतगतिं (३)चाप्येवं (for पञ्चमो ) (४) भवान्; न मे (for न चेत्) पृच्छते .

मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ।। १६ ।।[०१]

**युधिष्ठिरः**

रुद्राणां वा वसूनां वा मरुतानां वा प्रधानभाक्।
पृच्छामि को भवान्देवो नैतच्छकुनिना कृतम् ।। १७ ।।[०२]

लक्षालङ्कारः - मारुतानां प्रधानधृक् इत्यत्र प्रधानं रूपं धारयतीति स तथोक्तः ।

हिमवान्पारियात्रश्च विन्ध्यो मलय एव च ।
चत्वारः पर्वताः केन पातिता भूरितेजसः ।। १८ ।।[०३]

अतीव ते महत्कर्म कृतं च बलिनां वर ।
यान्न देवा न गन्धर्वा नासुराश्च न राक्षसाः ।
विषहेरन्महायुद्धे कृतं ते तन्महाद्भुतम्।[०४]
विनिघ्नता महेष्वासाश्चतुरोऽपि ममात्मजान् ।। १९ ।।[०५]

न ते जानामि यत्कार्यं नाभिजानामि काङ्क्षितम्।
कौतूहलं महज्जातं साध्वसं चागतं मम ।। २० ।।[०६]

येनास्म्युद्विग्नहृदयः समुत्पन्नशिरोज्वरः ।
पृच्छामि भगवंस्तस्मात्को भवानिह तिष्ठति ।। २२ ।।[०७]

---

(०१) ( पार्थ मा; मा पार्थ (मा तात) (४) च (for तु) यथाकामं (for तु कौन्तेय) (४) पिबस्व च (for ततःपिब) .

(०२) (२)च (for वा) प्रधानधृकू (३)देव ( देवो ) (४) शकुनिवत् .

(०३) पारिजातश्च; पात्रश्च (४)धरणीतले; पृथिवीतले; भूरितेजसः .

(०४) त्वयातीव (for अतीव ते) (२)बलं (for कृतं) च बलिनां (for बलवतां ) .

(०५) यं न; यान्न (४)च न यक्ष (३)न समर्था; समर्थास्तु (for विषहेरन् ) महाबुद्धे; महद्युःद्धे ) एतन् (for ते तन्) कृतं त्व (त) तेजसाद्भुतं .

(०६) (तत्कार्यं; यत्कर्म नैते जानन्ति यत्कामं (२)नाभिजानाति; न हि जानामि .

(०७) (त्वयेप्युद्विग्न (२)संमुद्भूतशिरोरुहः; समुत्पन्नशिरोरुजः (३)भगवन् तस्मात् पृच्छामि हि भवन्तं स्म (४)

**यक्षः**

यक्षोऽहमस्मि भद्रं ते नास्मि पक्षी जलेचरः ।
मयैते निहताः सर्वे भ्रातरस्ते महौजसः ।। २३ ।।(०१)

**वैशम्पयानः**

ततस्तामशिवां श्रुत्वा वाचं स परुषाक्षराम्।
यक्षस्य ब्रुवतो राजन्नुपक्रम्य तदा स्थितः ।। २४ ।।(०२)

ततो राजन्नपाक्रम्य तस्माद्देशादवस्थितः ।

विरूपाक्षं महाकायं यक्षं तालसमुच्छ्रयम्।
ज्वलनार्कप्रतीकाशमधृष्यं पर्वतोपमम् ।। २५ ।।(०३)

वृक्षमाश्रिय तिष्ठन्तं ददर्श भरतर्षभः ।
मेघगम्भीरनादेन तर्जयन्तं महास्वनम्।(०४)
उवाच यक्षः कौन्तेयं भ्रातरं शोकपीडितम् ।। २६ ।।(०५)

**यक्षः**

इमे ते भ्रातरो राजन्वार्यमाणा मयासकृत्।
बलात्तोयं जिहीर्षन्तस्ततो वै मृदिता मया ।। २७ ।।(०६)

---

इह (अन्व) धिष्ठितः; इत्यभाषत; अवतिष्ठते; इति तिष्ठति .

(०१) (२)जलेश्वरः नास्मि पक्षिकलेवरः (३)तिबलाः (for निहताः) (४) मितौजसः ; निपातिताः; निवारिताः.

(०२) तु पुरुषा; सुपरुषा; सुपरुषाक्षरं; स परुषाक्षरं (४) अपक्रम्य; पराक्रम्य; अपाक्रम्य; नाकम्पत (for उपक्रम्य) नाकम्पत युधिष्ठिरः .

(०३) (महात्मानं (for कायं ) (२) च्छ्रियं; च्छ्रितं .

(०४) (वृक्षम् सर (for सेतुम्) आवृत्य; चावृत्य (for आश्रिय) (२)भरतर्षभ; पुरुषर्षभः (३) क-ततो गम्भीरया वाचा;, घ-घोराकृतिं महावाचा, मेघगम्भीरनादेन; घोरगम्भीरया वाचा; घोराकृतिर्महावाचा (४) तर्जयंस्तं) स्वन (for बलम्) .

(०५) शोकप्रपीडितं .

(०६) (त इमे; य इमे (for इमे ते) तवेमे ह्यनुजा (३) जिहिर्षन्ति (४) तदा मया (for ततो) वसूदिता;

न पेयमुदकं राजन्प्राणानिह परीप्सता
**पार्थ मा साहसं कार्षीर्मम पूर्वपरिग्रहः ।। २८ ।।**

प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ।(०१)

**युधिष्ठिरः**

**न चाहं कामये यक्ष तव पूर्वपरिग्रहम् ।। २९ ।।**

कामं नैतत्प्रशंसन्ति सन्तो हि पुरुषाः सदा।(०२)
**यदात्मना स्वमात्मानं प्रशंसेत्पुरुषर्षभ ।। ३० ।।** (०३)

यथाप्रज्ञं तु ते प्रश्नान्प्रतिवक्ष्यामि पृच्छ माम् ।। ३१ ।। (०४)

**लक्षालङ्कारः - कामं नैतत् इत्यत्र एतत् स्वेनैव स्वस्य प्रशंसनम् ।**

**यक्षः**

किं स्विदादित्यमुन्नयति के चेतस्याभितश्चराः ।
**कश्चैनमस्तं नयति कस्मिंश्च प्रतितिष्ठति ।। ३२ ।।**(०५)

**लक्षालङ्कारः - के चेतश्चाभितश्चरा इत्यत्र सार्वविभक्तिकस्तसिरिति वचनात् इतः अस्य आदित्यस्य ।**

**युधिष्ठिरः**

**ब्रह्मादित्यमुन्नयति देवास्तस्याभितश्चराः ।**

---

वै मृदिता तदा (for मया) .
(०१) (२) परीक्षते; परीप्सथ (३) मा तात; मा पार्थ राजेन्द्र (for कौन्तेय) पिबस्व च (for ततःपिब) .
(०२) (न चाहं तोयं (for यक्ष) (२) परिग्रहः (३)अन्ये (for कामं) आत्मानं न प्रशं .
(०३) (तथात्मना आत्मानं न प्रशंसन्ति (२)पुरुषर्षभ ह्यसन्तः पुरुषाः सदा .
(०४) (४)पृच्छतां; पृच्छतः (for पृच्छ माम्) प्रवक्ष्यामहि पृच्छतः .
(०५) (किंश्चिद् (for किंस्विद्) (२) क-तस्य हितं चरा, (४) कस्मिंश्चित् (for कस्मिंश्च) .

धर्मश्चास्तं नयति च सत्ये च प्रतितिष्ठति ।। ३३ ।।(०१)

लक्षालङ्कारः -बह्मा ह्यादित्यमुन्नयति इत्यत्र ब्रह्मा सूर्योदयात्प्राक् प्रतिबन्धक- रक्षोवधाय ग ायत्र्यर्घ्यदातृब्राह्मणकुलम् । धर्मः अस्तमयात् प्राक् प्रति-बन्धकरक्षोवधाय गायत्र्यर्घ्यरूपधर्मः ।

**यक्षः**

केनस्विच्छ्रोत्रियो भवति केनस्विद्विन्दते महत्।
केनस्विद्द्वितीयवान्भवति राजन्केन च बुद्धिमान् ।। ३४ ।।(०२)

**युधिष्ठिरः**

श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत्।
धृत्या द्वितीयवान्भवति बुद्धिमान्वृद्धसेवया ।। ३५ ।। (०३)

**यक्षः**

किं ब्राह्मणानां देवत्वं कश्च धर्मः सतामिव ।
कश्चैषां मानुषो भावः किमेषामसतामिव ।। ३६ ।।(०४)

लक्षालङ्कारः - कश्च धर्मः सतामिव इत्यत्र सतां ऋष्यादीनामिव ब्राह्मणानां को धर्म इति प्रश्नार्थः ।

**युधिष्ठिरः**

स्वाध्याय एषां देवत्वं तप एषां सतामिव ।

---

(०१) (२) वेदां (for देवा ) (३) तं (ए) नं (च) (च) धर्म एवोस्तं नयति; अधर्मस्तंमस्तं नयति (४) स सत्ये (for सत्ये च) .

(०२) ( केनचिचू (३)केन स्विद् (for केन) द्वितीयो (for द्वितीयवान्) राजन् (for भवति) (४)केन स्विद्बुद्धिमांस्तथा; कया हि वद बुद्धिमान् .

(०३) (३)सहाय। (for द्वितीय) यक्ष (for भवति) (४) धर्म (for वृद्ध ) .

(०४) (दैवत्वं (२)किं च धर्मः; किं च कर्म (३) किमेषां; क एव क एषां (४)कश्चैषाम्; परिवादो; परित्यागो (for किमेषाम्) .

**मरणं मानुषो भावः परिवादोऽसतामिव ।। ३७ ।।(०१)**

**यक्षः**

**किं क्षत्रियाणां देवत्वं कश्च धर्मः सतामिव ।**
**कश्चैषां मानुषो भावः किमेषामसतामिव ।। ३८ ।।(०२)**

लक्षालङ्कारः - किमेषामसतामिव इत्यत्र असतामिव एषां किं दूषणमिति प्रश्नार्थः ।

**युधिष्ठिरः**

**इष्वस्त्रमेषां देवत्वं यज्ञ एषां सतामिव ।**
**भयं वै मानुषो भावः परित्यागोऽसतामिव ।। ३९ ।।(०३)**

लक्षालङ्कारः - परित्यागोऽसतामिव इत्यत्र असतां परित्याग इव ब्राह्मणानामपि कश्चित् परित्यागोऽस्ति । सः क इति योजना । परित्यागोऽसतामिवेत्युत्तरवाक्ये असतां दुर्जनानां परित्यागवत् परित्यागः स्वपुत्रमित्रकलत्रादीनां परित्यजनम् । परित्यागः परितः श्लाध्यस्त्याग इति त्रिरावृत्त्या योजना । अन्ते सन्न्यासाश्रम एव महांस्त्याग इति भावः ।

**इष्वस्त्रमेषां देवत्वं यज्ञ एषां सतामिव ।।**

लक्षालङ्कारः -इज्यस्त्वमेषाम् इत्यत्र इज्यस्त्वं सर्वजनपूज्यत्वम् । ज्यायानितिवत् इज्यानित्यपि वैदिकं पदम् । यज्ञः एषां धर्म इत्यर्थः ।

**यक्षः**

**किमेकं यज्ञियं साम किमेकं यज्ञियं यजुः ।**
**का चैषां वृणुते यज्ञं कां यज्ञो नातिवर्तते ।। ४० ।।(०४)**

---

(०१) (एव (for एषां) (२)यज्ञ; धर्म; सन्त (for तप ) तपः पथ्यं (for तप एषां) (३) भयं वै (for मरणं) (४) परीवादो; परित्यागो .

(०२) (३)एषां (for चैषां) .

(०३) (२)यज्ञा; दानम् (for यज्ञ) (३) मरणं (for भयं वै) ; (४)परिवादोसता .

(०४) (याज्ञियं (२)याज्ञियं (३)चैषां; चैता (for चैका) वृणुते; पृच्छते; विशते (for वृश्चते) .

### युधिष्ठिरः

प्राणो वै यज्ञियं साम मनो वै यज्ञियं यजुः ।
वागेषा वृश्चते यज्ञं तां यज्ञो नातिवर्तते ।। ४१ ।।(०१)

लक्षालङ्कारः - वागेषा वृश्चतेऽयज्ञम् इत्यत्र एषा वाक् सामादिरूपा वाक् अयज्ञं यज्ञविरोधिनं वृश्चते छिनत्ति । तां सामयजुषोर्वाचम् । यस्य साम्नो गाने यस्य यजुषः पाठे च यज्ञविरोधिनः नश्यन्ति तत्साम यजुश्च यज्ञियमिति भावः ।

### यक्षः

किंस्विदावपतां श्रेष्ठं किंस्विन्निवपतां वरम्।
किंस्वित्प्रतिष्ठमानानां किंस्वित्प्रसवतां वरम् ।। ४२ ।।(०२)

लक्षालङ्कारः - किंस्विदावपताम् इत्यत्र आवपतां बीजावापं कुर्वतां कृषीवलानां वस्तु किम् । निवपतां बीजावापं कुर्वतां तेषामेव वरं स्वप्रयत्नेन व्रियमाणं वरं श्रेष्ठं वस्तु ।

### युधिष्ठिरः

वर्षमावपतां श्रेष्ठं बीजं निवपतां वरम्।
गावः प्रतिष्ठमानानां पुत्रः प्रसवतां वरः ।। ४३ ।।(०३)

### यक्षः

इन्द्रियार्थाननुभवन्बुद्धिमाँल्लोकपूजितः ।
सम्मतः सर्वभूतानामुच्छ्वसन्को न जीवति ।। ४४ ।।(०४)

### युधिष्ठिरः

---

(०१) ( घ-ऋगेका, याज्ञियं विशते (for वृश्चते) ऋगेका वृणु (पृच्छ) ते यज्ञं .

(०२) (आवपतां; आतपतां (for आपततां) (२)निवपतां; निपतितां; आपततां (३)किं स्वित्प्रतिष्ठतां श्रेष्ठं (४)प्रसवतां (for प्रवदतां) .

(०३) (आवपतां (for आपततां) (२) निवपतां (for नि पततां) (३)गावः प्रतिष्ठतां श्रेष्ठाः (४)प्रसवतां; प्रवसतां (for प्रवदतां) .

(०४) (२)लोकविश्रुतः (३)सम्पन्नः; सर्वतः; निन्दकः (for संमतः) .

देवतातिथिभृत्यानां पितणामात्मनश्च यः ।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति ।। ४५ ।।[०१]

**यक्षः**

किंस्विद्गुरुतरं भूमेः किंस्विदुच्चतरं च खात्।
किंस्विच्छीघ्रतरं वायोः किंस्विद्बहुतरं नृणाम्(तृणात) ।। ४६ ।।[०२]

**युधिष्ठिरः**

माता गुरुतरा भूमेः खात्पितोच्चतरस्तथा।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी नृणाम्(तृणात) ।। ४७ ।।[०३]

**यक्षः**

किंस्वित्सुप्तं न निमिषति किंस्विज्जातं न चोपति।
कस्यस्विद्धृदयं नास्ति किंस्विद्वेगेन वर्धते ।। ४८ ।।[०४]

लक्षालङ्कारः - किंस्विज्जातं न चोपति इत्यत्र उपति उकारवाच्यात् पिपासादि- क्लेशात् पाति स्तन्यपानादिना आत्मानं रक्षतीति; उपो मानुषशिशुः, तद्वदाचरति उपति।

**युधिष्ठिरः**

मत्स्यः सुप्तो न निमिषत्यण्डं जातं न चोपति।

---

(०१) (४)स न; स च (for न स) .

(०२) (गुरुतरा; तरी (२)उच्चतरशू; उच्चरितां बलं; नभात् (३)वातात्(for वायोः)
(४)शीघ्रतरा; बहुतरी तृणात् (for नृणाम),

(०३) गुरुतरी (२)ह्युच्चतरशू; उच्चतरं; उच्चरितशू (for उच्चतरशू) ततः (for च खात्) खस्पितोच्चतरश्तथा रः स्मृतः स्ततः) (३) जलं (for मनः) वातात् (for वायोः) (४) घृणा (for चिन्ता) बहुतरा; बहुतरं तृणात् (for नृणाम् ) .

(०४) (सुप्तो मिषति; निमिषेत् (for निमिषति ) (२) न चेङ्गति (ते); च नेङ्गते (३)कस्यचिद्; कस्य वा (४)का च (for किं स्विद् ) .

अश्मनो हृदयं नास्ति नदी वेगेन वर्धते ।। ४९ ।।[०१]

**यक्षः**

किंस्वित्प्रवसतो मित्रं किंस्विन्मित्रं गृहे सतः ।
आतुरस्य च किं मित्रं किंस्विन्मित्रं मरिष्यतः ।। ५० ।।[०२]

**युधिष्ठिरः**

विद्या(सार्थः) प्रवसतो मित्रं भार्या मित्रं गृहे सतः ।
आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः ।। ५१ ।।

**यक्षः**

कोऽतिथिः सर्वभूतानां किं स्विद्धर्मं सनातनम्।
अमृतं किं स्विद्राजेन्द्र किं स्वित्सर्वमिदं जगत्।

**युधिष्ठिरः**

अतिथिः सर्वभूतानामग्निः सोमो गवामृतम्।
सनातनोऽमृतो धर्मो वायुः सर्वमिदं जगत्।[०३]

**यक्षः**

किंस्विदेको विचरते जातः को जायते पुनः ।
किंस्विद्धिमस्य भैषज्यं किंस्विदावपनं महत् ।। ५२ ।।[०४]

लक्षालङ्कारः - किंस्विदावपनं महत् इत्यत्र आवपनं बीजावापस्थानम् ।

---

(०१) सुप्तो न मत्स्यो (for मत्स्यः सुप्तो न) निमिषति अण्डं डजातं; निमिषत्यबुं जातं; निमिषेदण्डं (ड) जातं; मिषति अण्डजातं न चेङ्गति; च नेङ्गते; नचेङ्गते .

(०२) (किं स्विन्मित्रं प्रवसतः (३)मित्रं किं .

(०३) अमृतं किं गवां चैव सर्वभूतातिथिर्वह्निर्धर्मः सत्यं सनातनः सोमेमृतं गवां चैव .

(०४) (कश्चिद्; कः स्विद् विचरते (३) हिमस्य भेषजं किं स्वित् (४)वचनं (for वपनं ) किं स्विदायतनं जगत् .

**युधिष्ठिरः**

सूर्य एको विचरते चन्द्रमा जायते पुनः ।
**अग्निर्हिमस्य भैषज्यं भूमिरावपनं महत् ।। ५३ ।।**(०१)

**यक्षः**

किंस्विदेकपदं धर्म्यं किंस्विदेकपदं यशः ।
**किंस्विदेकपदं स्वर्ग्यं किंस्विदेकपदं सुखम् ।। ५४ ।।**(०२)

लक्षालङ्कारः - किंस्विदेकपदम् इत्यत्र पद्यते कीर्त्यत इति एकपदं मुख्यम् ।

**युधिष्ठरः**

दाक्ष्यमेकपदं धर्म्यं दानमेकपदं यशः ।
**सत्यमेकपदं स्वर्ग्यं शीलमेकपदं सुखम् ।। ५५ ।।**(०३)

लक्षालङ्कारः - दाक्ष्यं दाक्षिण्यं दयेत्यर्थः ।।

**यक्षः**

किंस्विदात्मा मनुष्यस्य किंस्विद्दैवकृतः सखा।
**उपजीवनं किंस्विदस्य किंस्विदस्य परायणम् ।। ५६ ।।**(०४)

**युधिष्ठिरः**

पुत्र आत्मा मनुष्यस्य भार्या दैवकृतः सखा।

---

(०१) (विचरते सूर्य एकाकी चरति (३)भिषजं; भेषजं (४)वचनं (for वपनं) .

(०२) (पदे धर्मं; मित्रं; धन्यं (२)पदे (३)पदे धर्म्यं; स्वर्गं (४)पदे .

(०३) (दान्तम्; धार्ष्ट्यम् (for दाक्ष्यम्) एकपदे धर्मं; मित्रं; धन्यं (२)एकपदे (३)एकपदे; चैकपदं स्वर्गं (४) एकपदे .

(०४) (कश्चिद् मनुष्याणां (२)कश्चिद् देवकृतः (३)च वै किं स्वित्; किंश्चित्स्यात्; च किं च स्वित् (for किं स्विदस्य) अस्योपजीवनं किं स्वित् (४)स्वीह्दास्ये .

उपजीवनं च पर्जन्यो दानमस्य परायणम् ।। ५७ ।।(०१)

**यक्षः**

धन्यानामुत्तमं किंस्विद्धनानां स्यात्किमुत्तमम्।
लाभानामुत्तमं किं स्यात्सुखानां स्यात्किमुत्तमम् ।। ५८ ।।(०२)

**युधिष्ठिरः**

धन्यानामुत्तमं दाक्ष्यं धनानामुत्तमं श्रुतम्।
लाभानां श्रेय आरोग्यं सुखानां तुष्टिरुत्तमा ।। ५९ ।।(०३)

लक्षालङ्कारः - सुखानां तुष्टिरुत्तमा इत्यत्र तुष्टिः अलम्बुद्धिः ।

**यक्षः**

किंस्विद्धर्मपरं लोके कश्च धर्मः सदाफलः ।
किं नयम्य न शोचन्ति कैश्च सन्धिर्न जीर्यते ।। ६० ।।(०४)

लक्षालङ्कारः - कश्च धर्मः सदाफल इत्यत्र सदा फलं यस्य सः सदाफलः, कीर्तनादिना फलच्छेदरहित इत्यर्थः । त्रेताधर्मः त्रेतायुगे क्रियमाणो धर्मः सदाफलः । तस्मिन्युगे वर्तमानानां पुण्यश्लोकानां चक्रवर्तिनां श्लाघारहितत्वेन कृतधर्मक्षये कारणाभावादिति भावः । कृतयुगे धर्म-फलस्य निर्णीतत्वेन सन्देहमूलप्रश्नायोगात्, द्वापरकलियुगयोः संशय- विपरीतज्ञानाभ्यां प्रायशः धर्मवैफल्यस्य निश्चितत्वेन सन्देहमूल- प्रश्नायोगाच्च त्रेतायुगधर्मस्यायं प्रश्न इति धर्मराजस्य हृदयम् ।

**युधिष्ठिरः**

---

(०१) (मनुष्याणां (२)देवकृतः (३)उपजीव्यसू (for उपजीवनं) तु (for च) (४) दास्ये (for अस्य); .
(०२) (धान्यानाम् (for धन्यानाम्) किं स्याद्; किश्चिद् (for किं स्विद् ) (२)स्यात्किम् (for किं स्विद् ) (३) किं स्यात् (for किं स्वित्) (४) तथोत्तरम् सुखानां किं स्वि (श्चि)दुत्तमं; सुखानां स्यात्किमुत्तमं .
(०३) (धान्यानाम् (for धन्या ) (३) श्रेय (ष्ट्) आरोग्यं (४)शुभानां तुष्टिरुत्तमं .
(०४) (किं स्विद्धर्मात् (for कश्च धर्मः) परं परो (२)कश्चिद् (for कश्च) (३) किं नु भित्वा; किं नु यन्त्वा; निनियम्य (for किं नियम्य ) (४)केन; कस्य; क्व च; कश्च .

आनृशंस्यं परो धर्मस्त्रयीधर्मः सदाफलः ।
**मनो यम्य न शोचन्ति सन्धिः सद्भिर्न जीर्यते ।। ६१ ।।**(०५)

### यक्षः

किं नु हित्वा प्रियो भवति किं नु हित्वा न शोचति।
**किं नु हित्वार्थवान्भवति किं नु हित्वा सुखी भवेत् ।। ६२ ।।**(०६)

### युधिष्ठिरः

मानं हित्वा प्रियो भवति क्रोधं हित्वा न शोचति।
**कामं हित्वार्थवान्भवति लोभं हित्वा सुखी भवेत् ।। ६३ ।।** (०७)

### यक्षः

किमर्थं ब्राह्मणे दानं किमर्थं नटनर्तके।
**किमर्थं चैव भृत्येषु किमर्थं चैव राजसु ।। ६४ ।।**

### युधिष्ठिरः

धर्मार्थं ब्राह्मणे दानं यशोऽर्थं नटनर्तके।
**भृत्येषु भरणार्थं वै भयार्थं चैव राजसु ।। ६५ ।।**

### यक्षः

केन स्विदावृतो लोकः केन स्विन्न प्रकाशते।
**केन त्यजति मित्राणि केन स्वर्गं न गच्छति ।। ६६ ।।**

### युधिष्ठिरः

---

(०५) (परं धर्मात् (for परो धर्मम्); (२)त्रेताधर्मः; त्राता धर्मः (३)यन्त्वा; नियम्य यस्य (for यम्य ) (४)सद्भिः सन्धिः हीयते (for जीर्यते) .

(०६) (हत्वा प्रियो भवति किं हित्वा (२)हत्वा (३)हत्वा (आ)त्म (अ)र्य) (४) हत्वा .

(०७) (हत्वा (२)लोभं (for क्रोधं) हत्वा (३)हत्वा (आ)त्म ((अ)र्थ) (४)क्रोधं; कोपं (for लोभं ) हत्वा .

अज्ञानेनावृतो लोकस्तमसा न प्रकाशते।
लोभात्यजति मित्राणि सङ्गात्स्वर्गं न गच्छति ।। ८७ ।।(०१)

**यक्षः**

मृतः कथं स्यात्पुरुषः कथं राष्ट्रं मृतं भवेत्।
श्राद्धं मृतं कथं वा स्यात्कथं यज्ञो मृतो भवेत् ।। ६८ ।।(०२)

**युधिष्ठिरः**

मृतो दरिद्रः पुरुषो मृतं राष्ट्रमराजकम्।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ।। ६९ ।।(०३)

**यक्षः**

का दिक्किमुदकं प्रोक्तं किमन्नं किं च वै विषम्।
श्राद्धस्य कालमाख्याहि ततः पिब हरस्व च ।। ७० ।।(०४)

**युधिष्ठिरः**

सन्तो दिग्जलमाकाशं गौरन्नं प्रार्थना विषम्।
श्राद्धस्य ब्राह्मणः कालः कथं वा यक्ष मन्यसे ।। ७१ ।।(०५)

**यक्षः**

तपः किंलक्षणं प्रोक्तं को दमश्च प्रकीर्तितः ।
क्षमा च का परा प्रोक्ता का च ह्रीः परिकीर्तिता।

---

(०१)कर्मार्थ चैव भृत्येपु; सङ्गामर्थ च भृत्येपु प्रियार्थ (for भयर्थ) .

(०२) (कथं मृतः (३)कथं मृतं वा; हि (for च) .

(०३) (३)अश्रोत्रिये (for यं) .

(०४) (पार्थ (for प्रोक्तं) किमुदकं नृप प्रोक्तं (२)अर्थ; मतं'; रत्नं (for अन्नं) किं च वै (for पार्थ किं) पिबस्व च (for ततः पिब) .

(०५) (सन्तो द्युदर्कमाख्यातं; (२) गौरवं; गौ रत्नं (for गौरन्नं) पार्थिवा; ब्राह्मणो (for प्रार्थना) (४) किं वा त्वं (for कथंवा) .

युधिष्ठिरः

तपः स्वधर्मवर्तित्वं मनसो दमनं दमः ।

क्षमा द्वन्द्वसहिष्णुत्वं ह्रीरकार्यनिवर्तनम्।

यक्षः

किं ज्ञानं प्रोच्यते राजन्कः शमश्च प्रकीर्तितः ।

दया च का परा प्रोक्ता किं चार्जवमुदाहृतम्।

युधिष्ठिरः

ज्ञानं तत्त्वार्थसम्बोधः शमश्चित्तप्रशान्तता।

दया सर्वसुखैषित्वमार्जवं समचित्तता।

यक्षः

कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः ।

कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः ।

युधिष्ठिरः

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः ।

सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ।

यक्षः

को मोहः प्रोच्यते राजन्कश्च मानः प्रकीर्तितः ।

किमालस्यं च विज्ञेयं कश्च शोकः प्रकीर्तितः ।

युधिष्ठिरः

मोहो हि धर्ममूढत्वं मानस्त्वात्माभिमानिता।

धर्मनिष्क्रियताऽऽलस्यं शोकस्त्वज्ञानमुच्यते।

यक्षः

किं स्थैर्यमृषिभिः प्रोक्तं किं च धैर्यमुदाहृतम्।
स्नानं च किं परं प्रोक्तं दानं च किमिहोच्यते।

युधिष्ठिरः

स्वधर्मे स्थिरता स्थैर्यं धैर्यमिन्द्रियनिग्रहः ।
स्नानं मनोमलत्यागो दानं वै भूतरक्षणम्।

यक्षः

कः पण्डितः पुमाञ्ज्ञेयो नास्तिकः कश्च उच्यते।
को मूर्खः कश्च कामः स्यात्को मत्सर इति स्मृतः ।

युधिष्ठिरः

धर्मज्ञः पण्डितो ज्ञेयो नास्तिको मूर्ख उच्यते।
कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः ।

यक्षः

कोऽहङ्कार इति प्रोक्तः कश्च दम्भः प्रकीर्तितः ।
किं तद्दैवं परं प्रोक्तं किं तत्पैशुन्यमुच्यते।

युधिष्ठिरः

महाज्ञानमहङ्कारो दम्भो धर्मो ध्वजोच्छ्रयः ।
दैवं दानफलं प्रोक्तं पैशुन्यं परदूषणम्।

यक्षः

धर्मश्चार्थश्च कामश्च परस्परविरोधिनः ।
एषां नित्यविरुद्धानां कथमेकत्र सङ्गमः ।

युधिष्ठिरः

यदा धर्मश्च भार्या च परस्परवशानुगौ।

तदा धर्मार्थकामानां त्रयाणामपि सङ्गमः ।

यक्षः

अक्षयो नरकः केन प्राप्यते भरतर्षभ।

एतन्मे पृच्छतः प्रश्नं तच्छीघ्रं वक्तुमर्हसि।

युधिष्ठिरः

ब्राह्मणं स्वयमाहूय याचमानमकिञ्चिनम्।

पश्चान्नास्तीति यो ब्रूयात्सोऽक्षयं नरकं व्रजेत्।

वेदेषु धर्मशास्त्रेषु मिथ्या यो वै द्विजातिषु।

देवेषु पितृधर्मेषु सोऽक्षयं नरकं व्रजेत्।

विद्यमाने धने लोभाद्दानभोगविवर्जितः ।

पश्चान्नास्तीति यो ब्रूयात्सोऽक्षयं नरकं व्रजेत्।

यक्षः

राजन्कुलेन वृत्तेन स्वाध्यायेन श्रुतेन वा।

ब्राह्मण्यं केन भवति प्रब्रूह्येतत्सुनिश्चितम्।

युधिष्ठिरः

शृणु यक्ष कुलं तात न स्वाध्यायो न च श्रुतम्।

कारणं हि द्विजत्वे च वृत्तमेव न संशयः ।

वृत्तं यत्नेन संरक्ष्यं ब्राह्मणेन विशेषतः ।

अक्षीणवृत्तो न क्षीणो वृत्ततस्तु हतो हतः ।

पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।

सर्वे व्यसनिनो मूर्खा यः क्रियावान्स पण्डितः ।

चतुर्वेदोऽपि दुर्वृत्तः स शूद्रादतिरिच्यते।

योऽग्निहोत्रपरो दान्तः स ब्राह्मण इति स्मृतः ।

यक्षः

प्रियवचनवादी किं लभते विमृशितकार्यकरः किं लभते।

बहुमित्रकरः किं लभते धर्मरतः किं लभते कथय।

युधिष्ठिरः

प्रियवचनवादी प्रियो भवति विमृशितकार्यकरोऽधिकं जयति।

बहुमित्रकरः सुखं वसते यश्च धर्मरतः स गतिं लभते।

यक्षः

को मोदते किमाश्चर्यं कः पन्थाः का च वार्तिका।

ममैतांश्चतुरः प्रश्नान् कथयित्वा जलं पिब

(वद मे चतुरः प्रश्नान्मृता जीवन्तु बान्धवाः ।। )

युधिष्ठिरः

पञ्चमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे।

अनृणी चाप्रवासी च स वारिचर मोदते।

अहन्यहनि भूतानि गच्छन्तीह यमालयम्।

शेषाः स्थावरमिच्छन्ति किमाश्चर्यमतः परम्।

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना नैको ॠषिर्यस्य मतं प्रमाणम्।

धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ।

अस्मिन्महामोहमये कटाहे सूर्याग्निना रात्रिदिवेन्धनेन।

मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्ता ।

यक्षः

तुल्ये प्रियाप्रिये यस्य सुखदुःखे तथैव च ।

**अतीतानागते चोभे स वै सर्वधनी नरः ।। ७४ ।।** [०१]

**लक्षालङ्कारः - अतीतानागते चोभ इत्यत्र अतीतं नष्टम्, अनागतम् अनागमन- मलाभः इत्युभे ।**

समत्वं यस्य सर्वेषु(भूतभव्यभविष्येषु) निःस्पृहः शान्तमानसः ।
**सुप्रसन्नः सदा योगी स वै सर्वधनी नरः(श्वरः) ।। ७५ ।।** [०२]

**यक्षः**

व्याख्यातः पुरुषो राजन्यश्च सर्वधनी नरः ।
**तस्मात्त्वमेकं भ्रातणां यमिच्छसि स जीवतु ।। ७६ ।।** [०३]

**युधिष्ठरः**

श्यामो य रक्ताक्षो बृहच्छाल इवोत्थितः ।
**व्यूढोरस्को महाबाहुर्नकुलो यक्ष जीवतु ।। ७७ ।।** [०४]

**यक्षः**

प्रियस्ते भीमसेनोऽयमर्जुनो वः परायणम्।
**स कस्मान्नकुलं राजन्सापत्नं जीवमिच्छसि ।। ७८ ।।** [०५]

---

(०१) (तुल्यौ प्रियाप्रियौ (२)सुखं दुःखं (for सुखदुःखे ) (४) क-ख-घ-समत्वं यस्य सर्वेषु स वै पुरुष उच्यते । .

(०२) (३)अतीतेनागते चैव (for चोभे) सुप्रसन्नः सदा योगी) (४) धनेश्वरः (for धनी नरः) सर्वैः सर्वे धनेश्वरः; स वै धर्मधनीश्वरः; सर्वे सर्वधनेश्वरः .

(०३) (आख्यातः (for व्या' ) (२)धनेश्वरः; धनीश्वरः (for धनी नरः) (३) त्वमेकं; तवैके; तवैकं (for तवैको ) .

(०४) (२)बृहत्साल; त्ताल सालस्कन्ध उ त्थितः च्छ्रितः); उ द्धतः (for उद्गतः) .

(०५) (२)ते च (for वः) परायण (३) त्वं (for स) नकुलो (for लं ) (४) साम्प्रतं; सापत्न्यं; सापत्यं जीवयिष्यसि (for मिच्छसि) .

यस्य नागसहस्रेण दशसङ्ख्येन वै बलम्।
तुल्यं तं भीममुत्सृज्य नकुलं जीवमिच्छसि ।। ७९ ।।(०१)

तथैनं मनुजाः प्राहुर्भीमसेनं प्रियं तव ।
अथ केनानुभावेन सापत्नं जीवमिच्छसि ।। ८० ।।(०२)

लक्षालङ्कारः - सापत्नं जीवमिच्छसि इत्यत्र सापत्नं स्वमातृसपत्न्याः पुत्रं जीवं जीवतीति व्युत्पत्त्या जीवन्तम् ।

यस्य बाहुबलं सर्वे पाण्डवाः समुपासते।
अर्जुनं तमपाहाय नकुलं जीवमिच्छसि ।। ८१ ।।(०३)

**युधिष्ठिरः**

आनृशंस्यं परो धर्मः परमार्थाच्च मे मतम्।
आनृशंस्यं चिकीर्षामि नकुलो यक्ष जीवतु ।। ८२ ।।

लक्षालङ्कारः - अनृशंस्यं पर इत्यत्र आनृशंस्यं दया ।

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मं न त्यजामि मा नो धर्मो हतो वधीत् ।। ८३ ।।(०४)

धर्मशीलः सदा राजा इति मां मानवा विदुः ।
स्वधर्मान्न चलिष्यामि नकुलो यक्ष जीवतु ।। ८४ ।।(०५)

---

(०१) (नागसहस्रस्य) (२)शतसङ्ख्येन; दशसङ्ख्यस्य (३)तमुत्ज्ज कथं भीमं (४)कस्मान्नकुलमिच्छसि .
(०२) (तथैव; तथेमं सर्वदा (for मनुजाः) (२) परन्तप (for प्रियं तव ) (३) अ नुमानेन; तु भावेन (for अ नुभावेन) (४) सापल्यं; सापत्यं .
(०३) पासते (for चाशिः ) (३) तमर्जुनं कथं त्यक्त्वा (हित्वा) .
(०४) (परं धर्मात् (for परो धर्मः) (२)परमार्थश्च (र्थ स); मतः; प्रियम् (for मतम्) .
(०५) (सदाचार (for सदा राजा) .

**कुन्ती चैव तु माद्री च द्वे भार्ये तु पितुर्मम।**
**उभे सपुत्रे स्यातां वै इति मे धीयते मतिः ।**(०१)

**यथा कुन्ती तथा माद्री विशेषो नास्ति मे तयोः ।**
**मातृस्वं सममिच्छामि नकुलो यक्ष जीवतु ॥ ८५ ॥**(०२)

**लक्षालङ्कारः - मातृस्वं सममिच्छामि इत्यत्र मातृस्वं मातुः पुत्ररूपद्रव्यम् ।**

**यक्षः**

**तस्य तेऽर्थाच्च कामाच्च आनृशंस्यं परं मतम्।**
**तस्मात्ते भ्रातरः सर्वे जीवन्तु भरतर्षभ ॥ ८६ ॥**(०३)

अस्मिन् पर्वणि २६८ अध्याये ८६श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि आरणेयपर्वणि यक्षप्रश्ने अष्टषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६८ ॥

(आरणेयपर्वणि अध्यायः)

## 03- 04 - 269Adhyaya

# २६९. एकोनसप्तत्यधिकद्विशततमोऽध्यायः

**यक्षेण युधिष्ठिरं प्रति स्वस्वरूपप्रकाशनपूर्वकमरणिहरणादेः शीलशोधनाय स्वकृतत्वकथनेन तदभिमतप्रदानम् ॥ चतुरो बन्धून्जीवयित्वा धर्मात्मना दत्तदर्शनस्य यक्षस्य युधिष्ठिराय वरदानम्**

**वैशम्पायनः**

---

(०१) युधिष्ठिरः च यक्ष (for चैव तु) पाण्डोर्भार्ये उभे अपि माद्र यास्तु नकुलो जीवे त्कुन्त्या जीवामि चाप्यहं) .
(०२) (२)न विशेषोस्ति विशेषं नास्ति नयोः(for तयोः) .
(०३) (यस्मात् (for यस्य) पार्थ (for र्थाच्च) धर्माच्च(for कामा ) .

ततस्ते यक्षवचनादुदतिष्ठन्त पाण्डवाः ।
क्षुत्पिपासे च सर्वेषां क्षणेन व्यपगच्छताम् ।। १ ।। [०१]

**युधिष्ठिरः**

सरस्येकेन पादेन तिष्ठन्तमपराजितम्।
पृच्छामि को भवान्देवो न मे यक्षो मतो भवान् ।। २ ।। [०२]

वसूनां वा भवानेको रुद्राणामथवा भवान्।

अथवा मरुतां श्रेष्ठो वज्री वा त्रिदशेश्वरः ।[०३]
मम हि भ्रातर इमे सहस्रशतयोधिनः ।
तं योधं न प्रपश्यामि येन सर्वे निपातिताः ।। ३ ।। [०४]

सुखं प्रति प्रबुद्धानाम् इन्द्रियाण्युपलक्षये।
स भवान् सुहृदोऽस्माकमथवा नः पिता भवान् ।। ४ ।। [०५]

लक्षालङ्कारः - सुखप्रतिमबुद्धानाम् इत्यत्र सुखस्य प्रतिमा उपमा यथा भवति तथा सुप्त्वा बुद्धानां प्रबुद्धानां मम भ्रातॄणां इन्द्रियाणि उपलक्षये । सुप्त्युत्थितानामेतेषां प्रसन्नचक्षुरादीन्द्रियदर्शने सुखकार्येव सुप्तिस्त्वया दत्ता, न तु दुःखकरो मोह इति भावः ।

**यक्षः**

अहं ते जनकस्तात धर्मोऽमृदुपराक्रम।

---

(०१) (२) क-मुत्तिष्ठन्तिस्म पाण्डवाः, क्षुत्पिपासाकुलास्सर्वे क्षणे तस्मिन्ययुश्शामम् । उदतिष्ठन्ति (३)क्षुत्पिपासा (४)विगच्छतां; अगच्छतां; अनश्यतां (for व्यगच्छताम्) क्षणेन व्यपगच्छतां; तत्क्षणादेव हन्यते .

(०२) (२)तिष्ठस्त्वाम् (for तिष्ठन्तम्) (४) भवान्मतः .

(०३) (३)एको (for श्रेष्ठो) मरुतां चाथ वा श्रेष्ठो) (४)यदि (for वज्री) त्रिदिवे (for त्रिदशे) .

(०४) वा (for हि ) केन (for इमे) (३) न तं योधं; तं योधं न ; न ते यो धान् (for न तं योगं) (४) येन सर्वे निपातिताः .

(०५) (सुख (for सुखं) प्रतिप्र’; विप्रति (for प्रतिवि) सुसुखं प्रतिबुद्धानामू (३)भवान्यै; भगवान् (for स भवान् ) सुहृदोस्माकम् .

त्वां दिदृक्षुरनुप्राप्तो विद्धि मां भरतर्षभ ।। ५ ।।[०१]

यशः सत्यं दमः शौचमार्जवं ह्रीरचापलम्।
दानं तपो ब्रह्मचर्यमित्येतास्तनवो मम ।। ६ ।।[०२]

अहिंसा समता शान्तिरानृशंस्यममत्सरः ।
द्वाराण्येतानि मे विद्धि प्रियो ह्यसि सदा मम ।। ७ ।।[०३]

दिष्ट्या पञ्चसु रक्तोऽसि दिष्ट्या ते षट् सदा जिता।
द्वे पूर्वे मध्यमे द्वे च द्वे चान्ते..साम्परायिके ।। ८ ।।[०४]

लक्षालङ्कारः - दिष्ट्या पञ्चसु रक्तोऽसि दिष्ट्या ते षट् सदा जिताः । द्वे पूर्वे मध्यमे द्वे च द्वे चान्तेऽसाम्परायके इत्यत्र पञ्चसु पञ्चमहायज्ञेषु वेदपञ्चरात्राख्यपञ्चविद्यासु वा रक्तः अनुरागवान् । द्वे कामक्रोधौ पूर्वे शैशवमारभ्य विद्यमाने; द्वे लोभमोहौ, लोभो धनलोभः मोहः पुत्रमित्र- कलत्रादिषु ममतारूपः 'ईश्वरोऽहमहं भोगी'त्यादिमिथ्याज्ञानरूपो वा; असाम्परायके मोक्षविरोधिनी द्वे मदो मत्सरश्चेति द्वे, अन्ते वार्धके पुत्रपौत्रधनधान्यादिसम्पत्त्या मदोऽपि प्रायः वार्धके भवतीति भावः । एवं षट् त्वया जिता इति पूर्वेणान्वयः ।

धर्मोऽहमिति भद्रं ते जिज्ञासुस्त्वामिहागतः ।
आनृशंस्येन तुष्टोऽस्मि वरं दास्यामि तेऽनघ ।। ९ ।।[०५]

कामक्रोधौ तु प्रथमौ लोभमोहौ तु मध्यमौ ।

---

(०१) धर्मः (श्रीधर्मः) (for यक्षः) (२) धर्मो वीर सनातनः (for तन) धर्मोमितपराक्रम (मः) (३)इह (for अनु) क्षुमधुप्राप्तं (४)तद्विद्धि (for विद्धि मां) भरतर्षभः; पुरुषर्षभ .

(०२) (सत्यं शौचं तपः (for दमः) (२) मार्दव (for आर्जवं) श्रीर् (ह्रीर्) (३) दमो (for तपो) (४) ए ते ए तास् तनया (for तनवो) .

(०३) (अहिंसा संयमः क्षान्तिस् (शान्तिस्) (२) आनृशंस्यम् (for तपः शौचम्) अमत्सरं (३)दारान् (for द्वाराणि ) (४)सि त्वं (for ह्यसि सुतो ( सदा ) .

(०४) (अ रक्तो (for रक्तो') २() ई क्षिता जिता दिष्ट्या तेष्वद्य जीविता; दिष्ट्या तेषां प्रतिष्ठिताः (३)चोभे (for द्वे च) (४) द्वे चान्ये; द्वे चान्त्ये (for द्वे चान्ते) .

(०५) (इति; वत्स (for अस्मि) अहं प्रीतो स्मि भद्रं ते (२)अहं गतः; उपागतः (for इहा ) (३)हं (for ऽस्मि) (४) वरान्(for वरं) षट्पदी) .

अन्ते भय विषादौ च एषा सा षट्पदी रमृता ।

वरं वृणीष्व राजेन्द्र दाता ह्यस्मि तवानघ ।
ये हि मे पुरुषा भक्ता न तेषामस्ति दुर्गतिः ।। १० ।।(०१)

**युधिष्ठिरः**

अरणीसहितं यस्य मृगो ह्यादाय गच्छति।
तस्याग्नयो न लुप्येरन्प्रथमोऽस्तु वरो मम ।। ११ ।।(०२)

**यक्षः**

अरणीसहितं ह्यस्य ब्राह्मणस्य हृतं मया।
मृगवेषेण कौन्तेय जिज्ञासार्थं तव प्रभो ।। १२ ।।(०३)

**वैशम्पायनः**

ददानीत्येव भगवानुत्तरं प्रत्यपद्यत।
अन्यं वरय भद्रं ते वरं त्वममरोपम ।। १३ ।।(०४)

**युधिष्ठिरः**

वर्षाणि द्वादशारण्ये त्रयोदशमुपस्थितम्।
तत्र नो नाभिजानीयुर्वसतो मनुजाः क्वचित् ।। १४ ।।(०५)

**वैशम्पायनः**

ददानीत्येव भगवानुत्तरं प्रत्यपद्यत।

---

(०१) (वरान् (for वरं) (२)दातास्मि तव चानघ; ददामि च तवा; दातास्मि हि तवा (३)मां (for मे ) सक्ता (for भक्ता ) (४) अपि(for अस्ति ) .

(०२) (तु हृता (for सहितं ) (२) मृगो ह्यादाय गच्छति; तां वृणे वदतां वर; मृगेण तपः दद तां वर .

(०३) ( क-अरणीयमियं तस्य; ख-इदमर्धद्वयं नास्ति, यक्षः धर्मः (ह्यस्य (for तस्य ) आरणेयमिदं तस्य (३) मृगवेशेन; ’रूपेण (४)अ नघ (for प्रभो ) .

(०४) (ददामी (for ददानी’) (२) प्रत्यभाषत (४)देयं (for वरं) ’त्तम (for पम) .

(०५) (३)तच्च (for तत्र) ते (नो) न विं नो नाभि (४)सर्वतो (for वसतो) .

भूयश्चाश्वासयामास कौन्तेयं सत्यविक्रमम् ॥ १५ ॥[०१]

**यक्षः-**

यद्यपि स्वेन रूपेण चरिष्यथ महीमिमाम्।
न वो विज्ञास्यते कश्चित्त्रिषु लोकेषु भारत ॥ १६ ॥[०२]

वर्षं त्रयोदशमिदं मत्प्रसादात्कुरूद्वहाः ।
विराटनगरे गूढा अविज्ञाताश्चरिष्यथ ॥ १७ ॥[०३]

यद्वः सङ्कल्पितं रूपं मनसा यस्य यादृशम्।
तादृशं तादृशं सर्वे छन्दतो धारयिष्यथ ॥ १८ ॥[०४]

अरणीसहितं चेद्ब्राह्मणाय प्रयच्छत।
जिज्ञासार्थं मया ह्येतदाहृतं मृगरूपिणा ॥ १९ ॥[०५]

प्रवृणीष्वापरं सौम्य वरमिष्टं ददानि ते।
न तृप्यामि नरश्रेष्ठ प्रयच्छन्वै वरांस्तथा।

तृतीयं गृह्यतां पुत्र वरमप्रतिमं महत्।
त्वं हि मत्प्रभवो राजन्विदुरश्च ममांशजः ॥ २० ॥[०६]

**युधिष्ठरः**

देवदेवो मया दृष्टो भवान्साक्षात्सनातनः ।

---

(०१) (ददामी (२)प्रत्यभाषत भूयश्चापि हि कौतेयमवदत्सत्य .

(०२) धर्मः (२) चरिष्यसि(for थ) (३) च(for वो) (४) मानवः (for भारत) .

(०३) (चेमं इदं मं; चैव; चतन् (for चेदं) (२) त्कुरूद्वह (३) रूढा (for गूढा) (४)अज्ञाता विचरि .

(०४) (यद्वा (for यद्वः) (२) यस्य वै; यस्य यत् (for यादृशम्) (३) भ्रातृणां तादृशं) रूपं (for सर्वे) (४) छद्मतो; छन्नं वै; तत्तथा; छन्नं वो .

(०५) (भाडं (for चेदं) (२) ब्राह्मणस्य प्रयच्छति; तु; थ (for ’त) तात गृहीतं (for ह्येतदाहृतं) .

(०६) (उच्यतां (for गृह्यतां) तृती त्वदी यं च गृहाण त्वं (२)वरं मत्प्रभवं; परमं प्रीतिदं भुवि (for महबं) (३) मत्सम्भवो (for मत्प्र) (४) ममा शजः; कः (for ’भाक्) .

यं ददासि वरं तुष्टस्तं ग्रहीष्याम्यहं पितः ।। २१ ।।(०१)

जयेयं लोभमोहौ च क्रोधं चाहं सदा विभो।
दाने तपसि सत्ये च मनो मे सततं भवेत् ।। २२ ।।(०२)

**धर्मः**

उपपन्नो गुणैरेतैः स्वभावेनासि पाण्डव ।
भवान्धर्मः पुनश्चैव यथोक्तं ते भविष्यति ।। २३ ।।(०३)

**वैशम्पायनः**

इत्युक्त्वान्तर्दधे धर्मो भगवाँल्लोकभावनः ।
समेताः पाण्डवाश्चैव सुखसुप्ता मनस्विनः ।। २४ ।।(०४)

उपेत्य चाश्रमं वीराः सर्व एव गतक्लमाः ।
आरणेयं ददुस्तस्मै ब्राह्मणाय तपस्विने ।। २५ ।।(०५)

इदं समुत्थानसमागतं महत्पितुश्च पुत्रस्य च कीर्तिवर्धनम्।
पठन्नरः स्याद्विजितेन्द्रियो वशी सपुत्रपौत्रः शतवर्षभाग्भवेत् ।। २६ ।।(०६)

न चाप्यधर्मे न सुहृद्विभेदने परस्वहारे परदारमर्शने।

---

(०१) (दैवरूपो; देवदेव (२)साक्षी (for साक्षात्) (३) यद् (for यं) मह्यं'; हृष्टम् (for तुष्टस्) यं यं वरं ददौ हृष्टस्) (४)तद् (for तं) गृहीष्यामि ततः; पितुः (for पितः) .
(०२) (त्यजे (for जये) (२)कामं क्रोधं; क्रोधं चैव; क्रोधं पापं (for क्रोधं चाहं) (२) धर्मे (for दाने) .
(०३) (एतैः (for सर्वैः) (२) (ए) व (for अ सि) (३)धर्मे धर्मी धर्मं (for धर्मः) धर्मपरश्(for धर्मः पुनश्) चैतद्; चैको (for चैव) (४) तद् (for ते) .
(०४) (अं तर्हितो (for र्दधे) (४) सुखमाप्ता युक्ताः; सुखं प्राप्ता); मुदमाप्ता; सुखसुप्त्वा (for सुप्ता) .
(०५) (उपेत्य (for अभ्येत्य) (२)गतज्वराः सर्वे ह्यमिततेजसः (३)अरणिं प्रददौ तस्मै (४)मनस्विने; महात्मने (for तप) .
(०६) (इत्थं; इमं(for इदं) गतं (for गमं) (२)पुण्यः धर्म कीर्तनं (for कीर्ति ) (३) पठेन् (for पठन्) (४) भुक् (for भाग्) तथा (for भवेत् ) .

कदर्यभावे न रमेन्मनः सदा नृणां सदाख्यानमिदं विजानताम् ।। २७।। (०१)

अस्मिन् पर्वणि २६९अध्याये २७३श्लोकाः सन्ति

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां वनपर्वणि आरणेयपर्वणि नकुलादिजीवनादिवरप्राप्तौ एकोनसप्तत्यधिकद्विशततमोऽध्यायः ।। २६९ ।।

# विराटपर्व (???? आरणेयपर्व)

**अज्ञातवासायानुमतिं गृह्णानस्य शोकाकुलस्य युधिष्ठिरस्य धौम्यकृतं प्रबोधनम् भीमसेनस्योत्साहप्रदानमाश्रमाद्दूरं गतानां पाण्डवानां मिथो मन्त्रयितुमुपवेशनम्**

**वैशम्पायनः**

धर्मेण तेऽभ्यनुज्ञाताः पाण्डवाः सत्यविक्रमाः ।

अज्ञातवासं वत्स्यन्तश्छन्ना वर्षं त्रयोदशम्।
उपोपविष्टा विद्वांसः सहिताः संशितव्रताः ।। १ ।। (०२)

तानब्रुवन्महात्मानः स्थिताः प्राञ्जलयस्तदा।
अभ्यनुज्ञापयिष्यन्तस्तं निवासं धृतव्रताः ।। २ ।। (०३)

विदितं भवतां सर्वं धार्तराष्ट्रैर्यथा वयम्।
छद्मना हृतराज्याश्चानयाश्च बहुशः कृताः ।। ३ ।। (०४)

उषिताश्च वने कृच्छ्रे वयं द्वादश वत्सरान्।

---

(०१) (अ धर्मश्च (for अ धर्मे न) रोधने योजने (for भेदने) (२) धर्षणे; मर्षणे दर्शने ;(for मर्शने) (३) कन्दर्प अकार्य (for कदर्य) च (for न ) भवेन् (for रमेन् ) (४) इहा (for सदा ) नृणां महाख्यानमिहोपजीवतां (जीवितां; 'जीवितं जवितं; जीवनं); नृणां महाख्यानपदोपजीवनात्; नृणां महाख्यानमिदं हि शृण्वतां; नृणां वराख्यानवरं च शृण्वतां; नृणां सदाख्यानरवं च शृण्वतां .

(०२) (त्वनु (for ऽभ्यनु) (२) सत्यवादिनः (३)वत्स्यन्त; उत्स्यन्त(for वस्त्वन्त') (३) विष्टा (for विश्य) विश्वस्ताः (for विद्वांसः) शंसितं (for संशित' ) ये तद्भक्ता वसन्ति स्म वनवासे तपस्विनः .

(०३) (२)वासास; वासं (for वासे) द्विजातयः; मनस्विनः (for तपं) (४) शिष्याः; स्थिताः (for श्लिष्टाः) यथा (for तदा) स्व (for तं) .

(०४) (४)अ नया' निःस्वा स सु (for च) .

**अज्ञातवाससमयं शेषं वर्षं त्रयोदशम्।**
**तद्वसामो वयं छन्नास्तदनुज्ञातुमर्हथ ।। ४ ।।** (०१)

सुयोधनश्च दुष्टात्मा कर्णश्च सहसौबलः

**जानन्तो विषमं कुर्युरस्मास्वत्यन्तवैरिणः ।**
**युक्तचाराश्च युक्ताश्च पौरस्य स्वजनस्य च ।। ५ ।।** (०२)

**अपि नस्तद्भवेद्भूयो यद्वयं ब्राह्मणैः सह ।**
**समस्ताः स्वेषु राष्ट्रेषु स्वराज्यस्था भवेमहि ।। ६ ।।** (०३)

**वैशम्पायनः**

**इत्युक्त्वा दुःखशोकार्तः शुचिर्धर्मसुतस्तदा।**
**सम्मूर्छितोऽभवद्राजा साश्रुकण्ठो युधिष्ठिरः ।। ७ ।।** (०४)

**तमथाश्वासयन्सर्वे ब्राह्मणा भ्रातृभिः सह ।**
**अथ धौम्योऽब्रवीद्वाक्यं महार्थं नृपतिं तदा ।। ८ ।।** (०५)

**राजन्विद्वान्भवान्दान्तः सत्यसन्धो जितेन्द्रियः ।**
**नैवंविधाः प्रमुह्यन्ते नराः कस्याञ्चिदापदि ।। ९ ।।** (०६)

**देवैरप्यापदः प्राप्ताश्छन्नैश्च बहुशस्तथा।**
**तत्र तत्र सपत्नानां निग्रहार्थं महात्मभिः ।। १० ।।** (०७)

---

(०१) (स्मो (for च) कृच्छ्रे; कृत्स्नं (for कृच्छ्रं ) (२) वयं (for यत्र) (४) वर्ष; वर्षे (for वर्षं) (३) क्व (for तद्) वसामो (for वत्स्यामो) .

(०२) (३)जानन्ते (for नन्तो) (४) अस्मान् (for सु) (अ)त्यक्तं; (अ)त्यर्थं (for (अ)त्यन्त) (३) त्यक्ता; युक्त (for युक्ता) क्षये स्वस्य जनस्य च दुशत्मनां हि कस्तेषां विश्वासं गन्तुमर्ईति .

(०३) (३)समनाः (माः); समन्तात्; समर्थाः (for समस्ताः) (४) वसेमहि।भवामहे(for भवेमहि) .

(०४) वैशं उं (२) (अ)शुचिर्शुचिर् अशुचिरार्तिग्रस्तात्वात् ।शुचिरित्येव पाठः श्चस्वच्छः .

(०५) (समां (for अथां) .

(०६) (विक्रान्तवान् (for विद्वान्भवान्) (२) शुचिर्धर्मसुतःस्यथा (३)प्रमुझ्यन्ते .

(०७) (२)बहुभिसू (for शम्) (४) विग्रहार्थ दुरात्मनां (for महा) .

इन्द्रेण निषधान्प्राप्य गिरिप्रस्थाश्रमे तदा।
छन्नेनोष्य कृतं कर्म द्विषतां च विनिग्रहे ।। ११ ।। (०१)

विष्णुनाश्वशिरः प्राप्य तथादित्यां निवत्स्यता।
गर्भे वधार्थं दैत्यानामज्ञातेनोषितं चिरम् ।। १२ ।। (०२)

प्राप्य वामनरूपेण प्रच्छन्नं ब्रह्मरूपिणा।
बलेर्यथा हृतं राज्यं विक्रमैस्तच्च ते श्रुतम् ।। १३ ।। (०३)

हुताशनेन यच्चापः प्रविश्यच्छन्नमासता।
विबुधानां कृतं कर्म तच्च सर्वं श्रुतं त्वया ।। १४ ।। (०४)

प्रच्छन्नं चापि धर्मज्ञ हरिणारिविनिग्रहे।
वज्रं प्रविश्य शक्रस्य यत्कृतं तच्च ते श्रुतम् ।। १५ ।। (०५)

और्वेण वसता छन्नमूरौ ब्रह्मर्षिणा तदा।
यत्कृतं तात देवेषु कर्म तत्तेऽनघ श्रुतम् ।। १६ ।। (०६)

एवं विवस्वता तात छन्नेनोत्तमतेजसा।
निर्दग्धाः शात्रवाः सर्वे वसता भुवि सर्वशः ।। १७ ।। (०७)

विष्णुना वसता चापि गृहे दशरथस्य वै।

---

(०१) (विषमं (for निषधान्) (२)तथा (for तदा) (३) नास्य (for नोष्य) (४)बलविग्रहे; च विनिग्रहे .

(०२) (२)ततो (for तथा) (अ) दित्या; दिव्या (for (अ) दित्यां) निवत्स्य ताः; निवत्स्य ते (३)गर्भो वधार्थं देवानाम् .

(०३) (१)वानर (for वामन) (२) प्रच्छन्न (for न्नं) (३)अप (for यथा) .

(०४) (१)(यच्चापि (for यच्चापः) (२) छद्मना सता (सतां; तथा) (४) सर्वमेवच (मेतच्च) तेश्रुतं .

(०५) (१)(एव (for चापि) (२) बलिनि (अ)रिविनिग्रहे (for वृत्रनि) (३)मुनिरूपेण वज्रेण .

(०६) (१) पूर्वम् (for छन्नम्) पुरा (for तदा) देवेषु (for लोके) कर्मतस्तेनविश्रुतं; .

(०७) (विपश्चिता (for विव) तेन (for तात) (२) प्रच्छन्नोत्तमं (३)शतशः;शात्रवाः (for शत्रवः) (४) वसता गिरिकन्धरे मन्देहा नाम राक्षसाः .

दशग्रीवो हतश्छन्नं संयुगे भीमकर्मणा ।। १८ ।।(०१)

एवमेव महात्मानः प्रच्छन्नास्तत्र तत्र ह ।
अजयञ्छात्रवान्युद्धे तथा त्वमपि जेष्यसि ।। १९ ।।(०२)

तथा धौम्येन धर्मज्ञो वाक्यैः सम्परितोषितः ।
शास्त्रबुद्ध्या स्वबुद्ध्या च न चचाल युधिष्ठिरः ।। २० ।।(०३)

अथाब्रवीन्महाबाहुर्भीमसेनो महाबलः ।
राजानं बलिनां श्रेष्ठो गिरा सम्परिहर्षयन् ।। २१ ।।(०४)

अवेक्षया महाराज तव गाण्डीवधन्वना।
धर्मानुगतया बुद्ध्या न किञ्चित्साहसं कृतम् ।। २२ ।।(०५)

सहदेवो मया नित्यं नकुलश्च निवारितौ।
शक्तौ विध्वंसने तेषां शत्रूणां भीमविक्रमौ ।। २३ ।।(०६)

न वयं तत्प्रहास्यामो यस्मिन्योक्ष्यति नो भवान्।
भवान्विधत्तां तत्सर्वं क्षिप्रं जेष्यामहे रिपून् ।। २४ ।।(०७)

इत्युक्ते भीमसेनेन ब्राह्मणाः परमाशिषा।

---

(०१) ((अ)त्रापि (for चापि) विष्णुना छद्मरूपेण (२) ह च (for वै) (३) सङ्ख्ये; छन्नः (for छन्नं) (४) सपुत्रः सह बान्धवैः .

(०२) (१)एवं तात; एवमेव; एक एव (२)च (for ह) छन्नास्तत्र च तत्र
(३) चव्यजयञ् युक्तान्; सर्वे; युत्त्या। (for युद्धे ) .

(०३) (१)(एवं (for तथा) (२)स; सु; च (for सं) (३)दृष्ट्या (for बुद्ध्या) ततो बुद्ध्या; पुनर्बुद्ध्वा (द्ध्या); प्रबुद्ध्वा तत् (for स्वबुद्ध्या च) (४) प्रतिपेदे; संस्तभ्यत; सुस्थितोथ (for न चचाल) .

(०४) (यथा; तथा (for अथा) (३)श्रेष्ठं (for श्रेष्ठो) (४) निवासं परिहर्ष; गिरा सम्परितोष; गिरा तं सम्प्रहर्ष .

(०५) (अजेक्षया (for अवे) (२) तथा (for तव) धन्विना .

(०६) (२)निवारितः (for तौ) (३)शक्तो निवारणे (for विध्वंसने) (४)शत्रणां भीमकर्मणौ .

(०७) (वयं न वर्त्म; च प्र; तच्च; धर्मं (for तत्प्र) वयं धर्मं न हास्यामो (२)मोक्ष्यति; मोक्ष्याम (for योक्ष्यति) भवेत् (for भवान्) (३)विधाता (for विधत्तां) (४) योत्स्यामहे रिपून् (for परान्) .

उक्त्वा चापृच्छ्य भरतान्यथास्वान्स्वान्ययुर्गृहान् ।। २५।।(०१)

सर्वे वेदविदो मुख्या यतयो मुनयस्तथा ।
आसेदुस्ते यथान्यायं पुनर्दर्शनकाङ्क्षया ।। २६ ।।(०२)

सह धौम्येन विद्वांसस्तथा पञ्च च पाण्डवाः ।
उत्थाय प्रययुर्वीराः कृष्णामादाय धन्विनः ।। २७ ।।(०३)

क्रोशमात्रमुपागम्य तस्माद्देशान्निमित्ततः ।
श्वोभूते मनुजव्याघ्राश्छन्नवासार्थमुद्यताः ।। २८ ।। (०४)

पृथक्छास्त्रविदः सर्वे सर्वे मन्त्रविशारदाः ।
सन्धिविग्रहकालज्ञा मन्त्राय समुपाविशन् ।। २९ ।। (०५)

इति श्रीमहाभारते शतसाहस्र्यां वैयासिक्यां संहितायां शतसाहस्र्यां संहितायां वैयासिक्यां वनपर्वणि आरणेयपर्वणि (विराटपर्वणि १ अध्यायः) अज्ञातवासमन्त्रणे पञ्चदशाधिकत्रिशत तमोऽध्यायः ।। ।।

---

(०१) वैशं उ (सेनेतु (for सेनेन) इत्येवमुक्ते भीमेन (२) शिषा (for शिषः) (३)उक्त्वा च (for प्रयुज्य ) (आ)मन्त्र्य (for (आ)पृच्छश्च) (४)यथास्वं जग्मुरालयान्; यथास्वं प्रययुर्गृहान् .

(०२) (विप्रा (for मुख्या) (३)आशीर्युक्ता; आसेदुस्ते (for आशीरुक्त्वा); न्याय्यं; ’कामं (for न्याय) (४)’काङ्क्षया .

(०३) (२)तत्र ततस् (for तथा) पञ्च च (for ते पञ्च) (३)सर्वे (for विराः) (४)कृष्णया (द्रौपद्या) सह (for कृष्णामादाय धन्विनं (for भारत) .

(०४) (परिक्रम्य; अपागम्य; उपागम्य; अतिगम्य; उपक्रम्य; अपक्रम्य (for अतिक्रम्य) (२)च भारत (for निमित्ततः ) (३) शोभने (for श्वोभूते) मनुजव्याघ्र; पुरुषव्याघ्राश (४)छद्म (for छन्न) .

(०५) पृथक्चार्थ’; पृथक्सार्थ; तेतत्वार्थ’; पृथक्चास्त्र’; पृथगस्त्रशास्त्रं (for मन्त्र) )सर्वे (for सन्धि .